श्री अनंतनाथ स्वामिने नमः

परमोपास्य आ.श्री विजय नेमि-विज्ञान-कस्तूर सूरिभ्यो नमः

श्री सिद्ध हेम शब्दानुशासनानुसारिणी

# हैमनूतनलघुप्रक्रिया


-: संपादक :-

पू.आ.श्री विजय चंद्रोदयसूरीश्वरजी म.

-: प्रकाशन प्रेरक :-

पू. आ. श्री विजय अशोकचंद्रसूरीश्वरजी म.

-: संकलयिता :-

पंडितवर्य श्री चंद्रशेखर झाजी



-: प्रकाशक :-

शेठ श्री नेमचंद मेलापचंद झवेरी जैन वाडी उपाश्रय ट्रस्ट

गोपीपुरा, सुरत

श्री अनंतनाथजी भगवाननुं देरासर–सुरत
प्रतिष्ठा वि. सं. १९४७–जेठ सुद–६



श्री अनंतनाथस्वामिने नमः ।

परमोपास्य श्री नेमि-विज्ञान-कस्तूरसूरिभ्यो नमः ।

श्री सिद्धहेमशब्दानुशासनानुसारिणी

# हैमनूतनलघुप्रक्रिया

टिप्पणी-परिशिष्टादिविभूषिता

संपादकः

आ. श्री विजय चन्द्रोदयसूरिजी महाराज

प्रकाशनप्रेरकः

आ. श्री विजय अशोकचन्द्रसूरिजी महाराज

सङ्कलयिता

दरभंगामण्डलान्तर्गत-लदौरग्रामनिवासि पलिवार हरिपुर कुलोद्भव-झोपारव्य शोभानन्दि श्री चन्द्रशेखर शर्मा

प्रकाशकः

श्री सुरतना शेठ श्री नेमचंद मेलापचंद झवेरीना,
श्री अनंतनाथजी भगवानना देरासरजी तथा
वाडीना उपाश्रयनुं ट्रस्ट
गोपीपुरा, जूनी अदालत पासे, सुरत.

—: प्राप्तिस्थान :—

१. श्री नेमचंद मेलापचंद झवेरी जैन वाडी उपाश्रय
जूनी अदालत पासे, गोपीपुरा,
सुरत

२. श्री नेमि-विज्ञान-कस्तूरसूरि ज्ञानमंदिर
गोपीपुरा, मेइन रोड,
सुरत

प्रथम आवृति	प्रत: ७५०

वी. सं. २५१४	वि. सं. २०४३	ई. स. १९८७

: मुद्रक :

जीतेन्द्र वी. शाह * जीगी प्रिन्टर्स
३०५, महावीर दर्शन, कस्तूरबा क्रोस रोड नं. ५,
बोरीवली (ईस्ट), बम्बई–४०००६६
फोन: C/o. ३१ ७८ १०

# પ્રકાશકીય

અમારું પરમ સૌભાગ્ય છે કે જે વ્યાકરણ દ્વારા સંસ્કૃતભાષાના રહસ્યનું જ્ઞાન મેળવી શકાય છે. તે કલિકાળ સર્વજ્ઞ શ્રી હેમચંદ્રાચાર્ય વિરચિત '**શ્રી સિદ્ધહેમ શબ્દાનુશાસન**'ને આધારે પંડિતજી શ્રી ચંદ્રશેખરજીઝા એ સંકલિત કરેલ "**હૈમ નૂતન લઘુ પ્રક્રિયા**" ગ્રંથ પ્રકાશિત કરવાનો અવસર અમોને પ્રાપ્ત થયો છે.

સુરત શેઠ શ્રી નેમચંદ મેલાપચંદ ઝવેરી વાડી જૈન ઉપાશ્રયે વિ. સં. ૨૦૪૧ની સાલમાં શાસનસમ્રાટ્ પ. પૂ. આ.શ્રી વિજય નેમિ સૂરીશ્વરજી મ.સા. ના પટ્ટ. પ. પૂ. આ.શ્રી વિજય વિજ્ઞાન સૂરીશ્વરજી મ.સા. ના પટ્ટ. પ. પૂ. આ.શ્રી વિજય કસ્તૂર સૂરીશ્વરજી મ.સા. ના પટ્ટ. પ. પૂ. આ. શ્રી વિજય ચંદ્રોદય સૂરીશ્વરજી મ.સા. ના ગુરુબંધુ પ.પૂ. આ. શ્રી વિજય અશોકચંદ્ર સૂરીશ્વરજી મ.સા. ગણિ શ્રી પુષ્પચંદ્ર વિજયજી મ., ગણિ શ્રી સોમચંદ્ર વિજયજી મ., મુનિ શ્રી કૈલાસચંદ્ર વિ. મ., મુનિ શ્રી પુણ્યચંદ્ર વિ.મ., મુનિશ્રી શ્રમણચંદ્ર વિ.મ., મુનિશ્રી શ્રીચંદ્ર વિ.મ., મુનિશ્રી વિશ્વચંદ્ર વિ.મ., મુનિશ્રી પ્રશમચંદ્ર વિ.મ.. મુનિ શ્રી શશીચંદ્ર વિ.મ. આદિ સહિત પધાર્યા.

તે સમયે સામુદાયિક સિદ્ધિતપની આરાધનાનો

પ્રસંગ ચિરસ્મરણીય બની ગયો. પૂ.આ. શ્રી વિજય અશોકચંદ્ર સૂરિમ., ગણિ શ્રી સોમચંદ્ર વિ. મુનિ વિશ્વચંદ્ર વિ., પૂ. સાધ્વીજી મ. આદિ સહિત ઉ. વર્ષ ૯ થી ઉં ૮૦ વર્ષના ૪૦૦ આરાધકોએ ઉલ્લાસભેર આરાધના કરી. સામુદાયિક ૪૦૦ ઉપરાંત અઠ્ઠાઈઓ, માસક્ષમણાદિક વિવિધ તપશ્ચર્યા પણ ઉત્સાહવર્ધક બની. સિદ્ધિતપના ઉદ્યાપન મહોત્સવ પ્રસંગે 'શ્રી સૂરિસમ્રાટ્ ધર્મરાજા નગર'માં તપસ્વીઓના સામૂહિક જ્ઞાનપૂજન સમયે પૂજ્ય આચાર્ય ભગવંતે સૂચન કર્યું કે આરાધનાની કાયમી સ્મૃતિ રૂપે પરમાત્માની ભક્તિ સાથે જ્ઞાન ભક્તિ થાય તેમ વિચારવું જોઈએ.

(૧) અંજનશલાકા સંબંધી મહોપાધ્યાયજી શ્રી સકલ ચંદ્રજી ગણિ કૃત "પ્રતિષ્ઠા કલ્પ" (૨) સિદ્ધ હેમને આધારે સંકલિત થયેલ 'હૈમ નૂતન લઘુ પ્રક્રિયા' (૩) પૂ. ધર્મરાજા ગુરુદેવે સંગૃહીત કરેલ 'પ્રાકૃત સુભાષિત સંગ્રહ'

આ ત્રણ ગ્રંથો શ્રીસંઘની અનુકૂળતા મુજબ પ્રકાશિત કરવાની પ્રેરણા કરતાં અમોએ તેઓશ્રીની વાત સ્વીકારી લઈ ત્રણે પુસ્તકો શેઠ **શ્રી નેમચંદ મેલાપચંદ ઝવેરી જૈન વાડી ઉપાશ્રય** ટ્રસ્ટના જ્ઞાનખાતામાંથી પ્રકાશિત કરવાનું નક્કી કર્યું. તેની ફૂળ શ્રુતિરૂપે 'પ્રતિષ્ઠા કલ્પ'ની પ્રત પ્રકાશિત થઈ ગઈ. વિધિ વિધાન માટે તો તે પ્રત એટલી ઉપયોગી પૂરવાર થઇ કે તે પ્રતની માંગ જોતાં કદાચ થોડા સમયમાં જ તે પ્રત અપ્રાપ્ય પ્રાયઃ થઇ જશે તેમ

લાગે છે. ત્યાર બાદ આ "**હૈમનૂતનલઘુપ્રક્રિયા**" પ્રકાશિત થઈ રહી છે. આ બંને પુસ્તકના મુદ્રણની તમામ વ્યવસ્થા **જીગી પ્રિન્ટર્સ વાળા શ્રી જીતુભાઇ બી. શાહે** કરી આપી તે બદલ તેમનો હાર્દિક આભાર માનીએ છીએ.

પ્રાંતે આશા રાખીએ છીએ કે સંસ્કૃત વ્યાકરણનું જ્ઞાન મેળવવાની જિજ્ઞાસા રાખનાર પૂ. સાધુ, સાધ્વીજી મ. તેમજ મુમુક્ષુ જીવોને આ પુસ્તક સવિશેષ ઉપયોગમાં આવે જેથી અમારો આ પ્રયાસ સફળતાને પામે.

લિ.

શ્રી સુરતના શેઠ શ્રી નેમચંદ મેલાપચંદ ઝવેરીના
શ્રી અનંતનાથજી ભગવાનના દેરાસરજી તથા
વાડી ઉપાશ્રય ટ્રસ્ટના ટ્રસ્ટીઓ

# પ્રાક્કથન

કલિકાળ સર્વજ્ઞ શ્રી હેમચંદ્ર સૂરિજી મ., કે તેમની સાથે અવિનાભાવે રહેલ શ્રી સિદ્ધહેમશબ્દાનુશાસન વિષયક ઘણું બધું લખાણ પણ અધૂરું જ લાગવાનું, વિરાટ્ લેખિની પણ વામન જ લાગવાની, તો પછી નાનીશી કલમે તે પૂજ્યશ્રીનું જીવન કવન શે આલેખી શકાય ?

તેથી તે વિષે વિશેષ વિચારણા ન કરતાં પ્રસ્તુત "હૈમનૂતનલઘુપ્રક્રિયા" ની ઉપયોગિતા અંગે કંઈક વિચારીશું.

**વ્યાકરણના અભ્યાસની મહત્તા**

यद्यपि बहु नाऽधीषे, तथापि पठ पुत्र ! व्याकरणम् ।
स्वजनः श्वजनो मा भूत् , सकलः शकलः सकृच्छकृत् ॥

સ્થૂલ દૃષ્ટિએ નીરસ લાગતો પણ વ્યાકરણનો વિષય સૂક્ષ્મદૃષ્ટિએ પ્રાચીન મહાપુરુષોની વિચાર શ્રેણી સાથે દૃષ્ટિ મેળવવાનો એક માત્ર ઉપાય છે.

સંસ્કૃત ભાષાના જ્ઞાન સિવાય સંસ્કૃતમય સ્યાદ્વાદ દર્શનાદિ ષડ્દર્શનના અખૂટ ખજાનાની પ્રાપ્તિ અશકય-પ્રાયઃ છે. આધુનિક દુનિયાની કોઇપણ શોધ/સિદ્ધિ એવી ન હશે કે જેના ઊંડા ઊંડા પણ મૂળ સંસ્કૃતમય કોઇ કૃતિમાં ન હોય ? પ્રાચીન-અર્વાચીન દરેક પ્રચલિત ભાષામાં પ્રાયઃ ભાષાકીય પરિવર્તન આવવાં છતાંય સુગ્રથિત હોવાને કારણે આ ભાષામાં કંઇ પણ ફેરફાર થઈ શકયો નથી. એટલે સુધી કે એકાદ અક્ષર પણ આઘો-પાછો

થવાથી અર્થનો અનર્થ તુરત થઈ જાય.

જેમકે स्वजन એટલે આત્મીય અને તેને બદલે श्वजन થાય તો કૂતરાનો પરિવાર, सकल=આખું, સંપૂર્ણ અને शकल=એક ખંડ, ટૂકડો, सकृत्=એક વાર અને शकृत्= છાણ. એટલા માટે જ વ્યાકરણનું જ્ઞાન આવશ્યક છે. તેનાથી બુદ્ધિ નિર્મળ થતાં શુદ્ધ પ્રયોગનું જ્ઞાન, અશુદ્ધનું નિવારણ અને યથેષ્ટ ફળની પ્રાપ્તિ થાય છે. તેથી પાતંજલ મહાભાષ્યમાં કહ્યું છે કે "एकः शब्दः सम्यग् ज्ञातः, सुष्ठु प्रयुक्तः, शास्त्रान्वितः, स्वर्गे लोके च कामधुग् भवति ॥"

### સિદ્ધ હેમનું વૈશિષ્ટ્ય

व्याकरणात्पदसिद्धिः, पदसिद्धेरर्थनिर्णयो भवति ।
अर्थात्तत्त्वज्ञानम्, तत्त्वज्ञानात्परं श्रेयः ॥ इति ॥

વ્યાકરણથી પદની સિદ્ધિ થાય છે. પદ સિદ્ધિથી અર્થનો નિર્ણય થાય છે. અર્થની જાણકારીથી તત્ત્વજ્ઞાન થાય છે. અને તત્ત્વ જ્ઞાનથી આત્મશ્રેયઃ થાય છે તે દૃષ્ટિએ શુદ્ધ પ્રયોગની સાધનિકા કેવી રીતે કરવી ? તે માટે જુદા જુદા વ્યાકરણો પોતપોતાની રીતે ઉદ્ભવ્યાં. તે અનેક વિધ વ્યાકરણોમાં પણ પ્રાચીનતાની દૃષ્ટિએ મહર્ષિ પાણિનિ કૃત વ્યાકરણ તેમજ ત્યારબાદ અર્વાચીનતાની દૃષ્ટિએ "સિદ્ધ હેમ" વિશેષ ખ્યાતિને પામ્યું. સમયની સાથોસાથ વાર્તિક અને ભાષ્યના આલેખનથી પાણિનિ વ્યાકરણે જે વિશેષતા પ્રાપ્ત કરી તે સર્વનું સૂક્ષ્માવલોકન તેમજ ગ્રન્થ સર્જન

નિરીક્ષણ પ્રતિભા દ્વારા અભ્યાસુની સરળતાદિકનો ગહન વિચાર કરી એક એક શબ્દ સાર્થક બને અને સરળતાથી સમજાય તે રીતે કલિકાળ સર્વજ્ઞ પૂ. આ. શ્રી. હેમચંદ્રસૂરિજી મહારાજે આઠ અધ્યાયયુક્ત જે વ્યાકરણનું નિર્માણ કર્યું તે "સિદ્ધ હેમ શબ્દાનુશાસન."

## પ્રક્રિયા ક્રમ

અષ્ટાધ્યાયી વ્યાકરણની રચના બાદ તેના સૂત્રોના પ્રત્યેક શબ્દોની આવશ્યકતા અને વિશિષ્ટ છણાવટ માટે વૈયાકરણોએ 'ન્યાસ' કે "બૃહન્ન્યાસ" વગેરેની રચના બુદ્ધિશાળી પુરુષોની બુદ્ધિને કસોટીની એરણ પર ચઢાવવા કરી, વ્યાકરણ શાસ્ત્ર રૂપી અગાધ સમુદ્રમાંથી થોડું પણ જ્ઞાન મેળવી શકાય તે દૃષ્ટિએ બૃહદ્વૃત્તિ, લઘુવૃત્તિ વિગેરે સાકાર બની. છતાંય તે અધ્યાય, પાદ કે સૂત્રના પાઠની પદ્ધતિના કાઠીન્યને ખ્યાલમાં રાખી પ્રાથમિક અભ્યાસુઓને સરળ પડે તે રીતે વ્યાકરણાન્તરની પદ્ધતિને અનુલક્ષી લઘુપ્રક્રિયા, બૃહત્પ્રક્રિયા, વિગેરેની રચના પઠન–પાઠનમાં વિશેષ ઉપયોગી સિદ્ધ થઈ.

## નૂતન પ્રક્રિયાની આવશ્યકતા

વર્ત્તમાન સમયમાં પૂ. સાધુ–સાધ્વીજી મ. ના પઠન-પાઠનમાં "લઘુપ્રક્રિયા" ખૂબજ ઉપયોગમાં આવે છે. ઘણા વર્ષો પહેલાં તેના પ્રકાશન થયા બાદ પુનઃ પ્રકાશનની આવશ્યકતા હતી. સાથો સાથ તેનું પઠન–પાઠનોપયોગી પ્રાયોગિક સંશોધન પણ જરૂરી હતું અને તે રીતે સંશો-

ધન કરી ગ્રંથનું નામ તે જ રાખી પ્રકાશન કરવાથી તેના મૂળ કર્તા—મહોપાધ્યાયજી **શ્રી વિનયવિજયજી** મ.ને અન્યાય થાય તેથી તેમાં 'નૂતન' શબ્દનો ઉમેરો કરી તેને જ આગવું સ્વરૂપ આપી વ્યવસ્થિત સંકલન આ નૂતન પ્રક્રિયમાં કરવામાં આવ્યું છે.

## પં. શ્રી ચંદ્રશેખરજી ઝા નો પ્રશસ્ય પ્રયાસ

ગ્રંથ સંકલનનું કાર્ય કંઈ વીચારીએ એટલું સરળ નહોતું. 'સિદ્ધહેમ'ના પઠન પાઠનનો જેમને બહોળો અનુભવ હોય, પ્રસિદ્ધ—અપ્રસિદ્ધ સર્વ સૂત્રો જેમના ખ્યાલમાં હોય અને હૈમ વ્યાકરણની પ્રક્રિયા હસ્તગત હોય તેવા વિદ્વાન્ વૈયાકરણ જ આ કાર્ય કરી શકે. જોગાનુજોગ છેલ્લા કેટલાય વર્ષોથી જૈન સમાજમાં જ્ઞાન પિપાસુઓની જ્ઞાનપિપાસાને તૃપ્ત કરનાર વિદ્વન્મૂર્ધન્ય, પંડિત વર્ય શ્રી ચંદ્રશેખરજી ઝા હૈમ વ્યાકરણનો અભ્યાસ કરાવતાં અવારનવાર જણાવતા કે આ પ્રક્રિયાનું વિદ્યાર્થીને ઉપયોગી નીવડે તે રીતે સંકલન થાય તો ખૂબજ લાભદાયી બને પણ એ કાર્ય તેમના સિવાય કોણ કરી શકે? તેથી **પ. પૂ. આ.શ્રી. વિજય ચંદ્રોદયસૂરિજી મ. ની** સતત પ્રેરણાને લક્ષ્યમાં રાખી પૂર્વોક્ત પંડિતજીએ નાદુરસ્ત તબીયત અને બુઝર્ગવયે પણ એ કાર્ય ઉપાડી લીધું અને જાણે પોતાના પ્રાણ ન પૂર્યા હોય તેમ સાંગોપાંગ પૂર્ણતાને પમાડયું.

## નૂતન પ્રક્રિયાની વિશિષ્ટતા

સંસ્કૃત વ્યાકરણના પ્રાથમિક અભ્યાસીને અનુલક્ષી આ પ્રક્રિયા તૈયાર થઇ છે તેથી વ્યાકરણ વિષયક સર્વ હકીકત સરળતાથી સમજાય તેનો પૂર્ણ ખ્યાલ રાખવામાં

આવ્યો છે. તે દૃષ્ટિએ પ્રકરણોની ગોઠવણી પણ અભ્યાસીના અભ્યાસને અનુકૂળ પડે તેમજ વ્યાકરણ વિષયક સમજ આવતી જાય તે રીતે ક્રમબદ્ધ કરવામાં આવી છે. એ કારણે પૂર્વાર્ધમાં શબ્દ વિષયક, પંચસંધિ, પરિભાષા, ષડ્-લિંગ, સ્ત્રી પ્રત્યય, કારક, સમાસ, તદ્ધિત આદિ; ઉત્તરાર્ધમાં આખ્યાત વિષયક દશગણ, સન્નન્તાદિ પ્રક્રિયા, કૃદંત આદિ તે રીતે પ્રકરણો ન ગોઠવતાં પંચ સંધિ, ષડ્લિંગ પૂર્ણ થયા બાદ આખ્યાતાદિ અને કૃદંત વિગેરે તેમજ છેલ્લે કંઈક વિશેષ ખ્યાલ આવતાં કારક, તદ્ધિત, સ્ત્રી પ્રત્યય, સમાસ અને પરિભાષા વિગેરે પ્રકરણો લેવામાં આવ્યાં છે.

### પ્રકરણ બાહુલ્ય

પ્રકરણો પણ બનતા પ્રત્યત્ને લગભગ બધાં જ બૃહ-ત્પ્રક્રિયામાં છે તે આવરી લીધાં છે. જેથી અભ્યાસીને બધી પ્રક્રિયાનો ખ્યાલ આ પુસ્તકથી આવી જાય અને સવિશેષ જાણકારી મેળવવાજ બૃહદ્વૃત્તિનો અભ્યાસ કરવાનો રહે. તેથી લઘુ પ્રક્રિયામાં ત્યાદ્યન્તમાં ત્યાદ્યર્થ, પરસ્મૈપદ—આત્મ-નેપદ પ્રક્રિયા; સ્યાદ્યન્તમાં પણ સમાસાશ્રય, એકશેષ વિગેરે જે પ્રકરણો નહોતાં તે સર્વ આકર ગ્રંથોને આધારે અહીં લેવામાં આવ્યાં છે.

### કારક-સમાસ પ્રકરણની મૌલિકતા

કારક પ્રકરણમાં પ્રથમા દ્વિતીયાદિ સર્વ કારકના અર્થની સરળ સ્પષ્ટ સમજ આપવામાં આવી છે. જેથી સાતેય વિભક્ત્યર્થનું હાર્દ સમજમાં આવે. અર્થની સ્પષ્ટતા માટે ક્યારેક વિશિષ્ટ કારિકાઓનો પણ ઉલ્લેખ કરવામાં

આવ્યો છે. સૂત્રો પણ કારક સંબંધી વિશેષ લીધાં છે. જેથી ક્યારે કઈ વિભક્તિનો પ્રયોગ કરવો, કારક-ઉપપદ વિભક્તિનો પ્રયોગ વિગેરેનો તુરત ખ્યાલ આવે.

સમાસ પ્રકરણમાં પણ સમાસની પ્રક્રિયા અને પદ્ધતિ સરળતાથી સમજાય તે દૃષ્ટિએ બહુવ્રીહિ, અવ્યયીભાવ, તત્પુરુષ, કર્મધારય, દ્વન્દ્વ આદિ સમાસનાં વિશિષ્ટ સૂત્રો લગભગ પ્રયોગો-વિગ્રહ આદિ સાથે તરત ખ્યાલમાં આવે તે રીતે આવરી લીધાં છે. અને સમાસાન્તની હકીકત પણ સુગમતાથી સમજાવી છે.

### સૂત્ર બાહુલ્ય

વર્તમાનમાં પ્રચલિત પ્રયોગ સંબંધી પ્રાયઃ કોઈપણ સૂત્ર પછી તે સંધિ, આખ્યાત, કારક, તદ્ધિત કે સમાસ સંબંધી કેમ ન હોય? તે સર્વનો સમાવેશ કરી લેવામાં આવ્યો છે. કદાચ તેથી પ્રથમ નજરે ગ્રંથ ગૌરવ થયાની પ્રતીતિ થાય પણ અભ્યાસીને પ્રસિદ્ધ પ્રયોગોનું જ્ઞાન થાય તે નજર સમક્ષ રાખવામાં આવ્યું છે. એજ રીતે જે સૂત્રો પ્રાથમિક અભ્યાસીને સમજવામાં કઠીન પડે તેવાં લાગ્યાં તેવાં સૂત્રોની ઉપેક્ષા પણ કરવામાં આવી છે.

### પ્રયોગ પ્રાચુર્ય

સૂત્રના ઐદંપર્ય-તાત્પર્યનો ખ્યાલ આપવા પ્રયોગો આપવામાં ક્યાંય, કોઈ પણ પ્રકરણમાં સંકીર્ણતા દર્શાવી નથી. બનતા પ્રયત્ને જેટલા જરૂરી લાગ્યા તે સર્વ પ્રયોગો બતાવ્યા છે. આખ્યાત પ્રકરણમાં પણ ધાતુનાં વિશિષ્ટ રૂપો આપવાનાં બાકી રહ્યાં નથી અમે કેટલાક પ્રયોગો

જેવાકે आशीर्षु, माद्भ्याम्, अचुचोरत् વિગેરે જે સિદ્ધહેમ કે બીજા વ્યાકરણુની દૃષ્ટિએ સિદ્ધ થઇ શકે તેવા નહોતા તે સર્વ પ્રયોગોની ઉપેક્ષા કરવામાં આવી છે, તેને સ્થાને आशीःषु, माभ्याम्, अचूचुरत् વિગેરે શુદ્ધ પ્રયોગો લીધા છે.

**ટીપ્પણુની સાર્થકતા**

સૂત્ર કે તેની વૃત્તિમાં લગભગ હકીકતોનો સમાવેશ કરવા છતાંય તે સર્વ હકીકત કદાચ વિદ્યાર્થીને ખ્યાલમાં ન આવે, કયારેક તે સૂત્ર–વૃત્તિ ગહુન પણુ હોય, કેટલાક વિશિષ્ટ પ્રયોગોમાં કયાં વિશેષ સૂત્ર લાગ્યાં તે ખ્યાલમાં ન આવતાં હોય તે સર્વની સરળ સમજણુ સૂત્રની નીચે કરેલ ટિપ્પણુમાં કરવામાં આવી છે અને તેથી જ પ. પૂ. આ.શ્રી. વિજય ચંદ્રોદયસૂરીશ્વરજી મહારાજે સંપાદિત કરેલ તે ટિપ્પણુ સૂત્ર–વૃત્તિના અર્થની સ્પષ્ટતા માટે સાર્થક બનવા સાથે અભ્યાસીને ખૂબ જ ઉપયોગી થાય તેવી છે.

આ રીતે આ નૂતન પ્રક્રિયામાં પ્રાથમિક અભ્યાસીને સુગમતાથી સૂત્ર, અર્થ, પ્રયોગ, પ્રક્રિયાદિક સર્વનું જ્ઞાન વ્યુત્પત્તિની દૃષ્ટિએ થાય તે રીતે શકય પ્રયત્ન કરવામાં આવ્યો છે. અનિટ્કારિકા, અનુબંધ ફલકારિકા આદિ ઉપયોગી શ્લોકોનો સંગ્રહ, સૂત્રોના અકારાદિક્રમની સૂચિ, શુદ્ધિપત્રક વિગેરે આપીને પ્રક્રિયાને સર્વાંગીણુ કરવા પ્રયાસ કર્યો છે. મુનિ શ્રી કુલચંદ્ર વિજયજી મ. આદિ અભ્યાસી સાધુઓને આ પ્રક્રિયાનો અભ્યાસ કરાવવાથી શિક્ષોપયોગી વિશેષ સુધારા–વધારા ખુલાસા પણુ થતા રહ્યા.

સૂત્રોના અકારાદિ ક્રમ તૈયાર કરવા વિગેરે નાના–

મોટા સર્વ કાર્યમાં મુનિશ્રી શ્રીચંદ્ર વિ. મ. તથા મુનિશ્રી કુલચંદ્ર વિ. મ. આદિ સાધુ ભગવંતોએ સારી એવી જહેમત ઉઠાવી. પં. શ્રી કપૂરચંદ આર. વારૈયાએ પ્રેસ-કોપીનું કાર્ય કરી આપ્યું. અને મુદ્રણનું કાર્ય "જીગી પ્રિન્ટર્સ"ના ઉત્સાહી કાર્યકર શ્રી જીતુભાઈ બી. શાહે સહાનુભૂતિ પૂર્વક ઝડપી કરી આપ્યું. શેઠ શ્રી નેમચંદ મેલાપચંદ ઝવેરી જૈનવાડી ઉપાશ્રય ટ્રસ્ટનો પૂર્ણ આર્થિક સહયોગ.

પુસ્તક સંપૂર્ણ તૈયાર થતાં તેના પ્રકાશન માટે વિચારી રહ્યા હતા તેવા સંયોગોમાં સૂરતમાં સામુદાયિક ૪૦૦ સિદ્ધિતપના ઉદ્યાપનના મહોત્સવ પ્રસંગે આ પુસ્તક શેઠ શ્રી નેમચંદ મેલાપચંદ ઝવેરી વાડી જૈન ઉપાશ્રય ટ્રસ્ટ તરફથી પ્રકાશિત કરવા પૂ ગુરુદેવશ્રી પ. પૂ. આ.શ્રી. વિજય અશોકચંદ્ર સૂરીશ્વરજી મહારાજે પ્રેરણા કરતાં ટ્રસ્ટના ટ્રસ્ટીઓએ તે વાત સહર્ષ સ્વીકારી લીધી અને તેના ફળ રૂપે આ ગ્રંથ પ્રકાશિત થઈ રહ્યો છે.

અને છેલ્લે........

સંસ્કૃત વ્યાકરણ અને તેમાંય સિદ્ધિહેમની પ્રક્રિયાનો વિશેષ ખ્યાલ સરળતાથી આવે તે જ આ "હૈમ નૂતન લઘુ પ્રક્રિયા" પ્રકાશિત કરવાનો ઉદ્દેશ છે. અભ્યાસીઓ આ પુસ્તકનો સવિશેષ ઉપયોગ કરી યત્કિંચિત્ પણ કરેલ પ્રયત્નને સાર્થક બનાવે તેજ અભિલાષા સાથે

આ.શ્રી વિ. અશોકચંદ્ર સૂરિ પાદરેણુ
ગણિ સોમચંદ્ર વિજય

# श्रीसिद्धहेमशब्दानुसारिणी हैमनूतनलघुप्रक्रिया-विषयानुक्रमणिका


| क्रमाङ्कः | विषयः | पत्राङ्कः |
|---|---|---|
| १ | संज्ञा प्रकरणम् | १ थी १० |
| २ | स्वरसंधि ,, | १०– १६ |
| ३ | असन्धि ,, | १६– १७ |
| ४ | व्यञ्जनसंधि ,, | १८– २२ |
| ५ | रेफसंधि ,, | २३– २७ |
| ६ | स्वरान्त पुल्लिङ्ग ,, | २७– ४२ |
| ७ | ,, स्त्रीलिङ्ग ,, | ४३– ४६ |
| ८ | ,, नपुंसकलिङ्ग ,, | ४६– ४९ |
| ९ | व्यञ्जनान्त पुंल्लिङ्ग प्रकरणम् | ४९– ६४ |
| १० | ,, स्त्रीलिङ्ग ,, | ६५– ६६ |
| ११ | ,, नपुंसकलिङ्ग ,, | ६७– ६८ |
| १२ | युष्मदस्मच्छब्दप्रक्रिया | ६८– ७३ |
| १३ | अव्यय ,, | ७४– ७६ |
| १४ | आख्यात प्रकरणम् | ७७–२३८ |
| १५ | भ्वादिगण प्रकरणम् | ७७–१३० |
| १७ | अदादिगण ,, | १३०–१५४ |
| १७ | अदाद्यन्तर्गणादि ,, | १५४–१६१ |
| १८ | दिवादि गण प्रकरणम् | १६१–१७० |
| १९ | स्वादि ,, ,, | १७०–१७४ |
| २० | तुदादि ,, ,, | १७४–१८० |
| २१ | रुधादि ,, ,, | १८०–१८३ |
| २२ | तनादि ,, ,, | १८३–१८५ |
| २३ | क्र्यादि ,, ,, | १८५–१८९ |

| | | | |
|---|---|---|---|
| २४ | स्वार्थिकाद्याद्प्रित्ययान्ताः प्रकरणम् | | १८९–१९२ |
| २५ | कण्डवादि | ,, | १९२–१९३ |
| २६ | चुरादि | ,, | १९३–१९४ |
| २७ | णिगन्त | ,, | १९४–२०० |
| २८ | सन्नन्त | ,, | २००–२०८ |
| २९ | यङ्न्त | ,, | २०८–२१५ |
| ३० | यङ्लुबन्त | ,, | २१५–२१७ |
| ३१ | परस्मैपद प्रक्रिया | ,, | २१७–२१९ |
| ३२ | आत्मनेपद प्रक्रिका | — | २१९–२२३ |
| ३३ | त्याद्यर्थ | ,, | २२३–२२६ |
| ३४ | नामधातु | ,, | २२६–२३१ |
| ३५ | भावकर्म | ,, | २३१–२३६ |
| ३६ | कर्मकर्तृ | ,, | २३६–२३८ |
| ३७ | कृदन्तप्रकरणम् | | २३८–३०८ |
| ३८ | कृदन्ते कृत्यप्रक्रिया प्रकरणम् | | २३८–२४६ |
| ३९ | पूर्व कृदन्त | ,, | २४६–३०८ |
| ४० | कारक | ,, | ३०८–३३५ |
| ४१ | तद्धितप्रकरणम् | | ३३५–४५६ |
| ४२ | तद्धितसंज्ञाधिकार प्रकरणम् | | ३३५–३३६ |
| ४३ | अपत्याद्यर्थ | ,, | ३३६–३५२ |
| ४४ | रक्ताद्यर्थ | ,, | ३५२–३५६ |
| ४५ | विकाराद्यर्थ | ,, | ३५६–३६० |
| ४६ | चातुरर्थिक | ,, | ३६०–३६३ |
| ४७ | दैवताद्यर्थ | ,, | ३६३–३६७ |
| ४८ | शैषिक | ,, | ३६७–३८५ |
| ४९ | प्राग्जितीय | ,, | ३८५–३८८ |

| | | | |
|---|---|---|---|
| ५० | इकणधिकार | प्रकरणम् | ३८८–४०० |
| ५१ | याधिकार | ,, | ४००–४०५ |
| ५२ | अर्हदाद्यर्थ | ,, | ४०५–४२४ |
| ५३ | मत्वर्थीय प्रक्रिया | ,, | ४२४–४३१ |
| ५४ | प्रकाराद्यर्थः | ,, | ४३१–४५६ |
| ५५ | स्त्रीप्रत्यय | प्रकरणम् | ४५७–४६८ |
| ५६ | समास | ,, | ४६९–५५० |
| ५७ | नामसमास | प्रकरणम् | ४६९–४७१ |
| ५८ | बहुव्रीहिसमास | ,, | ४७१–४८७ |
| ५९ | अव्ययीभावसमास | ,, | ४८७–४९५ |
| ६० | तत्पुरुषसमास | ,, | ४९५–५०९ |
| ६१ | कर्मधारयसमास | ,, | ५०९–५४० |
| ६२ | द्वन्द्वसमास | ,, | ५४०–५५० |
| ६३ | एकशेष समास | ,, | ५५०–५५३ |
| ६४ | अलुप् ,, | ,, | ५५४–५५७ |
| ६५ | समासाश्रयप्रक्रिया | ,, | ५५८–५६५ |
| ६६ | समासान्त ,, | ,, | ५६५–५६७ |
| ६७ | द्वित्व प्लुत ,, | ,, | ५६८–५७१ |
| ६८ | परिभाषा प्रकरणम् | | ५७१–५७९ |
| ६९ | उपयोगिश्लोकाः | | ५७९–५८३ |
| ७० | अनुबन्धप्रयोजनम् | | ५८४–५८७ |
| ७१ | वृत्तगणफलम् | | ५८७–५८८ |
| ७२ | अनिट्कारिका | | ५८९–५९१ |
| ७३ | सूत्र सूचि | | ५९२–६७९ |
| ७४ | धातुसूचि | | ६८०–६८६ |
| ७५ | शुद्धिपत्रकम् | | ६८७–६९२ |

श्री वीतरागाय परमात्मने नमः ।

# श्री-सिद्धहेमशब्दानुशासनानुसारिणी

# हैमनूतनलघुप्रक्रिया ॥

॥ मङ्गलम् ॥

जीयाद्वीरो जगद्वन्द्यो भव्यकैरवचन्द्रमाः ।
शब्दातीतगुणोऽशेषातिशयश्रीनिषेवितः ॥१॥
हेमचन्द्रं मुनिं नत्वा सिद्धहेमानुसारिणी ।
प्रक्रिया नूतना लघ्वी क्रियते सुखबोधदा ॥२॥

अर्हं ।१।१।१॥ अर्हमित्येतदक्षरं परमेश्वरस्य परमेष्ठिनो वाचकं सिद्धचक्रस्यादिबीजं सकलागमरहस्यं विघ्नविनाशकं सकलकामप्रदं शास्त्राध्ययनाध्यापनावधि प्रणिधेयम् ॥ १ ॥

---

॥ मङ्गलम् ॥

वीरं नौमि जिनाधीशं देवदेवं जगद्गुरुम्
ज्ञानगोचरसर्वार्थं मोक्षमार्गप्रदर्शकम् ॥१॥
नूतना प्रक्रिया लघ्वी श्रीचन्द्रोदयसूरिणा
पठतामुपकाराय टिप्पण्या भूष्यते मया ॥२॥

टि०—१ न क्षरति क्षीयते वेत्यक्षरवदखण्डः शब्दः, वाच्यवाचकयोः कथञ्चिदभेदात्तीर्थङ्करश्च । अत्र श्रीविनयविजयगणिकारिका—

"अर्हमित्यक्षरं ध्येयं, परमेश्वरवाचकम् ।
शास्त्रादौ पठतां क्षेमन्युत्पत्त्यभ्युदयप्रदम् ॥ इति

**सिद्धिः स्याद्वादात्** ।१।१।२॥ स्याद्वादात्[1]=अनेकान्तवादात् प्रकृतानां शब्दानां सिद्धिः=ज्ञप्तिर्निष्पत्तिश्च[2] ज्ञातव्या । वादात्=शुद्धशब्दप्रयोगात्, सिद्धिः=सम्यग्ज्ञानं मोक्षश्च स्यादिति वाऽर्थः ॥ २ ॥

॥ अथ संज्ञाप्रकरणम् ॥

**औदन्ताः[3] स्वराः** ।१।१।४। वर्णमातृकापाठे औकारान्ता वर्णाः स्वरसंज्ञका भवन्ति । ते यथा–अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ इति । अत्र ॥ औदन्ता ॥ इति बहुवचनात् प्लुतानामपि ग्रहणं बोध्यम् । एवमग्रेऽपि ॥ ३ ॥

**एकद्वित्रिमात्रा ह्रस्वदीर्घप्लुताः** ।१।१।५॥ मात्रा उच्चारणकालविशेषः । निमेषमात्र इति बहवः । एकद्वित्र्युच्चारणमात्रा औदन्ता वर्णा यथासंख्यं ह्रस्वदीर्घप्लुतसंज्ञका

---

१–स्यादित्यनेकान्तद्योतकमव्ययम् । स्याद्वादश्च नित्यानित्याद्यनन्तधर्मात्मकवस्तुस्वीकारः ।

२–ज्ञप्तिः सिद्धस्य प्रकाशनम्, निष्पत्तिरसत उत्पत्तिः । नित्यैकान्तवादे शब्दस्योत्पत्तिर्न घटते । अनित्यैकान्तवादे च शब्दस्य पूर्वमसत्त्वाज् ज्ञप्तिर्न घटते इति द्रष्टव्यम् । वि०वि० कारिका–

"शब्दानां ज्ञप्तिनिष्पत्ती स्यातां स्याद्वाददर्शने ।
शब्दे ह्येकान्ततो नित्येऽनित्ये वा तद् द्वयं कुतः ? ॥१॥ इति ।

**३–वि० वि० कारिका**–"औकारान्ता अकाराद्याः स्वरा वर्णाश्चतुर्दश" इति ।

भवन्ति । अ इ उ ऋ ऌ इति ह्रस्वाः । आ ई ऊ ॠ ॡ ए ऐ ओ औ इति दीर्घाः । अ ३ आ ३ इ ३ ई ३ इत्यादयः प्लुताः । दूरात्सम्बोधनादौ स्वराः प्लुताः ज्ञेयाः । उदात्तादि-संज्ञास्त्विह नोपयुज्यन्ते इति नोक्ताः । बोधार्थं तु सुहृद् भूत्वा किञ्चिदुच्यन्ते । तत्र ह्रस्वादयः प्रत्येकमुदात्ता अनुदात्ताः स्वरिताश्च । ताल्वादिषु स्थानेषूर्ध्वभागनिष्पन्नाः स्वरा उदात्ताः। तेष्वेव स्थानेष्वधोभागनिष्पन्नाः स्वराः अनुदात्ताः । तेषु स्थानेषु निष्पन्ना उभयधर्मयोगात् स्वरिताः स्वराः । ते च प्रत्येकं मुखसहितनासिकयोच्चार्यमाणाः सानुनासिका मुखेनैवोच्चार्यमाणा निरनुनासिकाश्च । तदित्थं ह्रस्वदीर्घप्लुताः

---

१–वि० वि० कारिका-

"एकमात्रो भवेद् ह्रस्वो, द्विमात्रो दीर्घ उच्यते ।
प्लुतः स्वरस्त्रिमात्रः स्याद् , व्यञ्जनं चार्धमात्रकम् ॥१॥

दूरादामन्त्रणे प्रश्ने, प्रश्नाख्याने च भर्त्सने ।
सम्मत्यसूयाकोपादौ, यथायोगं स्वराः प्लुताः ॥२॥ इति ।

टि० २–वि० वि० का०–

"स चैकैकस्त्रिधोदात्तोऽनुदात्तःस्वरितोऽपि च ।
षोढा च सानुनासिकनिरनुनासिका इति ॥१॥

उच्चैर्नीचैः समवृत्त्योच्चार्यमाणाः स्वराः क्रमात् ।
उदात्ताश्चानुदात्ताश्च स्वरिताश्च भवन्त्यमी ॥२॥

३ वि०वि० का०–"मुखनासोच्चार्यमाणो वर्णः स्यात्सानुनासिकः ।
मुखेनैवोच्चार्यमाणः ख्यातो निरनुनासिकः ॥१॥

प्रत्येकं[1] षोढेत्यवर्णादयः पञ्च प्रत्येकमष्टादशधा । सन्ध्यक्षराणि ए ऐ ओ औ इत्येतानि द्वादशधा, तेषां ह्रस्वाभावात् । मतान्तरेण तु ऌकारोऽपि द्वादशधैव, तस्य दीर्घाभावादिति बोध्यम् ॥ ५ ॥

**अनवर्णा नामी[2] १।१।६॥** अवर्णवर्जिता औकारान्ता वर्णा नामिसंज्ञका भवन्ति । इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ । बहुवचनेन प्लुतस्यापि संग्रहः ॥ ६ ॥

**ऌदन्ताः समानाः[3] ।१।१।७॥** ऌकारान्ताः वर्णाः समानसंज्ञका भवन्ति । अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ । बहुवचनं प्लुतसंग्रहार्थम् ॥ ७ ॥

**ए[4] ऐ ओ औ सन्ध्यक्षरम् ।१।१।८॥** ए ऐ ओ औ इत्येते वर्णाः **सन्ध्यक्षरसंज्ञका भवन्ति** ॥ ८ ॥

**अं अः अनुस्वारविसर्गौ ।१।१।९** अँकारावुच्चारणार्थौ[5] ।

---

१. **वि० वि० का०**—प्रत्येकमित्यवर्णाद्याः पञ्चाष्टादशधाः स्मृताः ।
सन्ध्यक्षरं द्वादशधा ह्रस्वषड्भेदवर्जितम् ॥१॥
ऌकारोऽपि द्वादशधा दीर्घाभावात्तु पाणिनेरिति च ।

२. **वि० वि० का०**—"अवर्णवर्जिताश्चैते स्वरा द्वादश नामिनः" ॥

३. **वि० वि० का०**—"ऌकारान्ता अकाराद्याः समानाख्याः स्वरा दश" ।

४. **वि० वि० का०**—"सन्ध्यक्षराख्याश्चत्वार ए ऐ ओ औ इमे स्वराः ।

५—**वि० वि० का०** "अकारावेतयोर्मध्ये सुखोच्चारणहेतुकौ" ।

अं नासिक्यो वर्णः अः इति कण्ठ्यः । तौ यथासंख्यमनुस्वार-विसर्गसंज्ञकौ भवतः ॥ ८ ॥

**कादिर्व्यञ्जनम्** ।१।१।१०॥ कादिर्वर्णो हकारपर्यन्तो-व्यञ्जनसंज्ञको भवति । क ख ग घ ङ । च छ ज झ ञ । ट ठ ड ढ ण । त थ द ध न । प फ ब भ म । य र ल व श ष स ह ॥ ९ ॥

**पञ्चको वर्गः** ।१।१।१२॥ कादिषु वर्णेषु यो यः पञ्चसंख्यापरिमाणो वर्णः स स वर्गसंज्ञको भवति । कवर्गः—क ख ग घ ङ । चवर्गः—च छ ज झ ञ । टवर्गः—ट ठ ड ढ ण । तवर्गः—त थ द ध न । पवर्गः—प फ ब भ म ॥१०॥

**यरलवा अन्तस्था** ।१।१।१५॥ यरलव इत्येते वर्णा अन्तस्थासंज्ञका भवन्ति । बहुवचनं सानुनासिकसंग्रहार्थम् ।११।

**अपञ्चमान्तस्थो धुट्** ।१।१।११। वर्गपञ्चमान्तस्था-वर्जितः कादिर्वर्णो धुट्संज्ञको भवति । क ख ग घ । च छ ज झ । ट ठ ड ढ । त थ द ध । प फ ब भ । श ष स ह ॥ १२ ॥

**आद्यद्वितीयशषसा अघोषाः** ।१।१।१३॥ वर्गाणा-

१—वि० वि० का० "व्यञ्जनाख्यास्त्रयस्त्रिंशद्वर्णा हान्ताश्च कादयः" ।

२—वि० वि० का० "मान्तेषु कादिवर्णेषु कचटतपसंज्ञकाः ।
पञ्चभिः पञ्चभिर्वर्णैर्वर्गाः पञ्च प्रकीर्त्तिताः" ॥१॥

३—वि० वि० का० "अवर्गपञ्चमान्तस्थास्ते चतुर्विंशतिर्धुटः ।

र्मांद्यद्वितीया वर्णाः शषसाश्चाघोषसंज्ञका भवन्ति । क, ख, च, छ, ट, ठ, त, थ, प, फ, श, ष, स ॥ १३ ॥

**अन्यो घोषवान्** ।१।१।१४॥ अघोषेभ्योऽन्यो गादिर्वर्णो घोषवत्संज्ञको भवति । ग घ ङ । ज झ ञ । ड ढ ण । द ध न । ब भ म । य र ल व । ह ॥ १४ ॥

**अं अः ≍ क ≍ पः शषसाः शिट्** ।१।१।१६॥ अनुस्वारो विसर्गो वज्राकृतिर्गजकुम्भाकृतिश्च वर्णः शषसाश्च शिट्संज्ञका भवन्ति । अकार–ककार–पकारा उच्चारणार्थाः ॥१५॥

**तुल्यस्थानास्यप्रयत्नः स्वः** ।१।१।१६॥ तुल्यौ वर्णान्तरेण सदृशौ स्थानास्यप्रयत्नौ यस्य स वर्णस्तं प्रति स्वसंज्ञको भवति । तत्र स्थानान्यष्टौ । यदुक्तम्—

"अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ॥
जिह्वामूलं च दन्ताश्च नासिकौष्ठौ च तालु च" ॥इति।

---

१–वि० वि० का० "आद्यद्वितीया वर्गाणामघोषाः शषसा अपि" ।

२–वि० वि० का० "अन्ये स्युर्गादयो वर्णा घोषवन्तश्च विंशतिः" ।

३–वि० वि० का० "शिट्संज्ञका अमी सप्त तत्र ≍ कः कुलिशाकृतिः । गजकुम्भाकृतिः ≍ पश्च कपावुच्चारणार्थकौ" ॥१॥

४–वि० वि० का० "आस्यप्रयत्नस्थानाभ्यां तुल्या वर्णाः स्वसंज्ञकाः ।
चतुर्दशानां स्वराणां स्वस्वभेदा यथा मिथः ॥१॥
पञ्च पञ्चैकवर्गस्था वर्णाः स्वाः स्युः परस्परम् ।
यलवाः सानुनासिक–निरनुनासिका अपि ॥२॥"

शिरो मूर्धा। तत्राऽवर्णहकारविसर्गकवर्गाणां कण्ठः। इवर्ण-चवर्गयकारशकाराणां तालु। उवर्णपवर्गोपध्मानीयानामोष्ठौ। ऋवर्णटवर्गरेफषकाराणां मूर्धा। लृवर्णतवर्गलकारसकाराणां दन्ताः। एदैतोः कण्ठतालु। ओदौतोः कण्ठोष्ठम्। वकार-स्य दन्तोष्ठम्। जिह्वामूलीयस्य जिह्वामूलम्। अनुस्वारस्य नासिका। ङञणनमानां स्वस्ववर्गस्थानं नासिका च। अन्तस्थासहितः पञ्चमसहितश्च हकार उरस्यः। हविसर्गावुर-स्यावित्यन्ये। प्रयत्नो द्विधा—आस्यप्रयत्नो बाह्यप्रयत्नश्च। आद्यश्चतुर्धा—स्पृष्टतेषत्स्पृष्टतेषद्विवृतताविवृतताभेदात्। तत्र स्पर्शानां स्पृष्टताप्रयत्नः, अन्तस्थानामीषत्स्पृष्टताप्रयत्नः। ऊष्मणामीषद्विवृतताप्रयत्नः। स्वराणां विवृतताप्रयत्नः। ह्रस्वस्याऽवर्णस्य प्रयोगदशायां संवृतताप्रयत्न इत्यपि मतम्। कादयो मावसानाः स्पर्शाः। शषसहा ऊष्माणः। तत्र अ इ उ ऋ लृ वर्णानाम् ए ऐ ओ औ इत्येतेषां च स्वस्वभेदा

---

१—वि० वि० का० "विसर्गोऽथाकुहाः कण्ठ्यास्तालव्या इचुयाश्च शः।
उपूपध्मानीया ओष्ठ्या मूर्धन्या ऋटुषाश्च रः ॥१॥
दन्त्या लृतुलसा, ए ऐ कण्ठतालुसमुद्भवौ।
ओ औ कण्ठौष्ठजौ ज्ञेयौ वो दन्त्यौष्ठ्यः प्रकीर्तितः" ॥२॥

२—जिह्वयश्च जिह्वामूलीयोऽनुस्वारो नासिकोद्भवः।
स्वस्थाननासिकास्थानाः स्युर्ङञणनमा इति ॥३॥

३—स्यादुरस्यो हकारस्तु सहान्तस्थः सपञ्चमः।
आस्यप्रयत्नाः संवारविवारस्पृष्टतादयः ॥४॥

मिथः स्वसंज्ञकाः । तथा वर्ग्याः पञ्च पञ्च मिथः स्वसंज्ञकाः । यलवानां प्रत्येकं सानुनासिकनिरनुनासिकतया द्वौ भेदौ परस्परं स्वसंज्ञकौ । रेफस्योष्मणां च स्वा न भवन्ति । स्वसंज्ञायामनुपयुक्तोऽपि बाह्यप्रयत्नो बोधार्थं विव्रियते–तद्यथा–तत्र विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति बाह्यप्रयत्ना एकादश । वर्गाणां प्रथमद्वितीयौ शषसाश्चाऽनुस्वारविसर्गजिह्वामूलीयोपध्मानीयाश्च विवाराः श्वासा अघोषाश्च । वर्गाणां तृतीयचतुर्थपञ्चमा अन्तस्था हकारश्चानुस्वारश्च संवारा नादा घोषाश्च । वर्गाणां प्रथमतृतीयपञ्चमा अन्तस्थाश्चाल्पप्राणाः । वर्गाणां द्वितीयचतुर्थावूष्माणश्च महाप्राणाः । स्वराश्चोदात्तानुदात्तस्वरिताः ।

**अप्रयोगीत्** ।१।१।३७ इह शास्त्रे उपदिश्यमानो वर्णस्तत्समुदायो वा यो लौकिके शब्दप्रयोगे न दृश्यते स इत्संज्ञको भवति ॥

---

१–"उक्ते वर्णे स्वसंज्ञोऽपि ग्राह्यः कारे च केवलः ॥
संयोगः स्याद् व्यञ्जनानि स्वराऽव्यवहितान्यहो" ॥५॥ इति ।

२–**वि० वि० का०** "वर्णो वर्णसमूहो वा पाठे समुपलभ्यते ।
न दृश्यते प्रयोगे यः स इत्संज्ञक इष्यते" ॥१॥
स्यादिस्त्यादिर्विभक्तिः स्याद् विभक्त्यन्तं भवेत्पदम् ।
आदेशः शत्रुवज्ज्ञेयो भवेन्मित्रवदागमः ॥२॥

लोकात् ।१।१।३।। उक्तातिरिक्तानां क्रियागुणद्रव्यजातिकाललिङ्गसंख्यापरिमाणाऽपत्यवीप्साालुक्संयोगगुरुलघ्ववर्णाकारादिसंज्ञानां पराम्नित्यं नित्यादन्तरङ्गमन्तरङ्गाच्चानवकाशं बलीय इत्यादिपरिभाषाणां च वर्णसमाम्नायस्य च लोकाद् वैयाकरणसिद्धान्तवेदिनः सकाशात् सिद्धिर्भवतीति ज्ञेयम्[१]। तत्र सुहृद् भूत्वा किञ्चिदुच्यते—यस्य स्थाने यो भवति स तस्यादेशः। यथा इकारादेः स्थाने भवन् यकारादिरादेशः। अत एवादेशः शत्रुवदिति प्रसिद्धिः। पुरो वर्णानामभावो विरामोऽवसानमिति चोच्यते। लुक्लुप्—लोपशब्दा वर्णादर्शनवाचकाः। विसर्गयुक्तोऽनुस्वारयुक्तः संयोगपरश्च ह्रस्वो दीर्घप्लुतौ च स्वरा गुरुरित्युच्यते। विसर्गानुस्वाररहितोऽसंयोगपरश्च ह्रस्वः स्वरो लघुसंज्ञको भवति। अर एत्

अवसानं विरामः स्याद् वर्णानुच्चारणं पुरः।
त्रयो लुक लुप् च लोपश्च वर्णादर्शनवाचकाः ॥३॥
दीर्घो विसर्गानुस्वार—युक् संयोगपरो गुरुः।
असंयोगपरो ह्रस्वो विसर्गाद्युज्झितो लघुः ॥४॥
अरेदोतो गुणसंज्ञा ऋ इ उ स्थानभाविनः।
*वृद्धिसंज्ञा स्मृता आ आर् ऐदौच्च स्वरसंभवाः ॥५॥*
स्यमौजसः स्युर्घुट्संज्ञाः पुंस्त्रियोः शिर्नपुंसके।
विना संबोधनार्थं सिं शेषघुट्संज्ञका अमी ॥६॥ इति।

१—वि० वि० का० "यदत्र संज्ञान्यायादि वर्णाम्नायादि नोदितम्।
तद्वैयाकरणादिभ्यो लोकेभ्यो बुध्यतां बुधैः" ॥१॥
इति सिद्धहेमशब्दानुशासनलघुप्रक्रियाटिप्पण्यां संज्ञाधिकारः समाप्तः।

ओत् एते गुणसंज्ञकाः। आ आर ऐत् औत् इत्येते वर्णा वृद्धिसंज्ञका ज्ञेयाः। अ इ उ ऋ लृ इत्येतत्स्वरोत्तरं वर्णशब्दे प्रयुक्ते स्वसंज्ञकानामपि ग्रहणं ज्ञेयम्। यथा—"अवर्णस्येवर्णादिनैदोदरलि"त्यादावववर्णेवर्णादिशब्देन सर्वेषामेवाकारादीनामीकारादीनां च प्रत्येकमष्टादशानां मिथः स्वसंज्ञकानां ग्रहणम्। एवं स्वरात्परतो व्यञ्जनाद्वा कारशब्दप्रयोगे सति ह्रस्वादिमात्रस्य षड्भेदस्य व्यञ्जनमात्रस्यैव च ग्रहणम्। यथा अकार इत्युक्ते ह्रस्वाकारस्य षड्भेदस्य ककार इति प्रयोगे च केवलस्य व्यञ्जनस्य करूपस्य ग्रहणम्। धुडादिसंज्ञास्तत्तत्कार्यावसरे दर्शयिष्यन्ते।

इति हैमनूतनलघुप्रक्रियायां संज्ञाधिकारः समाप्तः॥

अथ हैमनूतनलघुप्रक्रियायां

## स्वरसन्धि प्रकरणम्।

**समानानां तेन दीर्घः** ।१।२।१॥ समानसंज्ञकानां वर्णानां तेन=परेण समानेन सहितानां दीर्घः स्यात्। अत्र सहितानामित्युक्तेर्द्वयोः स्थाने एको दीर्घो भवति।

१– द्वयोर्हि सह कार्यान्वये साहित्यम्, पृथगादेशे तु तन्न स्यात्। तेनेति सूत्रे सहार्थे तृतीयेति बोध्यम्।

एवमग्रेऽपि बोध्यम् । स्वरहीनो वर्णः परं धावतीत्येतत्तु लोकात्सिद्धम् ॥

**आसन्न :** ।७।४।१२०॥ इह शास्त्रे आसन्नानासन्नयोरेकत्र प्रसङ्गे स्थानादिभिरासन्न एव विधिर्भवति । एवं च कण्ठ्ययोरकारयोः स्थाने स्थानेनासन्न आकार एव दीर्घः । एवमन्यत्राऽपि । दण्डाग्रम्, तवायुः, दधीदम्, मधूदकम्, पितॄषभः, क्लॄकारः ॥

**ऋलृति ह्रस्वो वा** ।१।२।३॥ समानानाम् ऋकारे लृकारे च परे ह्रस्वो वा स्यात् । बाल ऋश्यः, बालर्श्यः । कर्तृ ऋषभः, कर्तॄषभः । बाल लृकारः, बालल्कारः ॥

**अवर्णस्येवर्णादिनैदोदरल्** ।१।२।६॥ अवर्णस्य स्थाने इवर्णोवर्णऋवर्णलृवर्णैः परैः सहितस्य क्रमेण एत् ओत् अर् अल् इत्येते आदेशा भवन्ति । तकार उच्चारणार्थः । एवमन्यत्रापि । जिनेन्द्रः, तवेहा, गङ्गोदकम्, महा ऋषिः, महर्षिः, तव लृकारः, तवल्कारः ॥

**ऋणे प्रदशार्णवसनकम्बलवत्सरवत्सतरस्यार्** ।१।२।७॥ प्रादीनां समानामवर्णस्य ऋणशब्दे परे परेण

१– द्वयोः स्थाने दीर्घैकादेशे दण्ड् आग्रमित्यादिरूपेण प्रयोगापत्तिमाशङ्क्याह–स्वरहीन इति ।

२– ऋलृतीति सूत्रेण ह्रस्वः, पक्षेऽर् । ह्रस्वपक्षे तु न सन्धिः, ह्रस्वविधानवैयर्थ्यापत्तेरिति बोध्यम् ।

ऋकारेण सहितस्य आरित्ययमादेशो भवति । अरोऽपवादः । प्रार्णम्, ऋणार्णम् ॥

**ऋते तृतीयासमासे** ।१।२।८॥ अवर्णस्य ऋतशब्दे परे परेण ऋकारेण सहितस्य स्थाने आरित्ययमादेशो भवति तृतीयासमासे । शीतेन ऋतः शीतार्त इत्यादि ॥

**ऋत्यारुपसर्गस्य** ।१।२।९॥ उपसर्गस्य सम्बन्धिनोऽवर्णस्य ऋकारादौ धातौ परे परेण ऋकारेण सहितस्य स्थाने आरादेशो भवति । सर्वापवादः ॥

**षष्ठ्या अन्तस्य** ।७।४।१०६॥ षष्ठ्या निर्दिष्टे यत्कार्यमुच्यते तत् षष्ठीनिर्दिष्टस्यैव योऽन्त्यस्तस्य स्थाने भवति न तु समस्तस्य ॥

प्रार्च्छति, उपार्च्छति ॥

**ऐदौत्सन्ध्यक्षरैः** ।१।२।१२॥ अवर्णस्य सन्ध्यक्षरैः परैः सहितस्य स्थाने ऐत् औत् इत्यादेशौ भवतः । तवैषा, महा + ऐश्वर्यम्=महैश्वर्यम्, तवौदनः, खट्वौपगवः ॥

**ऊटा** ।१।२।१३॥ अवर्णस्य परेण ऊटा सहितस्य स्थाने

१– निमित्तनिमित्तिनोरेकत्र तृतीयासमासे सतोरित्यर्थः ।

२– आरित्यनुवृत्त्यैव सिद्धे आर् ग्रहणस्य आरेव यथा स्यादिति नियमार्थत्वात् । तेन ह्रस्वो न भवत्ति । उपसर्गाः– प्रपरापसमन्ववनिर्दुरभिव्यधिसूदतिनिप्रतिपर्यपयः । उप–आङिति विंशतिरेष सखे उपसर्गगणः कथितः कविभिः ॥१॥

औकारादेशो भवति । ओदपवादः । धौतः[1], धौतवान् ॥

**प्रस्यैषैष्योढोढ्यूहे स्वरेण** ।१।२।१४॥ प्रशब्दसम्बन्धिनोऽवर्णस्य एष–एष्य–ऊढ–ऊढि–ऊह इत्येतेषु परेषु परेण स्वरेण सहितस्य स्थाने ऐदौतावादेशौ स्तः । प्रैषः, प्रैष्यः, प्रौढः, प्रौढिः, प्रौहः ॥

**स्वैरस्वैर्यक्षौहिण्याम्** ।१।२।१५॥ स्वैर–स्वैरिन्–अक्षौहिणीत्येतेषु शब्देषु अवर्णस्य परेण स्वरेण सहितस्य स्थाने ऐत् औत् इत्येतावादेशौ भवतः । स्वैरः[2], स्वैरी, अक्षौहिणी ॥

**अनियोगे लुगेवे** ।१।२।१६॥ नियोगो नियमः, तदभावोऽनियोगोऽनियमः, तद्विषये एवशब्दे परेऽवर्णस्य लुक् स्यात् । इहेव तिष्ठ । नियोगे तु न । इहैव तिष्ठ मा गाः ॥

**वौष्ठौतौ समासे** ।१।२।१७॥ ओष्ठशब्दे ओतुशब्दे च परेऽवर्णस्य लुग् वा स्यात्समासे[3] । बिम्बोष्ठी, बिम्बौष्ठी । स्थूलोतुः[4], स्थूलौतुः ॥

**ओमाङि** ।१।२।१८॥ अवर्णस्य ओमि आङादेशे च परे लुग् भवति । अद्योङ्कारः । आ ऊढा=ओढा, अद्योढा । आ इहि=एहि, उपेहि ॥

---

१–धा+ऊतः । २–स्व+ईरः ।

३–निमित्तनिमित्तिनावेकत्रैव समासे चेद् भवत इत्यर्थः ।

४–ओतुर्बिडालः ।

उपसर्गस्यानिणेधेदोति ।१।२।१९।। उपसर्गसम्बन्धिनोऽवर्णस्येणेधृवर्जिते एकारादावोकारादौ च धातौ परे लुक् स्यात् । प्रेजते, परोखति । अनिणेधेदिति किम् ? उपैति, उपैधते ।

इवर्णादेरस्वे स्वरे यवरलम् ।।१।२।२१।। इवर्णोवर्णऋवर्णऌवर्णानामस्वे स्वरे परे यथासंख्यं य् व् र् ल् इत्येते आदेशा भवन्ति ।।

अदीर्घाद्विरामैकव्यञ्जने ।३।३२।। अदीर्घात् स्वरात् परस्य र् ह्स्वरवर्जितस्य वर्णस्य स्थाने विरामेऽसंयुक्तव्यञ्जने च परे द्वे रूपे वा भवतः, अनु यदन्यत्कार्यं प्राप्नोति तस्मिन् कृते, पश्चादित्यर्थः ।।

तृतीयस्तृतीयचतुर्थे ।१।३।४९।। धुटां स्थाने तृतीये चतुर्थे च परे तृतीयो भवति । दद्ध्यत्र, दध्यत्र । मद्ध्वत्र, मध्वत्र । पित्त्रर्थः पित्रर्थः, ऌ+इत्=लित् ।।

र्हादर्हस्वरस्याऽनु नवा ।१।३।३१।। स्वरेभ्यः परौ यौ रेफहकारौ ताभ्यां परस्य रेफहकारस्वरवर्जितस्य वर्णस्य स्थाने द्वे रूपे वा स्याताम्, अनु=यदन्यत्कार्यं प्राप्नोति तस्मिन् कृते, पश्चादित्यर्थः । गौर्यत्र, गौर्य्यत्र । नह्यस्ति, नह्य्यस्ति ।।

एदैतोऽयाय् १।२।२३।। एकारैकारयोः स्थाने स्वरे

परे यथासंख्यम् अय् आय् इत्येतावादेशौ भवतः । ने+अनम्=नयनम् । नै+अकः=नायकः ॥

**ओदौतोऽवाव् ।१।२।२४॥** ओकारौकारयोः स्थाने स्वरे परे यथासंख्यम् अव् आव् इत्येतावादेशौ भवतः । लो+अनम्=लवनम् । लौ+अकः=लावकः ॥

**य्यक्ये ।१।२।२६॥** ओकारौकारयोः स्थाने क्यवर्जिते यकारादौ प्रत्यये परे यथासंख्यमव् आव् इत्येतावादेशौ भवतः । गव्यति । नाव्यति ।

**स्वरे वा ।१।३।२४॥** अवर्ण-भो-भगो-अघोभ्यः परयोः पदान्ते स्थितयोर्वकारयकारयोः स्वरे परे लुग् वा भवति, लुकि सत्यां च न सन्धिः । त आगताः, तयागताः । तस्मा इदं, तस्मायिदम् । पट इह, पटविह । वृक्षा इह, वृक्षाविह ।

**स्वरे वानऽक्षे १।२।२९॥** गोरोकारस्य पदान्ते स्थितस्य स्वरे परे अव इत्यकारान्त आदेशो वा भवति, स चेत्स्वरोऽक्षशब्दस्थो न भवति । पक्षे यथाप्राप्तम् ॥

**एदोतः पदान्तेऽस्य लुक् ।१।२।२७॥** पदान्तस्थाभ्यामेदोद्भ्यां परस्याकारस्य लुग् भवति । गवाग्रम्, गोऽग्रम् । गवेशः, गवीशः ॥

---

१—अत्राऽसन्धौ सति गो अग्रमित्येवमपि रूपमिति रूपत्रयम् ।

२—वकारलोपे ग ईश इत्यपि ।

**गोर्नाम्न्यवोऽक्षे** ।१।२।२८॥ गोरोकारस्य पदान्तस्थस्याऽक्षशब्दे परे संज्ञायामव इत्यादेशो भवति । गवाक्षः ॥

**इन्द्रे** ।१।२।३० गोरोकारस्य पदान्तस्थस्येन्द्रस्थे स्वरे परे अव इत्यादेशो भवति । गवेन्द्रः[1] ॥

॥ इति हैमनूतनलघुप्रक्रियायां स्वरसन्धिप्रकरणम् ॥

## ॥ अथाऽसन्धिप्रकरणम् ॥

**वाऽत्यसन्धिः** ।१।२।३१॥ पदान्तस्थस्य गोरोकारस्य अकारे परे असन्धिर्वा[2] भवति । गो अग्रम् । गो अजिनम् ॥

**प्लुतोऽनितौ** ।१।२।३२॥ इतिशब्दवर्जिते स्वरे परे प्लुतोऽसन्धिर्भवति । सन्धिं न भजत इत्यर्थः । देवदत्त ३ अत्र न्वसि । इतौ तु–सुश्लोकेति[3] ।

**ईदूदेद् द्विवचनम्**।१।२।३४॥ ईत् ऊत् एत् इत्येवमन्तं द्विवचनं स्वरे परे सन्धिभाग् न भवति । मुनी इह, साधू एतौ, माले इमे, पचेते इमौ ॥

**अदो मुमी** ।१।२।३५॥ अदस् शब्दसम्बन्धिनौ मुमी

१–"इन्द्रे परे संज्ञायां च नित्यमि"त्येवं वचनं त्वविचारिताभिधानम्, संज्ञायामपि 'गोर्नाम्नीत्यादिना अक्षशब्दे परे एवादेशविधानादिति द्रष्टव्यम् ।

२–सन्धिकार्याभाव इत्यर्थः ।

३–सुश्लोक ३ इतीति स्थिते 'अवर्णस्ये' त्येदादेशः ।

इत्येतावसन्धी भवतः। अमुमुईचा[1]। अमी अश्वाः॥

**चादिः स्वरोऽनाङ्** ।१।२।३६॥ आङ्वर्जितश्चादिगणपठितोऽव्ययसंज्ञकः स्वरः स्वरे परेऽसन्धिर्भवति। अ अपेहि, इ इन्द्रं पश्य, उ उत्तिष्ठ, आ एवं नु तत्। अनाङिति किम्? ओष्णम्, एहि[2]॥

**ओदन्तः** ।१।२।३७॥ ओदन्तश्चादिः स्वरे परे असन्धिर्भवति। अहो अत्र॥

**सौ नवेतौ** ।१।२।३८॥ सिनिमित्त ओदन्त इतौ परेऽसन्धिर्वा भवति। पटो इति। पक्षे यथाप्राप्तम्[3]॥

**ह्रस्वोऽपदे वा** ।१।२।२२॥ इवर्णादीनामस्वे स्वरे परे ह्रस्वो वा भवति, न चेत्तौ निमित्तनिमित्तिनावेकत्र पदे भवतः। दधि अत्र, मधु अत्र। अपदे इति किम्? नद्यौ, वध्वौ॥

॥ इतिश्री हैमनूतनलघुप्रक्रियायामसन्धिप्रकरणम् ॥

१–अदस् पूर्वकादञ्चू धातोः क्विपि तृतीयैकवचने रूपमिदम्।

२–आ उष्णम्, आ इहि इति च च्छेदः। अत्र श्लोकः।

"ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः।
एतमातं ङितं विद्याद् वाक्यस्मरणयोरङित्"॥ इति।

३–अवादेशे वकारलोपे च 'पट इति' लोपविकल्पे च 'पटविती' ति।

॥ अथ व्यञ्जनसन्धिप्रकरणम् ॥

**धुटस्तृतीयः** ।२।१।७६॥ पदान्ते धुटामासन्नस्तृतीयो भवति । वागीशः ॥

**तृतीयस्य पञ्चमे** ।१।३।१॥ पदान्ते वर्गतृतीयस्य वर्गपञ्चमे परे अनुनासिको वा भवति । वाङ्मधुरा । वाग् मधुरा ॥

**प्रत्यये च** ।१।३।२॥ पदान्ते वर्गतृतीयस्य स्थाने वर्गपञ्चमादौ प्रत्यये परेऽनुनासिको भवति । वाङ्मयम् ॥

**ततो हश्चतुर्थः** ।१।३।३॥ पदान्ते वर्गतृतीयात्परस्य हकारस्य स्थाने पूर्वसवर्गश्चतुर्थो वा भवति । वाग्घीनः, वाग् हीनः । तद्धितम् , तद्हितम् ॥

**नोऽप्रशानोऽनुस्वारानुनासिकौ च पूर्वस्याऽधुट्परे** ।१।३।८॥ पदान्ते प्रशान्वर्जशब्दसम्बन्धिनो नकारस्य स्थाने चटतेषु सद्वितीयेष्वधुट्परेषु परतो यथासंख्यं श ष् स् इत्येते आदेशा भवन्ति, पूर्वस्याऽनुस्वारममोऽनुनासिकादेशश्च क्रमेण भवतः । भवांश्चरति, भवाँश्चरति । भवांश्छेकः, भवाँश्छेकः । भवांष्टीकते, भवाँष्टीकते । भवांष्ठकारः, भवाँष्ठकारः । भवांस्तरति, भवाँस्तरति । भवांस्थुडति, भवाँस्थुडति । अप्रशानिति किम् ? प्रशान् तरति ॥

**स्सटि समः** ।१।३।१२॥ समित्येतस्य स्सटि परे

---

१—अनुनासिकात्पश्चाद् द्वित्वम्—वाङ्ङ् मधुरा ।

सकारान्तादेशो भवत्यनुस्वारानुनासिकौ च पूर्वस्य । संस्स्कर्ता सँस्स्कर्ता ॥

द्विः कानः कानि सः ।१।३।११॥ द्विरुक्तस्य कानः कानि परे सकारान्तादेशो भवति, अनुस्वारानुनासिकौ च पूर्वस्य । कांस्कान्, काँस्कान् ॥

तौ मुमो व्यञ्जने स्वौ ।१।३।१४॥ मु इत्यागमस्य पदान्तस्थस्य च मकारस्य व्यञ्जने परे तस्यैव स्वौ तावनुस्वारानुनासिकौ क्रमेण भवतः । त्वं करोषि, त्वङ्करोषि । त्वं चारुः, त्वञ्चारुः । त्वं टीकसे, त्वण्टीकसे । त्वं तरसि, त्वन्तरसि । त्वं पचसि, त्वम्पचसि । संयतः, सँय्यँतः ॥

म्नां धुड्वर्गेऽन्त्योऽपदान्ते ।१।३।३९॥ अपदान्तस्थानां मकारनकाराणां धुट्संज्ञके वर्गे परे तस्यैवाऽन्त्योऽनु भवति । गन्ता, शङ्किता, कम्पिता ॥

शिड्हेऽनुस्वारः ।१।३।४०॥ अपदान्तस्थानां म्नां स्थाने शिटि हकारे च परे अनुस्वारादेशो भवति अनु । पुंसि, यशांसि ।

भवान् शूर इति स्थिते-

नः शिञ्च् ।१।३।१९॥ पदान्तस्थस्य नकारस्य स्थाने

१—स्वेत्यनुनासिकस्यैव विशेषणं बोध्यम् ।

शकारे परे ञ्च् इत्यादेशो वा भवति। श्च् इति संयोगावयवश्चेत् शकारो न भवति। भवाञ्च् शूर इति जाते–

**प्रथमादधुटि शश्छः** ।१।३।४।। पदान्ते प्रथमात्परस्य शकारस्य स्थाने अधुटि परे छकारादेशो वा भवति। भवाञ्च् छूर इति जाते–

**धुटो धुटि स्वे वा** ।१।३।४८।। व्यञ्जनात् परस्य धुटो धुटि स्वे परे लुग् वा भवति। भवाञ्छूरः, भवाञ्च्छूरः, भवाञ्च् शूरः, भवाञ् शूरः।

**ङ्णोः कटावन्तौ शिटि नवा** ।१।३।१७।। पदान्तस्थयोर्ङकारणकारयोः शिटि परे क्रमेण क् ट् इत्येतावन्तौ वा भवतः। प्राङ्क्छेते, प्राङ्क्शेते, प्राङ्शेते। सुगण्ट्छेते, सुगण्ट्शेते, सुगण्शेते ॥

**ह्रस्वाद् ङणनो द्वे** ।१।३।२०।। ह्रस्वात्परेषां पदान्तस्थानां ङ्णन् इत्येषां वर्णानां स्थाने स्वरे परे द्वे रूपे भवतः। क्रुङ्ङास्ते, सुगण्णिह, पचन्नास्ते ॥

**ड्नः सः त्सोऽश्वः** ।१।३।१८।। पदान्तस्थाद् डकारानकाराच्च परस्य सकारस्य स्थाने त्स् इत्यादेशो वा भवति। श्च् संयोगावयवश्चेत् सकारो न भवति। षड्त्सीदन्ति,[2]

१–अस्य सूत्रस्याऽत्रानुल्लेखस्तु न्यून इति स्पष्टमेव।

२–सूत्रे डकारनिर्देशान्न प्रथम इति बोध्यम्। तवर्गस्येति टवर्गोऽपि न, पदान्ताट्टवर्गादिति निषेधात्।

षट्सीदन्ति । भवान्त्साधुः, भवान् साधुः ॥

**स्वरेभ्यः** ।१।२।३०॥ स्वरात्परस्य छकारस्य द्वे रूपे भवतः ॥

**अघोषे प्रथमोऽशिटः** ।१।३।५०॥ शिड्वर्जस्य धुटः स्थानेऽघोषे परे प्रथमो भवति । देवच्छत्रम् , गच्छति ॥

**अनाङ्माङो दीर्घाद्वा छः** ।१।३।२८॥ आङ्माङ् वर्जितपदसम्बन्धिनो दीर्घात्पदान्तस्थात्परस्य छकारस्य द्वे रूपे वा भवतः । कन्याच्छत्रम् , कन्याछत्रम् ॥

प्लुताद्वा ।१।३।२९॥ पदान्तस्थाद् दीर्घस्थानात्प्लुतात्-परस्य छकारस्य द्वे रूपे वा भवतः । आगच्छ मुने ३ च्छत्र-मानय, आगच्छ मुने ३ छत्रमानय । आङ्माङ्वर्जनात्ततो-नित्यमेव–आच्छाया, मा च्छिदत् ॥

**तवर्गस्य श्चवर्ग–ष्टवर्गाभ्यां योगे चटवर्गौ** ।१।३।६०॥ तवर्गस्य स्थाने शकारचवर्गाभ्यां योगे चवर्गः, षकारटवर्गाभ्यां योगे च टवर्गः स्यात् । तच्छास्त्रम् , तच् शास्त्रम् । तच्चारु, पेष्टा, तट्टीकते ॥

**सस्य शषौ** ।१।३।६१॥ सकारस्य स्थाने शकारचवर्गा-भ्यां योगे शकारः, षकारटवर्गाभ्यां योगे च षकारो भवति ।

१–सस्य शषाविति न प्रवर्तते, पदान्ताट्टवर्गादिति निषेधात् ।

वृश्चति, मेज्जति, सर्पिष्षु ॥

**न शात्** ।१।३।६२॥ शकारात्परस्य तवर्गस्य स्थाने चवर्गो न भवति । अश्नाति, प्रश्नः ॥

**पदान्ताट्टवर्गादनाम्नगरीनवतेः** ।१।३।६३॥ पदान्तस्थाट्टवर्गात् परस्य नाम् नगरी नवति सम्बन्धिवर्जितस्य तवर्गस्य टवर्गः सस्य षश्च न स्यात् । षण्नयाः, षट्सु । अनाम्नगरीनवतेरिति किम्? षण्णाम्, षण्णगर्यः, षण्णवतिः ॥

**षि तवर्गस्य** ।१।३।६४॥ पदान्तस्थस्य तवर्गस्य स्थाने षकारे परे टवर्गो न भवति । तीर्थकृत् षोडशः शान्तिः । भवान् षण्ढः ॥

**उदः स्था-स्तम्भः सः** ।१।३।४४॥ उदः परयोः स्थास्तम्भयोः सकारस्य लुग् भवति । उत्थाता, उत्तम्भिता ॥

**लिलौ** ।१।३।६५॥ पदान्तस्थस्य तवर्गस्य स्थाने लकारे परे लौ भवतः । नकारस्य सानुनासिको लँकारोऽन्यस्य निरनुनासिको लकार इति विवेकः । तल्लुनाति, भवाल्ँलुनाति ॥ इति व्यञ्जनसन्धिः ॥

---

१–मस्जतीति स्थिते शकारादेशे तृतीयस्तृतीयेत्यादिना तृतीयत्वं बोध्यम् ।

२–सर्पिस् सु इति स्थिते सकारस्य रुत्वम्, तस्य शषसे इत्यादिना सत्वम्, सुपः षत्वम्, ततोऽनेन पूर्वसकारस्य षत्वमिति बोध्यम् ।

३–तृतीयस्येत्यादिना पञ्चमत्वम् ।

४–षष् आमिति स्थिते नामादेशः । षकारस्य तृतीयः, नकारस्यानेन णकारः । ततः पूर्वस्य तृतीयस्य प्रत्यये चेति पञ्चमः ।

## ॥ अथ रेफसन्धिप्रकरणम् ॥

कस् चारुरिति स्थिते—

**सो रुः** ।२।१।७२॥ पदान्तस्थस्य सकारस्य रुरादेशो भवति । उकार इत् । कर् चारुरिति जाते—

**चटते सद्वितीये** ।१।३।७॥ पदान्तस्थस्य रेफस्य चटतेषु सद्वितीयेषु परेषु यथासंख्यं श् ष् स् इत्यादेशा भवन्ति । कश्चारुः, अन्तश्चरति । कश्छादयति, कष्टीकते, कष्ठकारः, कस्तरति, कस्थुडति, पुनष्टीकते, अन्तस्तरति ॥

**शषसे शषसं वा** ।१।३।६॥ पदान्तस्थस्य रेफस्य शषसेषु परेषु यथासंख्यं शषस इत्यादेशा वा स्युः ॥

**रः पदान्ते विसर्गस्तयोः** ।१।३।५३॥ पदान्तस्थस्य रेफस्य स्थाने विसर्गादेशो भवति विरामे अघोषे परे च । कश्शेते, कः शेते । कष्षण्ढः[2], कः षण्ढः, कस्साधुः, कः साधुः ॥

**रः कखपफयोः ᳵ क )( पौ** ।१।३।५॥ पदान्तस्थस्य रेफस्य कखयोः पफयोः च परयोः यथासंख्यं ᳵ क )( पौ जिह्वामूलीयोपध्मानीयौ आदेशौ वा भवतः । क ᳵ करोति, कः करोति, क ᳵ खनति, कः खनति । क )(

---

१–अत्र सूत्रे रेफसामान्यग्रहणं न तु रोरेवेति बोध्यम् । एवमग्रेऽपि ।

२–क्लीबः ।

पचति, कः पचति, क )( फलति, कः फलति ॥

**ख्यागि** ।१।३।५४। पदान्तस्थस्य रेफस्य ख्याधातौ परे विसर्ग एव भवति । कः ख्यातः, पुनः ख्याति ॥

**शिट्यघोषात्** ।१।३।५५॥ अघोषात्परे शिटि परतः पदान्तस्थस्य रेफस्य विसर्ग एव भवति । कः प्साति, परुषः त्सरुकः[1] ॥

**व्यत्यये लुग्वा** ।१।३।५६॥ शिटः परेऽघोषे परतः पदान्तस्थस्य रेफस्य लुग्वा भवति । पुन स्पृशति, पुनः स्पृशति । क स्खलति, कः स्खलति । चक्षुश्च्योतति, चक्षुः श्च्योतति ॥

**अवर्णभोभगोअघोर्लुगसन्धिः** ।१।३।२२॥ अवर्णाद् भोभगोअघोभ्यश्च परस्य पदान्तस्थस्य रोर्घोषवति परे लुग् भवति, स च सन्धेर्निमित्तं न भवति । श्रमणा गच्छन्ति । भोस् भगोस् अघोस् इति सकारान्ता निपाताः । भो गच्छसि, भगो[2] हससि, अघो[3] याहि ॥

**रोर्यः** ।१।३।२०॥ अवर्णभोभगोअघोभ्यः परस्य पदान्तस्थस्य रोः स्थाने स्वरे परे यकारादेशो भवति । क[4] आस्ते, कयास्ते । भो अत्र, भो यत्र । भगो अत्र, भगो यत्र । अघो अत्र, अघो यत्र ॥

---

१–खड्गमुष्टिः । २–भगवन्नित्यर्थः ।
३–अघवन्नित्यर्थः । ४–स्वरे वेति यकारलोपोऽसन्धिश्च ।

**घोषवति** १।३।२१॥ अतः परस्य पदान्तस्थस्य रोः स्थाने घोषवति परे उकारो भवति। लुगपवादः[1]। धर्मो जयति। रोरिति किम्? प्रातर्गच्छति॥

**अतोऽति रोरुः** ।१।३।२०॥ अकारात्परस्य पदान्तस्थस्य रोः स्थाने अकारे परे उकारादेशो भवति। कोऽत्र, कोऽर्थः॥

**रो रे लुग्दीर्घश्चादिदुतः**।१।३।४९॥ रेफस्य रेफे परे लुग् भवति, अकारेकारोकाराणां चाऽव्यवहितपूर्वाणां दीर्घो भवति अनु। पुना रमते, मुनी राजते, पटू राजा। अन्विति किम्? जिनो[2] राजते॥

**रो लुप्यरि** ।२।१।७५॥ अहन् शब्दस्य स्यादिलुपि सत्यां पदान्ते रेफवर्जिते वर्णे परे रोऽन्तादेशो भवति। रोरपवादः। अहरधीते। अहर्गणः। अरीति किम्। अहोरूपम्[3]॥

---

१–अवर्ण भो इत्यादिना विहितलुकोऽपवाद इत्याशयः।

२–अत्र पूर्वमुत्वे रेफलोपाभावः। अन्वित्यस्याभावे तु परत्वाद्रेफलोप एव स्यात्। अत्र **वि० वि० कारिका**—
"सामान्यशास्त्रतो नूनं विशेषो बलवान् भवेत्।
परेण पूर्वबाधो वा प्रायशो दृश्यतामिह'॥ इति।
अत्र धर्मो जयतीत्याद्युद्देशेन पूर्वार्धः, जिनो राजते इत्याद्युद्देशेन चोत्तरार्ध इत्याभाति। शास्त्रकृत्तु 'अनु' इत्यधिकरोति। तदेतत्समालोचनीयं तज्ज्ञैः॥

३–अह्न इति रुत्वम्, तत उत्वमोत्वं च।

**अह्नः ।२।१।७४॥** अहन् शब्दस्य पदान्ते रुरित्ययमादेशो भवति । हे दीर्घाहो निदाघ ! । अहोभ्याम् ॥

**वाऽहर्पत्यादयः ।१।३।५८॥** अहर्पत्यादयः शब्दाः यथासंख्यमकृतविसर्गाः कृतोत्वाभावाश्च वा निपात्यन्ते । अहर्पतिः, अह ⌓ पतिः, अहःपतिः । हे प्रचेता राजन् ! । हे प्रचेतो राजन् ! ॥

**एतदश्च व्यञ्जनेऽनग्नञ्समासे ।१।३।४६॥** एतदस्तदश्च परस्य सेर्व्यञ्जने लुग् भवति, अकि नञ्समासे च सति न भवति । एष ददाति, स गच्छति । अनग्नञ्समास इति किम् ? एषकः करोति, असो याति ॥

**तदः सेः स्वरे पादार्था ।१।३।४५॥** तदः परस्य सेः स्वरे परे लुग् भवति, सा चेत्पादपूरणी भवति । सैष दाशरथी रामः । पादार्थेति किम् ? स एष भरतो राजा ॥

**न सन्धिः ।१।३।५२॥** विरामे सन्धिर्न भवति । दधि अत्र, ते आहुः । जिनः जयति । संहितायां तु सन्धिरेव । सा च–

---

१–पुल्लिङ्गे लुबभावाद् रो लुपीति न प्रवर्तते ।

२–अत्र विरामो विलम्बेनोच्चारणं बोध्यम् । अर्धमात्राधिककालविलम्बाभावे तु विरामो नेष्यते । अयमेव विरामाभावः संहितेत्युच्यते ।

"संहितैकपदे नित्या, नित्या धातूपसर्गयोः ।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते[1] ॥ इति ॥

इति रेफसन्धिः,

## ॥ अथ स्वरान्तपुल्लिङ्गप्रकरणम् ॥

**अधातुविभक्तिवाक्यमर्थवन्नाम** ।१।१।२७॥ धातुविभक्त्यन्तवाक्यवर्जितमर्थवद् यच्छब्दरूपं तन्नामसंज्ञं भवति ॥

**स्त्यादिर्विभक्तिः** ।१।१।१९॥ स्यादयस्त्यादयश्च प्रत्ययाः सुप्स्यामहिपर्यन्ता विभक्तिसंज्ञका भवन्ति ॥

**स्यौजसमौशस्टाभ्यांभिस्ङेभ्यांभ्यस्ङसिभ्यांभ्यस्ङसोसांङ्योस्सुपां त्रयी त्रयी प्रथमादिः** ।१।१।१८॥ स्यादीनां प्रत्ययानां त्रयी त्रयी[2] यथासंख्यं प्रथमाद्वितीयातृतीयाचतुर्थीपञ्चमीषष्ठीसप्तमीसंज्ञा भवति । तद्यथा-सि औ जसिति प्रथमा, अम् औ शसिति द्वितीया, टा भ्याम् भिसिति तृतीया, ङे भ्याम् भ्यसिति चतुर्थी, ङसि भ्याम् भ्यसिति पञ्चमी, ङस् ओस् आमिति षष्ठी, ङि ओस् सुप् इति सप्तमी । इकार-जकार-शकार-टकार-ङकार-पकारा इत्संज्ञका अनुबन्धाः । तत्र देवशब्दान्नामसंज्ञायां प्रथमैकवचने सावनुबन्धशब्दलोपे देव स् इति स्थिते,-

---

१-क्वचिद् व्यपेक्षामिति पाठः, स तु न मनोज्ञः । वाक्ये विवक्षाधीना संहितेत्याशयः ।

२-तत्र प्रत्येकं क्रमश एकवचन-द्विवचन-बहुवचन-संज्ञा ज्ञेयाः ।

**तदन्तं पदम्** ।१।१।२०॥ स्याद्यन्तं त्याद्यन्तं च शब्दरूपं पदसंज्ञं स्यात् । रुत्वविसर्गौ, देवः । द्विवचने–देवौ[1] । बहुवचने–देव असिति स्थिते–

**अत आः स्यादौ जस्भ्याम्ये** ।१।४।१॥ स्यादौ जसि भ्यामि यकारादौ च परे अकारस्य आकारो भवति । समानदीर्घः । देवाः ॥

**समानादमोऽतः** ।१।४।४६॥ समानात्परस्य अमोऽकारस्य लुग् भवति । देवम्, देवौ । द्वितीयाबहुवचने देव असिति स्थिते–

**शसोऽता सश्च नः पुंसि** ।१।४।४९॥ शसोऽकारेण सह समानस्य दीर्घः, तत्सन्नियोगे च पुल्लिङ्गविषये शसः सकारस्य नकारो भवति । देवान् ।

तृतीयैकवचने देव आ इति स्थिते–

**टाङसोरिनस्यौ** ।१।४।५॥ अकारात्परयोः स्याद्योः टाङसोः स्थाने यथासंख्यमिन-स्य इत्यादेशौ भवतः । देवेन, देवाभ्याम्[2] । देव भिस् इति स्थिते–

**भिस ऐस्** ।१।४।२॥ अकारात्परस्य स्यादेर्भिसः स्थाने ऐसित्यादेशो भवति । देवैः । चतुर्थ्येकवचने देव ए इति स्थिते–

१–ऐदौदित्यौः । २–अत आ इत्यात्वम् ।

**ङेङस्योर्यातौ** ।१।४।६।। अकारात्परयोः स्यादे ङे-ङस्योर्यथासंख्यं य आत् इत्यादेशौ भवतः । देवाय[1] । देवाभ्याम् । देव भ्यसिति स्थिते-

**एद् बहुस्भोसि** ।१।४।४।। बहुवचने सकारादौ भकारादौ ओसि च स्यादौ परे अकारस्य एकारादेशो भवति । देवेभ्यः ।।

**विरामे वा** ।१।३।५१।। विरामस्थस्य शिड्वर्जस्य धुटः प्रथमो वा स्यात् । देवात्[2], देवाद् । देवाभ्याम्, देवेभ्यः । देवस्य[3] । देवयोः[4] । षष्ठीबहुवचने देव आमिति स्थिते-

**ह्रस्वापश्च** ।१।४।३२।। ह्रस्वान्तादाबन्तात्स्त्रीलिङ्गादीदूदन्ताच्च परस्य आमः स्थाने नामित्यादेशो भवति । देव नामिति स्थिते-

**दीर्घो नाम्यतिसृचतसृषः** १।४।४७।। तिसृचतसृषकारान्तरेफान्तवर्जशब्दसम्बन्धिनः समानस्य स्यादौ नामि परे दीर्घो भवति । देवानाम् । देवे देवयोः । सप्तमीबहुवचने देव सु इति स्थिते एद् बहुस्भोसीत्येत्वे देवे सु इति जाते-

**नाम्यन्तस्थाकवर्गात्पदान्तः कृतस्य सः शिड्नान्तरेऽपि** ।२।३।१५।। नामिनोऽन्तस्थायाः कवर्गाच्च परस्य

---

१-अत आ इत्यात्वम् ।२-आदादेशे समानदीर्घे धुटस्तृतीय इति तृतीयत्वम् ।
३-टाङसोरिति स्यादेशः । ४-एद्बहुस्भोसीत्येत्वे अयादेशः ।

पदमध्ये स्थितस्य कृतस्य सकारस्य स्थाने षो भवति, शिटा नकारेण च व्यवधानेऽपि भवति। देवेषु। सम्बोधने प्रथमैकवचने देव स् इति स्थिते—

**अदेतः स्यमोर्लुक्** ।१।४।४४॥ अकारान्तादेकारान्ताच्च सम्बोधने सेस्तदादेशस्याऽमश्च लुग्भवति। देव! देवौ! देवाः!। एवं जिनसिद्धबुधादयोऽकारान्ताः पुल्लिङ्गाः। सर्वादिषु विशेषः। सर्व, विश्व, उभ, उभयट्, अन्य, अन्यतर इतर, डतर, डतम, त्व, त्वत्, नेम, समसिमौ सर्वार्थौ; पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायाम्, स्वमज्ञातिधनाख्यायाम्, अन्तरं बहिर्योगोपसंव्यानयोरपुरि, त्यद्, तद्, यद्, अदस्, इदम्, एतद्, एक, द्वि, युष्मद्, भवतु, अस्मद्, किम्, इत्यसंज्ञायां सर्वादिः। सर्वः सर्वौ॥

**जस इः** ।१।४।९॥ सर्वादेरकारान्तस्य सम्बन्धिनो जसः स्थाने इकार आदेशो भवति। सर्वे, सर्वम्, सर्वौ, सर्वान्॥

**रषृवर्णान्नो ण एकपदेऽनन्त्यस्याऽलचटतवर्गशसान्तरे** ।२।३।६३॥ रेफषकारऋवर्णेभ्यः परस्यानन्त्यस्य नकारस्य रेफषकारऋवर्णैरेव सहैकपदे वर्तमानस्य णो भवति,

१—सम्बोधनाभिव्यक्तये हे अये रे इत्यादिशब्दप्रयोगोऽपि प्राग् भवति यथा—हे देव इति।

२—प्रत्ययस्येति परिभाषया सर्वस्यादेशो बोध्यः।

न मेन्निमित्तनिमित्तिनोरन्तरे लकार-चवर्ग-टवर्ग-तवर्ग-शकार-सकारा भवन्ति । लादीन् विहाय शेषवर्णव्यवधानेऽपि भवतीत्यर्थः । सर्वेण । एकपदे इति किम् ? अग्निर्नयति । अनन्त्यस्येति किम् ? सर्वान् । लादिवर्जनं किम् ? विरलेन, अर्चनम्, किरीटेन, कीर्तनम्, रशना, रसना । सर्वाभ्याम्, सर्वैः ॥

**सर्वादेः स्मै-स्मातौ** ।१।४।७॥ सर्वादेरकारान्तस्य सम्बन्धिनो ङेङस्योर्यथासंख्यं स्मै स्मात् इत्यादेशौ भवतः । सर्वस्मै, सर्वाभ्याम्, सर्वेभ्यः । सर्वस्मात्, सर्वस्माद्, सर्वाभ्याम् सर्वेभ्यः । सर्वस्य, सर्वयोः । षष्ठीबहुवचने सर्व आमिति स्थिते--

**अवर्णस्यामः साम्** ।१।४।१५॥ अवर्णान्तस्य सर्वादेः सम्बन्धिनः षष्ठीबहुवचनस्यामः स्थाने सामित्यादेशो भवति । एत्वे षत्वे च-सर्वेषाम् । सप्तम्येकवचने सर्व इ इति स्थिते--

**ङेः स्मिन्** ।१।४।८॥ सर्वादेरकारान्तस्य सम्बन्धिनः सप्तम्येकवचनस्य ङेः स्थाने स्मिन्नित्यादेशो भवति । सर्वस्मिन्, सर्वयोः, सर्वेषु । हे सर्व ! हे सर्वौ, हे सर्वे ! ॥

**नवभ्यः पूर्वेभ्य इ स्मात् स्मिन् वा** ।१।४।१६॥

---

१-पदान्ते तृतीयत्वं विकल्पेन प्रथमत्वं बोध्यम् ।

पूर्वादिभ्यो नवभ्यो जसूङसिङीनां यथासंख्यं इ–स्मात् स्मिन् इत्यादेशा वा भवन्ति। पूर्वे, पूर्वाः। पूर्वस्मात्, पूर्वस्माद्, पूर्वात्, पूर्वाद्। पूर्वस्मिन्, पूर्वे। पूर्व, पर, अवर, दक्षिण, उत्तर, अपर, अधर, स्व, अन्तर इति नव पूर्वादयः। शेषं सर्ववत्। एवं परादीनामपि ॥

**नेमार्धप्रथमचरमतयायाल्पकतिपयस्य वा ।१।४।१०॥** नेमादीनाम् अकारान्तानां सम्बन्धिनो जसः स्थाने इर्वा भवति। नेमे नेमाः। शेषं सर्ववत्। तयायौ प्रत्ययौ। ततस्तदन्ता ग्राह्याः। द्वितये, द्वितयाः। त्रितये, त्रितयाः। द्वये, द्वयाः, त्रये, त्रयाः। शेषं देववत् ॥

**द्वन्द्वे वा ।१।४।११॥** द्वन्द्वसमासे वर्त्तमानस्याकारान्तस्य सर्वादेः सम्बन्धिनो जसः स्थाने इर्वा भवति। पूर्वोत्तरे, पूर्वोत्तराः ॥

**न सर्वादिः ।१।४।१२॥** द्वन्द्व समासे सर्वादिः सर्वादिर्न भवति। पूर्वोत्तराय। शेषं देववत् ॥

**तीयं ङित्कार्ये वा। १।४।१४॥** तीयप्रत्ययान्तं नाम ङे ङसिङसूङीनां कार्ये कर्तव्ये वा सर्वादिर्भवति। द्वितीयस्मै, द्वितीयाय। द्वितीयस्मात्, द्वितीयस्माद्, द्वितीयात्,

---

१–द्वावयवावस्येत्यर्थे तयप्रत्ययः। एवं त्रितय इत्यत्रापि। द्वय इत्यत्र त्वयप्रत्ययः। एवं त्रयः।

द्वितीयाद् । द्वितीयस्मिन्, द्वितीये । शेषं देववत् । एवं तृतीयस्मै, तृतीयायेत्यादि । उभशब्दो नित्यं द्विवचनान्तः । उभयशब्दस्य च द्विवचनं नास्ति । उभौ २, उभाभ्याम् ३, उभयोः २ । उभयशब्दस्यैकवचनबहुवचनयोः सर्वशब्दवद् रूपाणि ॥

**मासनिशासनस्य शसादौ लुग्वा । २।१।१००॥** मास–निशा–आसन इत्येषां शसादौ स्यादौ परे लुगन्तादेशो[1] वा भवति । मासः, मासान्, मासा, मासेन ॥

**नाम सिदय्व्यञ्जने । १।२।२१ ॥** सिति प्रत्यये यवर्जव्यञ्जनादौ च परे पूर्वं नाम पदसंज्ञं भवति । माभ्याम्[2] । मासाभ्याम् । सर्वविभक्तिषु वा लुगिति मते प्रथमैकवचनादावपि माः[3] मासः ॥

**दन्तपादनासिकाहृदयासृग्यूषोदकदोर्यकृच्छकृतो दत्पन्नस्हृदसन्यूषन्नुदन्दोषन्यकञ्शकन् वा । २।१। १०१ ॥** दन्त, पाद, नासिका, हृदय, असृज्, यूष, उदक, दोस्, यकृत्, शकृत्, इत्येषां दशानां शब्दानां स्थाने शसादौ स्यादौ परे यथासंख्यं दत्, पद्, नस्, हृद्, असन्, यूषन्, उदन्, दोषन्, यकन्, शकन्, इत्येते दशादेशा

१–षष्ठ्याऽन्तस्येति परिभाषयेति बोध्यम् ।

२–लुगन्तादेशे पदसंज्ञायां रुत्वे अवर्णभो इति रोर्लुकि रूपम् ।

३–लुगन्तादेशे दीर्घङ्याबिति सिलोपे रुत्वे विसर्गे च रूपम् ।

वा स्युः । दतः, दन्तान् । दता, दन्तेन । दद्भ्याम्[1], दन्ताभ्याम् । दद्भ्यः, दन्तेभ्यः । दताम्, दन्तानाम् । दत्सु, दन्तेष्वित्यादि । पदः, पादान् । पदा, पादेन । पद्भ्याम्, पादाभ्यामित्यादि ॥

**अनोऽस्य** । २।१।१०८ ॥ अनोऽकारस्य ङीप्रत्यये स्याद्यघुट्स्वरादौ च परे लुग् भवति । यूष्णः[2], यूषान् । यूष्णा, यूषेण ॥

**नाम्नो नोऽनह्नः** । २।१।९१॥ पदान्ते वर्त्तमानस्य अह्नशब्दवर्जितस्य नाम्नो नकारस्य लुग् भवति । यूषभ्याम्[3] यूषाभ्याम् ॥

**ई ङौ वा** । २।१।१०९ ॥ अनोऽकारस्य ईकारे ङौ च लुग्वा भवति । यूष्णि, यूषणि यूषे । इत्यदन्ताः ।

विश्वपाः, विश्वपौ, विश्वपाः । विश्वपाम् ॥

**लुगातोऽनापः** । २।१।१०७॥ आप् वर्जितस्याकारस्य ङीप्रत्यये स्याद्यघुट्स्वरादौ च लुग् भवति । विश्वपः, विश्वपा, विश्वपाभ्याम् । हे विश्वपाः ! । हाहः[4] हाहाभ्याम् । एवमन्येऽप्यादन्ताः पुल्लिङ्गाः । मुनिः ॥

**इदुतोऽस्त्रेरीदूत्** । १।४।२१॥ स्त्रीशब्दवर्जस्येदन्त-

---

१–नाम सिदिति पदत्वे तृतीयत्वम् । २–रषृवर्णादिति णः । ३–नाम सिदय्विति पदत्वेन लोपः । आत्वं तु न, नलोपासत्त्वादिति बोध्यम् ॥ ४–हाहाशब्दः ।

स्योदन्तस्य च औता सह यथासंख्यमीत् ऊत् इत्यादेशौ भवतः । मुनी ॥

**जस्येदोत्** । १।४।२२॥ इदन्तस्योदन्तस्य च जसि परे यथासंख्यमेत् ओत् इत्यादेशौ भवतः । मुनयः । मुनिम्, मुनीन् ॥

**टः पुंसि ना** । १।४।२४॥ इदन्तादुदन्ताच्च परस्य तृतीयैकवचनस्य टा इत्यस्य स्थाने पुंलिङ्गे ना इत्यादेशो भवति । मुनिना, मुनिभ्याम्, मुनिभिः ॥

**ङित्यदिति** । १।४।२३॥ अदिति[1] ङिति स्यादौ परे इदन्तस्योदन्तस्य च क्रमेण एत् ओत् इत्यादेशौ भवतः । मुनये । मुनिभ्यः ॥

**एदोद्भ्यां ङसिङसो रः** । १।४।३५॥ एत् ओत् इत्याभ्यां परयोर्ङसिङसोः[2] स्थाने रेफादेशो भवति । सूत्रे र-इत्यकार उच्चारणार्थः । मुनेः[3] । मुन्योः मुनीनाम् ॥

**ङि डौ** । १।४।२५॥ इदन्तादुदन्ताच्च परो ङिः डौ-र्भवति ॥

**डित्यन्त्यस्वरादेः** । २।१।१४॥ सन्निविष्टानां स्वराणां

१–यस्य दै इत्याद्यादेशो न भवति तस्मिन् ङिति ङे ङसि ङस् ङि-स्वरूपे स्यादावित्यर्थः । २–प्रत्ययस्येति सर्वस्यादेशः । ३–तदन्तं पदमिति पदत्वे रुत्वे रः पदान्त इति विसर्गः ।

योऽन्त्यः स्वरस्तदादेः शब्दरूपस्य ङिति परे लुग् भवति । मुनौ, मुनिषु ॥

**ह्रस्वस्य गुणः ।** १।४।४१॥ सम्बोधने वर्त्तमानस्य ह्रस्वान्तस्य सिना सह गुणो भवति । हे मुने ! । एवं यति-कवि-रवि-प्रभृतयः । साधुः, साधू, साधवः, साधुम्, साधून् । साधुना, साधुभ्याम्, साधुभिः, साधवे, साधुभ्यः । साधोः, साध्वोः । साधूनाम् । साधौ, साधुषु । हे साधो ! । शेषं मुनिवत् । एवं गुरु-भानुप्रभृतयः ॥

**ऋदुशनस्पुरुदंशोऽनेहसश्च से डा ।** १।४।८४॥ ऋकारान्ताद् उशनस्-पुरुदंशस्-अनेहस् इत्येतेभ्यः सख्युरिकारान्ताच्च परस्य शेषस्य सेः स्थाने डा इत्यादेशो भवति । सखा[2] । सुसखा[3] ॥

**सख्युरितोऽशावैत् ।** १।४।८३॥ सखिशब्दस्येकारान्तस्य शिवर्जिते शेषे घुटि परे ऐकारान्तादेशो भवति । सखायौ, सुसखायौ । सखायः । सखायम् । सखीन ॥

**न ना ङिदेत् ।** १।४।२७॥ केवलात्सखिशब्दात्पतिशब्दाच्च परस्य टाविभक्तेर्नादेशः, ङिति परे एकारश्च न

---

१-अत्र अतिस्त्रिशब्दमप्युदाहरन्ति, तन्नातीवोपयोगीत्युपेक्षितं बोध्यमिह ।

२-डित्यन्त्येतीकारलोपः । ३-सर्वत्र इदन्तसखिशब्दान्ताड्डादेशः । एवमैदादेशोऽपि ।

भवति । सख्या, सख्ये । केवलेति किम् ? सुसखिना । सुसखये ॥

**खितिखीतीय उर् ।** १।४।३६॥ खि-ति-खी-ती-एतत्सम्बन्धिन इवर्णस्थानाद् यकारात्परयोः ङसिङसोः स्थाने उरादेशो भवति । सख्युः । सुसखे ॥

**केवलसखिपतेरौः ।** १।४।२६॥ केवलाभ्यां सखिपतिभ्यामिदन्ताभ्यां परस्य ङेः स्थाने औ इत्यादेशो भवति । सख्यौ । सुसखौ । शेषं मुनिवत् । पत्या, पत्ये, पत्युः । पत्यौ । शेषं मुनिवत् । केवलेत्येव । मुनिपतिना, मुनिपतेः । मुनिपतौ । सर्वं मुनिवदेव । द्विशब्दो नित्यं द्विवचनान्तः ॥

**आद्वेरः ।** २।४।४१॥ द्विशब्दान्तं यावत् त्यदादीनामन्त्यस्य स्वसम्बन्धिनि स्यादौ तसादौ च परे अकारादेशो भवति । द्वौ, द्वाभ्याम्, द्वयोः । स्वसम्बन्धिनीति किम् ? प्रियद्विः । शेषं मुनिवत् । त्रिशब्दो नित्यं बहुवचनान्तः । त्रयः, त्रीन्, त्रिभिः, त्रिभ्यः ॥

**त्रेस्त्रयः ।** १।४।३४॥ आमः सम्बन्धिनस्त्रिशब्दस्य त्रयादेशो भवति ॥

**अनेकवर्णः सर्वस्य ।** ७।४।१०७॥ अनेकवर्ण आदेशः षष्ठ्या निर्दिष्टस्य सर्वस्य स्थाने भवति । त्रयाणाम् । आमः

---

१-ङित्यदित्यस्य न ना ङिदेदिति निषेधे इवर्णादेरिति यादेशे पश्चादुर् ।

सम्बन्धिन इति किम्? प्रियत्रीणाम्। त्रिषु। कतिशब्दो नित्यं बहुवचनान्तः ॥

**डतिष्णः संख्याया लुप्** ।१।४।५४॥ डतिप्रत्ययान्तायाः षकारान्ताया नकारान्तायाश्च संख्यायाः सम्बन्धिनोर्जस्शसोर्लुप् भवति। कति, कतिभिः, कतिभ्यः, कतीनाम्, कतिषु। स्वसम्बन्धिनोरेव, तेनेह न।[1] प्रियकतयः, प्रियकतीन्। एवं यतिततिशब्दौ। नीः ॥

**धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये** ।२।१।५०॥ धातुसम्बन्धिन इवर्णस्योवर्णस्य च स्थाने स्वरादौ प्रत्यये परे यथासंख्यमियुवु इत्यादेशौ भवतः। नियौ,[2] नियः। नियम्, नियः। निया, नीभ्याम् नीभिः। निये नीभ्यः। नियः, नियोः, नियाम् ॥

**निय आम्** ।२।४।५१॥ नियः परस्य ङेः स्थाने आमित्यादेशो भवति। नियाम्, नीषु, हे नीः। लूशब्दो नीशब्दवत्। सेनानीः ॥

**क्विब्वृत्तेरसुधियस्तौ** ।२।१।५८॥ क्विबन्तेनैव यः सुधीशब्दवर्जितः समासस्तत्सम्बन्धिनो धातोरिवर्णोवर्णस्य

---

१–अत्र हि प्रियकतिसम्बन्धिनौ जस् शसौ न तु कतिशब्दसम्बन्धिनाविति लुग् न भवति। २–अत्र नामत्वात्स्यादयः, धातुत्वाच्चेयादयः, एवमन्यत्रापि बोध्यम्। "क्विबन्ता धातुत्वं नोज्झन्ति नामत्वं च प्रतिपद्यन्ते" इति सिद्धान्तात्।

स्थाने स्वरादौ स्यादौ परे यथासंख्यं यकारवकारादेशौ भवतः। सेनान्यौ, सेनान्यः। सेनान्यम्, सेनान्या। सेनान्याम्[1], सेनानीषु। हे सेनानीः। एवं ग्रामण्यादयः। सुधीशब्दो नीशब्दवत्। सुल्वः। सुल्वि। शेषं सेनानीवत्। एवं खलपू-प्रभृतयः। दृन्भूः[2]।

**दृन्पुनर्वर्षाकारैर्भुवः** ।२।१।५९।। दृन्-पुनर्-वर्षा--कार-एतत्पूर्वस्य क्विबन्तभूधातोरुवर्णस्य स्थाने स्वरादौ स्यादौ परे वकारादेशो भवति। दृन्भ्वौ। दृन्भ्वि। शेषं सेनानीवत्। पुनर्भूः[3]। वर्षाभूः। शेषं दृन्भूवत्। एतत्पूर्वस्यैव भूधातोः क्विबन्तस्य वो नाऽन्यस्य, तेनेह न- स्वयम्भुवौ। शेषं लूवत्। यवक्रीः॥

**संयोगात्** ।२।१।५२।। धातुसम्बन्धिन इवर्णोस्योवर्णस्य च धातुसम्बन्धिन एव संयोगात्परस्य स्थाने स्वरादौ प्रत्यये परे इयुवादेशौ भवतः। य्वोरपवादः। यवक्रियौ। यवक्रियि। शेषं नीवत्। एवं कटप्रू-प्रभृतयः। उन्नीः। उन्न्यः[4]। उन्न्याम्[5]। सुश्रीः[6]॥

**वेयुवोऽस्त्रियाः** ।१।४।३०।। इयुवोः स्थानिनौ स्त्रीशब्द-वर्जितौ यौ नित्यस्त्रीदूतौ तदन्तात्परेषां स्यादिङितां स्थाने

---

१-निय आमिति ङेराम्। २-हिंसकः। ३-मण्डूकः। ४-धातु-सम्बन्धिनः संयोगात्परत्वाभावान्नेयादेशः। ५-ङेराम्। ६-शोभना श्रीर्यस्य सः।

यथासंख्यं दै दास् दास् दाम्-इत्यादेशा वा भवन्ति। सुश्रियै, सुश्रिये। सुश्रियाः, सुश्रियः॥

**आमो नाम् वा** ।१।४।३१॥ इयुवोः स्थानिनौ स्त्रीशब्द-वर्जितौ यौ नित्यस्त्रीदूतौ तदन्तात्परस्यामः षष्ठीबहुवचनस्य स्थाने नामित्यादेशो वा भवति। सुश्रीणाम्, सुश्रियाम्। सुश्रियाम्, सुश्रियि। हे सुश्रीः। अतिभ्रूः॥

**भ्रूश्नोः** ।२।१।५३। भ्रूशब्दसम्बन्धिनः श्नुप्रत्यय-सम्बन्धिनश्चोवर्णस्य संयोगात्परस्य स्थाने स्वरादौ प्रत्यये परे उवादेशो भवति। अतिभ्रुवौ। अतिभ्रुवै, अतिभ्रुवे। अति-भ्रूणाम्, अतिभ्रुवाम्, अतिभ्रुवि। हे अतिभ्रूः। सखीः॥

**योऽनेकस्वरस्य** ।२।१।५६॥ अनेकस्वरस्य धातोः सम्बन्धिनः इवर्णस्य स्थाने स्वरादौ प्रत्यये परे यादेशो भवति। सख्यौ। सख्यः। सख्या। सख्युः। सख्याम्। सख्यि। पतीः, पत्यौ। पत्याम्। पत्यि। वसूः॥

**स्यादौ वः** ।२।१।५७॥ अनेकस्वरस्य धातोः सम्ब-न्धिन उवर्णस्य स्थाने स्वरादौ स्यादौ परे वकारादेशो भवति। वस्वौ, वस्वः। वस्वाम्, वस्वि। पिता, अतिपिता॥

१-नित्यदित्वाभावान्न ह्रस्वः। २-सखायं पतिं वसु चेच्छतीत्यर्थे सखीय-पतीय-वसूयेति नामधातोः क्विपि सखी-पती-वसू-शब्दाः। ३-ऋदुशनसिति डाः।

अर्डौँ च ।१।४।३९॥ ऋकारस्य स्थाने ङिविभक्तौ घुटि च परे अरित्यादेशो भवति। पितरौ, अतिपितरौ, पितॄन्, अतिपितॄन्। पित्रा, अतिपित्रा।

ऋतो डुर् ।१।४।३७॥ ऋकारात्परयोर्ङसिङसोः स्थाने डुर् इत्ययमादेशः स्यात्। पितुः, अतिपितुः पितॄणाम्, अतिपितॄणाम्। पितरि, अतिपितरि। पितृषु, अतिपितृषु। पितः। अतिपितः। एवं भ्रातृदेवादयः। ना, नरौ, नॄन्। त्रा, नुः, त्रोः॥

नुर्वा ।१।४।४८॥ नृशब्दसम्बन्धिनः समानस्य नामि परे दीर्घो वा स्यात्। नृणाम्, नॄणाम्, नरि, नृषु। हे नः। कर्ता॥

तृस्वसृनप्तृनेष्टृत्वष्टृक्षतृहोतृपोतृप्रशास्त्रो घुट्यार् ।१।४।३८॥ तृच्प्रत्ययान्तस्य तृन्प्रत्ययान्तस्य स्वस्रादिशब्दानां च सम्बन्धिन ऋकारस्य स्थाने घुटि परे आरित्यादेशो भवति। कर्तारौ। अतिकर्तारौ। शसादिषु पितृवत्॥

क्रुशस्तुनस्तृच् पुंसि ।१।४।९१॥ क्रुशधातोः परो यस्तुन् तस्य शेषे घुटि परे तृजादेशो भवति, पुंसि। क्रुशधातोस्तुन् प्रत्यये क्रोष्टुशब्दः, ततः सौ-क्रोष्टा, क्रोष्टारौ। क्रोष्टून्॥

१—डित्यन्त्येति ऋकारस्य लुक्। २—ह्रस्वस्य गुणः। ३—सेर्डाः। जम्बूकः।

**टादौ स्वरे वा** ।१।४।९२।। टादौ स्वरादौ स्यादौ परे क्रुशः परस्य तुनस्तृजादेशो वा भवति । क्रोष्ट्रा, क्रोष्टुना । क्रोष्ट्रे, क्रोष्टवे । क्रोष्टुः, क्रोष्टोः । क्रोष्ट्रोः, क्रोष्ट्वोः । क्रोष्टूनाम् । क्रोष्टरि, क्रोष्टौ । क्रोष्टुषु । हे क्रोष्टो ! । अतिहेः । अतिहयौ । अतिहया । अतिहेः । अतिहयोः । अतिहयाम् । अतिहयि । हे अतिहे ! ।।

**आ रायो व्यञ्जने** ।२।१।५।। रैशब्दस्य व्यञ्जनादौ स्यादौ परे आकारान्तादेशो भवति । सुराः । सुरायौ । सुराभ्याम् । सुरायाम् । हे सुराः ! ।।

**ओत औः** ।१।४।७४।। ओकारस्य ओकारान्तादेव विहिते घुटि परे औकार आदेशो भवति । गौः, गावौ ।।

**आ अम् शसोऽता** ।१।४।७५।। ओकारस्य अम्शसो-रकारेण सह आकारो भवति । गाम्, गाः । गवा, गोभ्याम् । गोः, गवाम् । गोषु । हे गौः ! । एवं सुद्योप्रभृतयः । [3]ग्लौः । ग्लावौ । ग्लावः । ग्लावाम् । ग्लौषु । एवं सुनौप्रभृतयः ।

**इति स्वरान्तपुंलिङ्गप्रकरणम् ।।**

---

१–ह्रस्वस्य गुणः, से लुक् । २–धनवान् । ३–चन्द्रः ।

## ॥ अथ स्वरान्तस्त्रीलिङ्गप्रकरणम् ॥

तत्र आकारान्तः स्त्रीलिङ्गो गङ्गाशब्दः ॥

**दीर्घङ्याब्व्यञ्जनात्सेः ।१।४।४५॥** दीर्घाभ्यां ङ्याब्भ्यां व्यञ्जनाच्च परस्य सेः स्थाने लुक् स्यात् । अनेन सेर्लुकि, गङ्गा ॥

**औता ।१।४।२०॥** आबन्तस्य प्रथमाद्वितीयाद्विवचनेन औकारेण सह एकारान्तादेशो भवति । गङ्गे । गङ्गाः । गङ्गाम्, गङ्गा[1]: ॥

**टौस्येत् ।१।४।१९॥** आबन्तस्य टौसोः परयोरेकारान्तादेशो भवति । गङ्गया, गङ्गाभ्याम् । गङ्गाभिः ॥

**आपो ङितां यै यास् यास् याम् ।१।४।१७** आबन्तस्य स्यादेर्ङितां ङेङसिङस्ङीनां स्थाने क्रमेण यै यास् यास् याम् इत्यादेशा भवन्ति । गङ्गायै । गङ्गाभ्यः । गङ्गायाः । गङ्गयोः । गङ्गानाम् । गङ्गायाम् । गङ्गासु ॥

**एदापः ।१।४।४२॥** सम्बोधने आबन्तस्य सिना सह एकारान्तादेशो भवति । हे गङ्गे । एवं खट्वा–प्रभृतयः ॥

**नित्यदिद्द्विस्वराम्बार्थस्य ह्रस्वः ।१।४।४३** नित्यं दित्=दैदास्दास्दामादेशा येभ्यस्तेषां द्विस्वराम्बार्थानां चाऽऽबन्तानां सम्बोधने सिना सह ह्रस्वान्तादेशो भवति । हे

---

१–पुंस्त्वाभावान्न नादेशः ।

अम्ब[1] !, हे अक्क ! हे अत्त ! हे अल्ल !, शेषं गङ्गावत् । निशः[2], निशाः । निशा, निशया । निड्भ्याम्[3], निशाभ्याम् । निड्भिः, निशाभिः । निच्छु[4], निशासु । नसः[5], नासिकाः । नसा, नासिकया । नोभ्याम्[6], नासिकाभ्याम् । नस्सु[7], नःसु, नासिकासु । शेषं व्यञ्जनान्तवदाबन्तवच्च यथायथं बोध्यम् ॥

**सर्वादेर्डस्पूर्वाः ।१।४।१८॥** सर्वादेराबन्तस्य ये ङितां यै यास् यास् यामस्ते डस्पूर्वा भवन्ति । सर्वस्यै,[8] सर्वस्याः, सर्वासाम् । सर्वस्याम् । शेषं गङ्गावत् । द्वितीयस्यै, द्वितीयायै[9], द्वितीयस्याम्, द्वितीयायाम् । एवं तृतीया । शेषं गङ्गावत् ॥

**जराया जरस् वा ।२।१।३॥** स्वरादौ स्यादौ परे जराशब्दस्य जरस् इत्यादेशो वा भवति । जरसौ, जरे । जरसः, जराः । जरसा, जरया । जरसोः, जरयोः । जरसाम्, जराणाम् । जरसि, जरायाम् । शेषं गङ्गावत् । बुद्धीः ॥

**स्त्रियां ङितां वा दै दास् दास् दाम् ।१।४।२८॥** **स्त्रिलिङ्गेदुदन्तात्परेषां स्यादेर्ङितां स्थाने क्रमेण दै दास्**

---

१–अम्बादयो मातृवाचकाः । २–मासनिशेत्यादिनाऽन्त्यलुक् । ३–तृतीयस्तृतीयचतुर्थे इति तृतीयत्वम् । ४–अन्त्यलोपे तृतीयत्वे अघोष इति प्रथमत्वे सस्य शषाविति शत्वे प्रथमादधुटीति छत्वम् । ५–दन्तपादेत्यादिना नासिकाशब्दस्य नसादेशः । ६–नाम सिदिति पदत्वे रुत्वे उत्वे ओत्वम् । ७–पदत्वाद्रुत्वे शषसेति सत्वम्, विकल्पे विसर्गः । ८–आदौ यै इत्यादेशः, पश्चाद् डस्पूर्वः । एवमग्रेऽपि । ९–तीयं ङित्कार्ये वेति सर्वादित्वम् ।

दास् दामित्यादेशा वा भवन्ति । बुद्ध्यै, बुद्धये । बुद्ध्याः, बुद्धेः । बुद्ध्याम्, बुद्धौ । शेषं मुनिवत् । एवं मति–गति–रति प्रभृतयः । धेनूः । धेन्वै, धेनवे । धेन्वाः, धेनोः । धेन्वाम्, धेनौ । शेषं साधुवत् । नदी । नद्यौ । नद्यः । नदीम्, नदीः । नद्या, नदीभ्याम्, नदीभिः ॥

**स्त्रीदूतः** ।१।४।२९॥ नित्यस्त्रीलिङ्गादीकारान्तादूकारान्ताच्च शब्दात्परेषां स्यादेर्ङितां स्थाने यथासंख्यं दै दास् दास् दामित्यादेशा भवन्ति । नद्यै । नद्याः । नदीनाम् । नद्याम् । नदीषु । हे नदि ! । एवं गौरीप्रभृतयः ॥

**स्त्रियाः** ।२।१।५४॥ स्त्रीशब्दसम्बन्धिन इवर्णस्य स्वरादौ प्रत्यये परे इयादेशो भवति । स्त्रियौ, स्त्रियः ॥

**वाम्–शसि** ।२।१।५५॥ स्त्रीशब्दसम्बन्धिन इवर्णस्य अमि शसि च परे इयादेशो वा भवति । स्त्रियम्, स्त्रीम् । स्त्रियः, स्त्रीः । शेषं नदीवत् । लक्ष्मीः । शेषं नदीवत् । वधूः, वध्वौ, वध्वः । वधूः । वध्वा, वध्वै । हे वधु ! । श्रीह्रीधीशब्दाः सुश्रीवत् । भूः स्वयंभूवत् । भ्रूरतिभ्रूवत् ॥

**त्रिचतुरस्तिसृचतसृ स्यादौ** ।२।१।१॥ स्त्रीलिङ्गे वर्त्तमानयोस्त्रिचतुरोः स्थाने स्यादौ विभक्तौ परे यथासंख्यं तिसृ–चतसृ इत्यादेशौ भवतः ॥

---

१–ङ्यन्तत्वात् सिलोपः । २–अङ्यन्तत्वान्न सिलोपः ।

ऋतो रः स्वरेऽनि ।२।१।२॥ तिसृचतसृ इत्येतयो ऋकारस्य स्थाने स्वरादौ स्यादौ परे रेफादेशो भवति नकारविषयादन्यत्र । तिस्रः । तिसृभिः, तिसृभ्यः । तिसृणाम् । मातॄः । शेषं पितृवत् । स्वसा, स्वसॄः । स्वस्रा, स्वसुः । स्वसरि । हे स्वसः ! ॥

स्त्रियाम् ।२।४।१॥ स्त्रियां क्रुशः परस्य तुनस्तृजादेशो भवति । क्रोष्ट्री । शेषं नदीवत् । रै गो नौ शब्दाः प्राग्वत् ।

॥ इति स्वरान्तस्त्रीलिङ्गप्रकरणम् ॥

## अथ स्वरान्तनपुंसकलिङ्गप्रकरणम् ॥

अतः स्यमोम् ।१।४।५७॥ अकारान्तनपुंसकसम्बन्धिनोः स्यमोरमादेशो भवति । कुलम् ।

औरीः ।१।४।५६॥ नपुंसकस्य सम्बन्धी औकार ईकारो भवति । कुले ॥

नपुंसकस्य शिः ।१।४।५५॥ नपुंसकस्य सम्बन्धिनोर्जस् शसोः स्थाने शिः इत्यादेशो भवति । शकार इत् ॥

स्वराच्छौ ।१।४।६५॥ शौपरे स्वरान्तान्नपुंसकात्परो नोऽन्तो भवति ॥

शिर्घुट् ।१।१।२८। जस्–शसादेशः शिर्घुट्संज्ञको भवति ॥

---

१–स्त्रियां नृत इति ङीः । २–समानादमोऽतः ।

**नि दीर्घः ।१।४।८५।।** शेषे[1] घुटि परे यो नकारस्तस्मिन् परे पूर्वस्य स्वरस्य दीर्घो भवति। कुलानि। द्वितीयायां प्रथमावत्। हे कुल[2]! । शेषं देववत्। सर्वम्, सर्वे सर्वाणि। एवं द्वितीयायामपि। हे सर्व! । शेषं पुंवत्॥

**पञ्चतोऽन्यादेरनेकतरस्य दः ।१।४।५८।।** एकतरशब्दवर्जस्य सर्वादेरन्यादिपञ्चकस्य नपुंसकस्य सम्बन्धिनोः स्यमोः स्थाने द् इत्यादेशो भवति। अन्यत्[3], अन्यद्। इतरत्, इतरद्, अन्यतरत्, अन्यतरद्। कतरत्, । कतरद्। कतमत्, कतमद्। शेषं सर्ववत्। एकतरम्। शेषं सर्ववत्। आसानि[4], आसनानि। आस्ना, आसनेन। आसभ्याम्[5], आसनाभ्याम्। आस्नि[6], आसनि, आसने॥

**धुटां प्राक् ।१।४।६६।।** स्वरात्परा या धुङ्जातिस्तदन्तस्य नपुंसकस्य धुड्भ्य एव प्राक् शौ परे नोऽन्तो भवति। हृन्दि[7], हृदयानि। हृदा, हृदयेन। हृद्भ्याम्, हृदयाभ्याम्। उदानि, उदकानि। उद्ना, उदकेन। उद्भ्याम्, उदकाभ्याम्। उद्नि, उदनि, उदके। शेषं यूषन्वत्। पक्षे कुलवच्च॥

---

१—सम्बोधनैकवचनं विहाय शिस्यमौजसः शेषघुट्शब्देनोच्यन्त इति ध्येयम्। २—अदेतः स्यमोर्लुक्। ३—विरामे वा। ४—मासनिशासनस्य शसादौ लुग्वा। ५—नाम्नो नोऽनह्नः। ६—ईङौ वा। ७—म्नामिति बहुवचनसामर्थ्याद् वर्गान्त्य एव भवति णत्वं बाधित्वेति ध्येयम्।

**क्लीबे** ।२।४।९७।। नपुंसके वर्तमानस्य स्वरान्तस्य नाम्नो ह्रस्वो भति। श्रीपम् । शेषं कुलवत् । एवं विश्वपादयः।।

**अनतो लुप्** ।१।४।५९।। अकारान्तवर्जस्य क्लीबस्य सम्बन्धिनोः स्यमोः स्थाने लुप् भवति । वारि ।।

**अनाम्स्वरे नोऽन्तः** ।१।४।६४।। नाम्यन्तक्लीबस्य सम्बन्धिनि आम्वर्जे स्वरादौ स्यादौ परे नोऽन्तो भवति। वारिणी, बारीणि । वारिणा, वारिणे, वारिणः, वारिणोः, वारीणाम्[1] । वारिणि ।।

**नामिनो लुग्वा** ।१।४।६१।। नाम्यन्तक्लीबस्य सम्बन्धिनोः स्यमोः स्थाने लुग् वा भवति । हे वारि, हे वारे[2] ! । शेषं मुनिवत् । मधु, मधुनी, मधूनि, मधुना, हे मधो, हे मधु ! । शेषं वारिवत् ।।

**दध्यस्थिसक्थ्यक्ष्णोऽन्तस्यान्** ।१।४।६१।। दधि, अस्थि, सक्थि, अक्षि–इत्येषां नाम्यन्तानां नपुंसकानामन्त्यस्य स्थाने टादौ स्वरादौ परे अन् इत्यादेशो भवति । दध्ना[3],दध्ने, दध्नः, दध्नोः, दध्नाम्, दध्नि, दधनि[4] । शेषं वारिवत् ।।

---

१–ह्रस्वापश्चेति नाम् । दीर्घो नामिति दीर्घे णत्वम् । २–लुकि स्थानिवद्भावेन गुणः, लुपि तु न स्थानिवत्त्वम्, "लुप्यय्वृल्लेनत्" इति निषेधादिति लुग्विकल्पे लुपि न गुण इति बोध्यम् । ३–अनोऽस्य । ४–ई ङौ वा ।

**वाऽन्यतः पुमांष्टादौ स्वरे** ।१।४।६२॥ विशेष्यवशान्नपुंसकस्य नाम्यन्तस्य नाम्नः टादौ स्वरादौ परे पुंवद्वा भवति । अनेन पुंवद्भावे नागमह्रस्वयोरभावः। ततश्च पक्षे पुंवद्रूपम् । पटुना, पटुने, पटवे । पटोः, पटुनः । पटुनोः, पट्वोः । पटूनाम् । पटौ पटुनि । क्लीबे दीर्घान्तं नाम न भवति, ह्रस्वविधानात्। एवं च नी–ग्रामणीप्रभृतीनां वारिवत् पक्षे च पुंवद्रूपं बोध्यम् । कर्तृ, कर्तृणी, कर्तॄणि। हे कर्त्तः, हे कर्तृ ! । कर्त्रा, कर्तृणा, कर्तुः, कर्तृणः, कर्तरि, कर्तृणि । एकारैकारान्तानां ह्रस्वत्वेन वारिवद्–रूपाणि । ओकारौकारान्तानां ह्रस्वत्वे मधुशब्दवद्रूपाणि । अतिहि । अतिरि । व्यञ्जनादावात्वम् । अतिराभ्याम् । अतिरीणाम् । अतिगु, अतिनु, इत्यादि ।

## ॥ इति स्वरान्तनपुंसकलिङ्गप्रकरणम् ॥

## ॥ अथ व्यञ्जनान्तपुंलिङ्गप्रकरणम् ॥

**चकारान्तः सुवाच्शब्दः** ॥

**चजः कगम्** ।२।१।८६॥ चकारजकारयोः स्थाने धुडादौ प्रत्यये परे पदान्ते च ककारगकारादेशौ भवतः । सुवाक्, सुवाग् । सुवाचौ । सुवाचः । सुवाचा, सुवाग्भ्याम् ।

१–पुंलिङ्गे क्लीबे नामादेशे दीर्घः ॥ २- विरामे वा ।

३–नामेति पदत्वे ककारादेशे तृतीयत्वम् ।

सुत्रोक्षु। एवं पयोमुच्प्रभृतयः। क्विबन्तात् प्रत्यच्शब्दात्सौ प्रत्यच् स् इति स्थिते॥

अचः।१।४।६९॥ धुडन्तस्याञ्च्धातोर्घुटि परे धुटः प्राग् नोऽन्तो भवति॥

पदस्य।२।१।८९॥ पदान्ते वर्तमानस्य संयोगस्य लुगन्तादेशो भवति॥

युजञ्च्क्रुञ्चो नो ङः।२।१।७१॥ युज्-अञ्च्-क्रुञ्चां नकारस्य पदान्ते वर्त्तमानस्य ङकारादेशो भवति। प्रत्यङ्, प्रत्यञ्चौ। हे प्रत्यङ्॥

अच्च् प्राग् दीर्घश्च।२।१।१०४॥ नकाररहितस्याञ्च्धातोः सर्वस्य णि-क्य-घुट्वर्जे यकारादौ स्वरादौ च ³प्रत्यये परे चकारादेशो भवति, पूर्वस्वरस्य च दीर्घो भवति। प्रतीचः। प्रत्यग्भ्याम्। प्रत्यक्षु। प्राङ्, प्राञ्चम्, प्राचः, प्राग्भ्याम्। प्राक्षु, हे प्राङ्!॥

उदच उदीच्।२।१।१०३॥ कृतनलोपस्य उत्पूर्वकस्याञ्च्धातोरुदच् इत्यस्य णिक्यघुड्वर्जे यकारादौ स्वरादौ च

१–पदत्वे कत्वे तृतीयत्वे अघोष इति प्रथमत्वे षत्वम्। २–म्नामिति पञ्चमत्वम्। केचित्तु तवर्गस्येति चवर्गमाहुः। ३–अच्चेत्यादिसूत्रविषये प्राग् इवर्णादेरिति न प्रवर्तते दीर्घारम्भसामर्थ्यात्। पूर्वं पूर्वोत्तरपदयोः कार्यं पश्चात्सन्धिकार्यमिति ज्ञापनाच्च।

प्रत्यये परे उदीच् इत्यादेशो भवति। उदङ्[1], उदञ्चः, उदीचः। उदग्भ्याम्, उदक्षु॥

**सहसमः सध्रिसमि।३।२।१२३॥** सह-सम् इत्येतयोः स्थाने क्विबन्तेऽञ्चतौ उत्तरपदे परे यथासंख्यं सध्रिसमि इत्येतावादेशौ भवतः। सध्र्यङ्, सध्र्यञ्चौ, सध्रीचः। सध्र्यग्भ्याम्, सध्र्यक्षु, हे सध्र्यङ्!। सम्यङ्, सम्यञ्चः, समीचः, समीचा, सम्यग्भ्याम्, सम्यक्षु, हे सम्यङ्॥

**तिरसस्तिर्यति।३।२।१२४॥** तिरस्शब्दस्य अकारादौ क्विबन्तेऽञ्चतावुत्तरपदे परे तिरि इत्यादेशो भवति। तिर्यङ्, तिर्यञ्चौ, तिरश्चः[2]। तिरश्चा, तिर्यग्भ्याम्, तिर्यक्षु॥

**यज-सृज-मृज-राज-भ्राज-भ्रस्ज-व्रश्च-परिव्राजः शः षः।२।१।८७॥** यजादीनां चकारस्य जकारस्य शकारान्तस्य धातोः शस्य च धुडादौ प्रत्यये परे पदान्ते च षकारादेशो भवति। देवपूर्वाद् यजेः क्विपि देवेज् शब्दः। देवेट्[3], देवेड् देवेजौ, देवेजा देवेड्भ्याम्, देवेड्त्सु[4] देवेट्सु, हे देवेट्, हे देवेड्। तीर्थसृट्, तीर्थसृड्, तीर्थसृजौ। तीर्थसृड्भ्याम्, तीर्थसृड्त्सु, तीर्थसृट्सु। कंसपरिमृट्, कंसपरिमृड्, कंसपरिमृजः, कंसपरिमृड्भ्याम्, कंसपरिमृड्त्सु, कंस-

१—नोऽन्तः, संयोगान्तलोपे ङादेशः। २—सस्य शषौ। ३—षत्वे तृतीयत्वे प्रथमत्वम्। ४—षत्वे तृतीयत्वे ङ्नः त्स इति त्सादेशः। सूत्रे डकारनिर्देशात्प्रथमत्वं न भवति। टवर्गस्तु पदान्तादिति निषिध्यते।

परिमृट्सु । विभ्राट्, विभ्राड् । शेषं देवेज् शब्दवत् । सम्राट्[1], सम्राड् । शेषं विभ्राज् शब्दवत् ॥

**संयोगस्यादौ स्कोर्लुक्** ॥२।१।८८॥ धुडादौ प्रत्यये पदान्ते च यः संयोगस्तदादिस्थयोः सकारककारयोर्लुग् भवति । धानाभृट्, धानाभृड्[2] । धानाभृज्जौ[3] । धानाभृज्जा । धानाभृड्भ्याम् । धानाभृड्त्सु, धानाभृट्सु । मूलवृट्, मूलवृड्[4] । मूलवृश्चौ, मूलवृड्भ्याम् । मूलवृड्त्सु, मूलवृट्सु । परिव्राट्, परिव्राड् , परिव्राजौ, परिव्राड्भ्याम् ॥

**युजोऽसमासे** ।१।४।७१॥ रुधादेर्युज्धातोरसमासे धुडन्तस्य धुटः प्राग् घुटि परे नोऽन्तो भवति । युङ्, युञ्जौ । युजः, युग्भ्याम् , युक्षु, हे युङ् ! । असमास इति किम् ? अश्वयुक्, अश्वयुग् । अश्वयुजौ । अश्वयुग्भ्याम् । अश्वयुक्षु । एवं सुयुजादयः । दिवादेर्युज्धातोर्न भवति । युक्, युग् । युजौ । युग्भ्याम्, युक्षु ॥

**ऋत्विज् दिश् दृश् स्पृश् स्रज् दधृषुष्णिहो गः** ।२।१।६९॥ एषां पदान्ते गकारादेशो भवति । ऋत्विक्,

---

१—निपातनान्नानुस्वारः । २—धानाभृस्ज्शब्दः क्विबन्तः । संयोगादिलोपे षत्वे तृतीयत्वादि । ३—सस्य शषौ । तृतीयस्तृतीयचतुर्थे ।
४—सकारोपदिष्टं कार्यं लक्ष्यानुसारादत्र शास्त्रे शकारस्यापि भवतीति संयोगादेः सकारस्यात्र लुक् ।

ऋत्विग्, ऋत्विजौ, ऋत्विग्भ्याम् । ऋत्विक्षु । मरुत्, मरुद् । मरुतौ, मरुद्भ्याम्, मरुत्सु ॥

**ऋदुदितः ।१।४।७०॥** ऋदित उदितश्च धुडन्तस्य घुटि परे धुटः प्राक् स्वरात्परो नोऽन्तो भवति ॥

**न्स्महतोः ।१।४।८६॥** न्सन्तस्य महतश्च सम्बन्धिनः स्वरस्य शेषे घुटि परे दीर्घो भवति । महान् । महान्तौ । महद्भ्याम्, महत्सु, हे महन् । पचन्, पचन्तौ, पचतः, पचद्भ्याम्, पचत्सु । एवमन्येऽपि शत्रन्ताः । उकारानुबन्धो भवत् शब्दः ।

**अभ्वादेरत्वसः सौ ।१।४।९०॥** अत्वन्तस्याऽसन्तस्य च भ्वादिवर्जितस्य सम्बन्धिनः स्वरस्य शेषे सौ परे दीर्घः स्यात् । भवान्, भवन्तौ, भवतः, भवद्भ्याम्, भवत्सु, हे भवन्! । गोमान्, गोमन्तौ, गोमतः, गोमद्भ्याम्, गोमत्सु । हे गोमन्! । दधिमत्, दधिमद् । दधिमथौ, दधिमद्भ्याम् । दधिमत्सु ॥

**लुगस्यादेत्यपदे ।२।१।११३॥** अपदादावकारे एकारे च परे अकारस्य लुग् भवति ॥

**तः सौ सः ।२।१।४२॥** द्विपर्यन्तत्यदादीनां तकारस्य

१–नाम सिदिति पदत्वम् । २–पदत्वे गत्वे अघोष इति प्रथमत्वे षत्वम् । ३–पदस्येति तकारलोपः । ४–आदौ दीर्घः पश्चान्नोऽन्तः । ५–धुटस्तृतीयः, विरामे वा । ६–पदत्वे धुटस्तृतीयः, अघोषे इति प्रथमः ।

स्वसम्बन्धिनि सौ परे सकारादेशो भवति। स्यः। त्यौ, त्ये। त्यम्, त्यान्। त्येन, त्याभ्याम्, त्यैः। त्यस्मै, त्येभ्यः। त्यस्मात्, त्यस्माद्, त्ययोः, त्येषाम्, त्यस्मिन्, त्येषु। त्यदादेः[2] सम्बोधनं नास्तीत्युत्सर्गः। सः, शेषं त्यद्वद्। यः, एषः[3]। शेषं त्यद्वत्॥

**त्यदामेनदेतदो द्वितीयाटौस्यवृत्त्यन्ते** ।२।१।३३॥ त्यदादीनां सम्बन्धिन एतदित्यस्य द्वितीयायां टायामोसि च परे अन्वादेशे एनदित्यादेशो भवति, न तु वृत्त्यन्ते। कथितस्यानुकथनमन्वादेशः। कस्यचिद् वस्तुनः किञ्चित् क्रियादिकं विधातुं कथितस्य तेनान्येन वा शब्देन पुनरन्यत् क्रियादिकं विधातुं कथनमित्यर्थः। आगत एषः, अथो एनं[4] भोजय। एनौ, एनान्, एनेन, एनयोः॥

**इदमः**[5] ।२।१।३४॥ त्यदादीनां सम्बन्धिन इदमित्यस्य द्वितीयायां टायामोसि च परेऽन्वादेशे एनदित्यादेशो भवति, न तु वृत्त्यन्ते॥

**गडदबादेश्चतुर्थान्तस्यैकस्वरस्यादेश्चतुर्थः स्ध्वोश्च प्रत्यये** ।२।१।७७॥ गडदबादेश्चतुर्थान्तस्यैकस्वरस्य धातोरव-

---

१–अाद्वेर इत्यत्वम्। २–क्वचिद् हे सः! हे असौ! इत्याद्यपवादः।
३–अत्वलुकोः कृतयोः सत्वे नाम्यन्तस्थेति षः। ४–अत्वलुकौ।
५–प्रसङ्गादत्रेदं सूत्रमुपात्तम्। उपयोगस्तु मकारान्तेषु इदम् शब्दे।

यवस्यादेश्चतुर्थों भवति पदान्ते सकारादौ ध्वादौ च प्रत्यये परे। धर्मभुत्[1], धर्मभुद्। हे धर्मभुत्, द्। धर्मबुधौ। धर्मभुद्भ्याम्[2]। धर्मभुत्सु। राज्ञा[3]। राजानौ, राज्ञः[4]। राजभ्याम्[5], राजभिः। राजभ्यः। राज्ञि, राजनि[6]। राजसु ॥

**नामन्त्र्ये ।२।१।९२॥** सम्बोधने नाम्नो नकारस्य लुग् न भवति। हे राजन् ॥

**न वमन्तसंयोगात् ।२।१।१११॥** वकारान्ताद् मकारान्ताच्च संयोगात्परस्याऽनोऽकारस्य लुग् न भवति। यज्वनः, यज्वनि। आत्मनः आत्मनि। शेषं व्यञ्जनादौ राजवत्। एवं सुपर्वन् सुशर्मन् प्रभृतयः ॥

**इन् हन् पूषार्यम्णः शिस्योः ।१।४।८७॥** इन्नन्तस्य हन्–पूषन्–अर्यमन्- इत्येषां च स्वरस्य शौ शेषे सौ च परे एव दीर्घो भवति। दण्डी[7], दण्डिनौ। दण्डिना। दण्डिभ्याम्[8]। दण्डिनाम्। दण्डिषु, हे दण्डिन्!। एवं यशस्विन्नित्यादयोऽपीन्नन्ता ज्ञेयाः। वृत्रहा[9] ॥

**कवर्गैकस्वरवति ।२।३।७६॥** पूर्वपदस्थाद् रषृवर्णा-

१–गडदबादेरिति चतुर्थः, धुटस्तृतीयः, विरामे वा। २–नामसिदिति पदत्वे चतुर्थः, धुट इति तृतीयः। ३–नि दीर्घः, नाम्नो नोऽनह्नः। ४–अनोऽस्य, तवर्गस्य श्चवर्गः। ५–पदत्वे नाम्नो नोऽनह्नः। ६–ईङौ वा। ७–दीर्घे सति सिलोपे नलोपश्च। ८–पदत्वे नलोपः। ९–निदीर्घे न लोपः।

त्परस्य कवर्गवत एकस्वरवतश्चोत्तरपदस्यान्तस्य तथा नागमस्य स्यादेश्च नकारस्य णो भवति, न चेत्स नकारः पक्वसम्बन्धी भवति। वृत्रहणौ।

**हनो ह्नो घ्नः।२।१।११२॥** हन्तेर्ह्न इत्येवं रूपस्य घ्न इत्यादेशो भवति।

**हनो घि। ।२।३।९४।** हन्तेर्ह्न इत्येवंरूपस्य घकारे निमित्तनिमित्तिनोर्मध्ये सति णो न भवति। वृत्रघ्नः। वृत्रघ्ना। वृत्रहभ्याम्। वृत्रघ्नि, वृत्रहणि[1]। वृत्रहसु, हे वृत्रहन्!। पूषा, पूषणौ, पूष्णः, पूषभ्याम्, पूष्णि, पूषणि। हे पूषन्!। अर्यमा, अर्यमणौ, अर्यम्णः, अर्यमभ्याम्, अर्यम्णि, अर्यमणि। अर्यमसु, हे अर्यमन्। श्वा, श्वानौ॥

**श्वन्–युवन्–मघोनो ङी–स्याद्यघुट्स्वरे व उः ।२।१।१०६॥** श्वन्–युवन्–मघवन्–इत्येषां सस्वरो वकारो ङ्यां स्यादावघुट्स्वरादौ च परे उ भवति। शुनः, शुना, श्वभ्याम्, शुनि, श्वसु। हे श्वन्!। युवा, युवानौ, यूनः[2], यूना, युवभ्याम्, यूनि, हे युवन्!। मघवा[3], मघवानौ, मघोनः[4] मघवभ्याम्, मघोनि, हे मघवन्!। मघवत् शब्दस्य तु मत्वन्ततया गोमद्वद्रूपाणि॥

---

१–ई ङौ वा। णत्वनिषेधः। २–व इत्यस्योकारादेशे सति समानदीर्घः। ३–इन्द्रः। ४–व इत्यस्योकारे अवर्णस्येत्यादिना ओकारः।

**पथिन् मथिन् ऋभुक्षः सौ** ।१।४।७६।। पथिन् मथिन् ऋभुक्षिन्नित्येतेषां नकारान्तानामन्तस्य नकारस्य सौ परे आकारादेशो भवति ।।

**एः** ।१।४।७७।। पथ्यादीनां नकारान्तानामिकारस्य घुटि परे आकारादेशो भवति ।।

**थोन्थ्** ।१।४।७८।। पथिन् मथिनित्येतयोर्नकारान्तयोस्थकारस्य स्थाने घुटि परे न्थ् इत्यादेशो भवति । पन्थाः, पन्थानौ, पन्थानः । हे पन्थाः । पन्थानम् ।।

**इन् ङीस्वरे लुक्** ।१।४।७९।। पथ्यादीनां नकारान्तानां सम्बन्धिन इन् इत्यस्य ङीप्रत्यये स्यादावघुट्स्वरादौ च लुग् भवति । पथः, पथा, पथिभ्याम्, पथि, पथिषु । मन्थाः । शेषं पथिन् वत् । ऋभुक्षाः । ऋभुक्षाणौ, ऋभुक्षः, ऋभुक्षा, ऋभुक्षिभ्याम्, हे ऋभुक्षाः । पञ्चन् प्रभृतयो नान्ताः संख्यावाचकाः शब्दास्त्रिषु लिङ्गेषु सरूपाः । पञ्च[2] । पञ्चभिः । पञ्चभ्यः ।

**संख्यानां र्ष्णाम्** ।१।४।३३।। रेफषकारनकारान्तानां संख्यावाचिनां शब्दानां सम्बन्धिन आमः स्थाने नाम् इत्यादेशो भवति । पञ्चानाम्[3] । पञ्चसु । हे पञ्च ! । प्रिय-

१—इन्द्रः । २—डतिष्ण इति जसूशसोर्लुप्, नाम्नो न इति नलोपः ।
३—नामादेशे दीर्घो नामीति दीर्घे नाम्नो न इति नलोपः ।

पञ्चन् प्रभृतयो राजवत् । सप्तन् प्रभृतयः पञ्चन्वत् । अष्टन् शब्दस्य तु विशेषः ॥

**वाऽष्टन आः स्यादौ** ।१।४।५२॥ अष्टन् शब्दस्य स्यादौ परे आकारान्तादेशो वा भवति ॥

**अष्ट और्जस्शसोः** ।१।४।५३॥ अष्टाशब्दसम्बन्धिनोर्जस्शसोः स्थाने औकारादेशो भवति । अष्टौ[1] । आत्वाभावे–अष्ट । अष्टाभिः, अष्टभिः । अष्टानाम् । अष्टासु । अष्टसु । तुण्ढिप्[2], तुण्ढिब् । तुण्ढिभौ, तुण्ढिभ्याम् । तुण्ढिप्सु ॥

**अयमियं पुंस्त्रियोः सौ** ।२।१।३८॥ त्यदादिसम्बन्धिनि सौ परे पुंस्त्रिलिङ्गयोरिदमः स्थाने यथासंख्यम् अयम् इयमित्यादेशौ भवतः । अयम्[3] ॥

**दो मः स्यादौ** ।२।१।३९॥ त्यदादिसम्बन्धिनि स्यादौ परे इदमो दकारस्य मकारादेशो भवति । इमौ । इमे । इमम्, इमान् ॥

**टौस्यनः** ।२।१।३७॥ त्यदादिसम्बन्धिनि टायामोसि

---

१–नकारस्याऽऽत्वे समानदीर्घे औत्वे ऐदौदित्यौत्वम् । २–तुण्ढिभ् शब्दः । गडदबादेरिति चतुर्थः । धुटस्तृतीयः । विरामेवा । ३–परत्वादाद्वेर इत्यत्वे लुगस्येति लुकि पश्चादनेनाऽयमादेशः । अत्वमगोह्यायमादेश इत्यपि मतम् । एवमनेनेत्यादावपि वोध्यम् । अयमाद्यादेशस्य नित्यत्वं तु न शङ्कनीयम्, शब्दान्तरप्राप्तत्वादिति ध्येयम् ।

च परे अक्वर्जितस्य इदमः स्थाने अन इत्यादेशो भवति। अनेन ॥

**अनक्** ।२।१।३६॥ त्यदादिसम्बन्धिनि व्यञ्जनादौ स्यादौ परे अग्वर्जित इदम् अ[1] भवति। आभ्याम्[2] ॥

**इदमदसोऽक्येव** ।१।४।३॥ इदम् अदस् इत्येतयोरक्येव सत्यकारात् परस्य भिस् ऐस् भवति। तेनेह न भवति। एभिः। अस्मै[3]। एभ्यः, अस्मात्, अस्माद्। अस्य, अनयोः, एषाम्, अस्मिन्, एषु। अन्वादेशे–एनम्[4], एनौ, एनान्, एनेन, एनयोः ॥

**किमः कस्तसादौ च** ।२।१।४०॥ त्यदादिसम्बन्धिनि स्यादौ तसादौ च परे किम्शब्दस्य स्थाने क इत्यादेशो भवति। कः। अकसहितस्याप्ययमादेशः[5]। कौ, के। शेषं सर्ववत्[6]। चतुर्शब्दो बहुवचनान्तः ॥

**वाः शेषे** ।१।४।८२ शेषे घुटि च परे अनडुह् चतुर्

---

१–इदमोऽत्वे लुकि च कृते सर्वस्येद इत्यस्य स्थाने ऊकारादेशो भवतीत्यर्थो बोध्यः। २–अत्वे कृते अत आ इत्यात्वम्। ३–परत्वादकारादेशः, पश्चात् स्मै। ४–इदम् इत्येनदादेशे आद्वेर इत्यत्वे लुगस्येत्यलुक्। ५–किम् शब्दात्स्वार्थे अकि कृतेऽपि अनेन सर्वस्य कादेशे क इत्येवमेव रूपं न तु कक इति बोध्यम्। ६–सम्बोधने सिं विना स्यमौजसः शिश्च शेषघुट इति बोध्यम्।

इत्येतयोरुकारस्य वा इत्यादेशो भवति । चत्वारः । चतुरः, चतुर्भिः, चतुर्भ्यः चतुर्णाम्[1] ॥

**अरोः सुपि रः** ।१।३।५७॥ रुवर्जितस्य रेफस्य स्थाने सुपि रेफ एव भवति ॥

**न रात् स्वरे** ।१।३।३७॥ रेफात्परस्य शिटः स्थाने स्वरे परे द्वे रूपे न भवतः । चतुर्षु[2] । प्रियचत्वाः, प्रियचत्वारौ ॥

**उतोऽनडुच्चतुरो वः** ।१।४।८१॥ अनडुह् चतुर् इत्येतयोरुकारस्य सम्बोधने सौ परे व इत्यादेशो भवति । हे प्रियचत्वः ! । प्रियचतुरा । प्रियचतुर्भ्याम् । प्रियचतुराम् । विट्, विड्, विशौ, विशः । विड्भ्याम्, विड्त्सु[3], विट्सु । तत्त्वप्राट्, तत्त्वप्राड्, तत्त्वप्राशौ । तत्त्वप्राड्भ्याम् । तत्त्वप्राशि । तादृक्, तादृग् । तादृशौ, तादृशः । तादृशा । तादृग्भ्याम् । तादृक्षु[4] । एवं यादृशादयः । घृतस्पृक्, घृतस्पृग् । घृतस्पृशः, घृतस्पृग्भ्याम् । घृतस्पृक्षु ॥

**नशो वा** ।२।१।७०॥ नशः पदान्ते गकारादेशो वा भवति । जीवनक्, जीवनग् । जीवनट्, जीवनड् । जीवनशः ।

---

१–संख्यानामिति नामि णत्वे च र्हादर्हेति वा द्वित्वं बोध्यम् । २–अत्र र्हादिति प्राप्तं द्वित्वं निषिध्यते । नाम्यन्तस्थेति षः । ३–विड्त्स्विति तु पाणिनीयानुसारेण । सिद्धहेमानुसारेण त्वत्र डकारश्रुतिरेव । तवर्गस्येति तु नेह प्रवर्तते, पदान्ताट्टवर्गादिति निषेधात् । ४–ऋत्विगिति गत्वे अघोषे प्रथम इति प्रथमत्वे नाम्यन्तस्थेति षः ।

जीवनड्भ्याम्, जीवनग्भ्याम् । जीवनक्षु, जीवनड्त्सु, जीवनट्सु । दधृक्, दधृग्, दधृषौ, दधृग्भ्याम् । दधृक्षु ॥

**सजुषः** ।२।१।७३॥ सजुषः पदान्ते रुरन्तादेशो भवति ॥

**पदान्ते** ।२।१।६४॥ पदान्ते वर्त्तमानयोर्भ्वादिसम्बन्धिनो रेफवकारयोस्तस्यैव भ्वादेर्नामिनो दीर्घो भवति । सजूः[1] । सजुषौ, सजुषः । सजूर्भ्याम्[2], सजूष्षु, सजूःषु[3] । हे सजूः ।

**रात्सः** ।२।१।९०॥ पदान्ते वर्त्तमानस्य संयोगस्य सम्बन्धिनो रेफात् परस्य सकारस्यैव लुग् भवति । चिकीर्ष्[4] शब्दः । चिकीः[5] । चिकीर्षौ, चिकीर्षः । चिकीर्भ्याम् । चिकीर्षु । हे चिकीः ! । षष् शब्दो नित्यं बहुवचनान्तः । षट्, षड् । षड्भिः, षड्भ्यः, षण्णाम्[6], षड्त्सु[7], षट्सु । दोः[8],

---

१–सजुष् शब्दः, दीर्घङ्याब्बिति सलोपः । २–नामसिदिति पदत्वे रुत्वे पदान्त इति दीर्घः । ३–सुपि पदत्वे रुत्वे दीर्घे च शषसे इति सत्वे शिटाव्यवधानेऽपि नाम्यन्तस्थेति षत्वे सस्य शषाविति षत्वे च रूपम् । सत्वविकल्पे विसर्गे नाम्यन्तस्थेति षत्वम् । सजूर्षु इति पाठस्तु क्वचिदनुपयोगप्रयुक्त एव, अरोः सुपि र इति सूत्रसत्त्वादिति ध्येयम् । ४–रात्स इति कर्त्तव्ये षत्वस्याऽसत्वम् । एवं च सकारान्तेषु तदुल्लेखः प्रामादिक एव बोध्यः । ५–धुटस्तृतीयः । ६–संख्यानामिति नामादेशे तृतीयत्वे तवर्गस्येति टवर्गत्वे प्रत्यये चेति पञ्चमः । ७–ड्नः स इति त्सः । पदान्तादिति टवर्गनिषेधः षत्वनिषेधश्च । ८–दोष् शब्दः, रुत्वे कर्तव्ये षत्वस्यासत्त्वं बोध्यम् ।

दोषौ, दोषः । दोर्ष्णः[1] । दोषा । दोषभ्याम्, दोर्भ्याम् । दोर्ष्णि, दोषणि, दोषे । दोष्षु, दोःषु । हे दोः ! । असन्तः सुमनस् शब्दः । अभ्वादेरिति दीर्घः । सुमनाः, सुमनसौ, सुमनसः । सुमनोभ्याम् । सुमनस्सु[2], सुमनःसु । हे सुमनः ! । एवं वेधस् सुवचस् प्रभृतयः । उदित् श्रेयस् शब्दः । श्रेयान्[3], श्रेयांसौ[4], श्रेयसा, श्रेयोभ्याम्, श्रेयस्सु, श्रेयःसु । हे श्रेयन् ! । विद्वान्, विद्वांसौ ॥

**क्वसुष्मतौ च ।२।१।१०५॥** णि-क्य-घुड्वर्जे यकारादौ स्वरादौ मतौ च प्रत्यये परे क्वसः स्थाने उष् भवति । विदुषः, विदुषा ॥

**स्रन्स्ध्वन्स्क्वस्सनडुहो दः ।२।१।६८॥** स्रन्स्-ध्वन्सोः क्वस्प्रत्ययान्तस्य सकारस्याऽनडुह्शब्दस्य च योऽन्त्यस्तस्य पदान्ते दकारो भवति । विद्वद्भ्याम् । विद्वत्सु, हे विद्वन् ! ।

**पुंसोः पुमन्स् ।१।४।७३॥** पुंसु इत्येतस्य उदितो घुटि परे पुमन्स् इत्यादेशो भवति । पुमान्[5] । पुमांसौ, पुंसा, पुंभ्याम्, पुंसु, हे पुमन् ! । उशना[7], उशनसौ, उशनसः । उशनोभ्याम्, उशनस्सु, उशनःसु ॥

---

१–दन्तपादेति दोषन्नादेशः । २–रुत्वं वैकल्पिकं सत्वम् । ३–ऋदुदित इति नोन्तः, न्स्महतोरिति दीर्घः । ४–शिड्हे इत्यनुस्वारः । ५–न्स्महतोरिति दीर्घः । ६–पदस्येति सकारलोपः । ७–ऋदुशनसिति सेर्डा ।

**वोशनसो नश्चामन्त्र्ये सौ** ।१।४।८०।। सम्बोधने उशनस्शब्दस्य सौ परे नकारा लुक् चान्तादेशौ वा भवतः। हे उशनन्, हे उशन, हे उशनः!। पुरुदंशा, पुरुदंशसौ। पुरुदंशसः, पुरुदंशोभ्याम्, पुरुदंशस्सु, पुरुदंशःसु। हे पुरुदंशः!। अनेहा अनेहसौ, अनेहसः। अनेहोभ्याम्। अनेहस्सु, अनेहःसु। हे अनेहः॥

**अदसो दः सेस्तु डौ** ।२।१।४३।। त्यदादिसम्बन्धिनि सौ परे अदसो दकारस्य सकारादेशो भवति, सेस्तु डौ इत्यादेशः। असौ॥

**मोऽवर्णस्य** ।२।१।४५।। अवर्णान्तस्य त्यदादिसम्बन्धिनोऽदसो दकारस्य मकारादेशो भवति॥

**मादुवर्णोऽनु** ।२।१।४७।। अदसः सम्बन्धिनो मकारात्परस्य वर्णस्य उवर्णादेशो भवति पश्चात्कार्यान्तरेभ्यः। अमू॥

**बहुष्वेरीः** ।२।१।४९।। बहुवचने अदसो मकारात्परस्य एकारस्य स्थाने ईकारादेशो भवति। अमी। अमुम्, अमून्॥

**प्रागिनात्** ।२।१।४८।। अदसो मकारात्परस्य वर्णस्य इनादेशात्प्राग् उवर्णादेशो भवति। अमुना। अमूभ्याम्, अमीभिः, अमुष्मै, अमीभ्यः। अमुष्मात्, अमुष्माद्। अमुष्य, अमुयोः, अमीषाम्, अमुष्मिन्, अमीषु। हे असौ।

---

१–आद्वेर इत्यत्वे लुगस्येति लुकि सन्धौ च मत्वादिकार्यम्, एवमन्यत्रापि।

२–नाम्यन्तस्थेति षः, एवममुष्मादित्यादावपि।

**अनडुहः सौ** ।१।४।७२।। अनडुह्शब्दस्य धुडन्तस्य सौ परे धुटः प्राग् नोऽन्तो भवति । अनड्वान्[1] । अनड्वाहौ । अनडुहः । अनडुहा, अनडुद्भ्याम्[2] । अनडुत्सु[3] । हे अनड्वन् ! ।

**हो धुट् पदान्ते** ।२।१।८२।। हकारस्य धुडादौ प्रत्यये परे पदान्ते च ढकारो भवति । मधुलिट्, मधुलिड्, मधुलिहौ, मधुलिहः । मधुलिड्भ्याम्, मधुलिड्त्सु, मधुलिट्सु । हे मधुलिट् ।।

**भ्वादेर्दादेर्घः** ।२।१।८३।। भ्वादेर्धातोर्यो दकारादिरवयवस्तस्यावयवस्य हकारस्य धुडादौ प्रत्यये परे पदान्ते च घकारादेशो भवति । गोधुक्[4], गोधुग् । गोदुहौ, गोदुहः, गोधुग्भ्याम्, गोधुक्षु, हे गोधुक्, हे गोधुग् ।।

**मुह् द्रुह् स्निह् स्नुहो वा** ।२।१।८४।। मुह्–द्रुह्–स्नुह्–स्निह्–इत्येषां सम्बन्धिनो हकारस्य धुडादौ प्रत्यये परे पदान्ते च घकारादेशो वा भवति । तत्त्वमुक्, तत्त्वमुग्, तत्त्वमुट्, तत्त्वमुड् । तत्त्वमुहौ, तत्त्वमुहः, तत्त्वमुग्भ्याम्, तत्त्वमुड्भ्याम्, तत्त्वमुक्षु[5], तत्त्वमुड्त्सु, तत्त्वमुट्सु । हे तत्त्वमुक्, ग् ।।

**।। इति व्यञ्जनान्तपुल्लिङ्गप्रकरणम् ।।**

---

१–वाःशेष इति वादेशे नोन्तत्वे च पदस्येति हकारलोपः । २–स्रन्स् ध्वन्स् इत्यादिना दः । ३–अघोष इति प्रथमः । ४–घत्वे गडदबादिति घत्वम् । ५–मुह् द्रुह् इति घत्वे धुटस्तृतीय इति तृतीयत्वे अघोषे इति प्रथमत्वे नाम्यन्तस्थेति षः । घत्वविकल्पे हो धुडिति ढत्वे तृतीयत्वे त्सादेशे पदान्तादिति टवर्गत्वनिषेधः ।

## ॥ अथ व्यञ्जनान्तस्त्रीलिङ्गप्रकरणम् ॥

तत्र चकाराद्यन्ता वाच् स्रजित्यादयः पुल्लिँङ्गचकारान्तादिवदेव बोध्याः । अथ दकारान्ताः । तत्र त्यद्शब्दस्य नामसंज्ञायां सौ आद्वेर इत्यत्वे लुगस्येत्यलुकि--

आत् ।२।४।१८॥ अकारान्तान्नाम्नः स्त्रियामाप् प्रत्ययो भवति । स्या[1], त्ये, त्याः । सा, ते, ताः । या, ये, याः । एषा, एते, एताः । अन्वादेशे-एनाम्, एने, एनाः, एनया, एनयोः । शेषं सर्वत्र सर्वावत् । अप् शब्दो बहुवचनान्तः ॥

अपः ।१।४।४८॥ अपः स्वरस्य शेषे घुटि परे दीर्घो भवति । आपः, अपः ॥

अपोऽद् भे ।२।१।४॥ अप् इत्यस्य भकारादौ स्यादौ परे अद् इत्यादेशो भवति । अद्भिः, अद्भ्यः, अपाम् , अप्सु[2] । स्वाप्[3] , स्वाब् , स्वापौ । स्वपः । स्वद्भ्याम्, स्वप्सु । हे स्वप्, हे स्वब् । ककुप्[4] , ककुब् । ककुभौ, ककुभः । ककुभ्याम्, ककुप्सु । इयम्[5] , इमे[6], इमाः । अनया, आभ्याम्, आभिः, अस्यै, आभ्यः, अस्याः । अनयोः, आसाम्, अस्याम् आसु । अन्वादेशे-एनाम्, एने, एनाः, एनया, एनयोः ।

---

१-आपि दीर्घे दीर्घङ्याबिति सकारलुक् । तः सौ स इति सः । एवमग्रेऽपि ।
२-पदत्वे तृतीयत्वे अघोष इति प्रथमत्वम् । ३-सुजला । ४-ककुभ्-शब्दो दिगर्थे । ५-अत्वे लुकि च स्त्रियामापि दीर्घे च इयमादेशः । ६-पूर्ववदापि दीर्घे मत्वे ईत्वम् । एवमग्रेऽपि ।

चतुर्शब्दो नित्यं बहुवचनान्तः । चतस्रः । चतसृभिः, चतसृभ्यः, चतसृणाम्[2] । चतसृषु, हे चतस्रः । गीः[3], गिरौ, गिरः । गिरा, गीर्भ्याम् । गीर्षु[4] । हे गीः ॥

**दिवः औः सौ** ।२।१।११७॥ दिवोऽन्तस्य सौ परे और्भवति । द्यौः, दिवौ, दिवः ॥

**उः पदान्तेऽनूत्** ।२।१।११८॥ पदान्ते दिवोऽन्तस्य उकारादेशो भवति । तस्य च दीर्घत्वं न भवति । द्युभ्याम्, द्युषु । हे द्यौः । दिक्, दिग्[5], दिशौ, दिशः, दिग्भ्याम्, दिक्षु, हे दिक् । आशीः[6], आशिषौ, आशिषः, आशीर्भ्याम्, आशीष्षु आशीः-षु[7], हे आशीः । असौ[8], अमूः अमूम्, अमुया, अमूभिः, अमुष्यै, अमूभ्यः, अमुष्याः, अमुयोः, अमूषाम्, अमुष्याम्, अमूषु ॥

**नहाऽऽहोर्धतौ[9]** ।२।१।८५॥ **नहेर्ब्रूस्थानाऽऽहश्च धातोर्हकारस्य धुडादौ प्रत्यये पदान्ते च क्रमेण धकारातकारावादेशौ भवतः । उपानत्, उपानद्, उपानहौ, उपानहः । उपानद्भ्याम्, उपानत्सु ॥ इति व्यञ्जनान्तस्त्रीलिङ्गप्रकरणम् ॥**

---

१–चतस्रादेशे ऋतो र इति रत्वम् । २–अतिसृचतसृ इति पर्युदासान्न दीर्घः । ३–पदान्ते इति दीर्घः । ४–दीर्घे नाम्यन्तस्थेति षत्वे अरोरिति रत्वे न रादिति द्वित्वनिषेधः । ५–ऋत्विगिति गः । ६–रुत्वे पदान्त इति दीर्घः । ७–रुत्वे दीर्घे च शषसेति सत्वे शिड्व्यवधानेऽपि षत्वे सस्य शषाविति षः । ८–अत्वे लुकि [illegible] अदमो द इति सत्वम् से डौः । ९–उपपूर्वाद् नह्धातोः क्विपि दीर्घ उपानह्शब्दश्चर्मनिर्मितपादत्राणवाचकः ।

## ॥ अथ व्यञ्जनान्तनपुंसकलिङ्गप्रकरणम् ॥

प्रतिपूर्वादञ्च्धातोः क्विपि ऋत्विगित्यादिना गः। प्रत्यक्, प्रत्यग्, प्रतीची[2], प्रत्यञ्चि। पुनस्तद्वत्। शेषं पुंवत्। एवं प्राच् प्रभृतयः। असृक्, असृग्[4], असृजी, असाँनि[5], असृञ्जि। अस्ना, असृजा, असभ्याम्, असृग्भ्याम्। अस्नि, असनि, असृजि, असस्सु, असृक्षु। जगत्, जगद्। जगती, जगन्ति[10]। जगता, जगद्भ्याम्, जगत्सु। महत्, महती, महान्ति, महता, महद्भ्याम्, महत्सु। यकृत्, द्, यकाँनि, यकृन्ति[12]। यक्ना, यकृता, यकभ्याम्, यकृद्भ्याम्। यक्नि[13], यकनि, यकृति। शकृत्, द्,। शकानि, शकृन्ति। शक्ना, शकृता, शकभ्याम्, शकृद्भ्याम्, शक्नि, शकनि, शकृति। त्यत्[14], द्। त्ये, त्यानि। शेषं पुंवत्। एवं तदादयः। अहः, अह्नी, अहनी, अहानि, अह्ना, अहोभ्याम्। अह्नि, अहनि। अहस्सु,

१–अनतो लुबिति सेर्लुप्, लुपि न स्थानिवत्त्वमिति न नागमादि। चज इति कः। २–अच्च प्राग् दीर्घश्च। ३–नागमे म्नामिति पञ्चमः। ४–चज इति गः। ५–दन्तपादेति असन्नादेशः, नि दीर्घः। ६–अनोऽस्य। ७–पदत्वे नलोपः। ८–ईङौ वा। ९–धुटां प्राक्, म्नामिति पर्जन्यवल्लक्षणन्यायेन प्रवर्तते। १०–न्स्महतोः। ११–दन्तपाद० १२–म्नामिति बहुवचननिर्देशान्न णत्वम्। १३–ईङौ वा। १४–लुपि न स्थानिवदिति नाऽत्वादि। १५–रो लुप्यीति से विसर्गः। १६–ईङौ वा। १७–नि दीर्घः॥ १८–अनोऽस्य। १९–अह्न इति रुः, घोषवति।

अ[1]हःसु । हे अहः । ब्रह्म, ब्रह्मणी[2], ब्रह्माणि[3] । ब्रह्मणा[4], ब्रह्मभ्याम्, ब्रह्मसु ॥

**क्लीबे वा ।२।१।९३॥** सम्बोधने नाम्नो नस्य क्लीबे लुग् वा भवति । ब्रह्म ! ब्रह्मन् ! । इदम् , इमे, इमानि । किम्, के, कानि । शेषं पुंवत् । चत्वारि[5] । शेषं पुंवत् । पयः, पयसी, पयांसि[6], पयसा, पयोभ्याम्, पयस्सु, पयःसु । एवं मनस् वचस् तपस् प्रभृतयः । अदः, अमू[7], अमूनि । शेषं पुंवत् । काष्ठतट् ,ड् काष्ठतक्षी, काष्ठतङ्क्षि[8] । काष्ठतक्षा, काष्ठतड्भ्याम् । काष्ठतट्त्सु, काष्ठतट्सु ॥

॥ इति व्यञ्जनान्तनपुंसकलिङ्गप्रकरणम् ॥

## ॥ अथ युष्मदस्मच्छब्दप्रक्रिया ॥

युष्मदस्मदी अलिङ्गे । "नन्ता संख्या डतिर्युष्मदस्मच्च स्युरलिङ्गका" इति लिङ्गानुशासनात् ॥

**त्वमहं सिना प्राक् चाकः ।२।१।१२॥** युष्मदस्मदोः स्वसम्बन्धिनाऽन्यसम्बन्धिना वा सिना सह यथासंख्यं त्वम् अहम् इत्यादेशौ[9] भवतः । प्राक् चाकः । त्वम् , अहम् ॥

१–अहन इति रुः, शषसे इति सः । २–न वमन्तसंयोगात् । ३–निदीर्घे णत्वम् । ४–न वमन्तसंयोगात् । ५–आः शेषे । ६–न्स्महतोः । ७–विभक्तिकार्यं प्राक् पश्चाद् मूत्वम् । ८–धुटां प्राक् । म्नां धुड्वर्गे । ९–अकःप्रसङ्गे अकप्रत्ययविधानात्प्रागेव त्वमहमादेशावित्याशयः । पश्चादकः, तेन त्वकमित्यादिप्रयोगः ।

**मन्तस्य युवावौ द्वयोः** ।२।१।१०॥ द्वित्वविशिष्टेऽर्थे वर्तमानयोर्युष्मदस्मदोर्मकारान्तस्याऽवयवस्य स्यादौ परे क्रमेण युव आव इत्यादेशौ भवतः ॥

**अमौ मः** ।२।१।१६॥ युष्मदस्मद्भ्यां परयोरम् औ इत्येतयोर्म इत्यादेशो भवति । अकार उच्चारणार्थः ॥

**युष्मदस्मदोः** ।२।१।६॥ युष्मदस्मदोर्व्यञ्जनादौ स्यादौ परे आकारान्तादेशो भवति । युवाम्[1], आवाम् ॥

**यूयं वयं जसा** ।२।१।१३॥ युष्मदस्मदोः स्वसम्बन्धिनाऽन्यसम्बन्धिना वा जसा सह यथासंख्यं यूयं वयमित्यादेशौ भवतः प्राक् चाकः । यूयम् । वयम् ॥

**त्वमौ प्रत्ययोत्तरपदे चैकस्मिन्** ।२।१।११॥ एकत्वविशिष्टेऽर्थे वर्त्तमानयोर्युष्मदस्मदोर्मकारान्तस्यावयवस्य स्यादौ परे प्रत्ययोत्तरपदयोश्च परतः क्रमेण त्व म इत्यादेशौ भवतः । त्वाम्[2], माम् । युवाम्, आवाम् ॥

**शसो नः** ।२।१।१७॥ युष्मदस्मद्भ्यां परस्य शसः सर्वस्य स्थाने न इत्यादेशो भवति । अकार उच्चारणार्थः । युष्मान्[3], अस्मान् ॥

---

१—युवादेशे कृते युव अदिति स्थिते लुगस्येत्यल्लुकि आत्वे च समानानामिति दीर्घो बोध्यः । एवमन्यत्रापि । २—त्वाद्यादेशेऽल्लुकि आत्वे दीर्घः । ३—नादेशे आत्वे दीर्घः ।

**टाङ्योसि यः ।२।१।७॥** युष्मदस्मदोः टा ङि ओस् इत्येषु स्यादिषु परेषु यकारान्तादेशो भवति । त्वया[1], मया । युवाभ्याम्[2], आवाभ्याम् । युष्माभिः[3], अस्माभिः ॥

**तुभ्यं मह्यं ङ्या ।२।१।१४॥** युष्मदस्मदोः स्वसम्बन्धिनाऽन्यसम्बन्धिना वा ङेप्रत्ययेन सह यथासंख्यं तुभ्यं मह्यमिति आदेशौ भवतः । तुभ्यम्, मह्यम् ॥

**अभ्यम् भ्यसः ।२।१।१८॥** युष्मदस्मद्भ्यां परस्य चतुर्थीबहुवचनस्य भ्यसः स्थाने अभ्यमित्यादेशो भवति ॥

**शेषे लुक् ।२।१।१८॥** यस्मिन् स्यादावात्वं यत्वं च कृतं ततोऽन्यस्मिन् स्यादौ परे युष्मदस्मदोरन्तस्य लुग् भवति । युष्मभ्यम्[4], अस्मभ्यम् ॥

**ङसेश्चाद् ।२।१।१९॥** युष्मदस्मद्भ्यां परस्य ङसेः पञ्चमीभ्यसश्च स्थाने अद् इत्यादेशो भवति । त्वत्[5], द् । मत्, द् । युष्मत्[6], द् । अस्मत्, द् ॥

**तव मम ङसा ।२।१।१५॥** युष्मदस्मदोः स्वसम्बन्धिनाऽन्यसम्बन्धिना वा ङस्प्रत्ययेन सह क्रमेण तव मम इत्यादेशौ भवतः । तव, मम, युवयोः, आवयोः ॥

**आम आकम् ।२।१।२०॥** युष्मदस्मद्भ्यां परस्य

---

१–त्वाद्यादेशेऽल्लुकि यत्वम् । २–युवादेशेऽल्लुकि आत्वे दीर्घः । ३–आत्वे दीर्घः । ४–अन्त्यलुक्यल्लुक् । ५–त्वादेशेऽल्लुक्यन्त्यलुक्यल्लुक् । ६–अन्त्यलुक्यल्लुक् ।

आमः स्थाने आकमित्यादेशो भवति । युष्माकम्, अस्माकम् । त्वयि मयि । युष्मासु, अस्मासु ॥

**पदाद् युग्विभक्त्यैकवाक्ये वस्नसौ बहुत्वे** ।२।१।२१॥ पदात्परयोर्द्वितीयाचतुर्थीषष्ठीबहुवचनैः सह युष्मदस्मदोर्यथासंख्यं वस्नस् इत्यादेशौ वा भवतः । तच्चेत्पदं युष्मदस्मदी चैकवाक्ये भवतः । धर्मो वो रक्षतु । धर्मो नो रक्षतु । पक्षे–धर्मो युष्मान् रक्षतु, धर्मोऽस्मान् रक्षतु । तपो वो दीयते, तपो नो दीयते । पक्षे–युष्मभ्यम्, अस्मभ्यम् । शीलं वः स्वमस्ति, शीलं नः स्वमस्ति । पक्षे–युष्माकम्, अस्माकम् । पदादिति किम् ? युष्मान् धर्मो रक्षतु । अस्मान् धर्मो रक्षतु । एकवाक्ये इति किम् ? एकस्मिन् पदे मा भूत्–अतियुष्मान् पश्यति, अत्यस्मान् पश्यति । वाक्यान्तरे च मा भूत्–ओदनं पचत, युष्माकं भविष्यति । पटं वयत, अस्माकं भविष्यति ॥

**द्वित्वे वाम् नौ** ।२।१।२२। पदात्परयोर्युष्मदस्मदोर्द्वितीयाचतुर्थीषष्ठीद्विवचनैः सह यथासंख्यं वाम् नौ इत्यादेशौ वा भवतः । तच्चेत्पदं युष्मदस्मदी चैकवाक्ये भवतः ।

१–अन्त्यलुकि दीर्घः । २–आत्वे दीर्घः । ३–अन्यत्र श्लोकेनोदाहरणमुक्तम् तद्यथा–

"धर्मो रक्षतु वो लोका ! धर्मो रक्षतु नः सदा ।
नमो वः श्रीजिनाः ! शुद्धं, ज्ञानं नौ दीयतां धनम् ॥
दर्शनं वो जिनाधीशाः !, पापं हरति नो स्याद्" । इति ॥

धर्मो वां रक्षतु, धर्मो नौ रक्षतु। पक्षे युवाम् आवाम्। शीलं वां दीयते, शीलं नौ दीयते। पक्षे युवाभ्याम्, आवाभ्याम्। ज्ञानं वां स्वम्, ज्ञानं नौ स्वम्। पक्षे युवयोः, आवयोः॥

**अमा त्वामा** ।२।१।२४॥ पदात्परयोर्युष्मदस्मदोरमा सह यथासंख्यं त्वा मा इत्यादेशौ वा भवतः। एकवाक्ये। धर्मस्त्वा रक्षतु, धर्मो मा रक्षतु। पक्षे त्वाम्, माम्॥

**ङे ङसा ते मे** ।२।१।२३॥ पदात्परयोर्युष्मदस्मदोर्ङे-ङस्भ्यां इत्येताभ्यां सह ते मे इत्यादेशौ यथासंख्यं वा भवत एकवाक्ये। धर्मस्ते दीयते, धर्मो मे दीयते। पक्षे तुभ्यम्, मह्यम्। धर्मस्ते स्वम्, धर्मो मे स्वम्। पक्षे तव, मम॥

**नित्यमन्वादेशे** ।२।१।३१॥ पदात्परयोर्यदुक्तं वस्-नसादि तदन्वादेशविषये[2] नित्यं भवति। यूयं विनीतास्तद्वो गुरवो मानयन्ति, वयं विनीतास्तन्नो गुरवो मानयन्ति॥

**असदिवामन्त्र्यं पूर्वम्** ।२।१।२५॥ सम्बोध्यवाचकं पदं युष्मदस्मद्भ्यां पूर्वमसदिव भवति। सति[3] तस्मिन् यत्कार्यं

---

१– "पातु वां नौ जिनोऽयं च, दद्याद्वा नौ परं पदम्।
मनो वां नौ सदा भूयाद्, दृढं धर्मे जिनोदिते" ॥इति॥

२–अन्वादेशः प्रागुक्तः। ३–सति तस्मिन् पदात्परत्वात् प्राप्तो वसनसादिर्न भवति। पदात्परत्वाभावाच्च प्राप्तः सविभक्तिकः प्रयोगो भवतीत्याशयो बोध्यः।

तन्न भवति, असति यत्तद् भवतीत्यर्थः । श्रमणाः ! युष्मान् रक्षतु धर्मः । श्रमणाः ! अस्मान् रक्षतु धर्मः ॥

पादाद्योः ।२।१।२८॥ नियतपरिमाणमात्राक्षरपिण्डः पादः । श्लोकतुर्यांश इत्यर्थः । पदात्परयोर्युष्मदस्मदोर्यदुक्तं वस्नसादि तत्पादस्याादिभूतयोर्न भवति । "वीरो विश्वेश्वरो देवो, युष्माकं[1] कुलदेवता । स एव नाथो भगवानस्माकं[2] पापनाशनः" ॥ १ ॥ पादाद्योरिति किम् ? पादमध्यादौ यथा स्यात्—"पान्तु वो[3] देशनाकाले, जैनेन्द्रा दशनांशवः । भवकूपपतज्जन्तुजातोद्धरणरज्जवः" ॥ १ ॥ इति ॥

चाहहवैवयोगे ।२।१।२९॥ च अह, ह वा एव इत्येभिर्योगे पदात्परयोर्युष्मदस्मदोर्यदुक्तं वस्नसादि तन्न भवति । ज्ञानं युष्मांश्च रक्षतु । अस्मांश्च रक्षतु । ज्ञानं युष्मानह अस्मानह रक्षतु । ज्ञानं युष्मान् ह अस्मान् ह रक्षतु । ज्ञानं युष्मान् वा अस्मान् वा रक्षतु । ज्ञानं युष्मानेव अस्मानेव रक्षतु । एवमन्यदप्युदाहार्यम् ॥

## ॥ इति युष्मदस्मत्प्रक्रिया ॥

१–अत्र द्वितीयपादादिस्थत्वाद् वसादेशो न । २–चतुर्थपादादिस्थत्वान्नसादेशो न । प्रथम–तृतीयपादादिस्थयोस्तु युष्मदस्मदोः पदात् परत्वाभावादेव वस्नसादयो नेति ध्येयम् । ३–अत्र पादमध्यस्थस्य द्वितीयाबहुवचनान्तस्य युस्मदो वसादेशो भवति ।

## ॥ अथाऽव्ययानि ॥

अव्ययमित्यन्वर्था[1]ैषा संज्ञा । यन्न व्येति विकारं प्राप्नोति तदिति । तदुक्तम्–"सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु । वचनेषु च सर्वेषु, यन्न व्येति तदव्ययम्"॥१॥ इति॥ "नन्ता[2] संख्या डति[3] युष्मदस्मच्च स्युरलिङ्गकाः[4] । पदं[5] वाक्यमव्ययं चेत्यसंख्यं च[6] तद्बहुलमि[7]"ति च ॥२॥

**स्वरादयोऽव्ययम्** ।१।१।३०॥ स्वरादयः शब्दाः अव्ययसंज्ञका भवन्ति। स्वर्, अन्तर्, सनुतर्, पुनर्, प्रातर् ५ । सायम् नक्तम् अस्तम् दिवा दोषा, १० । ह्यस्, श्वस् कम् शम् योस् १५ । मयस् विहायसा रोदसी ओम् भूस्, २० । भुवस् स्वस्ति समया निकषा अन्तरा, २५ । पुरा बहिस् अवस् अथस् असाम्प्रतम्, ३० । अद्धा ऋतम् सत्यम् इद्धा मुधा, ३५ । मृषा वृथा मिथ्या मिथो मिथु, ४० । मिथस् मिथुस् मिथुनम् अनिशम् मुहुस्, ४५ । अभीक्ष्णम् मङ्क्षु झटिति उच्चैस् नीचैस्, ५० । शनैस् अवश्यम् सामि

---

१–अनुगतार्थमित्यर्थः । एवं च विवक्षितार्थाभावे नाऽव्ययसंज्ञेत्याशयः । २–नकारान्ताः पञ्चन् प्रभृतयः संख्यावाचिनः । ३–डतिप्रत्ययान्ताः कतितति प्रभृतयः । ४–लिङ्गरहिताः । ५–परिनिष्ठितं 'देवः' इत्यादिपदम्। देवशब्दस्य हि लिङ्गसंख्यावाचिता, न तु 'देवः' इति विभक्त्यन्तस्य पुनः संख्यान्तरयोगः, तथा सति विभक्त्याद्यापत्तेरिति ध्येयम् । एवं वाक्येऽपि बोध्यम्। ६–चकारादलिङ्गमिति बोध्यम् । ७–तेन विभक्तिलुकि लिट्र् धुकू इत्यादेः परिनिष्ठितस्य लिङ्गसंख्यावाचित्वेऽपि न क्षतिः ॥

साचि विष्वक्, ५५। अन्वक् ताजक् द्राक् स्राक् ऋधक्, ६०। पृथक् धिक् हिरुक् ज्योक् मनाक्, ६५। ईषत् ज्योषम् जोषम् तूष्णीम् कामम्, ७०। निकामम् प्रकामम् अरम् वरम् परम्, ७५। आरात् तिरस् मनस् नमस् भूयस्, ८०। प्रायस् प्रबाहु प्रबाहुक् प्रबाहुकम् आर्य, ८५। हलम् आर्यहलम् स्वयम् अलम् कु, ९०। बलवत् अतीव सुष्ठु दुष्ठु ऋते, ९५। सपदि साक्षात् सन् प्रशान् सनात्, १००। सनत् सना नाना विना क्षमा, १०५। शु सहसा युगपत् उपांशु पुरतस्, ११०। पुरस् पुरस्तात् शश्वत् कुवित् आविस् प्रादुस् ११६ इति स्वरादयः। आकृतिगणोऽयम्।

चादयोऽसत्त्वे ।१।१।३९॥ अद्रव्यार्थाश्चादयः शब्दा अव्ययसंज्ञकाः स्युः। चादयश्च निपाता इत्यप्युच्यन्ते। च अह ह वा एव एवम् नूनम् शश्वत् सूपत् कूपत् कुवित् नेत् चेत् नचेत् चण कच्चित् यत्र नह नहि हन्त माकिस् नकिस् मा माङ् न नञ् वात्र त्वाव न्वाव वावत् त्वावत् न्वावत् त्वै तुवै न्वै नुवै रै व श्रौषट् वौषट् वषट् वट् वाट् वेट् पाट् प्याट् फट् हुंफट् छंबट् अध आत् स्वधा स्वाहा अलम् चन हि अथ ओम् अथो नो नोहि भोस् भगोस् अघोस् अंघो हंहो हो अहो आहो उताहो हा ही हे है हये अयि अये अरे अङ्ग रे अरे अवे ननु शुकम् सुकम् नुकम् हिकम् ऊम् हुम् कुम् उञ् सुञ् कम् हम् किम् हिम् अद् कद् यद् तद् इद्

चिद् चिद् स्विद् उत बत इव तु नु यच्च कच्चन किमुत किल किंकिल किंस्वित् उदस्वित् आहोस्वित् अहह नहवै नवै नवा अन्यत् अन्यत्र शव् शप् अथकिम् विषु पर पशु खलु यदिनाम, यदुत प्रत्युत, यदा, जातु, यदि यथाकथाच यथा तथा पुद अथ पुरा यावत् तावत् दिष्ट्या मर्या आम नाम स्म इतिह सह अमा समम् सत्रा साकम् सार्धम् ईम् सीम् कीम् आम् आस् इति अव अठ अड बाह्या अनुषक् खोस् अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ प्र परा अप सम् अनु अव निस् निर् दुस् दुर् आङ् नि वि प्रति परि उप अधि अपि सु उद् अति अभि इति चादयः । बहुवचन-माकृतिगणार्थम् ॥

क्त्वातुमम् ।१।१।३५॥ क्त्वा तुम् अम् इत्येतत्प्रत्यया-न्तं शब्दरूपमव्ययसंज्ञकं भवति । कृत्वा, हत्वा, प्रकृत्य, प्रहृत्य, कर्तुम्, हर्तुम्, यावज्जीवम्, स्वादुङ्कारम् ॥

गतिः ।१।१।३६॥ गतिसंज्ञकाः शब्दा अव्ययसंज्ञका भवन्ति । अदःकृत्य ॥

अव्ययस्य ।३।२।७॥ अव्ययसम्बन्धिनः स्यादेर्लुप् भवति । स्वरस्ति । प्रातरस्ति, स्वः पश्य, प्रातः पश्य । एवमन्यत्रापि ॥

॥ इत्यव्ययप्रकरणम् ॥

## ॥ अथाख्यातप्रकरणम् ॥

तत्रादौ णिजाद्यन्तवर्जिताः शव्विकरणा रूढ्या[1] भ्वादय इति ख्याता धातव उच्यन्ते। आख्यातपदेन त्यादिप्रत्ययास्तदन्ताश्च शब्दा उच्यन्ते। आख्यातप्रत्ययाश्च धातोर्भवन्ति ॥

**क्रियार्थो धातुः ।३।३।३॥** क्रिया कृतिः[2] । प्रवृत्तिः, व्यापार इति यावत् । क्रिया एव अर्थो यस्य स शब्दो धातुसंज्ञको भवति । धातवस्त्रिविधाः[3]-परस्मैपदिन आत्मनेपदिन उभयपदिनश्च[4] । तत्र--

**नवाद्यानि शतृक्वसू च परस्मैपदम् ।३।३।१९॥**

---

१-अत्र भ्वादिशब्देन धातुसामान्यस्य ग्रहणं दृश्यते न तु गणविशेषस्य । किन्तूक्तेषु भ्वादिरिति रूढिरिति भावः । २-कृतिर्गुणो न्यायनये नात्रेति ध्येयम् । ३-अत्र वि० वि० प्रक्रिया"धातुस्त्रिविधो गणजो नामजः सौत्रश्च । आद्यो नवधा । तथाहुः"अदादयः कानुबन्धा श्चानुबन्धा दिवादयः । स्वादयष्टानुबन्धाश्च तानुबन्धास्तनादयः ॥१॥ रुधादयः पानुबन्धा, यानुबन्धास्तनादयः । क्र्यादयः शानुबन्धाश्च, णानुबन्धाश्चुरादयः" ॥२॥ उक्तानुबन्धरहिता भ्वादयः । यत्र नामैव प्रत्ययसम्बन्धाद् धातुत्वं याति स नामधातुः । सौत्राश्च कण्ड्वादयो दोलणूप्रमुखाश्च । तन्नाभिनन्दन्ति बुधाः । भ्वादेर्नामिन इत्यादौ भ्वादिपदेन धातुसामान्यस्य ग्रहणात् । नाम्नश्च न धातुत्वं किन्तु प्रत्ययान्तस्येत्यपि द्रष्टव्यम् । ४-तथा चात्र कारिका-"ङनुबन्ध इदनुबन्धः, कर्त्तर्यप्यात्मनेपदी धातुः । ईगनुबन्धस्तूभयपदो, परस्मैपदी शेषः ॥इति॥ ॥१॥

सर्वासां त्यादिविभक्तीनामाद्यानि नव नव वचनानि शतृक्वसू च प्रत्ययौ परस्मैपदसंज्ञकानि भवन्ति ॥

**पराणि कानानशौ चात्मनेपदम्** ।३।३।२०॥ सर्वासां त्यादिविभक्तीनां पराणि नव नव वचनानि कानानशौ च प्रत्ययावात्मनेपदसंज्ञकानि भवन्ति ॥

**त्रीणि त्रीण्यन्ययुष्मदस्मदि** ।३।३।१७॥ सर्वासां त्यादिविभक्तीनां त्रीणि त्रीणि वचनानि अन्यस्मिन्नर्थे युष्मदर्थे अस्मदर्थे च वाच्ये यथाक्रमं भवन्ति । अत्राऽन्योऽर्थो युष्मदस्मदपेक्षया बोध्यः ॥

**एकद्विबहुषु** ।३।३।१८॥ अन्यादिषु यानि त्रीणि त्रीणि वचनानि उक्तानि तानि एकद्विबहुष्वर्थेषु यथाक्रमं भवन्ति । एकस्मिन्नर्थे एकवचनम्, द्वयोरर्थयोर्द्विवचनम्, बहुष्वर्थेषु बहुवचनमिति विवेकः ॥

**शेषात्परस्मै** ।३।३।१००॥ येभ्यो धातुभ्यो येन विशेषेणात्मनेपदमुक्तं ततोऽन्यस्मादेव धातोः कर्तरि परस्मैपदं भवति ॥

**सति** ।५।३।१९॥ सति अर्थे वर्त्तमानाद्धातोर्वर्त्तमाना विभक्तिर्भवति । सन् विद्यमानः, वर्त्तमान इत्यर्थः । प्रारब्धा

न च समाप्ता क्रिया वर्त्तमानक्रिया । तदुपहितः कालो वर्त्त-मानकालो वर्त्तमान इति चोच्यते ॥

वर्त्तमाना—तिव् तस् अन्ति, सिव् थस् थ मिव् वस् मस्, ते आते अन्ते, से आथे ध्वे, ए वहे महे ।३।३।६॥ इमानि वचनानि वर्त्तमानासंज्ञकानि भवन्ति । वकार इत्, वित्कार्यार्थः ॥

एताः शितः ।३।३।१०॥ एता वर्त्तमानासप्तमी-पञ्चमीह्यस्तन्यः शितः शकारानुबन्धा ज्ञातव्याः । ततश्चैषु शिन्निमित्तं कार्यं भवति ॥

कर्त्तर्यनद्भ्यः शव् ।३।४।७१॥ अदादिवर्जिताद् धातोः कर्त्तरि विहिते शिति शव् प्रत्ययो भवति । शकारव-कारावितौ । भू-सत्तायाम् । ततो भूधातोः कर्त्तरि प्रथमपुरुषै-कवचने तिवि अनुबन्धलोपे शिव्यात्ययनुबन्धलोपे भू अ ति इति स्थिते—

नामिनो गुणोऽक्ङिति ।४।३।१॥ नाम्यन्तस्य धातोः किद्ङिद्वर्जिते प्रत्यये परे आसन्नो गुणो भवति । अवादेशः । स भवति, तौ भवतः, ते भवन्ति । त्वं भवसि, युवां भवथः, यूयं भवथ ॥

१—लुगस्येत्यल्लुक् ।

**मव्यस्याः** ।४।२।११३।। धातोर्विहिते मकारादौ वकारादौ च प्रत्यये परे अत आकारादेशो भवति । अहं भवामि, आवां भवावः, वयं भवामः । यत्रान्ययुष्मदस्मत्सु द्वयोस्त्रयाणां वा योगस्तत्र सर्वादिगणपाठापेक्षया परत्वमाश्रित्य परनिमित्तक एव पुरुषो बोध्यः । यथा—स च त्वं च-भवथः । स च त्वं च अहं च-भवामः । त्वं च अहं च-भवावः ।।

**विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थने** ।५।४। २८।। प्रत्ययार्थः कर्ता कर्म भावश्च । स विध्यादिविशिष्टश्चेत्तदा धातोः सप्तमी–पञ्चम्यौ प्रत्ययौ भवतः ।।

**सप्तमी यात् याताम् युस्, यास् यातम् यात, याम् याव याम । ईत ईयाताम् ईरन्, ईथास् ईयाथाम् ईध्वम्, ईय ईवहि ईमहि** ।३।३।७।। इमानि वचनानि सप्तमीसंज्ञकानि भवन्ति ।।

**यः सप्तम्याः** ।४।२।१२२।। अकारात्परस्य सप्तम्याः सम्बन्धिनो याशब्दस्य इकारादेशो भवति । भवेत्, द् । भवेताम् ।।

---

१—एवं स चाहं च भवावः । २—विधिः क्रियायां प्रेरणा । निमन्त्रणमप्रत्याख्येया प्रेरणा । आमन्त्रणं कामचारानुज्ञा । अधीष्टं सत्कारपूर्विका प्रेरणा, संप्रश्नः संप्रधारणा । प्रार्थनं याञ्चा ।

**याम्युसोरियमियुसौ** ।४।२।१२३॥ अकारात्परयोर्याम् युस् इत्येतयोर्यथासंख्यमियमियुसावादेशौ भवतः । भवेयुः । भवेः, भवेतम्, भवेत । भवेयम्, भवेव, भवेम ॥

**आशिष्याशीःपञ्चम्यौ** ।५।४।३८॥ आशीर्विशिष्टेऽर्थे धातोराशीःपञ्चम्यौ विभक्ती भवतः ॥

**पञ्चमी–तुव् ताम् अन्तु, हि तम् त, आनिव् आवव् आमव्, ताम् आताम् अन्ताम्, स्व आथाम् ध्वम्, ऐव् आवहैव् आमहैव्** ।३।३।८॥ इमानि वचनानि पञ्चमीसंज्ञकानि भवन्ति । वकार इत् ॥

**आशिषि तुह्योस्तातङ् वा** ।४।२।११९॥ आशिषि विहितयोस्तुह्योः स्थाने तातङ् इत्यादेशो वा भवति । अकारङकारावितौ । भवतात्, द्[1], भवतु । भवताम्, भवन्तु ॥

**अतः प्रत्ययाल्लुक्** ।४।३।८५॥ धातोः परो योऽकारान्तः प्रत्ययस्तस्मात्परस्य हेर्लुग्[2] भवति । भवतात्, द्, भव । भवतम्, भवत । भवानि[3], भवाव, भवाम ॥

**अदुरुपसर्गान्तरो णहिनुमीनानेः** ।२।३।७७॥ दुर्वर्जोपसर्गस्थादन्तःशब्दस्थाच्च रषृवर्णात्परस्य णकार–हिनु–

१–धुटस्तृतीयः, विरामे वा । २–लुगस्य । ३–समानदीर्घः ।

मीना-आनि सम्बन्धिनो नकारस्य णो भवति। णेति णोपदेशा णद् णम् प्रभृतयो धातवः। प्रभवाणि, अन्तर्भवाणि। अदुरिति किम्? दुर्भवानि॥

**अनद्यतने ह्यस्तनी** ।५।२।७॥ अनद्यतनभूतेऽर्थे वर्तमानाद्धातोर्ह्यस्तनी विभक्तिर्भवति॥

**ह्यस्तनी-दिव् ताम् अन्, सिव् तम् त, अम्व् व म। त आताम् अन्त, थास् आथाम् ध्वम्, इ वहि महि।** ।३।३।९॥ इमानि वचनानि ह्यस्तनीसंज्ञकानि भवन्ति। वकार इत्, दिस्योरिकारश्च॥

**अड्धातोरादिर्ह्यस्तन्यां चामाङा** ।४।४।२९॥ ह्यस्तन्यामद्यतनीक्रियातिपत्त्योश्च विषये धातोरादिरवयवोऽड् भवति। माङ् योगे तु न भवति। अभवत्, द्, अभवताम्, अभवन्। अभवः, अभवतम्, अभवत, अभवम्, अभवाव, अभवाम॥

**अद्यतनी** ।५।२।४॥ भूतेऽर्थे वर्तमानाद् धातोरद्यतनी विभक्तिर्भवति॥

**विशेषाविवक्षाव्यामिश्रे** ।५।२।५॥ अद्यतनादिविशेषस्याऽविवक्षायां व्यामिश्रणे च सति भूतेऽर्थे वर्तमाना-

१-आन्याय्यादुत्थानादान्याय्याच्च संवेशनादहरुभयतः सार्धरात्रं वा कालोऽद्यतनस्तदन्योऽनद्यतनः। २-विरामे वा। ३-लुगस्य। ४-लुगस्य।
५-मध्यस्याः।

द्धातोरद्यतनी विभक्तिर्भवति ॥

**अद्यतनी-दि[1] ताम् अन्, सि तम् त, अम् व म। त आताम् अन्त, थास् आथाम् ध्वम्, इ वहि महि** ।३।२।११॥ इमानि वचनान्यद्यतनी-संज्ञकानि भवन्ति ॥

**सिजद्यतन्याम्** ।३।४।५३॥ धातोरद्यतन्यां परभूतायां सत्यां सिच् प्रत्ययो भवति । इकारचकाराविती ॥

**पिबैतिदाभूस्थः सिचो लुप् परस्मै न चेट्** ।४।३।६६॥ पिबेत्यनेन यस्य पिबादेशः स पाधातुः एति-इती णिकोर्ग्रहणम्। देति दासंज्ञका धातवः। पा इण् इक् दा-धा भू-स्था-एभ्यः परस्य सिचः परस्मैपदे लुप् लुप् सन्नियोगे चैतेभ्य इट्[2] न भवति ॥

**भवतेः सिज्लुपि** ।४।३।१२॥ सिचो लुपि भवतेर्गुणो न भवति। अभूत्[3], दू, अभूताम् ॥

**भुवो वः परोक्षाद्यतन्योः** ।४।२।४३॥ भुवो वकारान्तस्य परोक्षाद्यतन्योः परत उपान्त्यस्य ऊदित्यादेशो भवति। अभूवन्[4]। अभूः, अभूतम्, अभूत। अभूवम्[5], अभूव, अभूम ॥

---

१-दिस्योरिकार इत्। २-भूधातोः सिज्लोपेऽपि स्ताद्यशित इतीट् प्राप्तो निषिध्यते। अन्यत्र त्वनुस्वारेत्त्वादेव एकस्वरादिति नेट्।

३-सिचो लुकीण्निषेधे च गुणनिषेधे अड्धातोरित्यटि विरामे वा।

४-सिचो लुकि गुणनिषेधे धातोरिवर्णोवर्णस्येयुवादेशौ ऊकारादेशः।

५-अभूवन्नित्यत्रैव।

**माङ्यद्यतनी** ।५।४।३९॥ माङि उपपदे धातोरद्यतनीविभक्तिर्भवति । सर्वविभक्त्यपवादः । मा भूत् । माङा योगेऽत्राड् न ॥

**सस्मे ह्यस्तनी च** ।५।४।४०॥ स्मशब्दसहिते माङ्युपपदे धातोर्ह्यस्तनी अद्यतनी च भवति । मा स्म भवत्, मा स्म भूत् ॥

**परोक्षे** ।५।२।१२॥ भूतानद्यतने परोक्षेऽर्थे वर्त्तमानाद् धातोः परोक्षाविभक्तिर्भवति ॥

**परोक्षा–णव् अतुस् उस्, थव् अथुस् अ, णव् व म । ए आते इरे, से आथे ध्वे, ए वहे महे** ।३।३।१२॥ इमानि वचनानि परोक्षासंज्ञकानि भवन्ति । णकारवकारा इतः ॥

**द्विर्धातुः परोक्षाङे प्राक् तु स्वरे स्वरविधेः** ।४।१।१॥ परोक्षायां ङप्रत्यये च परे धातुर्द्विर्भवति, स्वरादौ तु द्विर्वचननिमित्ते प्रत्यये स्वरस्य कार्यात् प्रागेव द्वित्वं भवति ॥

**ह्रस्वः** ।४।१।३९॥ धातोर्द्वित्वे सति पूर्वस्य स्वरान्तस्य ह्रस्वो भवति ।

**भूस्वपोरदुतौ** ।४।१।७० भूस्वप् इत्येतयोः परोक्षायां द्वित्वे सति पूर्वस्य यथासंख्यमकारोकारौ भवतः ॥

**द्वितीयतुर्ययोः पूर्वौ** ।४।१।४२॥ धातोर्द्वित्वे सति पूर्वस्य द्वितीयतुर्ययोः स्थाने यथासंख्यमाद्यतृतीयावासन्नौ भवतः ॥

**नामिनोऽकलिहलेः** ।४।३।५१॥ नाम्यन्तस्य धातोः कलिहलिवर्जस्य नाम्नश्च ञिति णिति च प्रत्यये परे वृद्धिर्भवति । बभूवुः ।

**इन्ध्यसंयोगात् परोक्षा किद्वत्** ।४।३।२१॥ इन्धेरसंयोगान्ताच्च धातोः परा अवित्परोक्षा किद्वद् भवति । बभूवतुः, बभूवुः ॥

**स्कसृवृभृस्तुद्रुश्रुस्रोर्व्यञ्जनादेः परोक्षायाः** ।४।४।८२॥ सस्पटः कृधातोः सृवृभृस्तुद्रुश्रुसृवर्जितेभ्यश्च सर्वधातुभ्यः परस्य व्यञ्जनादेः परोक्षाप्रत्ययस्य आदिरिट् भवति । स्क इति ससटा निर्देशः किम् ? केवलस्य मा भूत्—चकृव, चकृम । बभूविथ, बभूवथुः, बभूव । बभूव, बभूविव, बभूविम ॥

आशीः—क्यात् क्यास्ताम् क्यासुस्, क्यास् क्यास्तम्, क्यास्त क्यासम् क्यास्व क्यास्म । **सीष्ट सीयास्ताम् सीरन्, सीष्टास् सीयास्थाम् सीध्वम्, सीय सीवहि सीमहि** ।३।३।१३॥ इमानि

१—भूधातोर्णवि अनुबन्धलोपे वृद्धेः पूर्वं द्वित्वादि । ततो वृद्धौ आवादेशे ऊत् । २—अत्र कित्वाद् गुणाभावे धातोरिवर्णेत्युवि अत् । एवमग्रेऽपि ।

वचनानि आशीःसंज्ञकानि भवन्ति। ककारः सर्वत्रेत्। भूयात्, द्। भूयास्ताम्, भूयासुः भूयाः, भूयास्तम्, भूयास्त। भूयासम्, भूयास्व, भूयास्म ॥

अनद्यतने श्वस्तनी ।५।३।५॥ अनद्यतनभविष्यदर्थाद् धातोः श्वस्तनीविभक्तिर्भवति ॥

श्वस्तनी–ता तारौ तारस्, तासि तास्थस् तास्थ, तास्मि तास्वस् तास्मस्। ता तारौ तारस्, तासे तासाथे ताध्वे ताहे तास्वहे तास्महे ।३।३।१४॥ इमानि वचनानि श्वस्तनीसंज्ञकानि भवन्ति ॥

स्ताद्यशितोऽत्रोणादेरिट् ।४।४।३२॥ धातोः परस्य सकारादेस्तकारादेश्चाशितः प्रत्ययस्य आदिरिट् भवति। अप्रत्ययस्य उणादेश्च न भवति। भविता, भवितारौ, भवितारः। भवितासि, भवितास्थः, भवितास्थ। भवितास्मि, भवितास्वः, भवितास्मः ॥

भविष्यन्ती ।५।३।४॥ भविष्यदर्थे वर्त्तमानाद्धातोः परा भविष्यन्ती विभक्तिर्भवति ॥

भविष्यन्ती–स्यति स्यतस् स्यन्ति, स्यसि स्यथस् स्यथ, स्यामि स्यावस् स्यामस्। स्यते स्येते स्यन्ते, स्यसे स्येथे स्यध्वे, स्ये स्यावहे

---

१–क्त्वान्न गुणः। धुटस्तृतीयः, विरामे वा। २–इडागमे गुणे अवादेशः।

स्यामहे ।३।३।१५॥ इमानि वचनानि भविष्यन्तीसंज्ञानि भवन्ति । भविष्यति, भविष्यतः, भविष्यन्ति । भविष्यसि, भविष्यथः, भविष्यथ । भविष्यामि, भविष्यावः, भविष्यामः ॥

**सप्तम्यर्थे क्रियातिपत्तौ क्रियातिपत्तिः ।५।४।९॥** सप्तम्या अर्थो निमित्तं हेतुफलकथनादिका सामग्री । कुतश्चिद् वैगुण्यात् क्रियाया अतिपतनमनभिनिर्वृत्तिः क्रियातिपत्तिः । क्रियातिपत्तौ सत्यां भविष्यत्यर्थे वर्तमानाद्धातोः सप्तम्यर्थे क्रियातिपत्तिविभक्तिर्भवति ॥

**क्रियातिपत्तिः–स्यत् स्यताम् स्यन्, स्यस् स्यतम् स्यत, स्यम् स्याव स्याम । स्यत स्येताम् । स्यन्त, स्यथास् स्येथाम् स्यध्वम्, स्ये स्यावहि स्यामहि** ।३।३।१६॥ इमानि वचनानि क्रियातिपत्तिसंज्ञकानि भवन्ति । सुवृष्टिश्चेदभविष्यत् सुभिक्षमभविष्यत् । अभविष्यताम्, अभविष्यन् । अभविष्यः, अभविष्यतम्, अभविष्यत । अभविष्यम्, अभविष्याव, अभविष्याम ॥ पां पाने ॥

**॥ श्रौतिकृवुधिवुपाघ्राध्मास्थाम्नादाम्दृश्य-**

---

१–इटि गुणे अवादेशे नाम्यन्तस्थेति षः । २–सूत्रे सप्तम्यर्थपदार्थं क्रियातिपत्तिपदार्थं चाह । ३–इटि गुणे अवादेशे अडागमे षः । ४–श्रु, कृव्, धिव्, पा, घ्रा, ध्मा, स्था, म्ना, दा, दृश्, ऋ, शद्, सद्,–एतेषां धातूनां स्थाने यथासंख्यं शृ, कृ, धि, पिब, जिघ्र, धम, तिष्ठ, मन यच्छ, पश्य, ऋच्छ, शीय, सीद, इत्येते आदेशा भवन्ति ।

**र्तिशादसदः शृकृधिपिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छशीयसीदम्** ।४।२।१०८॥ श्रौत्याद्दीनां त्रयोदशानां शिति परे यथासंख्यं शृ इत्यादय आदेशा भवन्ति अत्यादौ । पिबति[1] पिबन्ति[2] । पिबामि[3], पिबेत्[4], द् । पिबतु । पिब[5] । अपिबत्, द् । अपिबम् । अपात्[6], द् ॥

**सिज्विदोऽभुवः** ।४।२।९२॥ सिचः प्रत्ययाद् विदश्च धातोः परस्य अनः स्थाने पुसादेशो भवति, न चेद् भूधातोः परः सिज् भवति । पकार इत् ॥

**इडेत्पुसि चातो लुक्** ।४।३।९४॥ क्ङित्यशिति स्वरादौ इटि एकारे पुसि च परे आकारान्तस्य धातोरन्तस्य लुग् भवति । अपुः अपाम्[7] ।

**आतो णव औः** ।४।२।१२०॥ आकारात्परस्य णवः स्थाने औरित्यादेशो भवति । पपौ[8] । पपतुः[9] ॥

**सृजिदृशिस्कृस्वरात्वतस्तृज्नित्यानिटस्थवः** ॥ ४।४।७९॥ सृजिदृशिभ्याम् स्सडागमसहितात्कृगः स्वरा-

१–लुगस्येत्यल्लुक् । २–लुगस्येति पुनर्लुक् । ३–मव्यस्याः । ४–यः सप्तम्याः । अवर्णस्येत्येत् । ५–हे र्लुक् । ६–पिबैतीति सिचो लुक् । ७–सिज्लुकि समानदीर्घः । ८–द्वित्वे ह्रस्वत्वे ऐदौदित्यैत्वम् । ९–कित्वादालुक् ।

न्तादकारवतश्च तृचि नित्यानिटो[1] धातोर्विहितस्य थव आदिरिड् वा भवति । पपिथ[2], पपाथ । पपिम ॥

**गापास्थासादामाहाकः** ।४।३।९६ गा, पा, स्था, सा, दा, मा, हा, इत्येतेषामन्तस्य क्ङित्याशिषि एकारो भवति । पेयात् , द् ॥

**एकस्वरादनुस्वारेतः** ।४।४।५७॥ एकस्वरादनुस्वारेतो धातोर्विहितस्य स्ताद्यशित आदिरिट् न भवति । पाता, पास्यति । अपास्यत् , द् ॥ घ्रां गन्धोपादाने ॥ जिघ्रति[3] । जिघ्रन्ति, जिघ्रामि । जिघ्रेत् , द् । जिघ्रतात् , द् , जिघ्रतु । जिघ्राणि[4] । अजिघ्रत् , द् । अजिघ्रन् । अजिघ्रम् , अजिघ्राम ॥

**ट्धेघ्राशाच्छासो वा** ।४।३।६७॥ धे, घ्रा, शा, छा, सा, एभ्यः परस्य सिचः परस्मैपदे लुप् वा भवति । अघ्रात् , द् । अघ्रुः[5] । अघ्राम् । पक्षे-

**सः सिजस्तेर्दिस्योः** ।४।३।६५॥ सिच् प्रत्ययान्ताद् धातोरस्तेश्च सकारान्तात्परः परादिरीत् भवति दिस्योः परयोः ।

---

१-अनुस्वारेत् धातुः सर्व एव तृचि नित्यानिट् भवति । वेट् धातुरपि न नित्यानिडिति बोध्यम् । २-इटि आलुक् । ३-लुगस्य । ४-समानदीर्घे रषृवर्णादिति णः । ५-पुस्यालुक् ।

**यमिरमिनम्यातः सोऽन्तश्च** ।४।४।८७।। यमिरमिनमिभ्य आदन्तेभ्यश्च धातुभ्यः परस्य परस्मैपदविषयस्य सिच आदिरिट् भवति, एषां धातूनां च सोऽन्तो भवति ।।

**इट ईति** ।४।३।७१।। इटः परस्य सिच ईति परे लुग् भवति । अघ्रासीत्[1], द् । अघ्रासिष्टाम्[2], अघ्रासिषुः । अघ्रासीः[3], अघ्रासिषम् । अघ्रासिष्व ।।

**द्वित्वे ह्यव्यञ्जनस्यानादेर्लुक्** ।४।१।।४४ धातोर्द्वित्वे सति पूर्वस्य अनादेर्व्यञ्जनस्य लुग् भवति । एकवचनमविवक्षितम्[4] ।

**गहोर्जः** ।४।१।४०।। धातोर्द्वित्वे सति पूर्वयोर्गकारहकारयोर्जकारो भवति । जघ्रौ[5], जघ्रतुः[6], जघ्रिथ[7], जघ्राथ । जघ्रिव[8] ।

**संयोगादेर्वाशिष्येः** ।४।३।९५।। धातोः संयोगादेराकारान्तस्य क्ङित्याशिषि परे अन्तस्यैकारादेशो वा भवति । घ्रेयात्, द् । घ्रायात्, द् । घ्रेयास्ताम्, घ्रायास्ताम् । घ्राता[9],

१–स्ताद्यशित इति त्वेकस्वरादिति निषिद्धः । सिज्लुकि समानदीर्घः । २–नाम्यन्तस्थेति षः, तवर्गस्येति टः । ३–रुत्वविसर्गौ । ४–अतो यथासम्भवमनेकस्यापि लुक । ५–द्वित्वे अनादिव्यञ्जनलोपे ह्रस्वत्वे द्वितीयेति तृतीयत्वे जत्वे औत्वम् । ६–कित्त्वे इडेत्पुसीत्यालुक् । ७–सृजिदृशीतीट् । इडेदित्यालुक् । ८–व्यञ्जनादित्वादिट् । ९–एकस्वरादिति नेट् ।

घ्रास्यति, अघ्रास्यत्, द् ॥ ध्मां शब्दाग्निसंयोगयोः । धमति, धमेत्, द् । धमतात्, द्, धमतु । अधमत्, द् । अधमन्, अधमम् । अधमाम । अध्मासीत्, द् । अध्मासिषुः । दध्मौ, दध्मुः, दध्मिथ, दध्माथ । दध्मिम । ध्मेयात्, द् । ध्मायात्, द् । ध्माता, ध्मास्यति, अध्मास्यत्, द् ॥ ष्ठां गतिनिवृत्तौ ॥

**षः सोऽष्ट्यैष्ठिवष्वष्कः** ।२।३।९८॥ ष्ट्यैष्ठिवष्वष्कवर्जस्य पाठे धात्वादेः षकारस्य सकारादेशो भवति । निमित्तापाये नैमित्तिकस्याऽप्यपायोऽग्न्यपाये तन्निमित्तद्रवत्वापायवत् । अतः षकाराभावे तन्निमित्तठकारस्याऽप्यभावे स्थाधातुः । तिष्ठति । तिष्ठेत्, द् । तिष्ठतात्, द्, तिष्ठतु । तिष्ठानि । अतिष्ठत्, द् । अतिष्ठन । अतिष्ठम् । अस्थात्, द् । अस्थाताम्, अस्थुः । अस्थाम् ।

**अघोषे शिटः** ।४।१।४५॥ धातोर्द्वित्वे सति पूर्वस्य शिटस्तत्सम्बन्धिन्येवाऽघोषे परे लुग् भवति । अनादिलुगपवादोऽयम् । तस्थौ, तस्थुः, तस्थिथ, तस्थाथ । तस्थिम । स्थेयात्, द् । स्थाता, स्थास्यति, अस्थास्यत्, द् ॥

१–लुगस्य । २–पुनर्लुगस्य । ३–यमिरमि० । ४–सिज्विदः । ५–संयोगादेर्वा । ६–पिबैतीति सिज्लुक् । ७–इडेत्पुसीत्यालुक् । ८–द्वितीयेति प्रथमत्वम् । ९–क्त्वे आलुक् । १०–सृजिदृशीति वेट्यालुक् । ११–गापास्था० । १२–एकस्वरात् ।

म्नां अभ्यासे ॥ मनति, मनेत्, द् । मनतात्, द् । अम्नासिष्टाम्[1], अम्नासिषुः । मम्नौ, मम्नतुः, मम्निथ, मम्नाथ, मम्निम । म्नेयात्[2], द् । म्नायात्, द् । म्नाता, म्नास्यति, अम्नास्यत्, द् ।

दांम् दाने ॥ यच्छति[3], यच्छेत्, द् । यच्छतात्, द्, यच्छतु । अयच्छत्, द् ।

**अवौ दा धौ दा ।३।३।५॥** अवितौ दा धा इत्येवंरूपौ धातू दासंज्ञौ भवतः । अदात्, द्[4] । अदुः[5] । अदाम् । ददौ, ददुः । ददिथ, ददाथ । ददिम । देयात्[6], द् । दाता, दास्यति । अदास्यत्, द् ।

जिं ज्रिं अभिभवे । जयति[7], जयेत्, द् । जयतात्, द्, जयतु । अजयत्, द् ॥

**सिचि परस्मै समानस्याऽङिति ।४।३।४४॥** समानान्तस्य धातोः परस्मैपदविषये अङिति सिचि परे आसन्ना वृद्धिर्भवति । अजैषीत्[8], द् । अजैष्टाम्, अजैषुः ॥

**जेर्गिः सन्परोक्षयोः ।४।१।३५॥** जिधातोः सनि परोक्षायां च द्वित्वे सति पूर्वस्मात्परस्य गि इत्यादेशो भवति । जिगाय[9] । जिग्यतुः[10] । जिगेयिथ[11], जिगेथ ।

---

१—यमिरमिनमि० । २—संयोगादेर्वा० । ३—श्रौतिकृवु० । ४—पिबैति० । ५—इडेत्पुसि० । ६—गापा० । ७—नामिन इति गुणे अयादेशः । ८—एकस्वरादितीण्निषेधः । ९—नामिनोऽकलीति वृद्धिः । १०—योऽनेकस्वरस्य । ११ १६—थवि वेट् ।

**णिद्वान्त्यो णव्** ।४।३।५८॥ परोक्षाया अन्त्यो णव् वा णिद् न भवति । पूर्वत्र[1] धातुषु णित्त्वविकल्पेऽपि न रूपभेद इति भूधातावेव नेदं सूत्रमुल्लिखितम् । जिगाय, जिगय[2] । जिग्यिम[3] ॥

**दीर्घश्च्वियङ्यक्क्येषु च** ।४।३।१०८॥ च्वौ यङि यक्ि क्येषु यकारादावाशिषि च परे अन्त्यस्वरस्य दीर्घो भवति । जीयात्, द् । जेता[4], जेष्यति, अजेष्यत्, द् । ज्रयति, ज्रयेत्, द्, ज्रयतात्, द् ज्रयतु । अज्रयत्, द् । अज्रैषीत्, द् । जिज्राय, जिज्रियतुः[5] । जिज्रयिथ, जिज्रेथ । जिज्रियिम । ज्रीयात्[6], द् । ज्रेता, ज्रेष्यति । अज्रेष्यत्, द् ॥

**स्मृं चिन्तायाम्** । स्मरति, स्मरेत्, द् । स्मरतात्, द्, स्मरतु । अस्मरत्, द् । अस्मार्षीत्[7], द् । अस्मार्ष्टाम्, अस्मार्षुः ॥

**ऋतोऽत्** ।४।१।३८॥ धातोर्द्वित्वे सति पूर्वस्य

---

१–भूधातौ णिद्विकल्पे गुणे अवादेशे उपान्त्यस्य ऊत्वे बभूवेत्येव रूपम् । २–णिति वृद्धिः, णित्त्वाभावे गुणः । ३–स्क्रसृ इति इट्, योऽनेकस्वरस्य । ४–स्ताद्यशित इति एकस्वरादिति निषिध्यते । नामिन इति गुणः । ५–संयोगादितीयादेशः । क्ङित्वान्न गुणः । ६–दीर्घश्च्वीति दीर्घः । ७–सिचि वृद्धिरिति वृद्धिः, अनुस्वारेत्त्वान्नेट् । ८–प्रसङ्गादुपन्यस्तम्, न तु तस्यात्रोपयोगः, द्वित्वात्परत्वाद् गुणस्यैव प्रवृत्तेः, ततो द्वित्वमिति ध्येयम् ।

ऋतोऽद् भवति ॥

**संयोगादृदर्त्तेः** ।४।३।९॥ संयोगात्परो य ऋकारस्तदन्तस्य धातोरर्तेश्च परोक्षायां परतो गुणो भवति । ककारोपलक्षितायां क्वसुकानरूपायां न भवति ॥

**ञ्णिति** ।४।३।५०॥ ञिति णिति च प्रत्यये परे धातोरुपान्त्यस्यातो वृद्धिर्भवति सस्मार, सस्मरतुः ॥

**ऋतः** ।४।४।८०॥ तृचि नित्यानिट ऋकारान्ताद् धातोर्विहितस्य थव आदिरिट् न भवति । सस्मर्थ । सस्मार, सस्मर । सस्मरिमे ॥

**क्ययङाशीर्ये** ।४।३।१०॥ संयोगात्परो य ऋकारस्तदन्तस्य धातोरर्तेश्च क्ये यङि आशीःसम्बन्धिनि यादौ च प्रत्यये परे गुणो भवति । स्मर्यात्, द् । स्मर्ता ॥

**हन्नृतः स्यस्य** ।४।४।४९॥ हन्तेर्ऋकारान्ताच्च धातोः परस्य स्यस्यादिरिड् भवति । स्मरिष्यति । अस्मरिष्यत्, द् ॥

तॄ प्लवनतरणयोः । तरति, तरेत्, द् । तरतात्, द्, तरतु । अतरत्, द् । अतारीत्, द् । अतारिष्टाम्, अतारिषुः ॥

**स्कृच्छृतोऽकि परोक्षयाम्** ।४।३।८॥ स्कृ ऋच्छ्

१–गुणे द्वित्वे ञ्णितीति वृद्धिः । २–स्क्रसृतीट् । ३–स्ताद्यशित इति तु न, अनुस्वारेत्त्वात् । अयं तु प्रतिप्रसवः । ४–सिचीटीति सिचि परस्मै इति वृद्धौ सिज्लोपे दीर्घे च रूपम् । ५–सिजविदः ।

इत्येतयोर्ऋकारान्तानां च धातूनां नामिनः परोक्षायां परतो गुणो भवति, ककारोपलक्षितायां तस्यां न भवति । ततार ॥

**तॄत्रपफलभजाम्** ।४।१।२५। तॄत्रप्फल्भज् इत्येषां धातूनामवित्परोक्षा-सेट्थवोः परयोरकारस्य एत्वं भवति, एषां द्वित्वं न भवति । तेरतुः, तेरुः, तेरिथ, ततार, ततर, तेरिम ॥

**ऋतां क्ङितीर्** ।४।४।११७॥ ऋकारान्तस्य धातोः क्ङिति च प्रत्यये परे ऋकारान्तस्य स्थाने इर् इत्ययमादेशो भवति ॥

**भ्वादेर्नामिनो दीर्घो र्वोर्व्यञ्जने** ।२।१।६३॥ भ्वादेर्धातोरवयवभूतौ यौ रेफवकारौ तयोः परयोस्तस्यैव भ्वादेर्नामिनो दीर्घो भवति ताभ्यां चेत्परं व्यञ्जनं भवति । तीर्यात्, दू ॥

**वॄतो नवाऽनाशीः सिच् परस्मै च** ।४।४।३५॥ वृग्वृङ्भ्याम् ॠकारान्तेभ्यश्च धातुभ्यः परस्य इटो वा दीर्घो भवति, परोक्षायमाशिषि परस्मैपदविषये सिचि च न भवति । तरीता, तरीता । तरीष्यति, तरिष्यति । अतरीष्यत् द् ॥ **ट्धें पाने** । धयति, धयेत्, द् ।

१—नामिन इति वृद्धिः । २—स्क्रसृतीट् । ३—स्ताद्यशित इतीट् । ४—शव्ययादेशः । आदित्वात्वं तु न, न शितीति निषेधादिति ध्येयम् ।

धयतात्, द्, धयतु । अधयत्, द् ॥

**आत्सन्ध्यक्षरस्य** ।४।२।१॥ सन्ध्यक्षरान्तस्य धातोराकारान्तादेशो भवति निर्निमित्तः ॥

**न शिति** ।४।२।२॥ धातोः सन्ध्यक्षरान्तस्य शिति प्रत्यये विषयभूते आकारो न भवति ॥

**ट्धेश्वेर्वा** ।३।४।५९॥ ट्धेश्विभ्यां कर्त्तर्यद्यतन्यां ङप्रत्ययो वा भवति । अदधत्,[1] द् । अदधन्[2] । अदधम्[3] । अदधाम[4] । अधात्[5], द्, । अधुः । अधासीत्[6], द् । अधासिषुः अधासिष्टम् । अधासिष्म । दधौ, दधुः[7] । दधिथ । दधिम । धेयात्[8], द् । धाता, धास्यति, अधास्यत्, द् ॥ **गैं गाने** । गायति, गायेत्, द् । गायतात्, द्, गायतु । अगायत्, द् । अगासीत्[9], द् । अगासुः । जगौ, जगतुः, जगिथ, जगाथ । जगिम । गेयात्[10], द् । गाता, गास्यति, अगास्यत्, द्, ॥ **ध्यैं चिन्तायाम्** । ध्यायति, ध्यायेत्, द् । ध्यायतात्, द्, ध्यायतु । अध्यायत्, द् । अध्यासीत्, द् । दध्यौ, दध्यतुः, दध्यिथ, दध्याथ । दध्यिम । ध्येयात्, द् ॥

१–आत्वे ङ प्रत्यये द्वित्वे ह्रस्वत्वे द्वितीयेति तृतीयत्वे इडेदित्यालुक् । २–लुगस्य । ३–लुगस्य । ४ मव्यस्याः । ५–ङविकल्पे ट्धेश्वेति सिज्लुक् । ६–सिज्लुग्विकल्पे यमिरमिनमि० । ७–कित्वे आलुक् । ८–दासंज्ञायां गापेत्येत् । ९–आत्वे इणिषेधे यमिरमि० । १०–गापेत्येत् ।

ध्यायात्, द् । ध्याता, ध्यास्यति, अध्यास्यत्, द् । **अर्च पूजायाम्** । अर्चेति, अर्चेत्, द् । अर्चतात्, द् । अर्चतु ।

**स्वरादेस्तासु** ।४।४।३१।। स्वरादेर्धातोरादेः स्वरस्याद्यतनीक्रियातिपत्तिह्यस्तनीषु विषये आसन्ना वृद्धिर्भवति । माङ योगे तु न भवति । आर्चत्, द् । आर्चीत् द्[1] । आर्चिषुः । आर्चिष्टम् ॥

**अनातो नश्चान्तऋदाद्यशौ संयोगस्य** ।४।१।६९।। ऋकारादेरश्नोतेः संयोगान्तस्य च धातोः परोक्षायां द्वित्वे पूर्वस्य आदेरकारस्य आकारस्थाने अनिष्पन्नस्य आकारो भवति, कृताकारात्तस्मान्नोन्तश्च । आनर्च, आनर्चतुः, आनर्चिथ, आनर्चिम । अर्च्यात्, द् । अर्चिता, अर्चिष्यति आर्चिष्यत्, द् ॥

**लघोरुपान्त्यस्य** ।४।३।४।। धातोरुपान्त्यस्य नामिनो लघोरक्ङिति प्रत्यये परे गुणो भवति ॥ **शुच् शोके** । शोचति, शोचेत्, द्, शोचतात्, द्, शोचतु, अशोचत्, द्, अशोचीत्, द्, शुशोच, शुशोचिथ, शुशुचिम । शुच्यात्, द्, शोचिता, शोचिष्यति । अशोचिष्यत्, द् ॥ **त्यजं हानौ** । त्यजति, त्यजेत्, द्, त्यजतात्, द्,

१—सिचि स्ताद्यशित इतीटि सः सिजस्तेरितीति, स्वरादेरिति वृद्धौ सिज्लोपे समानदीर्घः ।

त्यजेतु, अत्यजत्, द् ॥

व्यञ्जनानामनिटि ।४।३।४५॥ व्यञ्जनान्तस्य धातोः परस्मैपदविषयेऽनिटि सिचि परे समानस्य वृद्धिर्भवति । अत्याक्षीत्[1], द् ॥

धुड्ह्रस्वाल्लुगनिटस्तथोः ।४।३।७०॥ धुडन्ताद् ह्रस्वान्ताच्च धातोः परस्यानिटः सिचस्तकारादौ थकारादौ च प्रत्यये परे लुग् भवति । अत्याक्ताम्[2], अत्याक्षुः[3], अत्याक्ष्म । तत्याज[4], तत्यजुः, तत्यजिथ, तत्यक्थ[5] । त्याज, तत्यज । तत्यजिम । त्यज्यात्, द् । त्यक्ता[6], त्यक्षति, अत्यक्षत्, द् ॥ **व्रज गतौ** । व्रजति, व्रजेत्, द्, व्रजतात्, द्, व्रजतु । अव्रजत्, द् ॥

वदव्रजलृः ।४।३।४८॥ वदव्रजोर्लृकारान्तानां रेफान्तानां च धातूनामुपान्त्यस्याकारस्य परस्मैपदविषये सेटि सिचि परे वृद्धिर्भवति । अव्राजीत्, द् । अव्राजिषुः अव्राजिष्टम्, अव्राजिष्म । वव्राज, वव्रजिथ, वव्रजथुः, वव्राज, वव्रज । वव्रजिम । व्रज्यात्, द्, व्रजिता, व्रजिष्यति, अव्रजिष्यत्, द् । **पत्लृ पथे गतौ** । पतति ॥

---

१–सिचि एकस्वरादिति णिनषेधे इति वृद्धौ अटि चज इति गत्वे अघोष इति प्रथमत्वे नाम्यन्तस्थेति षः । २–वृद्धौ सिज्लुकि गत्वे प्रथमत्वे च रूपम् । ३–सिज्विद इति पुस् । ४–ङ्गिति । ५–सृजिदृशीति वेट् । पक्षे चज इति गत्वे अघोष इति प्रथमत्वम् । ६–एकस्वरादिति नेट्, गत्वम्, कत्वम् ।

नेर्ङ्मादापतपदनदगदवपीवहीशमूचिग्याति चातिद्रातिप्सातिस्यतिहन्तिदेग्धौ ।२।३।७९।। माङ्-मेङौ, दा, पत्, पद्, नद्, गद्, वप्, वह्, शम्, चि, या, वा, द्रा, प्सा, सो, हन्, दिह्, इत्येतेषु धातुषु परेषु दुर्वर्जोपसर्गस्थाद् अन्तःशब्दस्थाच्च रादेः परस्योपसर्गस्य नेर्नकारस्य णो भवति । देति दासंज्ञक-स्य ग्रहणम् । प्रणिपतति । पतेत्, द् । पततात्, द्, पततु, अपतत्, द् ।

लृदिद्द्युतादिपुष्यादेः परस्मै ।३।४।६४।। लृदितो धातोर्द्युतादिभ्यः पुष्यादिभ्यश्च कर्त्तर्यद्यतन्यां परस्मैपदे अङ् प्रत्ययो भवति ॥

श्वयत्यसूवचपतः श्वास्थवोचपप्तम् ।४।३।१०३।। श्वि, अस्, वच्, पत् इत्येतेषामङि परे यथासंख्यं श्व अस्थ वोच पप्त इत्येते आदेशा भवन्ति । अपप्तत्, द् । अपप्तन् । अपप्ततम् । अपप्तम् । अपप्ताम । पपात ॥

अनादेशादेरेकव्यञ्जनमध्येऽतः ।४।१।२४।। अवि-त्परोक्षासेट्थवोः परयो र्योऽनादेशादिर्धातुस्तत्सम्बन्धिनः स्वरस्याऽकाररूपस्य असंयुक्तव्यञ्जनमध्यस्थस्य स्थाने एका-रादेशो भवति, न च धातुर्द्विर्भवति । पेततुः । पेतिथ । पपात, पपत । पेतिम । पत्यात्, द् । पतिता । पतिष्यति ।

१–कुत्स्येत्यस्लुक् । २–पुनर्लुगस्य । ३–पुनर्लुगस्य । ४–स्क्रसितीट् ।

अपतिष्यत्, द्। पथति। पथेत, द्। पथतात्, द्। पथतु। अपथत्, द्॥

**न श्विजागृशसक्षण्हम्येदितः** ।४।३।४९॥ श्वि, जागृ, शस्, क्षण् इत्येषां हकारमकारयकारान्तानाम् एदितां च धातूनां परस्मैपदविषये सेटि सिचि परे वृद्धिर्न भवति॥

**व्यञ्जनादेर्वोपान्त्यस्यातः** ।४।३।४७॥ व्यञ्जनादेर्धातोरुपान्त्यस्याकारस्य सेटि सिचि परस्मैपदविषये परे वृद्धिर्वा भवति। अपथीत्[1], द्। पपाथ। पेथतुः। पेथिथ। पेथिम। पथ्यात्, द्। पथिता। पथिष्यति। अपथिष्यत्, द्॥ **गद व्यक्तायां वाचि।** गदति। प्रणिगदति[2]। गदेत्, द्। गदतात्, द्, गदतु। अगदत्, द्। अगादीत्[3], द्, अगदीत्, अगादिषुः, अगदिषुः। अगादीः, अगदीः। अगादिष्म, अगदिष्म। जगाद[4]। जगदुः। जगदिथ[5]। जगाद, जगद। जगदिम। गद्यात्, द्। गदिता, गदिष्यति, अगदिष्यत्, द्॥ **अर्द गतियाचनयोः।** अर्दति, अर्देत्, द्। अर्दतात्, द्, अर्दतु। आर्दत्[6], द्। आर्दीत्, द्। आनर्द, आनर्दुः, आनर्दिथ। अर्द्यात्, द्। अर्दिता, अर्दिष्यति, आर्दिष्यत्, द्॥ **णिदु कुत्सायाम्॥**

१–व्यञ्जनादेरिति प्राप्ता वृद्धिरेदित्त्वान्न श्विजाग्रित्यादिना निषिध्यते इति बोध्यम्। २–नेर्ङ्मादेति णः। ३–सिचीटीति वृद्धावटि च सिज्लोपे समानदीर्घः पक्षे वृद्ध्यभाव इत्यगदीदिति बोध्यम्। ४–गहोर्जः। ञ्णितीति वृद्धिः। ५–स्क्रसितीट्। ६–स्वरादेस्तास्विति वृद्धिः।

**पाठे धात्वादेर्णो नः ।२।३।९७।।** पाठविषये धात्वादेर्णकारस्य नकारादेशो भवति ।

**उदितः स्वरान्नोन्तः ।४।४।९९।।** उदितो धातोः स्वरात्परो नोऽन्तावयवो भवति । निन्दति[1] । निन्देत् , द् । निन्दतात् , द् , निन्दतु । अनिन्दत् , द् । अनिन्दीत् , द् । निनिन्द । निनिन्दिथ । निनिन्दिम । निन्द्यात्[2] , द् । निन्दिता, निन्दिष्यति । अनिन्दिष्यत् , द् ।। **टुनदु समृद्धौ** ।। नन्दति । नन्देत् , द् । नन्दतात् , द् , नन्दतु । अनन्दत् , द् । अनन्दीत् , द् । ननन्द । ननन्दिथ । नन्द्यात् , द् । नन्दिता, नन्दिष्यति, अनन्दिष्यत् , द् ।। **णमं प्रह्वत्वे** । नमति, प्रणमति[3] । नमेत् , द् । नमतात् , द् , नमतु । अनमत् , द् । अनंसीत्[4] , द् । अनंसिषुः । अनंसिष्म् । अनंसिष्म । ननाम, नेमतुः[5] । नेमिथ, ननन्थ[6] । ननाम, ननम । नेमिम । नम्यात् , द् । नन्ता[7] । नंस्यति[8] । अनंस्यत् , द् ।। **गम्लृं गतौ** ।।

**गमिषद्यमश्छः ।४।२।१०६।।** गम् , इषत् , यम् ,

---

१–पर्जन्यवल्लक्षण प्रवृत्तिरितिन्यायेन म्नां धुड्वर्गेति पञ्चमत्वम् । २–उदित्वात् ङिति नलुक् न । उदित्वात् किति नलुक् न । ३–अदुरुपसर्गान्तर इति णः । ४–स्ताद्यशित इतीट एकस्वरादिति निषेधे यमिरमीति इट् सोन्तश्च । शिड्हे इत्यनुस्वारः । ५–अनादेशादेरित्येत्वं द्वित्वनिषेधश्च । ६–म्नां धुड्वर्गे इति पञ्चमः । ७–म्नाम् । ८–शिड्हे० ।

इत्येषां शिति प्रत्यये परे छकारान्तादेशो भवति। गच्छति। गच्छेत्, द्। गच्छतात्, द्, गच्छतु। अगच्छत्, द्। अगमत्, द्। अगमन्। अगमम्। अगमाम। जगाम॥

**गमहनजनखनघसः स्वरेऽनङि क्ङिति लुक्** ।४।२।४४॥ गम्, हन्, जन्, खन्, घस्, इत्येषां धातूनामुपान्त्यस्य अङ्वर्जे स्वरादौ क्ङिति प्रत्यये परे लुग् भवति। जग्मतुः। जगमिथ, जगन्थ। जगाम, जगम। जग्मिम। गम्यात्, द्। गन्ता॥

**गमोऽनात्मने** ।४।४।५१।५२॥ गमः परस्य सकारादेस्ताद्यशित आदिरिड् भवति, आत्मनेपदे न भवति। गमिष्यति, अगमिष्यत्, द्। क्रमू पादविक्षेपे।

**भ्राशभ्लाशभ्रमक्रमक्लमत्रसित्रुटिलषि यसि संयसेर्वा** ।३।४।७३॥ भ्राश्, भ्लाश् भ्रम् क्रम् क्लम् त्रस् त्रुट् लष् यस् संयस् इत्येतेभ्यः कर्त्तरि विहिते शिति श्यः प्रत्ययो वा भवति। शकार इत्॥

**क्रमो दीर्घः परस्मै** ।४।२।१०९॥ क्रमेः परस्मैपदे शिति परे दीर्घो भवति अत्यादौ। क्राम्यति, क्रामति। क्राम्येत्, द्, क्रामेत्, द्। क्राम्यतात्, द्, क्राम्यतु, क्रामतात्, द्, क्रामतु। अक्राम्यत्, द्। अक्रामत्, द्॥

१–स्वरेभ्यः, अघोषे प्रथमः। २–ऌदिद्। ३–सृजिदृशीति वेट्, म्नां धुड्वर्गे। ४–अनुस्वारेत्त्वान्नेट्, म्नां धुड्वर्गे।

क्रमः ।४।४।५४।। क्रमः परस्य स्ताद्यशित आदिरिड् भवति । आत्मनेपदे न भवति । अक्रमीत्[1], द् । अक्रमिषुः । अक्रमिष्टम्, अक्रमिष्म ।।

कङश्चञ् ।४।१।४६।। धातोर्द्वित्वे सति पूर्वयोः ककारङकारयोर्यथासंख्यं चकारञकारौ भवतः । चक्राम, चक्रमतुः, चक्रमिथ[2] । चक्राम, चक्रम । चक्रमिम । क्रम्यात् । क्रमिता[3], क्रमिष्यति । अक्रमिष्यत्, द् ।। दृशृं प्रेक्षणे ।। पश्यति[4], पश्येत्, द् । पश्य, पश्यतात्, द् । अपश्यम् ।।

ऋदिच्छ्विस्तम्भूम्रुचूम्लुचूग्रुचूग्लुचूग्लुञ्चूञ्जो वा ।३।४।६५।। ऋदितो धातोः श्विप्रभृतिभ्यश्च कर्त्तर्यद्यतन्यां परस्मैपदे वा अङ्प्रत्ययो भवति ।।

ऋवर्णदृशोऽङि ।४।३।७।। ऋवर्णान्तानां धातूनां दृशश्चाङि प्रत्यये परे गुणो भवति । अदर्शत्, द् । अदर्शन्, अदर्शः, अदर्शम्, अदर्शाम[6] ।।

अः सृजिदृशोऽकिति ।४।४।१११।। सृजिदृशोः स्वरात्परो धुडादौ प्रत्यये अकारान्तो भवति न तु किति ।।

षढोः कः सि ।२।१।६२।। षकारढकारयोः स्थाने सकारे परे ककारादेशो भवति । अद्राक्षीत्[7], द्, । अद्राष्टाम्[8] ।

१—व्यञ्जनादेर्वेत्यस्य नश्विजागृ इति निषेधः । २—स्क्रसृतीट् । ३—क्रम इतीट् । ४—श्रौतिकृवुधिञ्विति पश्यादेशः, लुगस्येत्यल्लुक् । ५—लुगस्येति पुनर्लुक् । ६—मव्यस्याः । ७—इड्निषेधः, व्यञ्जनानामिति वृद्धिः, यजसृजेति षः । ८—धुड्ह्रस्वादिति सिज्लुक् ।

अद्राक्षुः । अद्राक्षीः । अद्राष्ट । अद्राक्षम्, अद्राक्ष्म । ददर्श । ददृशतुः[1] । ददर्शिथ, दद्रष्ठ[2] । ददृशिम[3] । द्रष्टा[4], द्रक्ष्यति[5] अद्रक्ष्यत्, द् ॥ **दंश दशने** ॥

**दंशसञ्जः शवि** ।४।२।४९॥ दंशसञ्जोरुपान्त्यनकारस्य शवि परे लुग्भवति । दशति । दशेत्, द् । दशानि । अदशत्, द् । अदाङ्क्षीत्[6], द् । अदांष्टाम्[7] । अदाङ्क्षुः । अदाङ्क्ष्म । ददंश । ददंशतुः[8] । ददंशिथ, ददंष्ठ[9] । ददंशिम ॥

**नो व्यञ्जनस्याऽनुदितः** ।४।२।४५॥ व्यञ्जनान्तस्यानुदितो धातोरुपान्त्यस्य नकारस्य क्ङिति प्रत्यये परे लुग्भवति । दश्यात्, द् । दंष्टा[10], दङ्क्ष्यति[11] । अदङ्क्ष्यत्, द् ॥ **कृषं विलेखने** । कर्षति, कर्षन्ति, कर्षामः । कर्षेत्, द् । कर्षाणि । अकर्षम् ॥

**स्पृशमृशकृषतृपदृपो वा** ।३।४।५४॥ स्पृश्-मृश्-कृष्-तृप्-दृप् एभ्यो धातुभ्योऽद्यतन्यां सिच् वा भवति ॥

---

१–अवित्परोक्षायाः कित्त्वान्न गुणः २–सृजिदृशीति वेट् । पक्षे यजसृजेति षः, तवर्गस्येति टवर्गः । अः सृजिदृश इति अः । ३–स्क्रसृतीट् । ४–इण्निषेधः, अः सृजिदृशः । यजसृजेति षः । ५-षढोः कः । ६–इण्निषेधः, व्यञ्जनानामिति वृद्धिः, यजसृजेति षः । षढोरिति कः । म्नामिति ङः, नाम्यन्तस्थेति षः । ७–धुड् ह्रस्वादिति सिज्लुक् । शिड्हे इत्यनुस्वारः । ८–नकारजोऽनुस्वार इति संयोगात्परत्वात्कित्त्वाभावान्नलोपाभावेऽनुस्वारः । ९–थवि वेट् । १०–यजसृजेति षः । ११–इण्निषेधः, यजसृजेति षः । षढोरिति कः । म्नामिति ङः ।

**स्पृशादिसृपो वा ।४।४।११२॥** स्पृश्–मृश्–कृष्–तृप्–दृपां सृपेश्च स्वरात्परो धुडादौ प्रत्यये परे अकारोऽन्तो वा भवति न तु किति । अक्राक्षीत्[1], द् । अक्राष्टाम्[2] । अक्राक्षुः । अकार्क्षीत्, द् । अकाष्टाम्, अकार्क्षुः ॥

**हशिटो नाम्युपान्त्याददृशोऽनिटः सक् ।३।४।५५॥** हकारान्तात् शिडन्ताच्च नाम्युपान्त्याद् दृशिवर्जाद् अनिटो धातोरद्यतन्यां परतः सक् प्रत्ययो भवति । सिचोऽपवादः । अकृक्षत्[3], द् ॥

**स्वरेऽतः ।४।३।७५ ॥** सकोऽकारस्य स्वरादौ प्रत्यये परे लुग् भवति । अकृक्षन् । अकृक्षम् । अकृक्षाम । चकर्ष, चकृषतुः, चकर्षिथ, चकृषिम । कृष्यात् । क्रष्टा[4], कर्ष्टा । क्रक्ष्यति[5], कर्क्ष्यति । अक्रक्ष्यत्, द्, अकर्क्ष्यत्, द् ॥ **हसे हसने** । हसति । हसेत्, द् । हसन्तु । अहसत्, द् । अहसीत्[6], द् । जहास । जहसिथ । हस्यात्, द् । हसिता, हसिष्यति । अहसिष्यत्, द् ॥ **दहं भस्मीकरणे** । दहति, दहेत्, द् । दहानि, अदहत् । अधाक्षीत्[7], द् ॥

**अधश्चतुर्थात्तथोर्धः ।२।१।७९॥** चतुर्थात्परयोस्तकार-

---

१–इण्निषेधः, व्यञ्जनानामिति वृद्धिः, षढोरिति कः । २–धुड्ह्रस्वात्वादिति सिज्लुक् । ३–सकः कित्त्वाद् गुणाभावः । ४–स्पृशादीत्यदन्तः । ५–स्पृशादित्यदन्तः । षढोः कः । ६–नश्वीति वृद्धिनिषेधः । ७–इण्निषेधः । व्यञ्जनानामिति वृद्धिः । भ्वादेर्दादेरिति घः । गडदबादेरिति चतुर्थोधः अघोष इति प्रथमः ।

थकारयोर्धातुरूपवर्जाद् धातोर्विहितयोः स्थाने धकारादेशो भवति । अदाग्धाम् । अधाक्षुः । अधाक्षीः, अधाक्षम् । ददाह, देहतुः । देहिथ, ददग्ध । देहिम । दह्यात्, द् । दग्धा, धक्ष्यति, अधक्ष्यत्, द् ॥ मिहं सेचने ॥ मेहति, मेहेत्, द् । मेह, मेहतात्, द् । अमेहत्, द् । अमेहम्, अमेहाम । अमिक्षत्, द् । अमिक्षन् । अमिक्षाम । मिमेह । मिमिहुः । मिमेहिम । मिह्यात्, द् ॥

ढस्तड्ढे ।१।३।४२॥ ढकारस्य तन्निमित्ते ढकारे परे अनु लुग् भवति दीर्घश्चादिदुतः । मेढा, मेक्ष्यति, अमेक्ष्यत् ॥ अर्ह मह पूजायाम् । अर्हति, अर्हेत, द् । अर्हाणि, आर्हत्, द् । आर्हीत्, द् । आर्हिषुः, आर्हिषम् । आनर्ह, आनर्हिथ । अर्ह्यात्, द् । आर्हिष्यति । आर्हिष्यत्, द् । महति, महेत् । महतात्, द्, महतु । अमहत्, द् । अमहीत्, द् । अमहिषुः । ममाह, मेहतुः, मेहिथ । मेहिव । मह्यात्, द् । महिता, महिष्यति, अमहिष्यत्, द् ॥ अक्षौ व्याप्तौ च ॥

वाऽक्षः ।३।४।७६॥ अक्षौ इत्येतस्मात्कर्त्तरि विहिते शिति श्नुः प्रत्ययो वा भवति ॥

---

१–धुड् ह्रस्वादिति सिज्लुक्, तृतीयस्तृतीयेति तृतीयत्वम् । २–हशिट इति सक्, हो धुडिति ढः, षढोः कः । ३–स्वरेऽतो लुक् । ४–स्वरादित्वाद्वृद्धिः । ५–न श्वीति वृद्धिनिषेधः ।

**उश्नोः ।४।३।२॥** धातोः परयोरुश्नुइत्येतयोः प्रत्ययोरक्ङिति गुणो भवति । अक्ष्णोति, अक्षति ॥

**शिदवित् ।४।३।२०॥** धातोः परो विद्वर्जितः शित्प्रत्ययो ङिद्वद् भवति । अक्ष्णुतः, अक्षतः । अक्ष्णुवन्ति,[1] अक्षन्ति । अक्ष्णुयात्, द् । अक्षेत्, द् । अक्ष्णुतात्, द्, अक्ष्णोतु । अक्षतात्, द्, अक्षतु । अक्ष्णुवन्तु, अक्षन्तु । अक्ष्णुतात्, द्, अक्षतात्, द् । अक्ष्णवानि, अक्षाणि । आक्ष्णोत्, द् । आक्षत्, द् । आक्ष्णुवन्, आक्षन् । आक्ष्णवम्, आक्षम् । आक्ष्णुम, आक्षाम ॥

**धूगौदितः ।४।४।३८॥** धूग औदिद्भ्यश्च धातुभ्यः परस्य स्ताद्यशित आदिरिड् वा भवति । आक्षीत्, द्, आक्षिष्टाम् । पक्षे आक्षीत्,[2] द् । आष्टाम्, आक्षुः । आनक्ष, आनक्षिथ । अक्ष्यात्, द् । अक्षिता, अष्टा, अक्षिष्यति, अक्ष्यति । आक्षिष्यत्, द् । आक्ष्यत्, द् ॥ **तक्षौ त्वक्षौ तनूकरणे ॥**

**तक्षः स्वार्थे वा ।३।४।७७॥** तनूकरणेऽर्थे वर्त्तमानात्तक्षौ इत्येतस्माद् धातोः कर्त्तरि विहिते शिति श्नुः प्रत्ययो वा भवति । तक्ष्णोति, तक्षति । तक्ष्णुतः, तक्षतः । तक्ष्णुवन्ति, तक्षन्ति, तक्ष्णुयात्, द्, तक्षेत्, द् । तक्ष्णोतु, तक्षतु । तक्ष्णुहि, तक्ष । तक्ष्णवानि, तक्षाणि । अतक्ष्णोत्,

---

१–भ्रुश्नोरित्युव् । २–इड् विकल्पे संयोगस्यादाविति ककार लुक्, षढोः कः, नाम्यन्तस्थेति षः । ३–इडभावे धुड्ह्रस्वादिति सिज्लुकि संयोगस्येति ककारलुक् । तवर्गस्येति टवर्गः, वराद्त्वित्वाद् वृद्धिः ।

द्। अतक्षत्, द्। अतक्षीत्, अताक्षीत्[1]। अतक्षिष्टाम्, अताष्टाम्। अतक्षुः, अताक्षुः। ततक्ष, ततक्षिथ। तक्ष्यात्। तक्षिता, तष्टा। तक्षिष्यति, तक्ष्यति। अतक्षिष्यत्, अतक्ष्यत्। त्वक्ष्णोति, त्वक्षति। त्वक्ष्णुवन्ति, त्वक्षन्ति। त्वक्ष्णुयात्, त्वक्ष्यात्। त्वक्ष्णुहि, त्वक्ष। अत्वक्ष्णोत्, अत्वक्षत्। अत्वक्षीत्, अत्वाक्षीत्। अत्वक्षिष्टाम्, अत्वाष्टाम्। तत्वक्ष। तत्वक्षिथ। त्वक्ष्यात्। त्वक्षिता, त्वष्टा, त्वक्षिष्यति, त्वक्ष्यति। अत्वक्षिष्यत्, अत्वक्ष्यत्। इति परस्मैपदिनः॥

अथात्मनेपदिनः। —

**एधि वृद्धौ। एधते[2]।**

**आतामाते आथामाथे आदिः ।४।२।१२१॥**

अकारात्परेषामातामाते आथामाथे इत्येतेषामात इर्भवति। एधेते[3], एधन्ते[4]। एधसे, एधेथे, एधध्वे। एधे, एधावहे[5]। एधामहे। एधेत, एधेयाताम्, एधेरन्। एधेथाः, एधेयाथाम्, एधेध्वम्। एधेय, एधेवहि, एधेमहि। एधताम्, एधेताम् एधन्ताम्। एधस्व, एधेथाम्, एधध्वम्। एधै[6], एधावहै, एधामहै[7]। ऐधत[8], ऐधेताम्, ऐधन्त। ऐधथाः, ऐधेथाम्, ऐधध्वम्। ऐधे, ऐधावहि, ऐधामहि[10]। ऐधिष्ट[11], ऐधिषाताम्।

१–इड्विकल्पे व्यञ्जनान्तत्वाद् वृद्धिः, संयोगस्येति ककारलुक्, षढोः कः, न म्यन्तरस्थेति षः। २–शव्। ३–अवर्णस्येत्यः। ४–लुगस्य। ५–मव्यस्याः। ६–ऐदौत्सन्ध्यक्षरैः। ७–समानदीर्घः। ८–स्वरादेस्तास्विति वृद्धिः, ९–अवर्णस्येत्येः। १०–मव्यस्याः। ११–स्वरादेस्तास्विति वृद्धिः, नाम्यन्तस्थेति षः, तवर्गस्येति टवर्गः।

**अनतोऽन्तोऽदात्मने ।४।२।११४॥** अनकारात्परस्यात्मनेपदसम्बन्धिनोऽन्तरूपस्यावयवस्य अत इत्ययमादेशो भवति । ऐधिषत । ऐधिष्ठाः, ऐधिषाथाम् ॥

**सो धि वा ।४।३।७२॥** धातोर्धकारादौ प्रत्यये परे सकारस्य[1] लुग् वा भवति । ऐधिध्वम्, ऐधिड्ढ्वम्[2] । ऐधिषि, ऐधिष्वहि, ऐधिष्महि ।

**गुरुनाम्यादेरनृच्छूर्णोः ।३।४।४८॥** गुरुर्नामी आदिर्यस्य तस्माद् धातोः ऋच्छ्-ऊर्णुवर्जात् परस्याः परोक्षायाः स्थाने आमादेशो भवति, आमन्ताच्च परे कृभ्वस्तयः परोक्षान्ता अनुप्रयुज्यन्ते ॥

**आमः कृगः ।३।३।७५॥** आमः परादनुप्रयुज्यमानात्करोतेराम एव पूर्वो यो धातुस्तस्मादिव कर्त्तर्यात्मनेपदं भवति । धातोरात्मनेपदित्वे अनुप्रयुज्यमानात्कृगोऽप्यात्मनेपदमन्यथा तु परस्मैपदमित्यर्थः । एधाञ्चक्रे[3], एधाञ्चक्राते, एधाञ्चक्रिरे । एधाञ्चकृषे[4], एधाञ्चक्राथे ॥

**नाम्यन्तात्परोक्षाद्यतन्याशिषो धो ढः ।२।१।८०॥**

---

१–सिचः सकारस्य धातोः सकारस्य चेति बोध्यम् । २–सिज्लुग्विकल्पे नाम्यन्तस्थेति षत्वे तृतीयस्तृतीयेति तृतीयत्वे तवर्गस्येति टवर्गः । ३–इन्ध्यसंयोगादिति किद्वान्न गुणः, म्नामिति विकल्पेन पञ्चमः । तेन एधांचक्रे इत्येवमादीन्यपि रूपाणि बोध्यानि । ४–स्क्रीति ससकारग्रहणात्सडभावे कृगो नेट्, नाम्यन्तस्थेति षः ।

रेफान्ताद् नाम्यन्ताच्च धातोः परासां परोक्षाद्यतन्याशिषां धकारस्य ढकारादेशो भवति। एधाञ्चकृढ्वे। एधाञ्चक्रे, एधाञ्चकृवहे, एधाञ्चकृमहे। एधाम्बभूव, एधाम्बभूवतुः, एधाम्बभूवुः, एधाम्बभूविथ, एधाम्बभूवथुः, एधाम्बभूव, एधाम्बभूव, एधाम्बभूविव, एधाम्बभूविम ॥

**अस्यादेराः परोक्षायाम्** ।४।१।६८॥ धातोर्द्वित्वे सति पूर्वस्यादेरकारस्य आकारो भवति। एधामास, एधामासतुः, एधामासुः। एधामासिथ, एधामासथुः, एधामास, एधामास, एधामासिव, एधामासिम। एधिषीष्ट, एधिषीयास्ताम्, एधिषीरन्, एधिषीष्ठाः, एधिषीयास्थाम्, एधिषीध्वम्, एधिषीय, एधिषीवहि, एधिषीमहि। एधिता, एधितारौ, एधितारः, एधितासे, एधितासाथे, एधिताध्वे, एधिताहे, एधितास्वहे, एधितास्महे। एधिष्यते, एधिष्येते, एधिष्यन्ते, एधिष्यसे, एधिष्येथे, एधिष्यध्वे, एधिष्ये, एधिष्यावहे, एधिष्यामहे। ऐधिष्यत, ऐधिष्येताम्, ऐधिष्यन्त। ऐधिष्यथाः, ऐधिष्येथाम्, ऐधिष्यध्वम्, ऐधिष्ये, ऐधिष्यावहि, ऐधिष्यामहि ॥ **अथ द्युतादयः** ॥ **द्युति दीप्तौ**। **द्योतते, द्योतेत, द्योतताम्, अद्योतत** ॥

१–परोक्षान्तभुवोऽनुप्रयोगे ततो बभूवेत्यादिवत्सर्वा प्रक्रिया बोध्या। म्नामिति विकल्पे तौ मुम इत्यनुस्वारो बोध्यः। २–आदेरत आत्वे समानदीर्घः। ३–असस्तृच्यभावात्सृजिदृशीति न वेट्। ४–स्वरादेस्तासु। ५–द्युतादयस्त्रयोविंशतिधातुर्पाठतो ज्ञेयाः। ६-लघोरिति गुणः।

द्युद्भ्योऽद्यतन्याम् ।३।३।४४।। द्युतादिभ्योऽद्यतनीविषये कर्त्तर्यात्मनेपदं वा भवति । अद्योतिष्ट, अद्योतिषत, अद्योतिध्वम् । अद्योतिड्ढ्वम् । पक्षेऽङ्[1] । अद्युतत्, द् । अद्युतन्[2], अद्युतम्, अद्युताम ।।

द्युतेरिः ।४।१।४१।। द्युतेर्द्वित्वे सति पूर्वस्योत इ भवति । दिद्युते, दिद्युतिषे, दिद्युतिमहे । द्योतिषीष्ट, द्योतिता, द्योतिष्यते, अद्योतिष्यत ।। रुचि अभिप्रीत्यां च । रोचते, रोचेत, रोचताम्, अरोचत । अरोचिष्ट, अरुचत्, रुरुचे । रोचिषीष्ट, रोचिता, रोचिष्यते, अरोचिष्यत ।। वृतूङ् वर्तने । वर्त्तते, वर्त्तेत, वर्त्तताम्, अवर्त्तत । अवर्त्तिष्ट, अवृतत् । ववृते, वर्तिषीष्ट, वर्तिता ।।

वृद्भ्यः स्यसनोः ।३।३।४५।। वृतादयो द्युताद्यन्तर्गताः पञ्च । वृत्, स्यन्द्, वृध्, शृध्, कृप्–इति वृतादिभ्यः स्यादिप्रत्ययविषये सन् प्रत्ययविषये च कर्त्तर्यात्मनेपदं वा भवति । वर्तिष्यते । पक्षे—

न वृद्भ्यः ।४।४।५६।। वृतादिभ्यः परस्य स्ताद्यशित आदिरिड् न भवति । आत्मनेपदविषये तु भवत्येव । वर्त्स्यति । अवर्तिष्यत, अवर्त्स्यत् । स्यन्दौङ् प्रस्रवणे । स्यन्दते,

1-लृदिदित्यादिना । 2-लुगस्य ।

स्यन्देत, स्यन्दताम् , अस्यन्दत अस्यन्दिष्ट, अस्य[1]न्त्त। अस्यन्दिषाताम् , अस्यन्त्साताम् , अस्यन्दिषि, अस्यन्त्सि। अस्य[2]दत् , अस्यदन् । अस्यदः, अस्यदाम। सस्यन्दे, सस्यन्दिषे, सस्य[3]न्त्से, सस्यन्दिमहे । स्यन्दिषीष्ट, स्यन्त्सीष्ट, स्यन्दिता, स्य[4]न्त्ता, स्यन्दिष्यते, स्यन्त्स्यते, स्यन्त्स्यति। अस्यन्दिष्यत, अस्यन्त्स्यत, अस्यन्त्स्यत् ।

**निरभ्यनोश्च स्यन्दस्याऽप्राणिनि ।२।३।५०॥** निरभ्यनुभ्यः परिनिविभ्यः परस्य स्यन्देः सकारस्याप्राणिनि कर्तरि सति षो वा स्यात् । निष्ष्यन्दते निस्[5]स्यन्दते निःस्यन्दते वा तैलम् । एवं परिष्यन्दते, विष्यन्दते इत्यादि । प्राणिनि कर्तरि तु-अनुस्यन्दते हस्ती ॥ वृधूङ् वृद्धौ । वर्धते, वर्धेत, वर्धताम् , अवर्धत । अवर्धिष्ट, अवृधत् । ववृधे, ववृधिषे, वर्धिषीष्ट, वर्धिता, वर्धिष्यते, व[6]र्त्स्यति । अवर्धिष्यत, अवर्त्स्यत् ॥ शृधूङ् शब्दकुत्सायाम् । शर्धते, शर्धेत, शर्धताम् , अशर्धत, अशर्धिष्ट, अशृधत् । शशृधे, शशृधिषे, शर्धिषीष्ट, शर्धिता, शर्धिष्यते, शर्त्स्यति, अशर्धिष्यत, अशर्त्स्यत् ॥ कृपौङ् सामर्थ्ये ॥

१-धुटो धुटीति वा लुक् । पूर्वं तु औदित्त्वादिड्विकल्पे धुड्ह्रस्वादिति सिज्लुगिति ध्येयम् । २-नो व्यञ्जनस्येति नलुक् । ३-औदित्त्वाद्विशेषत्वादेट् । ४-धुटो धुटि । ५-शषसे इति षत्वे षः, विकल्पे सः तद्विकल्पे विसर्गः । ६-न वृद्भ्यः, अघोषे इति प्रथमः ।

ऋर लृलं कृपोऽकृपीटादिषु ।२।३।९९।। कृपेर्धातो ऋकारस्य लृकारो रेफस्य च लकारो भवति कृपीटादिविषयस्य तु न भवति । कल्पते, कल्पेत, कल्पताम्, अकल्पत, अकल्पिष्ट ।।

सिजाशिषावात्मने ।४।३।३५।। नामिन्युपान्त्ये सति धातोः परे आत्मनेपदविषये अनिटौ सिजाशिषौ किद्वद् भवतः । अक्लृप्त[1] । अकल्पिषाताम्, अक्लृप्साताम्, । अकल्पिध्वम्, । अकल्पिड्ढ्वम्, अक्लृब्ध्वम्[3], । अक्लृपत्, । चक्लृपे, चक्लृपिषे, चक्लृप्से । कल्पिषीष्ट, कृप्सीष्ट ।।

कृपः श्वस्तन्याम् ।३।३।४६।। कृपेः श्वस्तन्यां विषये कर्त्तर्यात्मनेपदं वा स्यात् । कल्पिता, कल्प्ता, कल्पितासे, कल्प्तासि । कल्पिष्यते, कल्प्स्यते, कल्प्स्यति । अकल्पिष्यत, अकल्प्स्यत अकल्प्स्यत् । इति वृतादयो द्युतादयश्च ।। कपुङ् चलने ।। कम्पते[4], कम्पेत, कम्पताम्, अकम्पत, अकम्पिष्ट,

---

१—लघोरुपान्त्यस्य । २— औदित्त्वादिड् विकल्पे क्त्विाद् गुणाभावः । धुड्ह्रस्वादिति सिचो लुक् । ३— इड्विकल्पे सोधि वेति सिचो लुकि तृतीय इति तृतीयत्वम् । सोधीति विकल्पे सकारस्य पकारस्य च तृतीयत्वे अक्लृब्द्ध्वमित्यपि बोध्यम् । ४— उदित इति नागमे म्नामिति पञ्चमः ।

चकम्पे, कम्पिषीष्ट, कम्पिता, कम्पिष्यते, अकम्पिष्यत ॥ क्षमौषि सहने । क्षमते, क्षमेत, क्षमताम्, अक्षमत। अक्षमिष्ट, अक्षंस्त[1] । अक्षमिषाताम्, अक्षंसाताम् । चक्षमे, चक्षमिषे, चक्षंसे । चक्षमिवहे । क्षमिषीष्ट, क्षंसीष्ट । क्षमिता क्षन्ता[2] । क्षमिष्यते, क्षंस्यते । अक्षमिष्यत, अक्षंस्यत ॥ रमिं क्रीडायाम् ॥ रमते, रमेत, रमताम्, अरमत, अरंस्त[3], अरंसाताम् । रेमे, रेमिषे । रंसीष्ट, रन्ता, रंस्यते, अरंस्यत ॥

व्याङ्परे रमः ।३।३।१०५॥ व्याङ्परिभ्यः पराद् रमेः कर्त्तरि परस्मैपदं भवति । विरमति, विरमेत्, विरमतु, व्यरमत् । व्यरंसीत्[4] । विरराम, विरेमतुः । विरेमिथ, विररन्थ । विरम्यात्, विरन्ता, विरंस्यति, व्यरंस्यत् ॥

वोपात् ।३।३।१०६॥ उपपूर्वाद् रमेः कर्त्तरि परस्मैपदं वा भवति । उपरमति, उपरमते, वा भार्याम्[5]। डुलभिष्

---

१–औदित्त्वादिड् विकल्पे शिड्हे इत्यनुस्वारः । २– इड्विकल्पे म्नामिति पञ्चमः । ३– अनुस्वारेत्त्वान्नेट्, शिड्हे इत्यनुस्वारः । ४–अनुस्वारेत्त्वादिण्निषेधे यमि–रमीति सोन्त इट् च । ५–उपपूर्वो रमिरन्तर्भावितण्यर्थ इति सकर्मकः ।

प्राप्तौ । लभते, लभेत, लभताम् , अलब्ध[1] । अलप्साताम्[2] , अलब्धाः, अलब्ध्वम् , अलब्द्ध्वम् । लेभे । लेभिध्वे । लप्सीष्ट, लब्धा, लप्स्यते, अलप्स्यत ॥ **यभि मैथुने** ॥ यभते, यभेत, यभताम् , अयभत, अयभिष्ट, अयभिषाताम् , येभे, यभिषीष्ट, यभिता, यभिष्यते, अयभिष्यत ॥ **स्फायैङ् ओप्यायैङ् वृद्धौ** । स्फायते, स्फायेत, स्फायताम्, अस्फायिष्ट ॥

**हान्तस्थाञ्जीड्भ्यां वा** ।२।१।८१॥ हकारान्तादन्तस्थायाश्च पराद् ञेरिटश्च परासां परोक्षाऽद्यतन्याशिषां सम्बन्धिनो धकारस्य ढकारो वा भवति । अस्फायिढ्वम्[3] , अस्फायिध्वम् , अस्फायिड्ढ्वम् । पस्फाये, पस्फायिढ्वे, पस्फायिध्वे । स्फायिषीष्ट, स्फायिषीढ्वम् , स्फायिषीध्वम् । स्फायिता, स्फायिष्यते, अस्फायिष्यत । आप्यायते, आप्यायेत, आप्यायताम् , आप्यायत ॥

**दीपजनबुधिपूरितायिप्यायो वा** ।३।४।६७॥ दीप्-जन्-बुध्-पूरि-ताय्-प्याय्-एभ्यः कर्त्तर्यद्यतन्यास्ते परे ञिच् प्रत्ययो वा भवति तत्प्रत्ययस्य लुक् च । ञ्चावितौ ।

१–अनुस्वारेत्वादिण्निषेधे धुड् ह्रस्वादिति सिचो लुकि अध इति धत्वे तृतीय इति तृतीयः २–अनुस्वारेत्वादिण्निषेधे अघोषे प्रथमः । ३–सोधीति सिज्लुकि ढत्वविकल्पः, लुग्विकल्पे नाम्यन्तेति षत्वे तृतीय इति तृतीये तवर्गस्येति टवर्गः ।

आप्यायि, आप्यायिष्ट, आप्यायिषाताम् । आप्यायिढ्वम्, आप्यायिध्वम्, आप्यायिड्ढ्वम् ॥

**प्यायः पी ।४।१।९१॥** प्यायतेः परोक्षायां यङि च पी इत्यादेशो भवति । आपिप्ये[1], आपिप्याते, आपिप्यिढ्वे, आपिप्यिध्वे । आप्यायिषीष्ट, आप्यायिषीढ्वम्, आप्यायिषीध्वम् । आप्यायितासे, आप्यायिष्यते, आप्यायिष्यत । प्याय्धातुः प्रायेणाङ्पूर्वः प्रयुज्यते, पीन इत्यादौ क्वचिदेव न तथा ॥ **तायृङ् सन्तानपालनयोः** । तायते, तायेत, तायताम्, अतायत । अतायि, अतायिष्ट, अतायिषाताम् । अतायिढ्वम्, अतायिध्वम्, अतायिड्ढ्वम्, तताये, ततायिढ्वे, ततायिध्वे । तायिषीढ्वम्, तायिषीध्वम् । तायितासे, तायिष्यते; अतायिष्यत ॥ **अयि गतौ** । अयते ।

**उपसर्गस्यायौ ।२।३।१००॥** उपसर्गसम्बन्धिनो रेफस्य अयि गतावित्यस्मिन् धातौ परे लादेशो भवति । प्लायते, पलायते । अयेत । अयताम्, आयत, आयिष्ट, आयिषाताम्, आयिढ्वम्, आयिध्वम्, आयिड्ढ्वम् ॥

**दयायास्कासः ।३।४।४७॥** दय् अय् आस् कास् इत्येतेभ्यो धातुभ्यः परस्याः परोक्षायाः स्थाने आमादेशो

१—योऽनेकस्वरस्येति यः ।

भवति, आमन्ताच्च परे कृभ्वस्तयः परोक्षान्ता अनु प्रयुज्यन्ते। अयाञ्चक्रे, अयाञ्चकृढ्वे, अयिषीष्ट, अयिषीढ्वम्, अयिषीध्वम्, अयिता, अयिष्यते, आयिष्यत ॥ दयि दानगतिहिंसाऽऽदानेषु च। दयते, दयेत, दयताम्, अदयत। अदयिष्ट, अदयिढ्वम्,[1] अदयिध्वम्, अदयिड्ढ्वम्। दयाञ्चक्रे, दयाञ्चकृढ्वे। दयिषीष्ट, दयिषीढ्वम्,[2] दयिषीध्वम्। दयिता, दयिष्यते, अदयिष्यत ॥ षेवृङ् सेवने। सेवते, सेवेत, सेवताम्, असेवत, असेविष्ट, असेविढ्वम्, असेविध्वम्, असेविड्ढ्वम्। सिषेवे[3]। सिषेविध्वे, सिषेविढ्वे। सेविषीष्ट, सेविषीढ्वम्, सेविषीध्वम्, सेवितासे, सेविष्यते, असेविष्यत ॥

परिनिवेः सेवः ।२।३।४६॥ परि-नि-व्युपसर्गस्थानाम्यन्तस्थाकवर्गात्परस्य सेव्धातोः सकारस्य द्वित्वेऽप्यट्यपि षादेशो भवति। परिषेवते, विषिषेवे, न्यषेवत ॥ षहि मर्षणे। सहते, सहेत, सहताम्, असहत। असहिष्ट, असहिढ्वम्, असहिध्वम्, असहिड्ढ्वम्। सेहे,[4] सेहिढ्वे, सेहिध्वे। सहिषीष्ट, सहिषीढ्वम्, सहिषीध्वम् ॥

सहलुभेच्छरुषरिषस्तादेः ।४।४।४६ ॥ सह्-लुभ्-इष्-रुष्-रिष्-एभ्यः परस्य स्ताद्यशित आदिरिड् वा

१–सो धि वा, हान्तस्था०। २–हान्तस्था०। ३–नाम्यन्तस्था०। ४–अनादेशादेरित्येत्वं द्वित्वनिषेधश्च।

स्यात्। सहिता ॥

**सहिवहेरोच्चावर्णस्य** ।१।३।४३॥ सह्–वह्–इत्येतयोर्ढस्य तन्निमित्ते ढकारे परे अनु लुग् भवति, अवर्णस्य च ओकारो भवति। सोढा[1], सहितासे, सोढासे। सहिष्यते, असहिष्यत ॥ **गाहौङ् विलोडने** ॥ गाहते, गाहेत, गाहताम्, अगाहत। अगाहिष्ट, अगाढ[2]। अगाहिषाताम्, अघाक्षाताम्[3]। अगाहिष्ठाः, अगाढाः। अगाहिढ्ढ्वम्, अगाहिध्वम्, अगाहिड्ढ्वम्, अघाढ्ढ्वम्[4], अघाड्ढ्वम्। जगाहे, जगाहिषे, जघाक्षे, जगाहिढ्वे, जगाहिध्वे, गाहिषीष्ट, घाक्षीष्ट, गाहितासे, गाढासे, गाहिष्यते, घाक्ष्यते, अगाहिष्यत, अघाक्ष्यत ॥ **ईहि चेष्टायाम्** ॥ ईहते, ईहेत, ईहताम्, ऐहत, ऐहिष्ट। ऐहिढ्वम्, ऐहिध्वम्, ऐहिड्ढ्वम्। ईहाञ्चक्रे[5], ईहिषीष्ट, ईहिषीढ्वम्, ईहिषीध्वम्। ईहिता, ईहिष्यते, ऐहिष्यत ॥ **ईक्षि दर्शने** ॥ ईक्षते, ईक्षेत, ईक्षताम्, ऐक्षत, ऐक्षिष्ट, ऐक्षिध्वम्, ऐक्षिढ्वम्, ईक्षाञ्चक्रे, ईक्षिषीष्ट, ईक्षिता, ईक्षिष्यते, ऐक्षिष्यत ॥ इत्यात्मनेपदिनः ॥

---

१–इड्विकल्पे हो धुडिति ढत्वे, अध इति धत्वे, तवर्गस्येति टवर्गः। २–इड्विकल्पे धुड्ह्रस्वादिति सिचो लुकि हो धुडिति ढः, अध इति धः, तवर्गस्येति टवर्गः, ढस्तड्ढे इति ढलोपः। ३–इड्विकल्पे हो धुडिति ढः, गडदबादेरिति घः, षढोरिति कः, नाम्यन्तस्थेति षः। ४–धुटो धुटि स्वे वेति लोपविकल्पः। ५–गुरुनाम्यादेः०।

## अथोभयपदिनः ॥

**ईगितः ।३।३।९५॥** ईकारेत्संज्ञकाद् गकारेत्संज्ञकाच्च धातोः फलवति कर्त्तर्यात्मनेपदं भवति । अत्र कर्तुः फलवत्त्वेनाऽविवक्षायां परस्मैपदमेवेत्युभयपदित्वं बोध्यम् ॥ **डुपचींष् पाके ।** पचति, पचते, पचेत्, पचेत, पचतु, पचतात्, पचताम्, अपचत्, अपचत । अपाक्षीत्[1], अपक्त[2] । अपाक्ताम्, अपक्षाताम्, अपाक्षुः, अपक्षत । अपाक्षम्, अपक्षि । पपाच, पेचे, पेचिथ, पपक्थ । पेचिषे । पच्यात्, पक्षीष्ट । पक्तासि, पक्तासे । पक्ष्यति, पक्ष्यते, अपक्ष्यत्, अपक्ष्यत ॥ **श्रिग् सेवायाम् ।** श्रयति, श्रयते, श्रयेत्, श्रयेत, श्रयतु, श्रयतात्, श्रयताम्, अश्रयत्, अश्रयत ॥

**णिश्रिद्रुस्रुकमः कर्त्तरि ङः ।३।४।५८॥** ण्यन्तात् श्रि-द्रु-स्रु-कम्-इत्येतेभ्यश्च कर्त्तर्यद्यतन्यां ङ प्रत्ययो भवति । सिजपवादः । अशिश्रियत्[3] । अशिश्रियत । अशिश्रियताम्, अशिश्रियेताम् । अशिश्रियन्, अशिश्रियन्त । शिश्राय[4], शिश्रिये[5] । शिश्रियतुः, शिश्रियाते । शिश्रयिथ, शिश्रियिषे । शिश्रिय, शिश्रियिढ्वे[6], शिश्रियिध्वे । श्रीयात्[7],

१—इण्निषेधे व्यञ्जनानामिति वृद्धिः । चजः कगमिति कः, नाम्यन्तस्थेति षः । २—धुड् ह्रस्वादिति सिज्लुक्, चज इति कः । ३—ङे द्वित्वादिकार्ये संयोगादितीय् । ४—नामिन इति वृद्धिः । ५—कित्त्वाद्गुणाभावे संयोगादितीय् । ६—हान्तस्थादिति वा ढः । ७—दीर्घश्च्वीति दीर्घः ।

श्रयिषीष्ट, श्रीयास्त, श्रयिषीढ्वम्, श्रयिषीध्वम्। श्रयितासि, श्रयितासे। श्रयिष्यति, श्रयिष्यते। अश्रयिष्यत्, अश्रयिष्यत। णींम् प्रापणे। नयति, नयते, नयेत्, नयेत, नयतु, नयताम्। अनयत्, अनयत, अनैषीत्[1], अनेष्ट। अनैष्टाम्, अनेषाताम्। अनैषुः, अनेषत। अनैष्ट, अनेढ्वम्, अनेड्ढ्वम्। निनाय, निन्ये[2]। निनयिथ, निनेथ। निन्यिषे। निन्यिढ्वे, निन्यिध्वे। निन्यिम, निन्यिमहे। नीयात्, नेषीष्ट। नीयास्त, नेषीढ्वम्। नेतासि, नेतासे। नेष्यति, नेष्यते। अनेष्यत्, अनेष्यत। प्रणयति[3], प्रणीयते॥ डुकृंग् करणे।

**कृग्तनादेरुः** ।३।४।८३॥ कृगस्तनादेश्च गणात् कर्त्तरि विहिते शिति उः प्रत्ययो भवति। करोति[4]॥

**अतः शित्युत्** ।४।२।८९॥ शित्यविति प्रत्यये य उकारस्तन्निमित्तो यः कृगोऽकारस्तस्य उकारो भवति। कुरुते[5], कुरुतः॥

**कुरुच्छुरः** ।२।१।६६॥ कुरुच्छुरोः सम्बन्धिनो नामि-

---

१—इण्निषेधे ञिचि परस्मै इति वृद्धिः। २—क्त्विाद् गुणाभावे योऽनेकस्वरस्येति यः। ३—अदुरुपसर्गान्तरोण इति णः। ४—नामिनो गुण इति उश्नोरिति गुणश्च। ५—शिदविदीति ङित्वान्न गुणः।

नो रेफे परे दीर्घो न भवति। कुर्वाते, कुर्वन्ति[2], कुर्वते। करोषि, कुरुषे[3], कुरुथः, कुर्वाथे। कुरुथ, कुरुध्वे। करोमि, कुर्वे।

**कृगो यि च** ।४।२।८८॥ कृगः परस्य उकारस्य यकारादौ वकारादौ मकारादौ च प्रत्यये परे लुग् भवति। कुर्वः, कुर्वहे, कुर्मः, कुर्महे। कुर्यात्, कुर्वीत, कुर्युः, कुर्वीरन्। करोतु, कुरुतात्, कुरुताम्, कुर्वन्तु, कुर्वताम्।

**असंयोगादोः** ।४।२।८६॥ असंयोगात्परो य उकारस्तदन्तात् प्रत्ययात्परस्य हेर्लुग् भवति। कुरु, कुरुतात्, कुरुष्व। करवाणि, करवै। करवाम, करवामहै। अकरोत्, अकुरुत। अकरवम्, अकुर्वि, अकुर्म, अकुर्महि। अकार्षीत्[4]॥

**ऋवर्णात्** ।४।३।३६॥ ऋवर्णान्ताद् धातोः परे अनिटावात्मनेपदविषये सिजाशिषौ किद्वद् भवतः। अकृत[5], अकार्ष्टाम्, अकृषाताम्। अकार्षुः, अकृषत। अकार्षीः, अकृथाः, अकार्ष्ट, अकृढ्वम्, अकृड्ढ्वम्। अकार्षम्, अकृषि। चकार, चक्रे[6], चक्रुः, चक्रिरे। चकर्थ[7], चकृषे।

---

१–ङित्वाद्गुणाभावे इवर्णादेरिति वः। म्वादेर्नामिन इति दीर्घः प्राप्तो निषिध्यते। वमग्रेऽपि यथासम्भवं बोध्यम्। २–दीर्घनिषेधः। णत्वं तु म्नामिति बहुवचननिर्देशान्न भवति। ३–ङित्वान्नगुणः, नामीति षः। ४–इण्निषेधः, सिचीति वृद्धिः। ५–इण्निषेधः, कित्वान्न गुणः, धुड्हति सिज्लुक्। ६–कित्वान्न गुणः। ७–स्क्रति सकारनिर्देशात्तद्रहितस्य नेट्।

चकार, चकर, चक्रे । चकृम, चकृमहे ॥

**रिः शक्याशीर्ये ।४।३।११०॥** ऋकारान्तस्य धातोः ऋतः स्थाने शे क्ये आशीर्ये च परे रिरादेशो भवति । क्रियात्[1], कृषीष्ट । क्रियास्त, कृषीढ्वम् । कर्तासि, कर्तासे । करिष्यति[2], करिष्यते । अकरिष्यत्, अकरिष्यत ॥ **हृंग् हरणे ॥** हरति, हरते, हरेत्, हरेत । हरतु, हरताम्, अहरत्, अहरत, अहार्षीत्, अहृत । अहार्ष्ट, अहृढ्वम्, अहृड्ढ्वम् । जहार, जह्रे, जहर्थ, जह्रिषे, जह्र, जह्रिढ्वे जह्रिध्वे । ह्रियात्, हृषीष्ट । हर्तासि, हर्तासे, हरिष्यति, हरिष्यते । अहरिष्यत्, अहरिष्यत ॥ **भृंग् भरणे । धृंग् धारणे ।** अनयोर्हृधातुवद् रूपाण्यूह्यानि । **टुयाचृग् याञ्चायाम् ।** याचति, याचते, याचेत्, याचेत, याचतु, याचताम्, अयाचत्, अयाचत । अयाचीत्, अयाचिष्ट । ययाच, ययाचे । याच्यात्, याचिषीष्ट । याचितासि, याचितासे । याचिष्यति, याचिष्यते । अयाचिष्यत्, अयाचिष्यत ॥ **भजीं सेवायाम् ।** भजति, भजते, भजेत्, भजेत, भजानि, भजै । अभजत्, अभजत । अभाक्षीत्[3], अभक्त[4] । अभाक्ताम्[5], अभक्षाताम्[6] ।

---

१—ह्रस्वविधानसामर्थ्याद् दीर्घश्च्वीति न दीर्घः । २—हनृत इतीट् । ३—इण्निषेधः, व्यञ्जनानामिति वृद्धिः । चज इति गः । अघोष इति प्रथमः । नाम्यन्तेति षः । ४—धुडिति सिज्लुक्, चज इति गः, अघोष इति प्रथमः । ५—इण्निषेधे व्यञ्जनानामिति वृद्धिः, सिज्लुक्, गः, कः । ६—इण्निषेधे गः कः षः ।

अभाक्षीः, अभक्थाः । अभाक्त, अभग्ध्वम्, अभग्द्ध्वम् ।
बभाज, भेजे । भेजुः, भेजिरे । भेजिथ, बभक्थ । भेजिषे ।
भज्यात्, भक्षीष्ट । भक्तासि, भक्तासे । भक्ष्यति भक्ष्यते ।
अभक्ष्यत्, अभक्ष्यत ॥ राजृग् टु भ्राजृग् दीप्तौ ।
राजति, राजते, राजेत्, राजेत, राजतु, राजताम्, अराजत्,
अराजत । अराजीत्, अराजिष्ट । रराज ॥

**जॄ-भ्रम-वम-त्रस-फण-स्यम-स्वन-राज-भ्राज-भ्रास-भ्लासो वा ।४।१।२६॥** जॄप्रभृतीनामेषामवित्परोक्षासेट्थवोः परयोरत एत्वं वा स्यात्, तत्सन्नियोगे च द्वित्वं न स्यात् । रेजे, रराजे । रेजुः, रराजुः । रेजिरे, रराजिरे । राज्यात्, राजिषीष्ट । राजितासि, राजितासे, राजिष्यति, राजिष्यते, अराजिष्यत्, अराजिष्यत । एवं भ्राजेरपि स्वयमूह्यम् ॥ रञ्जीं रागे ॥

**अकट् घिनोश्च रञ्जेः ।४।२।५०॥** रञ्जेरकटि घिनणि शवि च प्रत्यये उपान्त्यनकारस्य लुग् भवति । रजति, रजते, रजेत्, रजेत । रजतु, रजताम् । अरजत्, अरजत । [1]अराङ्क्षीत्, अरङ्क्त । अराङ्क्ताम्, अरङ्क्षाताम्, अराङ्क्षुः, अरङ्क्षत । ररञ्ज, ररञ्जे । [3]रज्यात्, रङ्क्षीष्ट । रङ्क्तासि, रङ्क्तासे । रङ्क्ष्यति । रङ्क्ष्यते । अरङ्क्ष्यत्,

१-तॄत्रपेत्येर्द्वित्वाभावश्च । २-इण्निषेधे व्यञ्जनानामिति वृद्धौ गत्वे कत्वे षत्वे च म्नामिति पञ्चमः । ३-नो व्यञ्जनस्यैति नलुक् ।

अरङ्क्ष्यत ॥ शपीं आक्रोशे । शपति, शपते, शपेत्, शपेत, शपतु, शपताम्, अशपत्, अशपत । अशाप्सीत्, अशप्त, अशाप्ताम्, अशप्साताम् । शशाप, शेपे, शेपुः, शेपिरे, शेपिथ, शशप्थ, शेपिषे । शप्यात्, शप्सीष्ट । शप्तासि, शप्तासे, शप्स्यति, शप्स्यते, अशप्स्यत्, अशप्स्यत ॥

**गुहौग् संवरणे ॥**

**गोहः स्वरे ।४।२।४२॥** कृतगुणस्य गुहेः स्वरादौ प्रत्यये परे उपान्त्यस्य ऊद् भवति । गूहति, गूहते, गूहेत्, गूहेत, गूहतु, गूहताम्, अगूहत्, अगूहत । अगूहीत्, अघुक्षत्, ॥

**दुह दिह लिह गुहो दन्त्यात्मने वा सकः ।४।३।७४॥** दुह्-दिह्-लिह्-गुह्-एभ्यः परस्य सक् प्रत्ययस्य दन्त्यादावात्मनेपदे परे लुग् वा भवति । अगूहिष्ट अगूढ, अघुक्षत । अगूहिषाताम्, अघुक्षताम्, अगूहिषाताम्, अघुक्षाताम्, अगूहिषुः, अघुक्षन् । अगूहिषत, अघुक्षत, अगूहीः, अघुक्षः, अगूहिष्ठाः, अगूढाः, अघुक्षथाः । अगूहिष्ट, अगूढ, अघुक्षत । अगूहिद्वम्, अगूहिध्वम्, अगूहिड्ढ्वम्,

१–इड् विकल्पे हशिटः इति सक् हो धुडिति ढः, गडदबादेरिति घः, षढोरिति कः, नाम्यन्तस्थेति षः । २–स्वरेऽतः । ३–इड्विकल्पे ढत्वे धत्वे टवर्गे ढलोपः । ४–औदित्त्वाद्वेटि सोधीति सलोपविकल्पः । हान्तस्थेति ढत्वविकल्पः । इड्विकल्पे ढत्वादौ कृते ढस्तड्ढे इति ढलोपदीर्घौ । तत्रापि सलोपविकल्पे षत्वे ढत्वे टवर्गः ।

अघूढ्वम्, अघुक्षध्वम्, अगूहिषम्, अघुक्षम्[1], अगूहिषि, अघुक्षि, अगूहिष्व, अघुक्षाव, अगूहिष्वहि, अगूह्वहि[2], अघुक्षावहि ॥

**सिजाशिषावात्मने ।४।३।३५॥** नामिन्युपान्त्ये सति धातोः परे आत्मनेपदविषये अनिटौ सिजाशिषौ किद्वद् भवतः गुह्यात्, गूहिषीष्ट, घुक्षीष्ट । गूहिषीढ्वम्, गूहिषीध्वम्, घुक्षीध्वम् । जुगूह, जुगूहे । जुगुहतुः, जुगुहाते । जुगूहिथ, जुगुहिषे, जुघुक्षे, जुगुहिढ्वे, जुगुहिध्वे । गूहितासि, गोढासि । गूहितासे, गोढासे । गूहिष्यति, घोक्ष्यति । गूहिष्यते, घोक्ष्यते । अगूहिष्यत्, अघोक्ष्यत्, अगूहिष्यत, अघोक्ष्यत । **अथ यजादयो नव[3] । यजीं देवपूजासङ्गतिकरणदानेषु ।** यजति, यजते, यजेत्, यजेत, यजतु, यजताम्, अयजत् । अयजत । अयाक्षीत्[4], अयष्ट, अयाष्टाम्, अयक्षाताम् । अयाष्ट, अयड्ढ्वम्, अयड्ड्ढ्वम् ॥

**यजादिवशवचः सस्वरान्तस्था य्वृत् ।४।१।७२** यजादीनां वश्वचोश्च परोक्षायां द्वित्वे सति, पूर्वस्य सस्वरान्तस्था य्वृत् भवति । इयाज ।

---

१–सक्, स्वरेऽतः । २–इड्विकल्पे लुग्वा दुहेति सको लुक् ।

३–"यजिर्वपिर्वहिश्चैव, वसिर्वेञ् व्येञ् इत्यपि । ह्वेञ् वदि श्वयतिश्चेति यजाद्याः स्युरिमे नव" ॥१॥ ४–इणिणनषेधे व्यञ्जनानामिति वृद्धौ यजसृजेति षत्वे षढोरिति कत्वे षः ।

**यजादिवचेः किति** ।४।१।७९॥ यजादीनां धातूनां वचेश्च सस्वरान्तस्था य्वृत् किति परे भवति । ईजे[1] । ईजुः, ईजाते । इयजिथ, इयष्ठ, ईजिषे । इज्यात्, यक्षीष्ट । यष्टासि, यष्टासे । यक्ष्यति, यक्ष्यते । अयक्ष्यत्, अयक्ष्यत ॥ **डु वपीं बीजसन्ताने**। वपति, वपते, वपेत्, वपतु, वपताम्, अवपत्, अवपत । अवाप्सीत्, अवप्त । अवब्ध्वम्, अवब्द्ध्वम् । उवाप, ऊपे । उवपिथ, उवप्थ, ऊपिषे । उप्यात्, वप्सीष्ट । वप्तासि, वप्तासे, वप्स्यति, वप्स्यते, अवप्स्यत्, अवप्स्यत ॥ **वहीं प्रापणे**। वहति, वहते, वहेत्, वहेत, वहतु, वहताम्, अवहत्, अवहत । अवाक्षीत्, अवोढ[2], अवोढाम्, अवक्षाताम्, अवाक्षुः, अवक्षत । अवोढ, अवोढ्वम्, अवढ्ढ्वम्[4] । उवाह, ऊहे । उवहिथ, उवोढ, ऊहिषे । ऊह, ऊहिढ्वे, ऊहिध्वे । उह्यात्, वक्षीष्ट, वोढासि, वोढासे, वक्ष्यति, वक्ष्यते, अवक्ष्यत्, अवक्ष्यत । **वसं निवासे**। अयं परस्मैपदी । वसति, वसेत्, वसतु, अवसत् ॥

**सस्तः सि** ।४।३।९२॥ धातोः सकारान्तस्याऽशिति

---

१—य्वृति सति द्वित्वम् । २—इण्निषेधे व्यञ्जनानामिति वृद्धौ ढत्वे कत्वे षः । ३—धुड्ह्रस्वादिति सिज्लुकि ढत्वे अध इति धत्वे तवर्गस्येति टवर्गे सहिवहेरिति ढलोपौत्वे । ४—अत्र ढनिमित्तस्य ढस्याभावात् सहिवहेरिति न प्रवर्त्तते । सकारस्य तृतीयत्वे हस्य ढत्वे टवर्गो ढधयोः क्रमात् ।

सकारादौ प्रत्यये विषयभूते तकारान्तादेशो भवति । अवात्सीत्, अवात्ताम्, उवास ॥

**घस्वसः ।२।३।३६॥** नाम्यन्तस्थाकवर्गात्परस्य घसेर्वसेश्च धातोः सकारस्य षो भवति । ऊषतुः, उवसिथ, उवस्थ, उष्यात्, वस्ता, वत्स्यति, अवत्स्यत् । वेंग् तन्तुसन्धाने ॥ वयति, वयते । वयेत्, वयतु, वयताम् । अवयत्, अवयत । अवासीत्, अवास्त । अवासिषुः, अवासत । अवास्त, अवाद्ध्वम्, अवाद्द्ध्वम् ॥

**वेर्वय् ।४।४।१९॥** वेगो धातोः परोक्षायां वय् इत्यादेशो वा भवति । उवाय ॥

**न वयो य् ।४।१।७३॥** वेगादेशस्य वयो यकारस्य परोक्षायां य्वृद् न भवति । ऊये ।

**वेरयः ।४।१।७४॥** वेगोऽयकारान्तस्य पूर्वस्य परस्य च परोक्षायां य्वृन्न भवति । ववौ ।

**अविति वा ।४।१।७५।** वेगोऽयकारान्तस्याविति परोक्षायां य्वृद्वा न भवति । ववे, ऊवे । ऊयतुः, ववतुः, ऊवतुः । ऊयाते, ववाते, ऊवाते, । उवयिथ, वविथ,

१-परत्वात्पूर्वं य्वृत्ततो द्वित्वम् । २-आदित्यात्वे इण्निषेधे यमिनमोति सोन्त इट् च । ३-द्वित्वे सति य्वृत्. ञ्णितीति वृद्धिः । ४-परत्वात्पूर्वं य्वृति द्वित्वे समानदीर्घः ।

ववाथ । ऊयिषे, वविषे, ऊविषे । ऊय, वव, ऊव । ऊयि-ढ्वे, ऊयिध्वे, वविढ्वे, वविध्वे, ऊविढ्वे, ऊविध्वे । ऊयिम, वविम, ऊविम । ऊयिवहे, वविवहे, ऊविवहे । ऊयात्[1] । वासीष्ट । वातासि, वातासे । वास्यति, वास्यते । अवास्यत्, अवास्यत ॥ व्येंग् संवरणे । व्ययति, व्ययते, व्ययेत्, व्ययेत । व्ययन्तु, व्ययन्ताम् । अव्ययत्, अव्ययत । अव्यासीत्, अव्यास्त । अव्यासिषुः, अव्यासत ॥

ज्याव्येव्यधिव्यचिव्यथेरिः ।४।१।७१॥ ज्या–व्ये-व्यध्–व्यच्-व्यथ्-एषां परोक्षायां द्वित्वे सति पूर्वस्य इकारो भवति ॥

व्यस्थवणवि ।४।२।३॥ व्ययतेस्थवि णवि च विषयभूते आकारो न भवति । विव्याय । वि[3]व्ये । विव्यतुः, विव्याते ॥

ऋवृव्येऽद इट् ।४।४।८१॥ ऋ-वृ-व्येग्-अद्-एभ्यो धातुभ्यः परस्य थव आदिरिट् भवति । विव्ययिथ, विव्यिषे विव्यय, विव्यि[4]ढ्वे, विव्यिध्वे । विव्याय, विव्यय, विव्ये । वीयात्[5], व्यासीष्ट । व्याताासि, व्याताासे । व्यास्यति, व्या-

१–य्वृति दीर्घः । २–ह्रस्वत्वेनेकारलाभेऽपि इकारविधानसामर्थ्यात्पूर्वस्य वकारस्य न य्वृत्, नामिन इति वृद्धावायादेशः । ३–आत्वे य्वृति द्वित्वे योऽनेकेति यः । ४–हान्तस्थेति वा ढः । ५–आत्वे य्वृति दीर्घश्च्वीति दीर्घः ।

स्यते । अह्वास्यत्, अह्वास्यत । ह्वेंग् स्पर्धाशब्दयोः । ह्वयति, ह्वयते, ह्वयेत्, ह्वयेत, ह्वयतु, ह्वयताम्, अह्वयत्, अह्वयत ॥

ह्वालिप्सिचः ।३।४।६२॥ ह्वा-लिप्-सिच्-एभ्यः कर्त्तर्यद्यतन्यामङ् प्रत्ययो भवति । आह्वत्[1] ॥

वात्मने ।३।४।६३॥ ह्वा-लिप्-सिच्-एभ्यः कर्त्तर्यद्यतन्यामात्मनेपदे वाऽङ् भवति । अह्वत, अह्वास्त । अह्वेताम्[2], अह्वेताम् । अह्वासाताम् । अह्वन्त, अह्वध्वम्, अह्वद्ध्वम् ॥

द्वित्वे ह्वः ।४।१।८७॥ ह्वेधातो द्वित्वविषये सस्वरान्तस्था य्वृद् भवति । जुहाव[3], जुहुवे, जुहुवतुः, जुहुविरे । जुहविथ, जुहोथ । जुहुविषे । जुहुव, जुहुविढ्वे, जुहुविध्वे । हूयात्[5] । ह्वासीष्ट । ह्वातासि, ह्वातासे । ह्वास्यति, ह्वास्यते । अह्वास्यत्, अह्वास्यत ॥ वद व्यक्तायां वाचि । वदति, वदेत्, वदतु, अवदत् । अवादीत्[6] । अवादिष्टाम् । उवाद ॥

न श्वसदवादिगुणिनः ।४।३।१०॥ श्वस्-दद्-अम-

---

१-आत्वे अङि इडेतदियालोपः । २-आत्वेऽङि इडेदित्यालोपे आतामाते इति इः । ३-आत्वे य्वृति द्वित्वे नामिन इति वृद्धावाव् । ४-कित्वाद् गुणाभावे धातोरिवर्णेत्युव् । ५-आत्वे य्वृति दीर्घश्च्वीति दीर्घः । ६-वदव्रजेति वृद्धिः ।

योर्वकारादीनां यस्य गुणो जातस्तेषां च धातूनां स्वरस्य एत्वं न भवति । ऊदतुः । उवदिथ । उवाद, उवद । उद्यात् । वदिता, वदिष्यति, अवदिष्यत् ॥ टु ओ श्वि गतिवृद्धयोः । श्वयति, श्वयेत्, श्वयानि, अश्वयम् । अशिश्वि[2]येत्, अश्व[3]त्, अश्व[4]यीत् ॥

**वा परोक्षायङि ।४।१।९०॥** श्विधातोः सस्वरान्तस्था परोक्षायां यङि च परे य्वृत् वा भवति । शुशा[5]व । शुशविथ । शुशुवथुः । शुशाव, शुशव । शुशुविम । शिश्वाय, शिश्वियतुः, शिश्वयिथ, शिश्वाय, शिश्वय । शूयात् । श्वयिता श्वयिष्यति, अश्वयिष्यत् ॥ इति यजादयः ॥ अत्र श्विवद्वसः परस्मैपदिनः । शेषा उभयपदिनः । तथैव रूपाणि दर्शितानि गणपाठानुरोधात् । एते च धातवोऽदादिगणाद्बहिर्भूतत्वाद् भ्वादय इत्युच्यन्ते । वस्तुतस्तु सर्वे धातवो भ्वादयोऽदादयस्तु तदन्तर्गणा एवेति ध्येयम् ॥ इति भ्वादयः ॥

## अथाऽदादयः ।

" अदादयः कानुबन्धाश्चानुबन्धा दिवादयः । स्वादयश्चानुबन्धाश्च, तानुबन्धास्तुदादयः ॥१॥ रुधादयः पानु-

१–अनादेशादेरित्येत्वनिषेधे य्वृति द्वित्वे समानदीर्घः । कित्वान्न गुणः । २–द्वृषे इति ङे द्वित्वे संयोगादितीय् । ३–अदिदित्थ ङि श्वयत्यसू इति श्वादेशे लुगस्येत्यलुक् । ४–न श्विजागृ इति वृद्धिनिषेधे गुणायादेशौ । ५–य्वृति द्वित्वे वृद्ध्यावादेशौ ॥ इति भ्वादयः ॥

न्धा, यानुबन्धास्तनादयः । क्र्यादयः शानुबन्धाश्च, णानुबन्धाश्चुरादयः ॥२॥"

**अदंक् प्सांक् भक्षणे** । अत्ति[1], अत्तः, अदन्ति । अद्यात्, अद्युः । अत्तु, अत्तात् ।

**हुधुटोर्हेर्धिः ४।२।८३॥** हुधातोर्धुडन्ताच्च धातोः परस्य हेर्धिरादेशो भवति । अत्तात्, अद्धि । अदानि ॥

**अदश्चाट् ।४।४।९१॥** अद् धातोः रुत्पञ्चकाच्च धातोः परस्य दिस्योः शितोरादिरट् भवति । आदत्[2], आदन्, आत्त, आदम् ॥

**घस्लृ सनद्यतनीघञचलि ।४।४।१७॥** सन्-अद्यतनी-घञ्-अच्-अल्-एषु प्रत्ययेषु परेषु अद् धातोर्घस्लृ इत्यादेशो भवति । अघसत्[3] । अघसन्[4] । अघसाम[5] ॥

**परोक्षायां नवा ।४।४।१८॥** परोक्षायां परतोऽद् धातोर्घस्लादेशो वा भवति । जघास[6], जक्षतुः[7], जघसिथ । घसस्तृच्यभावान्नित्यमिट् । जघास, जघस, जक्षिम । पक्षे-आद[9], आदिथ[10], अद्यात्, अत्ता, अत्स्यति, आत्स्यत् । प्साति,

---

१-अघोषे इति प्रथमः । २-स्वरादेस्तासु । ३-घस्लादेशे लृदिदित्यङ् । ४-लुगस्य । ५-मव्यस्याः । ६-गहोर्जः, ञ्णिति वृद्धिः । ७-गमहनेत्युपान्त्यलोपेऽघोष इति प्रथमत्वे घस् वस इति षः । ८-तृचि न घस्लादेश इति तृचि नायं बित्यानिट् । ततो न वेडिति भावः । ९-अस्यादेरित्यात्वे समानदीर्घः । १०-ऋवृव्येऽद इतीट् ।

प्सान्ति। प्साथ। प्सायात्, प्सातु, प्सातात्, प्साहि, प्सानि। अप्सात्॥

**वा द्विषाऽऽतोऽनः पुस् ।४।२।९१॥** द्विष आकारान्ताच्च धातोः शितोऽनः स्थाने वा पुसादेशो भवति। अ[1]प्सुः। अप्सान्। अप्सासीत्। अप्सासिषुः। अप्सासिष्ट। पप्सौ, पप्सुः। पप्सिथ, पप्साथ। पप्सिम। प्सेयात्[2], प्सायात्। प्साता, प्सास्यति, अप्सास्यत्॥ **भांक् दीप्तौ॥** भाति, भायात्, भातु, भाहि, अभात्, अभुः, अभान्। अभासीत्, बभौ, बभतुः, बभिथ, बभाथ। भायात्। भाता, भास्यति, अभास्यत्॥ **यांक् प्रापणे॥** भातिवद् रूपाणि बोध्यानि। **ष्णांक् शौचे।** स्ना[3]ति। प्सातिवद्रूपाणि॥ **श्रांक्पाके॥** स्नातिवद्रूपाणि॥ **द्रांक् कुत्सितगतौ॥ पांक् पूरणे॥** उभयोः श्रातिवद्रूपाणि। **वांक् गतिगन्धनयोः।** पातिवत्॥ **ख्यांक् प्रकथने॥** ख्याति। अयं शिन्मात्रविषय इति बहवः॥ **पांक् रक्षणे॥ लांक् आदाने॥ रांक् दाने।** एते त्रयो यातिवत्॥ **मांक् माने॥** आशिषि मेया[4]त्। शेषं यातिवत्॥ **दांवक् लवने॥** दा[5]यात्। शेषं यातिवत्॥ **इंण्क् गतौ।** एति, इ[6]तः॥

१–इडेत्पुसीत्यालुक्। २–संयोगादेरित्येः। ३–षः स इति सत्वे निमित्ताभावे नैमित्तिकस्य णत्वस्याभावः। ४–गापास्थेत्येः। ५–त्वित्वादासंज्ञाभावादेत्वं न। ६–अविच्छितो ङित्वान्न गुणः।

**ह्रिवणोरप्विति व्यौ** ।४।३।१५।। हु–इण् इत्येतयोर्नामिनः स्वरादावपित्यविति च शिति परे क्रमाद् वकारयकारादेशौ भवतः। यन्ति, एषि, इथः, इथ, एमि, इवः, इमः। इयात्। इयाताम्। एतु, इतात्। यन्तु। इहि। अयानि[1] ।।

**एत्यस्तेर्वृद्धिः** ।।४।४।३०।। इण्–इक्–अस् एषामादेः स्वरस्य ह्यस्तन्यां विषये वृद्धिर्भवति, न तु माङ्योगे। य[2]त्वाऽल्लुगपवादः। ऐत्, आयन्। आयम् ऐम ।।

**इणिको गाः** ।४।४।२३।। अद्यतन्यां विषये इण इकश्च धातोर्गा इत्यादेशो भवति। अगात्[3]। अगुः[4]। अगाः, अगाम् ।।

**पूर्वस्याऽस्वे स्वरे य्वोरियुव्** ।४।१।३७।। धातोर्द्वित्वे सति पूर्वस्येकारस्योकारस्य चास्वे स्वरे परे क्रमादिय् उव् इत्यादेशौ भवतः। इयाय[5] ।।

**इणः** ।२।१।५१।। इणो धातोः स्वरादौ प्रत्यये परे इयादेशो भवति। यत्वापवादः। ईयतुः[6]। ईयुः। इययिथ, इयेथ। इयाय, इयय। ईयिम। ईयात्[7]। एता, एष्यति, ऐष्यत् ।।

---

१–गुणायादेशौ। २–ह्विणोरिति यत्वस्येणि असूधातौ चाल्लुक इत्याशयः।
३–पिबैतीति सिचो लुक्। ४–सिज्विद इति पुसोऽटपुसीत्यालुक्।
५–द्वित्वे वृद्धावायादेशे इय्। ६–द्वित्वे इयादेशे समानदीर्घः।
७–दीर्घश्च्वीति दीर्घः।

**आशिषीणः** ।४।३।१०७।। उपसर्गात्परस्येण ईकारस्य क्ङिति यकारादावाशिषि परतो ह्रस्वो भवति । उदियात् ।। **इंक् स्मरणे** ।। प्रायेणायमधिपूर्वः । अध्येति, अधीतः ।।

**इको वा** ।४।१।१६।। इक् धातोः स्वरादाववििति शिति परे यकारो वा भवति । अधियन्ति । अधीयन्ति । शेषरूपाणीण्वत् । आशिषि तु अधीयात् । **वींक् प्रजननकान्त्यसनखादने च** ।। वेति, वीतः, वियन्ति[1] । वीयात् । वेतु, वीतात् । वीहि । वयानि, अवेत्, अवीताम् । अवियन्, अवयम्, अवीम । अवैषीत्, अवैषुः । अवैष्टम् । विवाय, विव्युः[3] । विवयिथ, विवेथ । विवाय, विवय । विव्यिम, वीयात् । वेता, वेष्यति, अवेष्यत् ।। **षुंक् प्रसवैश्वर्ययोः** । प्रसवोऽभ्यनुज्ञानम् ।।

**उत औविति व्यञ्जनेऽद्वेः** ।४।३।५९।। अद्विरुक्तस्योकारान्तस्य धातोर्व्यञ्जनादौ विति प्रत्यये परे औकारान्तादेशो भवति । सौति, सुतः[4], सुवन्ति । सुयात्, सौतु, सुतात् । सवानि । असौत्, असुवन्, असवम्, असुम ।।

---

१—यत्वाभावे इय् । पश्चात्समानदीर्घः । २—ङित्वाद्गुणाभावे इय् । ३—कित्त्वाद्गुणाभावे योऽनेकस्वरस्येति यः । ४—अविच्छितो ङित्वान्न गुणः । ५—ङित्वाद्गुणाभावे उव् । ६—अविच्छितो ङित्वान्न गुणः ।

धूग्सुस्तोः परस्मै ।४।४।८६॥ धूग्–सु–स्तु–एभ्यः परस्य सिच आदिरिड् भवति परस्मैपदे परे । असावीत् । असाविषुः । असाविष्टम् । अत्र सुमात्रग्रहणम् । सुनोतेरेव ग्रहणमिति पक्षो बृहद्वृत्त्यादौ न दृश्यते । सुषाव । सुषुवतुः, सुषविथ, सुषोथ । सूयात्, सोता, सोष्यति । असोष्यत् ॥ तुंक् हिंसावृत्तिपूरणेषु ॥

यङ्तुरुस्तोर्बहुलम् ।४।३।६४॥ यङ्लुबन्तादद्विरुक्तेभ्यस्तु–रु–स्तु–इत्येतेभ्यश्च धातुभ्यः परो व्यञ्जनादौ त्विति प्रत्यये परे परादिरीद् भवति बहुलम् । तवीति, तौति । तुतः, तुवन्ति । तुयात्, तवीतु, तौतु, तुतात् । तवानि, अतवीत्, अतौत्, अतौषीत् । अतौष्टाम् । तुताव, तुतुवुः । तुतविथ, तुतोथ. तुताव, तुतव । तूयात्, तोता, तोष्यति, अतोष्यत् ॥ टुक्षु रु कुंक् शब्दे । टुरित् । क्षौति, क्षुतः क्षुवन्ति । क्षुयात् । क्षौतु, क्षुतात्, क्षुहि । क्षवाणि । अक्षौत्, अक्षावीत् । चुक्षाव । चुक्षविथ । क्षूयात् । क्षविता, क्षविष्यति, अक्षविष्यत् । रवीति, रौति । रुयात् । रवीतु, रौतु, रुतात् । रवाणि । अरवीत्, अरौत् । अरावीत् । रुराव, रुरविथ । रूयात्, रविता, रविष्यति, अरविष्यत् । कौति, कुयात्, कौतु, कुतात् । कुहि, कवानि । अकौत्, अकौ-

१–सिचि परस्मै इति वृद्धिः । २–सृजिदृशीति वेट् । ३–दीर्घश्च्वीति दीर्घः ।

षीत्। अकौष्टाम्। चुकाव, चुकविथ, चुकोथ। कूयात्, कोता, कोष्यति, अकोष्यत् ॥ युक् मिश्रणे। यौति, युयात्, यौतु, युतात्, अयौत्। अयावीत्। युयाव। युयविथ। यूतात्, यविता, यविष्यति। अयविष्यत् ॥ णुक् स्तुतौ। पाठे धात्वादेर्णोनः। यौतिवत्। रुदृक् अश्रुविमोचने ॥

**रुत्पञ्चकाच्छिदयः** ।४।४।८९॥ रुद्-स्वप्-श्वस्-अन्-जक्ष्-अस्माद् रुत्पञ्चकात्परस्य यकारवर्जव्यञ्जनादेः शित आदिरिड् भवति। रोदिति, रुदितः, रुदन्ति। रुद्यात्। रोदितु, रुदितात्। रुदिहि, रोदानि ॥

**दिस्योरीट्** ।४।४।९०॥ रुत्पञ्चकात्परयोर्दिस्योः शितोरादिरीट् भवति। अरोदीत्[2], अरोदत्। अरुदिताम्। अरोदीः, अरोदः, अरोदम्। अरुदत्[3]। अरोदीत्। अरुदन्, अरोदिषुः[4]। अरुदाम, अरोदिष्म। रुरोद, रुरोदिथ। रुद्यात्। रोदिता, रोदिष्यति, अरोदिष्यत् ॥ ञिष्वपंक् शये। स्वपिति[5], स्वपिमि, स्वपिम। स्वप्यात्। स्वपितु, स्वपितात्। स्वपिहि, अस्वपीत्[6], अस्वपत्। अस्वाप्सीत्[7], अस्वाप्तम्[8]। सुष्वाप[9]।

१—अनुस्वारेत्त्वान्नेट्। सिचि परस्मै इति वृद्धिः। २—अदश्चाडित्यट्। ३—ऋदिच्छ्विस्त्यङ् वा। ङित्वान्नगुणः। ४—सिज्विद इति पुस्। ५—षः स इति सः। ६—पर्यायेणेडटौ। ७—व्यञ्जनानामिति वृद्धिः। ८—धुड्ह्रस्वादिति सिज्लुक्। ९—भूस्वपोरित्युत्, नाम्यन्तरिति षः।

**स्वपेर्यङ्ङे च ।४।१।८०॥** स्वपेर्यङि ङे किति च प्रत्यये सस्वरान्तस्था य्वृद् भवति । सुषुपतुः । सुष्वपिथ, सुष्वप्थ । सुप्यात्, स्वप्ता, स्वप्स्यति, अस्वप्स्यत् ॥ अन -श्वसक् प्राणने ॥ प्राणनं श्वासग्रहणम् । जीवनमित्यर्थः । अयं प्रपूर्व इष्यते ॥

**द्वित्वेऽप्यन्तेऽप्यनितेः परेस्तु वा ।२।३।८१॥** अदुरुपसर्गान्तःस्थाद् रषृवर्णात् परस्याऽनितेर्नकारस्य द्वित्वे चाऽद्वित्वे चान्ते चानन्ते च णो भवति, परिपूर्वकस्य तु वा भवति । प्राणिति, प्राण्यात्, प्राणितु, प्राणिहि, प्राणीत्, प्राणत् । प्राणीत्, प्राणिष्टाम् । प्राण, प्राणिथ । प्राण्यात्, प्राणिता, प्राणिष्यति, प्राणिष्यत् । श्वसिति, श्वस्यात्, श्वसितु, अश्वसीत्, अश्वसत् । अश्वासीत्, अश्वसीत् । शश्वास, श्वस्यात्, श्वसिता, श्वसिष्यति, अश्वसिष्यत् ॥ जक्षक् भक्षहसनयोः । जक्षिति ।

**अन्तो नो लुक् ।४।२।९४॥** द्व्युक्तजक्षपञ्चतः परस्य शितोऽवितोऽन्तः सम्बन्धिनो नकारस्य लुग् भवति । जक्षति । जक्ष्यात्, जक्षितु, जक्षतु । अजक्षीत्, अजक्षत् ॥

**द्व्युक्तजक्षपञ्चतः ।४।२।९३॥** द्वे उक्ते यस्य स द्व्युक्तः, पञ्चानां वर्गः पञ्चत् । द्व्युक्तात् धातोर्जक्षपञ्च-

१-पूर्वं य्वृत्ततो द्वित्वम् । २-व्यञ्जनादेरिति वा वृद्धिः ।

तश्च परस्य शितोऽवितोऽनः स्थाने पुसादेशो भवति। अजक्षुः। अजक्षीत्। जजक्ष, जजक्षिथ। जक्ष्यात्, जक्षिता, जक्षिष्यति, अजक्षिष्यत् ॥ इति रुदादयः पञ्च। दरिद्राक् दुर्गतौ ॥ दरिद्राति ॥

**इर्दरिद्रः । ४।२।९८॥** दरिद्रातेर्व्यञ्जनादौ शित्यविति प्रत्यये परे आकारस्य इकारो भवति। दरिद्रितः ॥

**श्नश्चातः ।४।२।९६॥** द्व्युक्तजक्षपञ्चतः श्नाप्रत्ययस्य च आकारस्य शित्यविति प्रत्यये परे लुग् भवति। दरिद्रति। दरिद्रियात्, दरिद्रिहि, अदरिद्रात्, अदरिद्रिताम्। अदरिद्रुः ॥

**दरिद्रोऽद्यतन्यां वा ।४।३।७६॥** दरिद्रातेरद्यतन्या विषये अन्तस्य वा लुग् भवति। अदरिद्रीत्, अदरिद्रासीत् अदरिद्रिष्टाम्। अदरिद्रासिष्टाम् ॥

**धातोरनेकस्वरादाम् परोक्षायाः कृभ्वस्ति चानु तदन्तम् ।३।४।४६॥** अनेकस्वराद् धातोः परस्याः परोक्षायाः स्थाने आमादेशो भवति, आमन्ताच्च परे कृभ्वस्तयो धातवः परोक्षान्ता अनु पश्चादनन्तरं

---

१–पक्षे यमिनमीतीट् सोन्तश्च। स्ताद्यशित इति हि सामान्यशास्त्रमिति ध्येयम्।

प्रयुज्यन्ते। दरिद्राञ्चकार। दरिद्रांचकार। ददरिद्राविति तु पाणिनिमते। नेहं॥

**अशित्यस्सन्णकच्णकानटि** ।४।३।७७॥ सकारादिसन्, णकच्, णक, अनट् एतेभ्यो वर्जिते अशितिप्रत्यये विषयभूते दरिद्रातेरन्तस्य लुग् भवति। दरिद्र्यात्। दरिद्रिता, दरिद्रिष्यति, अदरिद्रिष्यत्। **जागृक् निद्राक्षये**॥ जागर्ति, जागृतः, जाग्रति। जागर्षि, जागृमः। जागृयात्। जागर्तु, जागृहि, जागराणि॥

**व्यञ्जनाद्देः सश्च दः**। ४।३।७८॥ धातोर्व्यञ्जनात्परस्य देर्लुक्, यथासम्भवं धातुसकारस्य च दकारो भवति। अजागः, अजागृताम्॥

**पुस्पौ** ।४।३।३॥ नाम्यन्तस्य धातोः पुसि पौ च परे गुणो भवति। अजागरुः॥

**सेः स्द्धां च रुर्वा** ।४।३।७९॥ धातोर्व्यञ्जनात्परस्य सेर्लुक्, सकारदकारधकाराणां च यथासंभवं वा रुर्भवति। अजागः। अजागरीत्। ञ्णिव्येवेति नियमान्न वृद्धिः। अजागरिष्टाम्॥

**जागुषसमिन्धेर्नवा** ।३।४।४९॥ जागृ-उष्-सम्पूर्व

१-अत्र ह्याकारस्य नित्यं लुगिति ध्येयम्। एवं च परोक्षायां विषये आलुक्, ततः परोक्षाप्रत्यय इति बोध्यम्। २-अविच्छितो ङित्त्वाद् गुणाप्राप्त्या इवर्णादेरिति रादेशः ३-द्व्युक्तेति पुस॥

इन्ध्-इत्येतेभ्यो धातुभ्यः परस्याः परोक्षायाः स्थाने आमादेशो वा भवति, आमन्ताच्च परे कृभ्वस्तयः परोक्षान्ता अनु प्रयुज्यन्ते। जागराञ्चकार, जागरांचकार ॥

**आद्योंश एकस्वरः** ।४।१।२॥ अनेकस्वरस्य धातोराद्य एकस्वरोऽवयवः परोक्षाङेप्रत्यये परे द्विर्भवति ॥

**जागुर्ञिणवि** ।४।३।५२॥ जागर्तेर्ञौ णव्येव च ञ्णिति प्रत्यये परे वृद्धिर्भवति नाऽन्यत्र। जजागार। नियमः किम्? जागरयति, जागरकः॥

**जागुः क्किति** ।४।३।६॥ जागर्तेः क्किति प्रत्यये परे गुणो भवति। जजागरतुः। जजागरिथ। जजागार, जजागर। जागर्यात्। जागरिता, जागरिष्यति अजागरिष्यत् ॥

**चकासृक् दीप्तौ**। चकास्ति, चकासति। चकास्यात्, चकास्तु, चकाधि[२]। चकाद्धि। अचकात्, अचकाः, अचकाद्। अचकासीत्। अचकासदिति तु प्रमादः[३]। चकासाञ्चकार। चकास्यात्, चकासिता। चकासिष्यति। अचकासिष्यत्

**शासूक् अनुशिष्टौ**। शास्ति॥

**इसासः शासोऽङ्व्यञ्जने** ।४।४।११८॥ शास्तेरव-

---

१-तौ मुमावित्यनुस्वारानुनासिकौ। २-सोधि वेति धातुसकारस्यापि लोपः, पक्षे तृतीयस्तृतीयेति दः। ३-अत्र हि दीर्घकारितोऽङ् वा भवति न तु ह्रस्वेकारेत इति भावः।

यवस्य आसः स्थानेऽङि व्यञ्जनादौ च क्ङिति प्रत्यये परे इस् इत्यादेशो भवति । शिष्टः[1] । शासति[2] । शास्सि, शिष्ठः, शिष्यात् । शास्तु, शिष्टात् । शासतु ॥

**शासस्हनः शाध्येधिजहि** ।४।२।८४॥ शास्–अस्-हन्–इत्येतेषां हि प्रत्ययान्तानां शाधि–एधि–जहि-इत्येते आदेशाः क्रमेण भवन्ति । शाधि, शिष्टात्, अशात्[3] । अशिष्टाम् । अशासुः । अशाः[4], अशात् ॥

**शास्त्यसूवक्तिख्यातेरङ्** ।७।४।६०॥ शास्-अस्-वच् ख्या इत्येतेभ्यो धातुभ्यः कर्त्तर्यद्यतन्यामङ्प्रत्ययो भवति । अशिषत् । अशिषन्, अशिषाम । शशास । शिष्यात् । शासिता, शासिष्यति । अशासिष्यत् **वचंक् भाषणे** । वक्ति[5], वक्तः । अन्तिपरस्य वचेः प्रयोगो न दृश्यते । वक्षि[6], वच्मि, वच्यात्, वक्तु, वग्धि[7], अवक्[8], अवोचत्[9] । अवोचन् । अवोचाम । उवाच[10] । ऊचतुः[11] । उवचिथ, उवक्थ । उच्यात् ।

---

१–नाम्यन्तस्थेति षः तवर्गस्येति टवर्गः । २–अन्तो नो लुक् । ३–व्यञ्जनादिति देर्लुक् सश्च दः । ४–सेस्द्धामिति से लुक् रुत्वं च । पक्षे पदान्ते धुटस्तृतीय इति दत्वे विरामे वा प्रथमत्वम् । ५–चजः कगम् । ६–चजः कगम् । नाम्यन्तस्था । ७–हुधुटोहे धिः । चजः कगम् । तृतीयस्तृतीयेति गः । ८–व्यञ्जनादिति देर्लुक्, चजः कगम्, धुटस्तृतीयः, विरामे वा । ९–शास्त्यसू इत्यङ् । श्वयत्यसू इति वोचादेशः । १०–यजादीति य्वृत् । ११–यजादिवचेरिति य्वृति द्वित्वम् ।

वक्ता । वक्ष्यति । अवक्ष्यत् । मृजौक् शुद्धौ ॥

**मृजोऽस्य वृद्धिः** ।४।३।४२।। मृजेर्गुणे सत्यकारस्य वृद्धिर्भवति । मार्ष्टि, मृष्टः[1] ॥

**ऋतः स्वरे वा** ।४।३।४३।। मृजेर्ऋकारस्य स्वरादौ प्रत्यये परे वा वृद्धिर्भवति । मार्जन्ति, मृजन्ति । मार्क्षि[2], मृज्यात् । मार्ष्टु, मृष्टात् । मृजन्तु, मार्जन्तु । मृड्ढि[3] । मृष्टात् । मार्जानि । अमार्ट्, ड् । अमृष्टाम् । अमृजन्, अमार्जन् । अमार्जीत्[4] । अमार्क्षीत् । अमार्जिष्टाम्, अमार्ष्टाम् । अमार्जिषुः । अमार्क्षुः । ममार्ज । ममार्जतुः, ममृजतुः । ममार्जिथ मृज्यात् । मार्जिता, मार्ष्टा । मार्जिष्यति, मार्क्ष्यति । अमार्जिष्यत्, अमार्क्ष्यत् ॥ विदक् ज्ञाने ॥

**तिवां णवः परस्मै** ।४।२।११७।। वेत्तेः परेषां परस्मैपदानां तिवादीनां नवानां प्रत्ययानां स्थाने णवादयो नवादेशा यथासंख्यं भवन्ति । वेद[5], विदतुः । विदुः, वेत्थ, विदथुः, विद, वेद, विद्व, विद्म । पक्षे-वेत्ति[6] वित्तः, विदन्ति । वेत्सि, वित्थः, वित्थ । वेद्मि, विद्वः, विद्मः । विद्यात् ॥

---

१—यजसृजेति षः, तवर्गस्येति टवर्गः । २—वृद्धौ, यजसृजेति षः, षढोरिति कः, नाम्यन्तेति षः । ३—हुधुट इति धिः, ततः ष ड ढाः । ४—इड्विकल्पे ष क षाः । ५—लघोरिति गुणः । ६—अघोषे प्रथमः ।

**पञ्चम्याः कृग्** ।३।४।५२॥ वेत्तेः परस्याः पञ्चम्याः स्थाने किदामादेशो वा भवति, आमन्ताच्च परः पञ्चम्यन्तः कृग् अनु प्रयुज्यते । विदाङ्करोतु, विदांकरोतु । विदांकुरुतात् । पक्षे—वेत्तु, वित्तात् । [२]विद्धि, वेदानि । [३]अवेत् । अविदुः, [४]अवेः अवेत् । अवित्त । अवेदम् । अवेदीत्, अवेदिषुः, अवेदिष्ट ॥

**वेत्तेः कित्** ।३।४।५१॥ वेत्तेः परस्याः परोक्षायाः स्थाने आमादेशो वा भवति, स च कित्, आमन्ताच्च परे कृभ्वस्तयोऽनु प्रयुज्यन्ते । विदाञ्चकार, विदांचकार । पक्षे—विवेद, विविदुः । विवेदिथ । विद्यात् । वेदिता, वेदिष्यति, अवेदिष्यत् ॥ **हनंक् हिंसागत्योः** ॥ हन्ति, प्रणिहन्ति ।

**यमिरमिनमिगमिहनिमनिवनतितनादेर्धुटि क्ङिति** ।४।२।५५॥ यमादीनां तनादीनां चान्त्यस्याऽनुनासिकस्य धुडादौ क्ङिति लुक् स्यात् । हतः, घ्नन्ति, हंसि, हथः, हन्मि । प्रघ्नन्ति ।

---

१—तौ मुमः । २—हुधुट इति धिः । ३—व्यञ्जनादिति देर्लुक् । ४—सिजिवद इत्युस् । ५—सेःस्द्धामिति से लुक्, रुत्वं च । ६—म्नामिति पर्जन्यवल्लक्षणन्यायेन पञ्चमः । ७—नेर्ङ्मेति णः । ८—यमिरमीति नकारलोपः । ९—हनो घीति णत्वनिषेधः । गमहनेत्युपान्त्यलोपः, हनो ह्नो घ्न इति घ्नादेशः ।

**हनः** ।२।३।८२।। अदुरुपसर्गान्तःशब्दस्थाद्रादेः परस्य हन्तेर्नकारस्थ णो भवति ।।

**वमि वा** ।२।३।८३।। अदुरुपसर्गान्तः शब्दस्थाद्रादेः परस्य हन्तेर्नस्य वकारे मकारे च परे णो वा भवति । प्रहण्मि, प्रहन्मि, हन्यात्, प्रहण्यात् । हन्तु, हतात् । घ्नन्तु[1], जहि[2], हतात् । हत । हनानि । अहन्[3], अहताम्, अहन्[4], अहत ।।

**अद्यतन्यां वा त्वात्मने** ।४।४।२२।। अद्यतन्यां विषये हनो वध इत्ययमादेशो भवति, आत्मनेपदे तु वा भवति ।

**अतः** ।४।३।८२।। अकारान्ताद् धातोर्विहितेऽशिति प्रत्यये तस्यैव धातोर्लुगन्तादेशो भवति । अल्लोपस्य स्थानिवत्त्वान्न वृद्धिः । अवधीत्, अवधिषुः । अवधिष्ट ।।

**ञिणति घन्** ।४।३।१०१।। ञौ णवि च प्रत्यये परे हन्तेर्घन् इत्ययमादेशो भवति । जघान[5] ।।

**अङे हि हनो हो घः पूर्वात्** ।४।१।३४।। हि-हन्-इत्येतयोर्धातोर्ङवर्जे प्रत्यये परे द्वित्वे सति पूर्वस्मात्

---

१—गमहनेत्युपान्त्यलोपः, हनो ह्नो घ्न इति घ्नादेशः । २—शासस्हन इति जह्यादेशः । ३—व्यञ्जनादिति देर्लुक् । ४—सेःस्द्धामिति सेर्लुक् । ५—द्वित्वे द्वितीयतुर्ययोरिति गत्वे गहोर्जः इति जः ।

परस्य हस्य घो भवति । जघ्नतुः । जघनिथ, जघन्थ । जघ्निम ॥

**हनो वध आशिष्यञौ** ।४।४।२१॥ आशीर्विषये हनो वध इत्यकारान्तादेशो भवति । ञिविषये तु न भवति । वध्यात् । हन्ता, हनिष्यति, अहनिष्यत् ॥

**वशक् कान्तौ** ॥ कान्तिरिहेच्छा । वष्टि ॥

**वशेरयङि** ।४।१।८३॥ वशेः सस्वरान्तस्था अयङि क्ङिति प्रत्यये य्वृद् भवति । उष्टः, वक्षि । उश्यात्, वष्टु, उष्टात् । उड्ढि, वशानि । अवट्, औष्टाम्, अवट् । अवाशीत् । अवशीत् । उवाश, ऊशतुः । उवशिथ । उश्यात्, वशिता, वशिष्यति, अवशिष्यत् ॥

**असक् भुवि** ॥ सत्तायामित्यर्थः । अस्ति ॥

**श्नास्त्योर्लुक्** ।४।२।९०॥ श्नस्य प्रत्ययस्याऽस्तेश्च धातोरकारस्य शित्यविति प्रत्यये लुग् भवति । स्तः, सन्ति ॥

---

१–उपान्त्यलोपे विशेषत्वाद् हनो ह्न इति बाधित्वा अङे हीति घः । २–हनृत इतीट् । ३–यजसृजेति षः, तवर्गस्येति टः । ४–यजसृजेति षः, षढोरिति कः, नाम्यन्तस्थेति षः । ५–हु धुट इति धिः, षः, तृतीय इति डः, तवर्गस्येति ढः । ६–व्यञ्जनादिति देर्लुक्, षः, तृतीयः प्रथमः । ७–य्वृति स्वादेरिति वृद्धिः । ८–व्यञ्जनादेरिति वा वृद्धिः । ८–यजादिवशेति य्वृत् । ९–पूर्वं य्वृत् ततो द्वित्वम् ।

**अस्तेः सि हस्त्वेति** ।४।३।७३।। अस्तेः सकारस्य सकारादौ प्रत्यये परे लुग् भवति, एकारे तु प्रत्यये सकारस्य हकारः। असि, स्यात् । अस्तु, स्तात् । एधि[1] । असानि । आसीत्[2], आस्ताम्[3] ।।

**अस्तिब्रुवोर्भूवचावशिति** ।४।४।१।। अस्तिब्रुवोर्यथासंख्यं भू वच् इत्येतावादेशौ भवतोऽशितिप्रत्यये विषयभूते । अभूत् । बभूव, भूयात् , भविता, भविष्यति, अभविष्यत् ।।

**प्रादुरुपसर्गाद्यस्वरेऽस्तेः** ।२।३।५८।। प्रादुःशब्दादुपसर्गस्थाच्च नाम्यन्तस्थाकवर्गात्परस्यास्तेः सकारस्य यकारादौ स्वरादौ च प्रत्यये परे षो भवति शिड्नान्तरेऽपि । प्रादुष्ष्यात् । निषन्ति । निःषन्ति । दुःषन्ति ।। इत्यदादयः **परस्मैपदिनः ।। अथादादय आत्मनेपदिनः ।।**

**इंङ्क अध्ययने** ।। अधिपूर्व एवाऽयं प्रयुज्यते । अधीते, अधीयाते[4] । अधीयते । अधीयीत । अधीयीयाताम् । अधीताम् अधीयाताम् । अधीष्व । अध्ययै[5] । अध्ययामहै । अध्यैत[6] । अध्यैयाताम्[7] । अध्यैयत । अध्यैयि । अध्यैमहि ।।

---

१–शासस्त्येध्यादेशः। २–सः सिजस्तेरितीत्। एत्यस्तेरिति वृद्धिः। ३–लोपापवादत्वादेत्यस्तेरिति वृद्धिरेव । ४–ङित्वाद् गुणाभावे धातोरितीयादेशो समानदीर्घः । ५–गुणेऽयादेशो यः । ६–स्वरादेरिति वृद्धिः । ७–आदावियू, पश्चाद् वृद्धिः ।

**वाद्यतनीक्रियातिपत्त्योर्गीङ्** ।४।४।२८॥ अद्यतनी-क्रियातिपत्त्योः परत इङो गीङादेशो वा भवति । अध्यगीष्ट[1], अध्यगीषत । अध्यगीध्वम्, अध्यगीड्ढ्वम् । पक्षे–अध्यैष्ट, अध्यैषाताम्, अध्यैषत ॥

**गाः परोक्षायाम्** ।४।४।२६॥ इङः परोक्षाविषये गादेशो भवति । अधिजगे[2] । अधिजगाते, अधिजगिषे । अध्येषीष्ट, अध्येता, अध्येष्यते, अध्यगीष्यत, अध्यैष्यत ॥ शीङ्क् स्वप्ने ॥

**शीङ एः शिति** ।४।३।१०४॥ शीङः शिति परे एकारान्तादेशो भवति । शेते, शयाते ॥

**शीङो रत्** ।४।२।११५॥ शीङः परस्याऽऽत्मनेपद-सम्बन्धिनोऽन्तो रत् इत्यादेशो भवति । शेरते, शयीत, शेताम्, शेरताम् । शयै । अशेत, अशयाताम्, अशेरत । अशयिष्ट । अशयिढ्वम्[3], अशयिध्वम्, अशयिड्ढ्वम् । शिश्ये[4], शिश्यिरे । शिश्यिढ्वे, शिश्यिध्वे । शयिषीष्ट, शयिषीढ्वम्, शयिषीध्वम् । शयिता, शयिष्यते, अशयिष्यत ॥ षूङौक् प्राणिगर्भविमोचने ॥ सूते, सुवाते[5], सुवीत, सूताम् ॥

---

१–गीङिति ङित्करणान्न गुणः । २–परोक्षायां विषये इङो गादेशे द्वित्वादौ गस्य जः, इडेदित्यालुक् । ३–हान्तस्थेति वा ढः । ४–कित्त्वाद् गुणाभावे योऽनेकस्वरस्येति यः । ५–ङित्वाद् गुणाभावे उव् ।

**सूतेः पञ्चम्याम्** ।४।३।१३॥ सूतेः पञ्चम्यां गुणो न भवति । सुवै, असूत, असुवत । असविष्ट[1], असोष्ट, असविषाताम्, असविढ्वम्, असविध्वम्, असविड्ढ्वम् । असोढ्[2]वम्, असोड्ढ्वम् । सुषुवे, सुषुविढ्वे, सुषुविध्वे । सविषीष्ट, सोषीष्ट । सविता, सोता । सविष्यते, सोष्यते । असविष्यत, असोष्यत ॥ **ईडिक् स्तुतौ** ॥ ईट्टे,[3] ईडते ॥

**ईशिडः से ध्वेस्वध्वमोः** ।४।४।८८॥ ईश् ईड् आभ्यां परयोर्वर्तमाना से ध्वे इत्यनयोः पञ्चमीस्वध्वमोश्चादिरिड् भवति । ईडिषे, ईडिध्वे । ईडीत । ईट्टाम्, ईडिष्व, ईडिध्वम् । ऐट्ट, ऐट्ठाः । ऐडि । ऐडिष्ट, ईडाञ्चक्रे । ईडिषीष्ट, ईडिता, ईडिष्यते । ऐडिष्यत ॥ **ईरिक् गतिकम्पनयोः** ॥ ईर्त्ते, ईर्षे, ईरीत, ईर्त्ताम्, ईर्ष्व, ईर्ध्वम्, ऐर्त्त, ऐरिष्ट, ईराञ्चक्रे[4], ईरिषीष्ट । ईरिता, ईरिष्यते, ऐरिष्यत ॥ **ईशिक् ऐश्वर्ये** ॥ ईष्टे,[5] ईशिषे । ईशिध्वे, ईशीत, ईष्टाम्, ईशिष्व, ईशिध्वम् । ऐष्ट, ऐशिष्ट । ईशांचक्रे, ईशिषीष्ट, ईशिता, ईशिष्यते, ऐशिष्यत ॥ **वसिक् आच्छादने** । वस्ते, वस्से, व[6]ध्वे, वद्ध्वे । वसीत, वस्ताम् । वस्स्व, वध्वम्, वद्ध्वम् । अवस्त, अवध्वम्, अवद्ध्वम् ॥ अवसिष्ट, व[7]वसे, ववसिध्वे,

१–औदित्त्वाद्वेट् । २–र्नाम्यन्तादिति ढः । ३–तवर्गस्येति टः, अघोष इति प्रथमः । ४–गुरुनाम्यादेरित्याम् । ५–यजसृजेति षः । तवर्गस्येति टः । ६–सोधिवेलि सलुक्, पक्षे तृतीयस्तृतीय इति तृतीयः । ७–न शसददेति अनादेशादेरित्यस्य निषेधः ।

वसिषीष्ट, वसिता, वसिष्यते, अवसिष्यत ॥ **आङः शासूकि इच्छायाम्** । आशास्ते । प्रायेणायमाङ्पूर्वः, "नमो वाकं प्रशास्महे" इति दर्शनात् । आशासते, आशाध्वे, आशाद्ध्वे । आशासीत, आशास्ताम्, आशास्त । ईशास इति नेह प्रवर्तते, आङ्पूर्वस्य शास आस इस् क्विप्येवेति नियमात् । आशासिष्ट, आशशासे । आशासिषीष्ट । आशासिता, आशासिष्यते । आशासिष्यत ॥ **आसिक् उपवेशने** ॥ आस्ते, आध्वे, आद्ध्वे । आसीत, आस्ताम्, आस्स्व, आस्त, आसिष्ट, आसांचक्रे । आसिषीष्ट, आसिता, आसिष्यते, आसिष्यत ॥ **णिसुकि चुम्बने** ॥ निंस्ते, निंस्से, निन्ध्वे, निन्द्ध्वे । निंसीत, निंस्ताम्, अनिंस्त, अनिंसिष्ट । निनिंसे, निंसिसीष्ट, निंसिता, निंसिष्यते, अनिंसिष्यत ॥ **चक्षिक् व्यक्तायां वाचि** । चष्टे, चक्षे, चड्ढ्वे । चक्षीत, चष्टाम्, अचष्ट, अचक्षत ॥

**चक्षो वाचि क्शांग् ख्यांग्** ।४।४।४॥ चक्षिक् धातोर्वाचि वर्त्तमानस्याऽशिति प्रत्यये विषयभूते क्शांग् ख्यांग् इत्यादेशौ भवतः ॥

**नवा परोक्षायाम्** । ४।४।५॥ चक्षिको वाचि परोक्षायां विषये क्शांग्–ख्यांगौ वा भवतः । अनुस्वारेत्त्वमिडभावाय,

१–आङ्पूर्वः शास् इच्छायामर्थे आत्मनेपदीत्यर्थः । २–दयायासिल्याम् । ३–संयोगस्येति ककारलोपे तवर्गस्येति टः । ४–संयोगादिलोपे तृतीयत्वे ढः ।

गित्त्वमुभयपदार्थम् । अक्शासीत्, अक्शास्त, अख्यत्, अख्यत । अख्येताम्, अख्यन्त । चक्शौ, चक्शे, चख्यौ, चख्ये, पक्षे–चचक्षे, क्शायात्, क्शेयात्[2], क्शासीष्ट, ख्यायात्, ख्येयात्, ख्यासीष्ट, क्शाता, ख्याता, क्शातासि, ख्यातासि, क्शास्यति, क्शास्यते, ख्यास्यति, ख्यास्यते, अक्शास्यत्, अक्शास्यत, अख्यास्यत्, अख्यास्यत ॥ इत्यदादय आत्मनेपदिनः । अथादादय उभयपदिनः ॥ ऊर्णुग्क् आच्छादने ॥

**वोर्णोः** ।४।३।६०॥ ऊर्णोतेरद्विरुक्तस्य व्यञ्जनादौ विति प्रत्यये और्वा भवति । ऊर्णौति, ऊर्णोति । ऊर्णुतः । ऊर्णुवन्ति । ऊर्णुयात् । ऊर्णौतु, ऊर्णोतु । ऊर्णुतात् । ऊर्णुहि । ऊर्णवानि ॥

**न दिस्योः** ।४।३।६१॥ ऊर्णोतेर्दिस्योः परयोरौर्न भवति । और्णोत् ॥

**वोर्णुगः सेटि** ।४।३।४६॥ ऊर्णोतेः परस्मैपदविषये सेटि सिचि परे वृद्धिर्वा भवति ॥

**वोर्णोः** ।४।३।१९॥ ऊर्णोतेरिड् वा ङिद्वत् भवति । और्णुवीत्[3], और्णावीत्, और्णवीत् ॥

---

१–शास्यत्यसू इत्यङ्, इडेदित्यालोपः । २–संयोगादेरित्येर्वा । ३–इटो ङित्वे उव्, पक्षे वृद्धिः, पक्षे गुणः ।

**स्वरादेर्द्वितीयः ।४।१।४।।** स्वरादेर्धातोर्द्विवचनभाजो द्वितीयोंश एकस्वरो द्विर्भवति न त्वाद्यः ।।

**अयि रः ।४।१।६।।** स्वरादेर्धातोर्द्वितीयस्यावयवस्यैकस्वरस्य रेफः संयोगादिर्द्विर्न भवति. रेफात्पर आनन्तर्येण यकारश्चेन्न भवति । णत्वस्यासत्त्वान्नुशब्दस्य द्वित्वम् । ऊर्णुनाव । ऊर्णुनुवुः । ऊर्णुनुविथ । ऊर्णुनविथ । ऊर्णूयात् । ऊर्णुविता, ऊर्णविता । ऊर्णुविष्यति, ऊर्णविष्यति । और्णुविष्यत्, और्णविष्यत् । ऊर्णुते, ऊर्णुवते । ऊर्णुवीत, ऊर्णुताम्, ऊर्णवै । और्णुत, और्णुविष्ट, और्णविष्ट । और्णुविढ्वम्, और्णुविध्वम्, और्णुविड्ढ्वम् । और्णविढ्वम्, और्णविध्वम्, और्णविड्ढ्वम् । ऊर्णुनुवे । ऊर्णुनुविढ्वे, ऊर्णुनुविध्वे । ऊर्णुविषीष्ट, ऊर्णविषीष्ट । ऊर्णुविषीढ्वम्, ऊर्णविषीढ्वम् । ऊर्णुविषीध्वम्, ऊर्णविषीध्वम् । ऊर्णुविता, ऊर्णविता । ऊर्णुविष्यते, ऊर्णविष्यते । और्णुविष्यत, और्णविष्यत ।। **ष्टुंगक् स्तुतौ** ।। स्तवीति, स्तौति[४]। स्तुयात् । स्तवीतु, स्तौतु, स्तुतात् । स्तुहि, स्तवानि, अस्तवीत्, अस्तौत् ।।

**स्तुस्वञ्जश्चाटि न वा ।२।३।४९।।** परिनिविभ्यः

१—क्त्वाद् गुणाभावे उव् । २—इटो ङित्त्वे उव्, पक्षे गुणः । ३—दीर्घश्च्वि इति दीर्घः । ४—षः स इति सः, यङ्त्वितीत् । पक्षे उत औरित्यौः ।

परस्य स्तुस्वञ्जोर्धात्वोरसोङ् सिवुस्सहस्सटां च सकार-स्याटि सति षो वा भवति । पर्यष्टौत् । पर्यस्तौत्[1], अस्तावीत्, तुष्टाव, तुष्टुवुः, तुष्टोथ[2], स्तूयात्[3], स्तोता, स्तोष्यति, अस्तोष्यत् । स्तुते, स्तुवते, स्तुवीत, स्तुताम्, अस्तुत, अस्तोष्ट, अस्तोढ्वम्, अस्तोड्ढ्वम्, तुष्टुवे[4], तुष्टुषे, तुष्टुढ्वे, स्तोषीष्ट, स्तोता, स्तोष्यते, अस्तोष्यत ॥ ब्रूंग्क् व्यक्तायां वाचि ॥

**ब्रूगः पञ्चानां पञ्चाहश्च** ।४।२।११८॥ ब्रूगः परेषां तिवादीनां पञ्चानां स्थाने यथासंख्यं पञ्च णवादय आदेशा वा भवन्ति, तत्सन्नियोगे ब्रूग आह इत्यादेशश्च भवति । अकार उच्चारणार्थः । आह, आहतुः, आहुः । आत्थ[5] आहथुः ।

**ब्रूतः परादिः** ।४।३।६३॥ ब्रूतेरुकारात्परो व्यञ्जनादौ विति प्रत्यये परे परादिरीद् भवति । ब्रवीति, ब्रुवन्ति[6] । ब्रवीषि, ब्रूथ । ब्रूते, ब्रुवते, ब्रूयात्, ब्रुवीत । ब्रवीतु, ब्रूतात्, ब्रूहि, ब्रवाणि । ब्रूताम्, ब्रूष्व, ब्रवै । अब्रवीत्[7], अब्रूताम्, अब्रवम् । अब्रूत । अब्रुवि । अवोचत्[8] । अवोचत ।

---

१–धूग्सुस्तोरिट्, सिचि परस्मै इति वृद्धिः । २–स्क्रसृवृभृस्तुद्रुस्रुश्रुवः... (स्क्रस्त्रिति) नेट् । ३–दीर्घश्च्वि । ४–अघोषे शिटः । नाम्यन्तस्थेति षः, तवर्गस्येति टः । ५–नहाहोरिति तः । ६–ङित्त्वाद् गुणाप्राप्तावुव् । ७–ब्रूत इतीट् । ८–शास्त्यसू इत्यङ् । श्वयत्यसू इति वोचादेशः ।

उवाच[9], ऊचतुः[10]। उवचिथ[11], उवक्थ । ऊचे, उच्यात् । वक्षीष्ट[12], वक्तासि, वक्तासे, वक्ष्यति, वक्ष्यते । अवक्ष्यत्, अवक्ष्यत ॥ **द्विषींक् अप्रीतौ**। द्वेष्टि, द्विषन्ति, द्वेक्षि[13], द्विष्टे, द्विक्षे, द्विड्ढ्वे[14], द्विष्यात्, द्विषीत । द्वेष्टु, द्विष्टात्, द्विड्ढि, द्वेषाणि, द्विष्टाम्, द्विक्ष्व, द्विड्ढ्वम्, द्वेषै । अद्वेट्[15], ड्, अद्विषुः, अद्विषन्[16]। अद्विष्ट, अद्विक्षत्[17], अद्विक्षत । दिद्वेष, दिद्विषे । द्विष्यात्, द्विक्षीष्ट[18]। द्वेष्टासि, द्वेष्टासे । द्वेक्ष्यति, द्वेक्ष्यते । अद्वेक्ष्यत्, अद्वेक्ष्यत ॥ **दुहींक् प्रपूरणे**। दोग्धि[19], दुग्धः, दुहन्ति, धोक्षि[20] दुग्धः, दोह्मि, दुह्यात्, दोग्धु, दुग्धात् । दुग्धि, दोहानि । अधोक्[21], ग् । अदुग्धाम्, अधोक्, ग् । अदुग्ध, अदोहम् । अधुक्षत्[22], दुदोह, दुदुहुः । दुदोहिथ । दुह्यास्ताम् । दोग्धा, धोक्ष्यति, अधोक्ष्यत् ।

---

९—यजादिवशवच इति य्वृत् । १०—अवित्परोक्षायाः कित्त्वाद् यजादिवचेरिति य्वृति द्वित्वम् । समानदीर्घः । ११—सृजिदृशीति वेट्, पक्षे—चजः कगम् । १२—चज इति कः। नाम्यन्तस्थेति षः । १३—षढोरिति कः । १४—तृतीय इति तृतीयत्वे टवर्गः । १५-उपान्त्यगुणः, व्यञ्जनादिति देर्लुक्, तृतीयत्वे वा प्रथमः । १६—वा द्विषातः । १७—हशिट इति सक्, षढोरिति कः । १८—षढोरिति कः, नाम्यन्तस्थेति षः । सिजाशिषाविति कित्त्वान्नगुणः । १९—दादेरिति घत्वे, अध इति चतुर्थः, ततस्तृतीयत्वम् । २०—हस्य घत्वे गडदबादेरिति चतुर्थः । अघोष इति प्रथमः, षत्वम् । २१—व्यञ्जनादिति देर्लुकि उपान्त्यगुणे घत्वे चतुर्थे तृतीयत्वे वा प्रथमत्वम् । २२—सकि घत्व—धत्व—तृतीयत्व—प्रथमत्वषत्वानि ।

दुग्धे, दुहते, धुक्षे, धुग्ध्वे । दुहे । दुहीत, दुग्धाम्, धुक्ष्व, धुग्ध्वम्, दोहै । अदुग्ध, अदुग्धाः, अधुग्ध्वम्, अदुग्ध[१], अधुक्षत । अधुक्षाताम्[२], अधुक्षत । अधुक्षध्वम्, अधुग्ध्वम्[३] । अदुह्वहि, अधुक्षावहि । दुदुहे, दुदुहिषे । दुदुहिढ्वे[४], दुदुहिध्वे । धुक्षीष्ट, दोग्धासे, धोक्ष्यते, अधोक्ष्यत ॥ **दिहींक् लेपे** ॥ दुहिवद्रूपाणि, प्रणिदेग्धि[५] ॥ **लिहींक् आस्वादने** ॥ लेढि[६], लीढः[७], लिहन्ति, लेक्षि[८] । लीढ । लीढे, लिक्षे, लीढ्वे । लिह्यात्, लिहीत । लेढु, लीढात्, लीढि, लेहानि । लीढाम्, लिक्ष्व । लीढ्वम् । अलेट्, ड् । अलीढ, अलिहाताम्, अलीढाः । अलिक्षत् । अलीढ, अलिक्षत । अलिक्षाताम्, अलिक्षन्त । अलीढाः, अलिक्षथाः । अलिह्वहि, अलिक्षावहि । लिलेह, लिलेहिथ । लिलिहे, लिलिहिढ्वे, लिलिहिध्वे । लिह्यात्, लिक्षीष्ट । लेढासि, लेढासे । लेक्ष्यति, लेक्ष्यते । अलेक्ष्यत्, अलेक्ष्यत ॥

**॥ इत्यदादय उभयपदिनः ॥ अदादयः समाप्ताः ।**

## ॥ अथादाद्यन्तर्गणा ह्वादयः ॥

**हुंक् दानादनयोः ॥ ह्वः शिति ।४।१।१२॥**

---

१–दुहदिहेति सको वा लुक् । २–स्वरेऽतः । ३–सको वा लुक् । ४–हान्तस्थेति वा ढः । ५–नेङ्मेति णः । ६–हो धुडिति ढत्वे अध इति चतुर्थत्वे तवर्गस्येति ढः, ढस्तड्ढे इति ढलोपः । ७–ढ-लोपदीर्घौ । ८–षढोरिति कत्वे षः ।

ह्वादयः शिति परे द्विर्भवन्ति । जुहोति,[९] जुहुतः,[१०] जुह्वति,[११] जुहोषि, जुहुथः, जुहुथ । जुहोमि, जुहुवः, जुहुमः । जुहुयात् । जुहुयुः । जुहोतु, जुहुतात् । जुहुधि,[१२] जुहवानि,[१३] अजुहोत्, अजुहुताम्, अजुहवुः,[१४] अजुहोः, अजुहुत, अजुहवम् । अहौषीत्, अहौषुः, अहौष्ट ॥

**भीह्रीभृह्वोस्तिव्वत्** ।३।४।५०॥ भी-ह्री-भृ-हु इत्येतेभ्यो धातुभ्यः परस्याः परोक्षायाः स्थाने आमादेशो वा भवति, स च तिव्वत्, आमन्ताच्च परे कृभ्वस्तयः परोक्षान्ता अनु प्रयुज्यन्ते । तिव्वद्भावाद् यथायथं द्वित्वमित्वं च । जुहवाञ्चकार ।[१५] पक्षे-जुहाव, जुहुवुः, जुहविथ, जुहोथ, हूयात्, होता, होष्यति, अहोष्यत् ॥

**ओहांक् त्यागे** ॥ जहाति ॥

**हाकः** ।४।२।१००॥ जहातेर्द्वयुक्तस्य व्यञ्जनादौ शित्यविति प्रत्यये परे अन्तस्येकारो वा भवति ॥

**एषामीर्व्यञ्जनेऽदः** ।४।३।९७॥ एषां द्वयुक्तजक्षपञ्चतश्नाप्रत्ययान्तानामाकारस्य शित्यविति व्यञ्जनादौ परत

९-नामिन इति गुणः । १०-ङित्वान्न गुणः । ११-अन्तो नो लुक्, ह्विणोरिति वः । १२-हुधुट इति धिः । १३-गुणावादेशौ । १४-द्वयुक्तजक्षेति पुसि पुस्पाविति गुणः । १५-तिव्वद्भावाद् हवः शितीति द्वित्वे गहोरिति जत्वे गुणावादेशौ । तौ मुम इत्यनुनासिकानुस्वारौ ।

ईकारो भवति, दासंज्ञं वर्जयित्वा। जहितः, जहीतः, जहति। जहिथः, जहीथः। जहिमः, जहीमः॥

**यि लुक्** ।४।२।१०२॥ यकारादौ शिति प्रत्यये परे जहातेरन्तस्य लुग् भवति। जह्यात्, जहातु, जहितात्, जहीतात्। जहतु॥

**आ च हौ** ।४।२।१०१॥ ह्रस्वस्य जहातेर्हौ परे आकार इकारश्च वा भवति। जहाहि, जहिहि, जहीहि। जहितात्, जहीतात्, जहानि। अजहात्, अजहुः। अहासीत्। जहौ, जहुः[2], जहिथ, जहाथ। जहिम। हेयात्[3]। हाता, हास्यति, अहास्यत्। ञिभींक् भये। बिभेति॥

**भियो नवा** ।४।२।९९॥ बिभेतेर्व्यञ्जनादौ शित्यविति प्रत्यये परे अन्तस्येकारो वा भवति। बिभितः, बिभीतः, बिभ्यति[4]। बिभिमः, बिभीमः। बिभियात्, बिभीयात्, बिभेतु, बिभितात्, बिभीतात्, बिभिहि, बिभीहि, बिभयानि। अबिभेत्, अबिभिताम्, अबिभीताम्, अबिभयुः, अबिभयम्, अभैषीत्, बिभयाञ्चकार। पक्षे—बिभाय, बिभ्युः, बिभयिथ, बिभेथ, बिभ्यिम, भीयात्[6], भेता, भेष्यति, अभेष्यत्॥ ह्रींक् लज्जायाम्। जिह्रेति, जिह्रियति,

१—श्नश्चात इत्यालुक्। २—इडेदित्यालुक्। ३—गापास्थेत्येः। ४—योऽनेकस्वरस्येति यः। ५—पुस्पाविति गुणः। ६—दीर्घश्च्वीति दीर्घः। ७—ङिद्वद्भावाद् गुणाप्राप्तौ संयोगादितीय्।

जिह्रीयात्, जिह्रेतु, जिह्रीतात्। जिह्रियतु, जिह्रीहि, जिह्रयाणि, अजिह्रेत्, अजिह्रयुः, अह्रैषीत्, जिह्रयाञ्चकार। पक्षे-जिह्राय, जिह्रियुः। ह्रीयात्, ह्रेता, ह्रेष्यति, अह्रेष्यत्॥ पृंक् पालनपूरणयोः॥

**पृभृमाहाङामिः** ।४।१।५८॥ पृ-ऋ-भृ-मा हाङ्-इत्येतेषां शिति परे द्वित्वे सति पूर्वस्येकारो भवति। पिपर्त्ति, पिपृतः, पिप्रति, पिपर्षि, पिपृयात्, पिपर्त्तु, पिपृतात्, पिप्रतु, पिपृहि, पिपराणि, अपिपः, अपिपरुः, अपिपः, अपिपरम्, अपार्षीत्, पपार, पप्रुः, पपर्थ, पप्रिम, प्रियात्, पर्ता, परिष्यति, अपरिष्यत्॥ पॄ इति दीर्घकारान्त इति पक्षे तु-पिपर्ति॥

**ओष्ठ्यादुर्** ।४।४।११८॥ धातोरोष्ठ्याद् वर्णात्परस्य ऋकारस्य क्ङिति प्रत्यये परे उरादेशो भवति। पिपूर्तः, पिपुरति, पिपूर्यात्, पिपूर्तात्, पिपुरतु, पिपूर्हि, पिपराणि, अपिपः, अपिपूर्ताम्, अपिपरुः, अपारीत्, पपार॥

**ऋ शॄ दॄ प्रः** ।४।४।२०॥ शॄ-दॄ-पॄ-इत्येतेषां धातूनां परोक्षायां परत ऋकारोऽन्तादेशो वा भवति। पप्रतुः,

१-ङिद्वद्भावाद् गुणाप्राप्तौ इवर्णादेरिति रः। २-नामिन इति गुणे व्यञ्जनादिति देर्लुक्, रेफस्य विसर्गः। ३-पुसि गुणः। ४-नामिन इति गुणे सेर्लुक्। ५-ऋत इति नेट्। ६-रिः शेति रिः। ७-हनृत इतीट्। ८-भ्वादेरिति दीर्घः।

पपरुः[6], पपरिथ, पप्रिम, पपरिम । पूर्यात् , परीता[7], परिता, परीष्यति, परिष्यति, अपरीष्यत्, अपरिष्यत् ॥ **ऋंक् गतौ** ॥ ईयर्ति[8], इयृतः, इयृति, इयर्षि, इयृयात् , इयर्तु, इयृतात् , इयृतु, इयृहि, इयराणि, ऐयः[9], ऐयृताम् , ऐयरुः ॥

**सर्त्यर्तेर्वा** ।३।४।६१॥ सृ–ऋ–इत्याभ्यां कर्त्तर्यद्यतन्यामङ् प्रत्ययो वा स्यात् । आरत्[10] , आरन् । पक्षे–आर्षीत् , आर्ष्टाम् , आर्षुः, आर[11], आरुः, आरिथ[12], अर्यात्[13], अर्ता, अरिष्यति, आरिष्यत् ॥

**अथात्मनेपदिनः ॥**

**ओहांक् गतौ** ॥ जिहीते[14], जिहाते[15], जिहते, जिहीषे, जिहीध्वे, जिहे, जिहीमहे । जिहीत, जिहीताम् , अजिहीत, अजिहाताम् , अजिहत, अहास्त, अहाध्वम् , अहाद्ध्वम् । जहे, जहिढ्वे, जहिध्वे, हासीष्ट, हातासे, हास्यते, अहास्यत ॥ **मांङ्क् मानशब्दयोः** ॥ मिमीते[16], मिमीत, मिमीताम् , अमिमीत, अमास्त, ममे, ममिषे, मासीष्ट, माता, मास्यते, अमास्यत ॥

---

६–स्कृच्छृत इति गुणे द्वित्वम् । ७–वृत इति वा दीर्घः । ८–द्वित्वे गुणे पूर्वस्येत्वे पूर्वस्यास्त्र इतीयादेशः । ९–इयादेशे वृद्धिः, देर्लुक् । १०–ऋवर्णेति गुणे स्वरादेरिति वृद्धिः । ११–स्कृच्छृत इति गुणे द्वित्वे अस्यादेरित्यात्वे उपान्त्यवृद्धौ समानदीर्घः । १२–ऋवृव्ये इतीट् । १३–क्ययङेति गुणः । १४–एषामीरितीः । १५–श्नश्चात इत्यालुक् । १६–ईर्व्यञ्जने ।

अथ ह्वादय उभयपदिनः ॥

डुदांग्क् दाने ॥ ददाति, दत्तः, ददति, दत्थ, दद्मः । दद्यात्, ददातु, दत्तात्, ददतु ॥

हौ दः ।४।१।३१॥ दासंज्ञकस्य धातो हौ परेऽन्तस्य एकारादेशो भवति, द्वित्वं च न भवति । देहि, दत्तात्, ददानि, अ[1]ददात् । अदत्ताम्, अद[2]दुः, अदद्म, अ[3]दात्, अ[4]दुः, ददौ, ददुः, ददिथ, ददाथ, ददिम, देया[5]त्, दाता, दास्यति, अदास्यत्, दत्ते, ददाते, ददते, दद्ध्वे, ददे । ददीत, दत्ताम्, दत्स्व, ददै, अदत्त, अददत[6], अददि ।

इश्च स्थादः ।४।३।४१॥ तिष्ठतेर्दासंज्ञाच्च धातोः पर आत्मनेपदविषयः सिच् किद्वत्स्यात्तत्संनियोगे च स्थादोरन्त्यस्येकारादेशः । अदित[7], अदिषाताम्, अदिषत, अदिथाः, अदिध्वम्, अदिड्ढ्वम्, ददे, दासीष्ट, दातासे, दास्यते, अदास्यत ॥ डुधांग्क् धारणे ॥ दधाति ॥

धागस्तथोश्च ।२।१।७८॥ दधातेश्चतुर्थान्तस्य दकारादेर्दकारस्य पदान्ते सकारादौ ध्वशब्दादौ तथयोश्च प्रत्ययेषु परेषु चतुर्थो भवति । धत्त[8]ः, दधति, धत्थ, दध्यात्,

१—श्नश्चातः, अघोषे प्रथमः । २—द्व्युक्तेति पुसि श्नश्चात इत्यालुक् । ३—पिबैतीति सिज्लुक् । ४—सिज्विद इति पुसि, सिचो लुक्यालुक् । ५—गापेत्येः । ६—अन्तो नो लुकि श्नश्चात इत्यालुक् । ७—इश्चेतीत्वे कित्वे च धुडिति सिज्लुक् । ८—द्वित्वे श्नश्चात इत्यालोपे चतुर्थेऽघोषे प्रथमः ।

दधातु, धत्तात्, धेहि, अदधात्, अधात्, दधौ, धेयात्, धाता, धास्यति, अधास्यत्। धत्ते, धद्ध्वे, दधीत, धत्ताम्, अधत्त, अधित, दधे, धासीष्ट, धातासे, धास्यते, अधास्यत। डुभृंग् क् धारणपोषणयोः॥ बिभर्त्ति, बिभृतः, बिभ्रति, बिभृयात्, बिभर्त्तु, बिभृहि, बिभराणि, अबिभः, अबिभरुः, अभार्षीत्, बिभरांचकार, बभार, बभ्रतुः, बभर्थ, बभृम। भ्रियात्, भर्त्ता, भरिष्यति, अभरिष्यत्। बिभृते, बिभ्रते, बिभ्रीत, बिभृताम्, अबिभृध्वम्, अबिभ्रि, अभृत, अभृढ्वम्, अभृड्ढ्वम्, बिभरांचक्रे, बभ्रे, बभृषे, बभृढ्वे, भृषीष्ट, भृषीढ्वम्, भर्त्तासे, भरिष्यते, अभरिष्यत॥ णिजृंकि शौचे॥

**निजां शित्येत्** ।४।१।५७॥ निज्-विज्-विषां त्रयाणां शिति द्वित्वे सति पूर्वस्य एकारादेशो भवति। पाठे धात्वादेर्णो नः। नेनेक्ति[1], नेनिजति, नेनेक्षि, नेनिज्यात्, नेनेक्तु, नेनिक्तात्, नेनिग्धि[3]॥

**द्वयुक्तोपान्त्यस्य शिति स्वरे** ।४।३।१४॥ कृतद्वित्वस्य धातोरुपान्त्यस्य नामिनः स्वरादौ शिति प्रत्यये परे गुणो न भवति। नेनिजानि, अनेनेक्, ग्। अनेनिजुः, अनेनेक्, ग्। अनेनिजम्, अनिजैत्[4],

१—र्नाम्यन्तादिति ढः। २—उपान्त्यगुणे च ज इति गेऽघोषे प्रथमः। ३—हु धुट इति धिः चज इति गः। ४—ऋदिच्छ्वीत्यङ्।

अनैक्षीत्, अनैक्ताम्, अनैक्षुः। निनेज निनेजिथ, निज्यात्, नेक्ता, नेक्ष्यति, अनेक्ष्यत्, नेनिक्ते नेनिक्षे, नेनिजीत, नेनिक्ताम्, नेनिक्ष्व, नेनिग्ध्वम्, नेनिजै, अनेनिक्त, अनेनिजि, अनिक्त, अनिक्षत, अनिक्थाः अनिक्षि, निक्षीष्ट, नेक्तासे, नेक्ष्यते, अनेक्ष्यत। **विजृंकी पृथग्भावे ॥** वेवेक्ति। निज्वत् ॥ **विष्लृंकी व्याप्तौ ॥** वेवेष्टि, वेविष्टः, वेविषति, वेविष्यात्, वेवेष्टु, वेविड्ढि[1], वेविषाणि, अवेवेट्, ड्। अविषैत्[2], विवेष, विष्यात्, वेष्टा, वेक्ष्यति[3], अवेक्ष्यत्, वेविष्टे, वेविक्षे, वेविषीत, वेविष्टाम्, वेविक्ष्वे[4], वेविषै, अवेविष्ट, अविक्षत[5], विविषे, विक्षीष्ट[6], वेष्टासे, वेक्ष्यते, अवेक्ष्यत ॥ इति ह्वादयः ॥

॥ अथ दिवादयः ॥ **दिवूच् क्रीडाजयेच्छापणद्युतिस्तुतिगतिषु ॥**

**दिवादेः श्यः ।३।४।७२॥** दिवादेर्गणात् कर्तृविहिते शिति श्यः प्रत्ययो भवति। शकारः शित्कार्यार्थः। दीव्यति[7], दिव्यन्ति[8], दीव्येत्, दीव्यतु, अदीव्यत्, अदेवीत्, दिदेव,

१—हेर्धित्वे तृतीय इति तृतीये तवर्गस्येति ढः। २—लृदिद्द्युतादिपुष्यादेः...ङ्। ३—उपान्त्यगुणे षः कः, षः। ४—षः कः, षः। ५—हशिट इति सक्, षः कः, षः। ६—सिजाशिषाविति कित्त्वाद्गुणाभावे षः कः, षः। ७—भ्वादेरिति दीर्घः। ८—लुगस्य।

दिदिवतुः दिदेविथ, दीव्यात्, देविता, देविष्यति, अदेविष्यत् ॥ जॄष् झॄष् च जरसि ॥ जी[९]र्यति, जीर्येत्, जीर्यतु, अजीर्यत्, अ[१०]जरत्, अजारीत्, जजार, जेर[११]तुः, जजरतुः, जीर्यात्, जरी[१२]ता, जरिता, जरीष्यति, जरिष्यति, अजरीष्यत्, अजरिष्यत्। अझारीत्, जझार, जझरतुः। शेषं जीर्यतिवत् ॥ शोंच् तक्षणे ॥

**ओतः श्ये ।४।२।१०३॥** धातोरोकारस्य श्ये परे लुग् भवति। श्यति, श्येत्, श्यतु, अश्यत्। अ[१३]शात्, अशासीत्। शशौ, शशिथ, शशाथ, शशिम, शायात्, शाता, शास्यति, अशास्यत् ॥ दोंं छोंच् छेदने ॥ द्यति, द्येत्, द्यतु, अद्यत्, अ[१४]दात्, ददौ, देयात्, दाता, दास्यति, अदास्यत्, छ्यति, छ्येत्, छ्यतु, अच्छ[१]्यत्, अ[२]च्छात्, अच्छासीत्, च[३]च्छौ, छायात्, छाता, छास्यति, अच्छास्यत् ॥ षोंच् अन्तकर्मणि ॥ षः सः। स्यति, स्येत्, स्यतु, अस्यत्, अ[४]सात्, असासीत्। ससौ, से[५]यात्, साता,

---

९–ऋतामितीरि भ्वादेरिति दीर्घः। १०–ऋदिच्छ्वीत्यङ्। ऋवर्णेति गुणः। ११–स्कृच्छृत इति गुणः, जॄभ्रमेति वा एः १२–वृत इति वा दीर्घः। १३–आत्सन्ध्यक्षरस्येत्याः, ट्धेघ्राशेति सिज्लुक्। पक्षे–यमिरमीतीट् सोन्तश्च। १४–दासंज्ञायां पिबैतीति सिज्लुक्।

१–स्वरेभ्य इति द्वित्वेऽघोषे प्रथमः। २–ट्धेघ्रेति वा सिज्लुक्, पक्षे यमिरमीति सोन्त इट् च। ३–आदित्याः। ४–ट्धेघ्रेति वा सिज्लुक्। ५–गापेत्येः।

सास्यति, असास्यत् ॥ **नृतैच् नर्त्तने** ॥ नृत्यति, नृत्येत्, नृत्यतु, अनृत्यत्, अनर्तीत्, ननर्त्त, ननृततुः, नृत्यात्, नर्तिता ॥

**कृतचृतनृतच्छृदतृदोऽसिचः सादेर्वा** ।४।४।५०॥ कृत्–चृत्–नृत्–छृद्–तृद्–एभ्यः परस्य सिज्वर्जितस्य सकारादेः स्ताद्यशितः प्रत्ययस्यादिरिड् वा भवति। नर्तिष्यति, नर्त्स्यति, अनर्तिष्यत्, अनर्त्स्यत् ॥ **कुथच् पूतीभावे**[६] ॥ कुथ्यति, कुथ्येत्, कुथ्यतु, अकुथ्यत्, अकोथीत्, चुकोथ, कुथ्यात्, कोथिता, कोथिष्यति, अकोथिष्यत् ॥ **व्यधंच् ताडने** ॥

**ज्यावधः क्ङिति** ।४।१।८१॥ जिनाते र्विध्यतेश्च सस्वरान्तस्था किति ङिति च प्रत्यये परे य्वृद् भवति। विध्यति, विध्येत्, विध्यतु, अविध्यत्, अव्यात्सीत्, अव्याद्धाम्, विव्याध, विविधतुः, विव्यधिथ, विव्यद्ध, विध्यात्, व्यद्धा, व्यत्स्यति, अव्यत्स्यत् ॥ **षिवूच् उतौ** ॥ षः सः। सीव्यति, सीव्येत्, सीव्यतु, असीव्यत्, असेवीत्, सिषेव, सीव्यात्, सेविता, सेविष्यति, असेविष्यत् ॥

---

६–पूतीभावो दौर्गन्ध्यम्। ७–वेध इत्यर्थः। ८–व्यञ्जनानामिति वृद्धिः, अघोषे प्रथमः। ९–ज्याव्यध इतीः पूर्वस्य। १०–ज्यावध इति य्वृति द्वित्वम्। ११–अध इति धः, तृतीयः।

**ष्ठिवू क्षिवूच् निरसने** ॥ निरसनमत्र थूत्कारादिरूपेणेति ध्येयम् ॥

**ष्ठिवूक्लम्वाचमः** ।४।२।११०॥ ष्ठिवेः क्लमेराङ्पूर्वस्य च चमेः शिति परे दीर्घो भवति अत्यादौ । ष्ठीव्यति[12], ष्ठीव्येत्, ष्ठीव्यतु, अष्ठीव्यत्, अष्ठेवीत् ॥

**तिर्वा ष्ठिवः** ।४।१।४३॥ ष्ठिवे र्द्वित्वे सति पूर्वस्य द्वितीयस्य तिरादेशो वा भवति । तिष्ठेव[13], टिष्ठेव, ष्ठीव्यात्, ष्ठेविता, ष्ठेविष्यति, अष्ठेविष्यत् ॥ **त्रसैच् भये** ॥ त्रस्यति[14], त्रसति त्रस्येत्, त्रसेत्, त्रस्यतु, त्रसतु, अत्रस्यत्, अत्रसत्, अत्रासीत्[1], अत्रसीत्, तत्रास, त्रेसतुः[2], तत्रसतुः, त्रस्यात्, त्रसिता, त्रसिष्यति, अत्रसिष्यत् ॥ अथ पुषादयः । **पुषंच् पुष्टौ** ॥ पुष्यति, पुष्येत्, पुष्यतु, अपुष्यत्, अपुषत्[3], पुपोष, पुपोषिथ, पुष्यात्, पोष्टा, पोक्ष्यति[4], अपोक्ष्यत्, ॥ **शुषंच् शोषणे** ॥ **दुषंच् वैकृत्ये** ॥ **ञितृषंच् पिपासायाम्** ॥ **तुषं हृषं च तुष्टौ** ॥ **रुषंच् रोषे** ॥ पुष्यतिवद् रूपाणि ॥ **क्लिदौच् आर्द्रीभावे** ॥ क्लिद्यति, क्लिद्येत्,

---

१२–अष्ट्यै ष्ठिव इत्युक्तेर्न सः । १३–अघोषे शिटः इति प्रथमस्यैव लोपः । उपान्त्यगुणः । १४–भ्राशभ्लाशेति वा श्यः । पक्षे शव् ।

१–व्यञ्जनादेर्वेति वा वृद्धिः । २–जॄभ्रमेति वा एः, द्वित्वाभावश्च । ३–लृदिदित्यङ् । ४–षः कः, षः ।

क्लिद्यतु, अक्लिद्यत्, अक्लिदत्, चिक्लेद, क्लिद्यात्, क्लेदिता[5], क्लेत्ता, क्लेदिष्यति, क्लेत्स्यति, अक्लेदिष्यत्, अक्लेत्स्यत् ॥ ञिमिदांच् स्नेहने ॥

मिदः श्ये ।४।३।५॥ मिदेरुपान्त्यस्य श्ये परे गुणो भवति । मेद्यति, मेद्येत्, मेद्यतु, अमेद्यत्, अमिदत्, मिमेद, मिद्यात्, मेत्ता[6], मेत्स्यति, अमेत्स्यत् ॥ क्षुधंच् बुभुक्षायाम् ॥ चुक्षोध[7], क्षुध्यात्, क्षोद्धा, क्षोत्स्यति, अक्षोत्स्यत्, । शेषं पुष्यतिवत्, ॥ शुधं च शौचे ॥ शुशोध । शेषं क्षुध्यतिवत् ॥ *क्रुधं च कोपे ॥ चुक्रोध । शेषं शुध्यतिवत् ॥ तृपौच्* प्रीतौ ॥ अतर्पीत्[10], अत्राप्सीत्[11], अतार्प्सीत्, अतृपत्[12] । अत्राप्ताम्, अतार्प्ताम्[13], अत्राप्सुः, ततर्प, ततर्पिथ, तृप्यात्, तर्पिता, त्रप्ता, तर्प्ता, तर्पिष्यति, त्रप्स्यति, तर्प्स्यति, अतर्पिष्यत्, अत्रप्स्यत्, अतर्प्स्यत् ॥ दृपौच् हर्षमोहनयोः ॥

तृप्यतिवद्रूपाणि ॥ लुभच् गार्ध्ये ॥ लोभिता[14], लोब्धा, लोभिष्यति, अलोभिष्यत् ॥ क्षुभच् संचलने ॥ चुक्षोभ । शेषं लुभ्यतिवत् ॥ नशौच् अदर्शने ।

---

५–धूगौदित इति वेट् । ६–उपान्त्यगुणेऽघोषे प्रथमः । ७–अनादिव्यञ्जनलोपे कङश्चञ । ८–उपान्त्यगुणे अध इति चतुर्थे तृतीयः । ९–उपान्त्यगुणेऽघोषे प्रथमः । १०–स्पृशमृशेति वा सिचि धूगौदित इति वेट् ।११–इड्विकल्पे स्पृशादीत्यः, व्यञ्जनानामिति वृद्धिः । अविकल्पे वृद्धिः । १२–लृदिदित्यङ् । १३–इड्विकल्पे व्यञ्जनानामिति वृद्धौ धुड्ह्रस्वादिति सिज्लुक् । १४–सहलुभेच्छेति वेट् ।

**नशः शः** ।२।३।३८।। अदुरुपसर्गान्तःस्थाद् रषृवर्णात्परस्य नशेः शकारान्तस्य सम्बन्धिनो नस्य णो भवति । प्रणश्यति । शः किम् ? प्रनङ्क्ष्यति । प्रनष्टः । नश्येत्, नश्यतु, अनश्यत् ॥

**नशेर्नेश् वाऽङि** ।४।१।१०२।। नशेरङि परे नेश् इत्ययमादेशो वा भवति । अनेशत्, अनशत्[1], ननाश, नेशतुः, नेशिथ, नश्यात्, नशिता[2] ॥

**नशो धुटि** ।४।४।११०।। नश्यतेः स्वरात्परो धुडादौ प्रत्यये परे नोन्तो भवति । नंष्टा, नशिष्यति, नङ्क्ष्यति[3], अनशिष्यत्, अनङ्क्ष्यत् ॥ **श्लिषंच् आलिङ्गने** ॥ श्लिष्यति, श्लिष्येत्, श्लिष्यतु, अश्लिष्यत् ॥

**श्लिषः** ।३।४।५६।। श्लिषो धातोरनिटोऽद्यतन्यां सक् प्रत्ययो भवति । अङ्पवादः । अश्लिक्षत्, अश्लिक्षन्[4] ॥

**नाऽसत्वाश्लेषे** ।३।४।५७।। श्लिषो धातोरप्राण्याश्लेषे वर्त्तमानात्सक् प्रत्ययो न भवति । उपाश्लिषज्जतु[5] च काष्ठं च । शिश्लेष, श्लिष्यात्, श्लेष्टा, श्लेक्ष्यति, अश्लेक्ष्यत् ॥ **असूच् क्षेपणे** ॥ अस्यति, अस्येत्, अस्यतु,

---

१–लृदिदित्यङ् । २–औदित्वाद्वेट् । ३–यजसृजेति षः । षढोरिति कः, म्नामिति पञ्चमः, नाम्यन्तस्थेति षः । ४–स्वरेऽतः । ५–लृदिदित्यङ् ।

आस्यत्, आस्थत्[6], आस[7], अस्यात्, असिता, असिष्यति, आसिष्यत् ॥

**अथ शमसप्तकम् । शमूदमूच् उपशमे ॥ तमूच् काङ्क्षायाम् ॥ श्रमूच् खेदतपसोः ॥ भ्रमूच् अनवस्थाने ॥ क्षमौच् सहने ॥ मदैच् हर्षे ॥**

**शमसप्तकस्य श्ये ।४।२।१११॥** शमादीनां मदैच्पर्यन्तानां सप्तानां श्ये परे दीर्घो भवति । शाम्यति, शाम्येत्, शाम्यतु, अशाम्यत्, अशमत्, शशाम, शेमुः, शेमिथ, शम्यात्, शमिता, शमिष्यति, अशमिष्यत् । दमितम्योः शमिवद् रूपाणि । शश्राम, शश्रमतुः, शश्रमिथ । शेषं शमिवदेव । भ्राम्यति[8], भ्रमति, भ्राम्येत्, भ्रमेत्, भ्राम्यतु, भ्रमतु, अभ्राम्यत्, अभ्रमत्, अभ्रमीत्[9], बभ्राम, भ्रेमतुः[10], बभ्रमतुः, शेषं शमिवत् । चक्षामे[13], चक्षमतुः, चक्षमिथ, क्षमिता[11], क्षन्ता[12], क्षमिष्यति, क्षंस्यति, अक्षमिष्यत्, अक्षंस्यत् । शेषं शमिवत् । माद्यति । शेषं शमिवत् । ॥ **मुहौच् वैचित्र्ये ॥** मुह्यति, मुह्येत् मुह्यतु,

---

६–शास्त्यसू इत्यङ्, श्वयत्यसू इत्यस्थादेशः, लुगस्येत्यलुक्, स्वरादेरिति वृद्धिः । ७–अस्यादेरित्यात्वे समानदीर्घः । ८–भ्राशम्लाशेति वा श्यः । ९–लृदिदित्यङ्, म्वादेस्त्वभ्रमीदिति । १०–जृभ्रमेति वा एः । ११–औदित्त्वाद्वेट् । १२–पक्षे म्नामिति पञ्चमः । १३–शिड्हे इत्यनुस्वारः ।

अमुह्यत्, अमुहत्, मुमोह, मुमुहतुः, मुमोहिथ, मुह्यात्, मोहिता, मोग्धा, मोढा, मोहिष्यति, मोक्ष्यति, अमोहिष्यत्, अमोक्ष्यत् ॥ द्रुहौच् जिघांसायाम् ॥ द्रोहिता, द्रोग्धा, द्रोढा, द्रोहिष्यति, ध्रोक्ष्यति, अद्रोहिष्यत्, अध्रोक्ष्यत्, शेषं मुह्यतिवत् । ॥ ष्णिहौच् प्रीतौ ॥ सिष्णेह, स्नेहिता, स्नेग्धा, स्नेढा, स्नेहिष्यति, स्नेक्ष्यति ॥ शेषं द्रुह्यतिवत् । इति पुषादयः । अथात्मनेपदिनः । ॥ पदिंच् गतौ ॥ पद्यते, पद्येत, पद्यताम्, अपद्यत ॥

**ञिच् ते पदस्तलुक् च ।३।४।६६॥** पदिंच् गताविस्यस्माद्धातोः कर्त्तर्यद्यतन्यास्ते परे ञिच् प्रत्ययो भवति निमित्तभूतस्य तप्रत्ययस्य लुक् च । अपादि, अपत्साताम्, अपत्सत, अपत्थाः, अपद्ध्वम्, अपद्द्ध्वम्, पेदे, पत्सीष्ट, पत्तासे, पत्स्यते, अपत्स्यत ॥ युधिंच् संप्रहारे ॥ अयुद्ध, अयुत्साताम्, अयुद्ध्वम्, अयुद्द्ध्वम्, युयुधे, योद्धासे, योत्स्यते, अयोत्स्यत ॥ बुधिंच्

---

१–औदित्त्वाद्वेट्, पक्षे वा द्रुहेति घत्वे अध इति चतुर्थे तृतीयः, घत्व विकल्पे ढत्वे चतुर्थे टवर्गे ढस्तड्ढ इति ढलोपः । २–इड्विकल्पे घत्वेऽघोष इति प्रथमे षत्वे, घत्वविकल्पे च ढत्वे कत्वे षत्वे च तुल्यं रूपम् । ३–पूर्ववत्प्रक्रिया । ४–इड्विकल्पे घत्वे पक्षे ढत्वे च गडदबादेरिति चतुर्थः । शेषप्रक्रिया पूर्ववत् । ५–नाम्यन्तस्थेति षत्वे णत्वम् । ६–ञिणतीति वृद्धिः । ७–धुड्ह्रस्वादिति सिज्लोपे अध इति चतुर्थे तृतीयः, सिजाशिषाविति कित्त्वान्न गुणः ।

**मनिँच् ज्ञाने** ॥ अबोधि[8], अबुद्ध[9], अभुत्साताम्[10], अबुद्धाः, अभुद्ध्वम्, अभुद्द्ध्वम्, बुबुधे, भुत्सीष्ट, बोद्धासे, भोत्स्यते, अभोत्स्यत ॥ शेषं युधिवत् । अमंस्त[11] अमंसाताम्, अमन्द्ध्वम्, अमन्द्ध्वम्, मेने, मंसीष्ट, मन्ता, मंस्यते, अमंस्यत ॥ ॥ **जनैँचि प्रादुर्भावे** ॥

**जा ज्ञाजनोऽत्यादौ** ।४।२।१०४॥ ज्ञाजन् इत्येतयोः शिति प्रत्यये परे जा इत्ययमादेशो भवति । तिवादिश्चे-दनन्तरो न भवति । जायते, जायेत, जायताम्, अजायत ॥

**न जनबधः** ।४।३।५४॥ जन् बध्योः ञ्णिति कृति ञौ परे च वृद्धिर्न भवति । अजनि[12], अजनिष्ट, अजनिषत, अजनिष्ठाः, जज्ञे[1], जनिषीष्ट, जनिता, जनिष्यते, अजनिष्यत ॥ **दीपैँचि दीप्तौ** ॥ दीप्यते, दीप्येत, दीप्यताम्, अदीप्यत, अदीपि, अदीपिष्ट, दिदीपे, दीपिषीष्ट, दीपितासे, दीपिष्यते, अदीपिष्यत ॥ इति आत्मनेपदिनः ॥

**अथ दिवादय उभयपदिनः** ॥ **णहीँच् बन्धने** ॥ पाठे धात्वादेर्णो नः । नह्यति, नह्यते, नह्येत्, नह्येत,

---

८–दीपजनेति ञिच् । ९–ञिविकल्पे अयुद्धेतिवत्प्रक्रिया । १०–गड-दबादेरिति चतुर्थेऽघोषे प्रथमः । ११–शिड्हेऽनुस्वारः । १२–दीपजन इति ञिच्, ञ्णितीति वृद्धिप्राप्तिः, तन्निषेधः ।

१–गमहनेत्युपान्त्यलोपः, चवर्गः ।

नह्यतु, नह्यताम्, अनह्यत्, अनह्यत। अनात्सीत्[२], अनाद्धाम्[३], अनद्ध, अनत्साताम्, ननाह, नेहतुः, नेहिथ, ननद्ध, नेहे, नेहिढ्वे, नेहिध्वे, नह्यात्, नत्सीष्ट, नद्धासि, नद्धासे, नत्स्यति, नत्स्यते, अनत्स्यत्, अनत्स्यत इति दिवादयः ॥

## ॥ अथ स्वादयः ॥

॥ षुंगट् अभिषवे ॥ १ः सः ॥

**स्वादेः श्नुः ।३।४।७५॥** स्वादेर्गणात् कर्त्तरि विहिते शिति श्नुः प्रत्ययो भवति। सुनोति[४], सुनुतः, सुन्वन्ति[५], सुनोषि, सुनोमि ॥

**वम्यविति वा ।४।२।८७॥** असंयोगात्परो य उकारस्तस्य प्रत्ययसम्बन्धिनो लुग् वा भवति वकारादौ मकारादौ चाविति प्रत्यये। सुन्वः, सुनुवः, सुन्मः, सुनुमः, सुनुयात्, सुनोतु, सुनुतात्, सुनु[६], सुनवानि, असुनोत्, असावीत्[७], सुषाव, सुषविथ, सुषोथ, सूयात्, सोता, सोष्यति, असोष्यत्, सुनुते, सुन्वते, सुन्वीत, सुनुताम्, असुनुत, असुन्वहि, असुनुवहि, असोष्ट, असोढ्वम्,

२—व्यञ्जनानामिति वृद्धिः, नहाहेरिति धः । अघोषे प्रथमः । ३—वृद्धौ धुड्ह्रस्वादिति सिज्लुकि अध इति चतुर्थे तृतीयः । ४—श्नोर्ङित्वाद्धातोर्न गुणः, उश्नोरिति गुणः । ५—उभयोः प्रत्यययो ङित्वात् गुणाभावे इवर्णादेरिति यः । ६—असंयोगादिति हेर्लुक् । ७—धूग्सुस्तोरितीट्, सिचि परस्मै इति वृद्धिः ।

असोड्ढ्वम्, सुषुवे, सुषुविढ्वे, सुषुविध्वे, सुषुविमहे, सोषीष्ट, सोषीढ्वम्, सोतासे, सोष्यते, असोष्यत ॥

**उपसर्गात्सुग्सुवस्तुस्तुभोऽट्यप्यद्वित्वे** ।२।३।३९॥ द्विर्वचनाभावे सति सुनोति सुवति स्तौति स्तोभतीनां सकारस्योपसर्गस्थान्नाम्यन्तस्थाकवर्गात्परस्य षो भवति अडागमेऽपि सति शिड्नान्तरेऽपि ॥ अभिषुणोति[८], निःषुणोति[९], अभ्यषुणोत् ॥ **चिंगट् चयने** ॥ चिनोति, चिनुते, चिनुयात्, चिन्वीत, चिनोतु, चिनुताम्, अचिनोत्, अचिनुत, अचैषीत्[१], अचेष्ट, अचेढ्वम्, अचेड्ढ्वम् ॥ **चेः किर्वा** ।४।१।३६॥ चिनोतेः सन्परोक्षयोर्द्वित्वे सति पूर्वस्मात्परस्य किरादेशो वा भवति। चिकाय, चिचाय, चिक्यतुः[२], चिच्यतुः, चिकयिथ, चिकेथ, चिचयिथ, चिचेथ, चिक्ये, चिच्ये, चिक्यिढ्वे[३], चिक्यिध्वे, चिच्यिढ्वे, चिच्यिध्वे, चीयात्, चेषीष्ट, चेतासि, चेतासे, चेष्यति, चेष्यते, अचेष्यत्, अचेष्यत ॥ **धूगट् कम्पने** ॥ अधावीत्[४], अधविष्ट, अधोष्ट, अधविढ्वम्, अधविध्वम्, अधविड्ढ्वम्, अधोढ्वम्, अधोड्ढ्वम्, धवितासि, धोतासि, धवितासे, धोतासे, धविष्यते, धोष्यते, अधविष्यत्, अधोष्यत्,

---

८-षत्वे रषृवर्णादिति णः । ९-शिड्व्यवधानेऽपि षः ।

१-सिचि परस्मै इति वृद्धिः । २-क्त्वादगुणाभावे योऽनेकस्वरस्येति यः । ३-हान्तस्थेति वा ढः । ४-धूगसुस्तोरितीट्, सिचि परस्मै इति वृद्धिः ।

अधविष्यत, अधोष्यत ॥ **स्तृंगट् आच्छादने** ॥ अस्तार्षीत्, अस्तार्ष्टाम् ॥

**संयोगादृतः** ।४।४।३७॥ धातोः संयोगात्परो य ऋकारस्तदन्ताद् धातोः परयोरात्मनेपद विषययोः सिजाशिषोरादिरिड् वा भवति। अस्तरिष्ट, अस्तृत, अस्तरिषाताम्, अस्तृषाताम्, तस्तार, तस्तरतुः, तस्तर्थ, तस्तरे, तस्तरिढ्वे, तस्तरिध्वे, स्तर्यात्, स्तरिषीष्ट, स्तृषीष्ट, स्तरिषीढ्वम्, स्तरिषीध्वम्, स्तृषीढ्वम्, स्तर्तासि, स्तर्तासे, स्तरिष्यति, स्तरिष्यते, अस्तरिष्यत्, अस्तरीष्यित ॥ **वृगट् वरणे** ॥ अवारीत् ॥

**इट् सिजाशिषोरात्मने** ।४।४।३६॥ वृभ्यामृदन्तेभ्यश्च परयोरात्मनेपदविषययोः सिजाशिषोरादिरिड् वा भवति। अवरीष्ट, अवरिष्ट, अवृत, अवरीढ्वम्, अवरीध्वम् अवरीड्ढ्वम् । एवं दीर्घविकल्पेऽपि । अवृढ्वम्, अवृड्ढ्वम्, ववार, वव्रतुः ववरिथ, वव्रे, वव्रिढ्वे, वव्रिध्वे, वरिषीष्ट, वृषीष्ट, वरिषीढ्वम्, वरिषीध्वम्, वृषीढ्वम्[१२] ।

---

५–सिचि परस्मै इति वृद्धिः, नाम्यन्तस्थेति षः । ६–इड्विकल्पे ऋवर्णादिति कित्त्वाद् गुणाभावे धुड्ह्रस्वादिति सिज्लुक् । ७–स्कृच्छ्रृ इति गुणे ञ्णितीति वृद्धिः । ८–क्ययङाशीरिति गुणः । ९–ऋवर्णादिति कित्त्वान्न गुणः । १०–हन्ऋत इतीट् । ११–वृतो नवेति वा दीर्घः १२–नाम्यन्तादिति ढः । सिजाशिषाविति कित्त्वान्न गुणः ।

वरीता, वरिता, वरीतासे, वरितासे, वरीष्यति, वरिष्यति, वरीष्यते, वरिष्यते, अवरीष्यत्, अवरिष्यत्, अवरीष्यत, अवरिष्यत ॥ अथ परस्मैपदिनः ॥ **हिंट् गतिवृद्ध्योः ।** प्र[1]हिणोति, हिनुयात्, हिनोतु, अहिनोत्, अहैषीत्, जिघा[2]य, जिघ्यतुः, हीयात्, हेता, हेष्यति, अहेष्यत् ॥ **श्रुंट् श्रवणे ॥** शृ[3]णोति, शृणुयात्, शृणोतु, अशृणोत्, अश्रौषीत्, शुश्राव, शुश्रोथ[4], शुश्रुम, श्रूयात्, श्रोता, श्रोष्यति, अश्रोष्यत् ॥ **शक्लृंट् शक्तौ ॥** शक्नोति, शक्नु[5]वन्ति, शक्नुयात्, शक्नोतु, शक्नुहि, अशक्नोत्, अशक[6]त्, शशाक, शेकतुः, शेकिथ, शशक्थ, शक्यात्, शक्ता, शक्ष्यति, अशक्ष्यत् ॥ **आप्लृंट् व्याप्तौ ॥** आप्नोति, आप्नुयात्, आप्नोतु, आप्नुहि, आप्नोत्, आपत्, आप, आपुः, आपिथ, आपिम, आप्यात्, आप्ता, आप्स्यति, आप्स्यत् । अथात्मनेपदी ॥ **अशौटि व्याप्तौ ॥** अश्नुते, अ[7]श्नुवीत, अश्नुताम्, आश्नुत । आ[8]शिष्ट, आशिषाताम् । पक्षे–आष्ट, आक्षाताम्[9], आड्ढ्वम् आड्ड्ढवम्, आ[10]नशे, आ[11]शिषीष्ट, आक्षीष्ट, आशिता, आष्टा, आशिष्यते,

---

१–अदुरुपसर्गान्तर इति णः । २–अङे हिहन इति घः । ३–श्रौति कृग्विति शृः, णत्वम् । ४–स्क्रसिति पर्युदासान्नेट् । ५–श्नुश्नोरित्युव् । ६–लृदिदित्यङ् । ७–श्नुश्नोरित्युव् । ८–औदित्त्वाद्वेट्, विकल्पे तु सिज्लुकि षत्वे टवर्गः । ९–इड्विकल्पे षः कः, षः । १०–अनात इत्यात्वं नोन्तश्च । ११–इड्विकल्पे षः कः, षः ।

आक्ष्यते, आशिष्यत, आक्ष्यत ॥ इति स्वादयः ॥

॥ अथ तुदादयः ॥

॥ तुदींत् व्यथने ॥ तुदादेः शः ।३।४।८१॥ तुदादेर्गणात् कर्त्तरि विहिते शिति शः प्रत्ययो भवति। तुदति[12], तुदेत्, तुदतु, अतुदत्, अतौत्सीत्[13], अतौत्ताम्[14], तुतोद, तुतुदुः, तुतोदिथ, तुद्यात्, तोत्ता, तोत्स्यति, अतोत्स्यत्। तुदते, तुदेत, तुदताम्, अतुदत्, अतुत्त[15], अतुत्साताम्, अतुद्ध्वम्, अतुदद्ध्वम्, तुतुदे, तुत्सीष्ट, तोत्तासे, तोत्स्यते, अतोत्स्यत ॥ भ्रस्जींत् पाके ॥

ग्रहव्रश्चभ्रस्जप्रच्छः ।४।१।८४॥ ग्रह्-व्रश्च्-भ्रस्ज्-प्रच्छ्-एषां धातूनां सस्वरान्तस्था क्ङिति प्रत्यये परे य्वृद् भवति। भृज्जति[1], भृज्जेत्, भृज्जतु, अभृज्जत् ॥

भृज्जो भर्ज् ।४।४।६॥ भृज्जतेरशिति प्रत्यये भर्ज् इत्ययमादेशो वा भवति। अभार्क्षीत्[2], अभार्ष्टाम्[3], अभार्क्षुः, अभ्राक्षीत्[4], अभ्राष्टाम्[5], अभ्राक्षुः, बभर्ज, बभ्रज्ज, बभर्जतुः,

---

१२-अविच्छितो ङित्वान्न गुणः। १३-व्यञ्जनानामिति वृद्धिः, अघोषे प्रथमः। १४-वृद्धौ धुड्ह्रस्वादिति सिज्लुकि अघोषे प्रथमः। १५-सिजाशिषाविति कित्वाद्गुणाभावे सिज्लुकि अघोषे प्रथमः।

१-सस्य शषाविति शः, तृतीय इति तृतीयः, २-व्यञ्जनानामिति वृद्धिः, यजसृजेति षः, कः, षः। ३-धुड्ह्रस्वादिति सिज्लुकि यजसृजेति षः, टवर्गः। ४-संयोगस्यादाविति सलोपे षः कः षः। ५-सिज्लुकि संयोगस्येति सलोपे यजसृजेति षः। टवर्गः।

बभ्रज्जतुः बभर्जिथ बभर्ष्ठ[६], बभ्रज्जिथ[७], बभ्रष्ठ, भर्ज्यात्, भृज्ज्यात्, भ्रष्टासि, भर्ष्टासि, भ्रक्ष्यति[८], भर्क्ष्यति[९], अभर्क्ष्यत्, अभ्रक्ष्यत्। भृज्जते, भृज्जेत, भृज्जताम्, अभृज्जत, अभर्ष्ट[१०] अभ्रष्ट[११], अभर्क्षाताम्, अभ्रक्षाताम्, बभर्जे, बभ्रज्जे, भर्क्षीष्ट, भ्रक्षीष्ट, भर्ष्टासे, भ्रष्टासे, भर्क्ष्यते, भ्रक्ष्यते, अभर्क्ष्यत, अभ्रक्ष्यत। ॥ **क्षिपींत् प्रेरणे** ॥ क्षिपति, क्षिपते, क्षिपेत्, क्षिपेत, क्षिपतु, क्षिपताम्, अक्षिपत्, अक्षिपत, अक्षैप्सीत्, अक्षैप्ताम्, अक्षिप्त, अक्षिप्साताम्, चिक्षेप, चिक्षिपे, क्षिप्यात्, क्षिप्सीष्ट, क्षेप्तासि, क्षेप्तासे, क्षेप्स्यति, क्षेप्स्यते, अक्षेप्स्यत्, अक्षेप्स्यत ॥ **दिशींत् अतिसर्जने** ॥ अतिसर्जनं दानमिति वदन्ति। दिशति, दिशते, दिशेत्, दिशेत, दिशतु, दिशताम्, अदिशत्, अदिशत, अदिक्षत्[१२], अदिक्षत, दिदेश, दिदिशे, देष्टासि, देष्टासे, देक्ष्यति[१३], देक्ष्यते, अदेक्ष्यत्, अदेक्ष्यत ॥ **कृषींत् विलेखने** ॥ कृषति, कृषते, कृषेत्, कृषेत, कृषतु, कृषताम्, अकृषत्, अकृषत, अक्राक्षीत्, अकार्क्षीत्,

---

६–संयोगादिलोपे यजसृजेति षः, टवर्गः। ७–सृजिदृशीति वेट् सस्य शषाविति शः, तृतीय इति तृतीयः। ८–संयोगस्येति सलोपे षः, टवर्गः। ९–संयोगस्येति सलोपे षः कः षः। १०–धुड्ह्रस्वादिति सिज्लुकि षः, टवर्गः। ११–संयोगस्येति सलोपे षः टवर्गः। १२–हशिट इति सक्, यजसृजेति षः, कः, षः। १३–यजसृजेति षः। कः। षः।

अकृक्षत्, अकृष्ट[14], अकृक्षत, अकृक्षाताम्[15], चकर्ष, चकृषे, कृष्यात्, कृक्षीष्ट, क्रष्टासि[16], कर्ष्टासि, क्रष्टासे, कर्ष्टासे, क्रक्ष्यति, कर्क्ष्यति, क्रक्ष्यते, कर्क्ष्यते, अक्रक्ष्यत्, अकर्क्ष्यत्, अक्रक्ष्यत, अकर्क्ष्यत ॥ **मुच्लृंती मोक्षणे** ॥

**मुचादितृफदृफगुफशुभो-भः शे** ।४।४।१००॥ मुचादीनां तृफ्-दृफ्-शुभ् गुफ्-उभ्-इत्येषां च स्वरान्नोऽन्तो भवति शे परे । मुञ्चति, मुञ्चते[1], मुञ्चेत्, मुञ्चेत, मुञ्चतु, मुञ्चताम्, अमुञ्चत्, अमुञ्चत, अमुचत्, अमुक्त[2], अमुक्षाताम्[3], मुमोच, मुमुचे, मुच्यात्, मुक्षीष्ट, मोक्तासि, मोक्तासे, मोक्ष्यति, मोक्ष्यते, अमोक्ष्यत्, अमोक्ष्यत ॥ **षिचींत् क्षरणे** ॥ षः सः । सिञ्चति, सिञ्चते, सिञ्चेत्, सिञ्चेत, सिञ्चतु, सिञ्चताम्, असिञ्चत्, असिञ्चत, असिचत्[4], असिचत, असिक्त, असिक्षाताम्, सिषेच, सिषिचे, सिच्यात्, सिक्षीष्ट, सेक्तासि, सेक्तासे, सेक्ष्यति, सेक्ष्यते, असेक्ष्यत्, असेक्ष्यत ॥ **विद्लृंती लाभे** ॥ विन्दति, विन्दते, विन्देत्, विन्देत, विन्दतु, विन्दताम्,

---

१४–सिचः कित्वान्नगुणः, धुडिति सिज्लोपः । १५–स्वरेऽत इत्यलुक् ॥ १६–स्पृशादीत्यः ।

१–म्नामिति पञ्चमः । २–सिजाशिषाविति कित्वाद्गुणाभावः । धुडिति सिज्लुक्, चज इति कः । ३–कित्वाद्गुणाभावे चज इति कः, षः । ४–हृवालिप्सिच इत्यङ् । आत्मनेपदे तु वात्मने इत्यङ् ।

अविन्दत्, अविन्दत। अविदंत्, अवित्त, अवित्साताम्, विवेद, विविदे, विद्यात्, वित्सीष्ट, वेत्तासि, वेत्तासे, वेत्स्यति, वेत्स्यते, अवेत्स्यत्, अवेत्स्यत ॥ लुप्लृंती छेदने ॥ लुम्पति, लुम्पते, अलुपत्, अलुप्त, लोप्तासि, लोप्तासे ॥ लिपींत् उपदेहे ॥ उपदेहनं विलेपनम्। अलिपत्, अलिपत, अलिप्त, अलिप्साताम्, शेषं लुम्पतिवत् ॥ कृतैत् छेदने ॥ कृन्तति, कृन्तेत्, कृन्ततु, अकृन्तत्, अकर्त्तीत्, चकर्त्त, कृत्यात्, कर्तिता, कर्तिष्यति[10], कर्त्स्यति, अकर्तिष्यत्, अकर्त्स्यत् ॥ खिदंत् परिघाते ॥ परिघातो दैन्यम्। खिन्दति, अखैत्सीत्[11], अखैत्ताम्[12], चिखेद, खेत्ता, खेत्स्यति, अखेत्स्यत् ॥ पिशत् अवयवे ॥ पिंशति[13], अपेशीत्, पिपेश, पेशिता, ॥ त्रयः परस्मैपदिनः ॥ अष्टौ मुचादयः ॥ मृंत् प्राणत्यागे ॥

**म्रियतेरद्यतन्याशिषि च ।३।३।४२॥** म्रियतेरद्यतन्याशीर्विषयात् शिद्विषयाच्च कर्त्तर्यात्मनेपदं भवति। म्रियते[14], म्रियेत, म्रियताम्, अम्रियत, अमृत[15], अमृषाताम्, ममार,

५—लृदित्वादङ्। ६—कित्त्वाद् गुणाभावे धुडिति सिज्लुकि अघोषे प्रथमः। ७—म्नामिति पञ्चमः। ८—ह्वालिप्सिच इत्यङ्। आत्मनेपदे वात्मने इति वाऽङ्। ९—म्नामिति पञ्चमः, बहुवचनसामर्थ्याच्च न णः। १०—कृतछृदेति वेट्। ११—व्यञ्जनानामिति वृद्धिः। १२—वृद्धौ धुडिति सिज्लुक्। १३—शिड्हे इत्यनुस्वारः। १४—रिः शक्येति रिः। संयोगादितीय्। १५—ऋवर्णादिति कित्वान्नगुणः, धुड्ह्रस्वादिति सिज्लुक्।

मम्रतुः, ममर्थ, मम्रिव, मृषीष्ट, मर्त्तासि, मरिष्यति, अमरिष्यत् ॥ कॄन् विक्षेपे। किरति[16], किरेत्, किरतु, अकिरत्, अकारीत्, चकार, चकरतुः[1], चकरिथ, कीर्यात्[2], करीता[3], करिता, करीष्यति, करिष्यति ॥ गॄत् निगरणे ॥

नवा स्वरे ।२।३।१०२॥ गिरते रेफस्य स्वरादौ प्रत्यये विहितस्य लकारो वा भवति। गिलति[4], गिरति, अगालीत्[5], अगारीत्, जगाल, जगार, जगरतुः[6], जगलतुः, गीर्यात्[7], गलीता[8], गलिता, गरीता, गरिता, ॥ ओव्रश्चौत् छेदने ॥ वृश्चति[9], अव्रश्चीत्, अव्राक्षीत्[10], अव्राष्टाम्[11], अव्राक्षुः। वव्रश्च, वव्रश्चिथ[12], वृश्च्यात्, व्रश्चिता, व्रष्टा[13], अव्रश्चिष्यत्, अव्रक्ष्यत्[14] ॥ प्रच्छंत् ज्ञीप्सायाम् ॥ ज्ञीप्सा पृच्छा। पृच्छति[15] ॥

अनुनासिके च च्छ्वः शूट्। ४।१।१०८ ॥

---

१६–ऋतामितीर्।

१–स्कृच्छृत इति गुणः। २–ऋतामितीरि भ्वादेर्नामिन इति दीर्घः। ३–वृतो नवेति वा दीर्घः। ४–ऋतामितीरि लः। ५–सिचि चेति वृद्धिः। ६–स्कृच्छृत इति गुणः। ७–ऋतामितीरि भ्वादेरिति दीर्घः। ८–वृत इति वा दीर्घः। ९–ग्रहव्रश्चेति य्वृत्। सस्य शषाविति शः १०–संयोगस्यादाविति सलोपे व्यञ्जनानामिति वृद्धौ यजसृजेति षत्वे षढोरिति कत्वे षः। १२–संयोगादिसकारलोपे वृद्धौ सिज्लोपे यजसृजेति षत्वे तवर्गस्येति टवर्गः। १२–तृचि नित्यानिट्त्वाभावान्नित्यमिट्। १३–इड्विकल्पे संयोगादिसकारलोपे यजसृजेति षत्वे टवर्गः। १४–षढोः क इति कः। १५–ग्रहव्रश्चेति य्वृत्।

धातोश्छकारवकारयोरनुनासिकादौ क्वौ धुडादौ प्रत्यये च परे क्रमेण श् ऊट् इत्येतावादेशौ स्तः । [16]अप्राक्षीत्, [17]अप्राष्टाम्, अप्राक्षुः, पप्रच्छतुः, पप्रच्छिथ, [18]पप्रष्ठ, पृच्छ्यात्, प्रष्टा, प्रक्ष्यति ॥ सृजंत् विसर्गे ॥ सृजति, [19]अस्राक्षीत्, [20]अस्राष्टाम्, अस्राक्षुः, ससर्ज, [21]ससर्जिथ, [22]सस्रष्ठ, स्रष्टा, स्रक्ष्यति ॥ टु मस्जोंत् शुद्धौ ॥ [23]मज्जति ॥

मस्जेः सः ।४।४।१११॥ मस्जेः स्वरात्परस्य सकारस्य स्थाने धुडादौ प्रत्यये नोऽन्तो भवति । [24]अमाङ्क्षीत्, अमाङ्क्ताम्, अमाङ्क्षुः, ममज्ज, ममज्जिथ, ममङ्क्थ, ममज्जिव, मङ्क्ता, [25]मङ्क्ष्यति, ॥ णुदंत् प्रेरणे ॥ [26]नुदति, अनौत्सीत्, अनौत्ताम्, अनौत्सुः, नुनोद, नुनोदिथ, नोत्ता, नोत्स्यति । मतान्तरेऽयमुभयपदी । नुदते, अनुत्त, अनुत्साताम्, नुनुदे, नुत्सीष्ट, नोत्तासे ॥ स्पृशंत् संस्पर्शे ॥ स्पृशति, [27]अस्प्राक्षीत्, अस्पार्क्षीत्, अस्पृक्षत्, [28]पस्पर्श,

१६–शादेशे व्यञ्जनानामिति वृद्धौ यजसृजेति षत्वे षढोरिति कः । षः । १७–वृद्धौ सिज्लुकि षत्वे टवर्गः । १८–शत्वे षत्वे टवर्गः । १९–अः सृजि दृश इत्यदन्तत्वे इवर्णादेरिति रादेशे वृद्धौ यजसृजेति षत्वे कत्वे षः । २०–धुडिति सिज्लुक्, अदन्तः, वृद्धिः, षः, टवर्गः । २१–सृजिदृशीति वेट् । २२–पक्षे अदन्तत्वे षत्वे टवर्गः । २३–सस्य शषाविति शः, तृतीय इति तृतीयः । २४–नोन्तत्वे व्यञ्जनानामिति वृद्धौ चज इति गत्वे अघोष इति प्रथमः । म्नामिति पञ्चमः । २५–नोन्तत्वे गत्वे प्रथमत्वे पञ्चमत्वे षः । २६–अविच्छितो ङित्त्वा-न्नगुणः । २७–कृषिवत्सर्वा प्रक्रिया । २८–अघोषे शिट इत्यादिलोपः ।

पस्पृशतुः, स्पृश्यात्, स्प्रष्टा, स्पर्ष्टा, स्प्रक्ष्यति, स्पर्क्ष्यति, अस्प्रक्ष्यत्, अस्पर्क्ष्यत् ॥ विशंत् प्रवेशने ॥ विशति, अविक्षत्, विवेश, विवेशिथ, वेष्टा, वेक्ष्यति ॥ **मृशंत् आमर्शने** ॥ मृशति, अम्राक्षीत्, अमार्क्षीत्, अमृक्षत् । स्पृशिवत्सर्वा प्रक्रिया ॥ ममर्श, म्रष्टा, मर्ष्टा, ॥ **इषत् इच्छायाम्** ॥ इच्छति, ऐच्छत्, ऐषीत्, इयेष, ईषतुः, एषिता, एष्टा, एषिष्यति ॥ अथात्मनेपदिनः ॥ **ओविजति भयचलनयोः** ॥ अस्योत्पूर्वकत्वं प्रायिकम्, संविग्न इत्यादि-प्रयोगाणामपि दर्शनात् । उद्विजते, उदविजत ॥

**विजेरिट्** ।४।३।१८॥ विजेरिट् ङिद्वद् भवति । उदविजिष्ट, उद्विविजे, उद्विजिषीष्ट, उद्विजितासे, उद्विजि-ष्यते ॥ **औलस्जैति व्रीडे** । लज्जते, अलज्जिष्ट, ललज्जे, लज्जिषीष्ट, लज्जिता ॥ **जुषैति प्रीतिसेवनयोः** ॥ जुषते, अजोषिष्ट, जुजुषे, जोषिषीष्ट, जोषिता ॥ इति तुदादयः समाप्ताः ॥

## ॥ अथ रुधादयः ॥

**॥ रुधृंपि आवरणे ॥ रुधां स्वराच्छ्नो न लुक् च ।**

---

१–स्पृशादिसृपो वेत्यदन्तः, इवर्णादेरिति रः, यजसृजेति षः, टवर्गः, पक्षे गुणः । २–षढोः क इति कः । ३–हशिट इति सक्, षक षाः । ४–गमिषद्यिति छे द्वित्वे प्रथमः । ५–स्वरादेरिति वृद्धिः । ६–द्वित्वे अवान्त्यगुणे पूर्वस्यास्व इतीय् । ७–सहलुभेच्छेति वेट् । ८–सस्य शषाविति शः, तृतीय इति तृतीयः ।

।३।४।८२॥ रुधादेर्गणस्य स्वरात्परः कर्तरि विहिते शिति श्नः प्रत्ययो भवति, तत्सन्नियोगे च प्रकृतिनकारस्य लुग् भवति ॥ रुणद्धि[९], रुन्धः[१०], रुन्धन्ति । रुणत्सि, रुन्द्धः, रुन्ध । रुणध्मि, रुन्ध्वः, रुन्ध्मः । रुन्ध्यात् । रुणद्धु, रुन्धात्, रुन्धि[११], रुणधानि, अरुणत्[१२], द् । अरुणः[१३], अरुणत्, द् । अरुधत्[१४], अरौत्सीत्, रुन्धे, रुन्धाते, रुन्धते, रुन्त्से, रुन्धीत, रुन्धाम्, रुणधै, अरुन्ध, अरुद्ध[१५], अरुत्साताम्, रुरुधे, रुत्सीष्ट, रोद्धासे, रोत्स्यते, अरोत्स्यत ॥

**युजूंपि योगे** ॥ युनक्ति[१], युङ्क्तः[२], युञ्ज्यात्, युनक्तु, युङ्ग्धि, युनजानि, अयुनक्, अयुजत्, अयौक्षीत्, अयौक्ताम्, युयोज, युज्यात्, योक्तासि, योक्ष्यति, अयोक्ष्यत्, युङ्क्ते, युञ्जीत, युङ्क्ताम्, अयुङ्क्त, अयुक्त, अयुक्षाताम्, युयुजे, युक्षीष्ट, योक्तासे, योक्ष्यते, अयोक्ष्यत, ॥ **भिदृंपी विदारणे** ॥ भिनत्ति, भिन्ते, भिन्द्यात्, भिन्दीत, भिनत्तु, भिन्धि, भिन्ताम्, अभिनत्, अभिनः, अभिनत्, द् ।

---

९–अध इति धः, तृतीय इति तृतीयः, णत्वम् । १०–श्नास्त्योरित्यलुक् धुटो धुटीति धलोपः, म्नामिति बहुत्वसामर्थ्यार्णत्वाभावः । ११–हुधुट् इति धित्वे धुट इति धलोपः । १२–व्यञ्जनादेरिति देर्लुक् । १३–सेस्द्धामिति सेर्लुक् रुत्वं च । १४–ऋदिच्छ्वीत्यङ् । १५–धुड्ह्रस्वादिति सिचो लुकि अध इति धः ।

१–च ज इति गः, अघोषे प्रथमः । २–श्नास्त्योर्लुगित्यलुकि, गत्वे प्रथमत्वे म्नामिति पञ्चमः ।

अभिदत्, अभैत्सीत्, अभैत्ताम्, अभित्त, अभित्साताम्, बिभेद, बिभेदिथ, बिभिदे, भिद्यात्, भित्सीष्ट, भेत्तासि, भेत्तासे, भेत्स्यति, भेत्स्यते, अभेत्स्यत्, अभेत्स्यत ॥ छिदृंपी द्वैधीकरणे ॥ भिदिवत्। स्वरात्परस्य छस्य द्वित्वं विशेषः ॥ इत्युभयपदिनः।

## अथ परस्मैपदिनः ॥

भञ्जोंप् आमर्दने ॥ श्नो नलुक् च। भनक्ति[3], भङ्क्तः[4], भञ्ज्यात्, भनक्तु, भङ्ग्धि, अभनक्[5], अभाङ्क्षीत्, अभाङ्क्ताम्, बभञ्ज, बभञ्जिथ, बभङ्क्थ, भज्यात्[6], भङ्क्तासि, भङ्क्ष्यति, अभङ्क्ष्यत् ॥ भुजंप् पालनाऽभ्यवहारयोः ॥ भुनक्ति, भुङ्क्तः, भुञ्ज्यात्, भुङ्ग्धि, अभुनक्, अभौक्षीत्, अभौक्ताम्, बुभोज, भुज्यात्, भोक्तासि, भोक्ष्यति, अभोक्ष्यत् ॥ अञ्जौप् व्यक्तिम्रक्षणकान्तिगतिषु ॥ अनक्ति, अङ्क्तः, अञ्ज्यात्, अङ्ग्धि, आनक्, आञ्जीत्, आञ्जिष्टाम्, आङ्क्षीत्[7]। आङ्क्ताम्, आनञ्ज, आनञ्जिथ, अज्यात्[8], अञ्जिता, अङ्क्ता, अञ्जिष्यति[9], अङ्क्ष्यति, आञ्जिष्यत्, आङ्क्ष्यत् ॥ शिष्लृंप् विशेषणे। शिनष्टि,

---

३–श्नप्रत्ययो धातुनकारस्य लुक् च। चजः कगम्, अघोषे प्रथमः। ४–श्नास्त्योरित्यलुकि म्नामिति पञ्चमः। ५–व्यञ्जनादिति देर्लुकि चज इति गः, विरामे प्रथमो वा। ६–नो व्यञ्जनस्येति नलुक्। ७–धूगौदित इति विकल्पे व्यञ्जनामिति वृद्धौ च ज इति गत्वेऽघोष इति प्रथमे षः। ८–नो व्यञ्जनस्येति नलुक्। ९–इड्विकल्पे गत्वे प्रथमत्वे पञ्चमः।

शिंष्टः[10], शिंष्यात्, शिनष्टु, शिं[11]ण्ढि, शिनषाणि, अशिनट्, अशिषत्[12], शिशेष, शिष्यात्, शेष्टा, शेक्ष्यति[13], अशेक्ष्यत् ॥ **हिसु तृहप् हिंसायाम्** ॥ हिनस्ति[14], हिंस्तः, हिनस्सि, हिंस्यात् [1]हिन्धि, हिंस्तात्, अहिनत्[2], द्, अहिनः, अहिनत्[3], द्, अहिंसीत्, जिहिंस, जिहिंसतुः[4] जिहिंसिथ, हिंस्यात्, हिंसिता, हिंसिष्यति, अहिंसिष्यत् ॥

**तृहः श्नादीत्** ॥४।३।६२॥ तृहः श्नात्परो व्यञ्जनादौ विति प्रत्यये परे ईकारो भवति । तृणेढि[5], तृण्ढः, तृंहन्ति[6], तृणेक्षि[7], तृंह्यात्, तृण्ढि[8], तृण्ढात्, अतृणेट्, ड् । अतर्हीत्, ततर्ह, तृह्यात्, तर्हिता, तर्हिष्यति अतर्हिष्यत् ॥ इति रुधादयः ॥

## ॥ अथ तनादयः ॥

॥ **तनूयी विस्तारे** ॥ तनोति[9], तनुतः, तन्वन्ति,

---

१०—श्नास्त्योरित्यलुकि शिड्हे इत्यनुस्वारः । ११—श्नास्त्योरित्यलुकि धित्वे तृतीयत्वे टवर्गे म्नामिति पञ्चमे धुटो धुटीति डलोपः । १२—लृदित्त्वादङ् । १३—षढोरिति कः षः । १४—उदित इति नागमस्य यदागमन्यायेन धातुनकारत्वात् श्नसन्नियोगे लुक् ।

१—धित्वे तृतीय इति तृतीये धुटो धुटीति वा लुक् । २—व्यञ्जनाद्देरिति देर्लुक् सस्य दत्वं च । ३—सेस्द्वामिति रुः । पक्षे—पदान्ते तृतीयः । ४—शिड्हे इत्यनुस्वारः । ५—ईकारागमे अवर्णस्येत्येत्वे हो धुडिति ढत्वेऽध इति धत्वे टवर्गे ढस्तड्ढे इति लुकि रूपम् । ६—शिड्हे इत्यनुस्वारः । ७—षढोरिति कः, षः । ८—स्नास्त्योरित्यलुकि हेर्धित्वे ढत्वे टवर्गे ढलोपे पञ्चमः । ९—उश्नोरिति गुणः ।

तनोषि, तन्वः[11], तनुवः, तनुयात्, तनु[12], तनुतात्, तनवानि, अतनोत्, अतानीत्[13], अतनीत्, ततान, तेनतुः, तेनिथ, तन्यास्ताम्, तनितासि, तनिष्यति, अतनिष्यत्। तनुते, तन्वते[14], तन्वीत, तनुताम्, तनवै, अतनुत ॥

**तन्भ्यो वा तथासिन्णोश्च** ।४।३।६८॥ तनादेर्गणा-णात्परस्य सिचस्ते थासि च प्रत्यये परे लुप् वा भवति, तत्संनियोगे च नकारस्य णकारस्य च लुप् भवति, न चेट् । अतत, अतनिष्ट, अतनिषाताम्, अतथाः, अतनिष्ठाः, तेने, तनिषीष्ट, तनितासे, तनिष्यते, अतनिष्यत ॥ षणूयी दाने ॥ षः सः, निमित्ताभावे णकारस्याभावान्नः । सनोति, सनुते, असानीत्, असनीत् ।

**सनस्तत्रावा** ।४।३।६९॥ सनोतेर्नलुपि सत्यामन्तस्य वा आकारो भवति । असात, असत, असनिष्ट, असाथाः, असथाः, असनिष्ठाः, असनिषाथाम्, असनिध्वम्, असनिड्ढ्वम्, ससान, सेनतुः, सेने, सेनाते, सन्यात्, सनिषीष्ट, सनितासि, सनितासे, सनिष्यति, सनिष्यते, असनिष्यत्, असनिष्यत । **क्षणु क्षिणूयी हिंसायाम्** ॥ अक्षणीत्[15], चक्षाण, चक्षणतुः । शेषं तनोतिवत् । एवं क्षिणोतीत्याद्यपि ।

११—वम्यविति वा । १२—असंयोगादोः । १३—व्यञ्जनादेर्वोपान्त्यस्य ।
१४—अनत इत्यदादेशः, इवर्णादेरिति वः । १५—नश्वीति वृद्धिनिषेधः ।

उप्रत्ययनिमित्तोपान्त्यगुणोऽत्र नेत्यपि मतम्, तथा च कालिदासः-" न तद्यशः शस्त्रभृतां क्षिणोती " ति। **वनूयि याचने** ॥ वनुते, वन्वते, वनुवहे, वन्वहे, वन्वीत, वनुताम्, वनवै, अवनुत, अवत, अवनिष्ट, ववने[1], वनिषीष्ट, वनितासे, वनिष्यते, अवनिष्यत ॥ **मनूयि अवबोधने** ॥ मेने, मेनाते । शेषं वनिवत् । इमावात्मनेपदिनौ ॥ इति तनादयः ॥

## ॥ अथ क्र्यादयः ॥

॥ **डुक्रींग्श् द्रव्यविनिमये** ॥ **क्र्यादेः श्ना ३।४।७९॥** क्र्यादेर्गणात् कर्त्तरि विहिते शिति श्ना प्रत्ययो भवति । क्रीणाति[2], क्रीणीतः[3], क्रीणन्ति[4], क्रीणीमः, क्रीणीयात्, क्रीणातु, क्रीणीतात्, क्रीणीहि, क्रीणानि, अक्रीणात्, अक्रैषीत्, चिक्राय, चिक्रियतुः[5], चिक्रयिथ, चिक्रेथ, क्रीयात्, क्रेता, क्रेष्यति, अक्रेष्यत् । क्रीणीते, क्रीणाते, क्रीणीत, क्रीणीताम्, अक्रीणीत, अक्रीणत, अक्रेष्ट, अक्रेषाताम्, चिक्रिये, चिक्रियिढ्वे, चिक्रियिध्वे, क्रेषीष्ट, क्रेतासे, क्रेष्यते, अक्रेष्यत ॥ **प्रींग्श् तृप्तिकान्त्योः** ॥ प्रीणाति । क्रीणातिवत् ॥ **मींग्श् हिंसायाम्** ॥ प्रमीणाति[6] । मीनीते,

१-न शसददेत्येत्वनिषेधः । २-श्नोऽविच्छितो ङित्त्वान्न गुणः । ३-ईर्व्यञ्जन इति ईः । ४-श्नश्चात इत्यालुक् । ५-संयोगादितीय् । ६-अदुरुपसर्गान्तर इति णः ।

मीनीयात्, मीनीत, मीनातु, मीनीताम्, मीनीहि, मीनीष्व, अमीनात्, अमीनीत ॥

**मिग् मीगोऽखलचलि ।** ।४।२।८॥ मिनोति मीनात्योर्यपि खल्–अच्–अल्वर्जिते अक्ङिति च प्रत्यये विषयभूते आकारान्तादेशो भवति । अमाँसीत्, अमास्त, ममौ, मिम्यतुः, मिम्ये, ममिथ, ममाथ, मिम्यिढ्वे, मिम्यिध्वे, मीयात्, मासीष्ट, मातासि, मातासे, मास्यति, मास्यते, अमास्यत्, अमास्यत । **ग्रहीश् उपादाने** ॥ गृह्णाति, गृह्णीते, गृह्णीयात्, गृह्णीत, गृह्णातु, गृह्णीताम् ॥

**व्यञ्जनाच्छ्नाहेरानः** ।३।४।८०॥ व्यञ्जनान्ताद् धातोः परस्य श्नायुक्तस्य हेः स्थाने आन इत्यादेशो भवति । गृहाण, गृह्णीतात् । गृह्णीष्व, अगृह्णात्, अगृह्णीत ॥

**गृह्णोऽपरोक्षायां दीर्घः** ।४।४।३४॥ गृह्णाते र्यो विहित इट् तस्य दीर्घो भवति न चेत्स इट् परोक्षायां भवति । अग्रहीत्, अग्रहीष्टाम्, अग्रहीष्ट, जग्राह, जगृहतुः,

७–मिग् मीग इत्यात्वे यमिनमीति सोऽन्त इट् च । ८–अवित्परोक्षायाः कित्वाद् गुणाभावे योऽनेकस्वरस्येति यः । ९–ग्रहव्रश्चेति य्वृत् । णत्वम् ।
१–नश्वीति वृद्धिनिषेधः । इटो दीर्घे स्थानिवद्भावात् सिचो लुक् ।
२–ग्रहव्रश्चेति य्वृति द्वित्वादि ।

जग्रहिथ, जगृहे, जगृहीढ्वे, जगृहीध्वे, गृह्यात्, ग्रहीषीष्ट, ग्रहीतासि, ग्रहीतासे, ग्रहीष्यति, ग्रहीष्यते, अग्रहीष्यत्, अग्रहीष्यत। **पूगश् पवने।**

**प्वादेर्ह्रस्वः ।४।२।१०५॥** प्वादेर्गणस्य शिति प्रत्यये परे ह्रस्वो भवति। पुनाति, पुनीते, पुनीयात्, पुनीत, अपुनात्, अपुनीत, अपावीत्, अपविष्ट, अपविढ्वम्, अपविध्वम्, अपविड्ढवम्, पुपाव, पुपुवतुः, पुपविथ, पुपुविम, पुपुवे, पुपुविढ्वे, पुपुविध्वे, पूयात्, पविष्यति, पविष्यते, अपविष्यत्, अपविष्यत ॥ **लूगश् छेदने।** **धूगश् कम्पने।** पुनातिवद्रूपाणि ॥ **स्तॄगश् आच्छादने ॥** स्तृणाति, स्तृणीते, स्तृणीयात्, स्तृणीत, स्तृणातु, स्तृणीताम्, अस्तृणात्, अस्तृणीत, अस्तारीत्, अस्तरीष्ट[३], अस्तरिष्ट, अस्तीर्ष्ट[४], अस्तीर्षाताम्, अस्तीर्ढ्वम्, अस्तीड्ढ्वम्[५], तस्तार, तस्तरतुः[५], तस्तरिथ, तस्तरे, तस्तरिढ्वे, तस्तरिध्वे, स्तीर्यात्, स्तरिषीष्ट, स्तीर्षीष्ट, स्तरिषीढ्वम्, स्तरिषीध्वम्, स्तीर्षीढ्वम्, स्तरीतासि, स्तरितासि, स्तरीतासे, स्तरितासे, स्तरीष्यति, स्तरिष्यति, स्तरीष्यते, स्तरिष्यते, अस्तरीष्यत्, अस्तरिष्यत्, अस्तरीष्यत, अस्तरिष्यत-

---

३–इट् सिजाशिषावितीटि वृतो नवेति दीर्घः। ४–इड्विकल्पे ऋवर्णादिति कित्त्वे ऋतामितीरि भ्वादेरिति दीर्घः। ५–अघोषे शिट इति शिड्लोपः, स्कृच्छृत इति गुणः।

॥ **वृङ्श् वरणे** ॥ अवारीत्, ववार, ववरतुः, ववरिम, अवरीष्ट, अवरिष्ट, अवूर्ष्ट, अवूर्षाताम्, ववरे, वूर्यात्, वरिषीष्ट, वूर्षीष्ट, वरीतासि, वरितासि, वरीतासे, वरितासे। शेषं सामान्यम् । अथ **परस्मैपदिनः** ॥ **ज्यांश् वयोहानौ** ॥

**दीर्घमवोऽन्त्यम्** ।४।१।१०३॥ वेग्वर्जितस्य धातोर्य्वृदन्त्यं दीर्घं भवति। जिनाति, जिनीयात्, जिनातु, अजिनात्, अज्यासीत्, जिज्यौ, जिज्यतुः, जिज्यिथ, जिज्याथ जीयात्, ज्याता, ज्यास्यति, अज्यास्यत् ॥ इति प्वादयः ॥ **बन्धंश् बन्धने** । बध्नाति, बध्नीयात्, बध्नातु, बधान, बध्नीयात्, अबध्नात्, अभान्त्सीत्, अबान्धाम्, अभान्त्सुः, बबन्ध, बध्यात्, बन्धा, भन्त्स्यति, अभन्त्स्यत् ॥ **अशश् भोजने** ॥ अश्नाति, अश्नीयात्, अश्नातु, अशान, आश्नात्, आशीत्, आश, अश्यात्, अशिता,

६–स्कृच्छ्रत इति गुणः । ७–इड्विकल्पे ऋवर्णादिति क्त्विवाद् ओष्ठ्यादुरित्युरादेशे भ्वादेरिति दीर्घः । ८–ज्याव्यध इति य्वृति दीर्घे प्वादेर्ह्रस्वः । ९–ज्याऽये इति पूर्वस्य इकारः । १०–ज्याव्यध इति य्वृति द्वित्वादि ।

१–नो व्यञ्जनस्येति नलोपः । २–व्यञ्जनानामिति वृद्धिः । गडदबादेरिति चतुर्थः । अघोषे प्रथमः । ३–वृद्धौ धुडिति सिज्लुकि अध इति चतुर्थे धुटो धुटीति लोपः । ४–नो व्यञ्जनस्येति नलोपः । ५–अध इति चतुर्थे धुटो धुटीति लोपः ।

अशिष्यति, आशिष्यत् ॥ मुषश् स्तेये ॥ मुष्णाति, मुष्णीयात्, मुष्णातु, मुषाण, अमुष्णात्, अमोषीत्, मुमोष, मुष्यात्, मोषिता, मोषिष्यति, अमोषिष्यत् ॥ पुषश् पुष्टौ ॥ मुष्णातिवत् ॥ ज्ञांश् अवबोधने ॥ जा[6]नाति, जानीयात्, जानातु, जानीहि, जानीतात्, अजानात्, अज्ञासीत्, जज्ञौ, जज्ञिथ, जज्ञाथ, ज्ञेयात्, ज्ञायात्, ज्ञाता, ज्ञास्यति, अज्ञास्यत् ॥ इति क्र्यादयः ॥

## ॥ अथ स्वार्थिकायादिप्रत्ययान्ताः ॥

॥ **गुपौ रक्षणे** ॥ **गुपौधूपविच्छिपणिपनेरायः** ।३।४।१॥ गुप्-धूप्-विच्छ्-पण्-पन्-एभ्यो धातुभ्यः पर आयप्रत्ययो भवति स्वार्थे । शव् । गोपायति, गोपायेत्, गोपायतु, अगोपायत् ॥ धूप सन्तापे । पणि व्यवहारे स्तुतौ । पन च ॥ धूपायति, पणा[9]यति, पनायति ॥ **कमूङ् कान्तौ** ॥ कान्तिरिहेच्छा ॥

**कमेर्णिङ्** ।३।४।२॥ कमेर्धातोः स्वार्थे णिङ् प्रत्ययो भवति । का[10]मयते, कामयेत, कामयताम् । अकामयत ॥ **ऋत घृणागतिस्पर्धेषु** ॥

**ऋतेर्ङीयः** ।३।४।३॥ ऋत् इत्यस्माद् धातोः

---

६-जाज्ञेति जादेशः । ७-संयोगादेर्वेत्येः । ८-लघोरुपान्त्यस्येति गुणः, लुगस्येत्यलुक् । ९-पणिपनी आयप्रत्ययान्तौ परस्मैपदिनौ । १०-[illegible]ति वृद्धिः, शवि गुणायादेशौ ।

स्वार्थे ङीयप्रत्ययो भवति । ऋतीयते, ऋतीयेत, ऋतीयताम्, आर्तीयीत ॥

**अशवि तेवा ।३।४।४॥** गुपादिभ्योऽशवि विषये आय-णीङ्-ङीया वा भवन्ति । अगोपायीत्, अगोपीत्, अगौप्सीत्, अगौप्ताम्, गोपायाञ्चकार, जुगोप, जुगोपिथ, जुगोपिव, गोपाय्यात्, गुप्यात्, गोपायिता, गोपिता, गोप्ता, गोपायिष्यति, गोपिष्यति, गोप्स्यति, अगोपायिष्यत्, अगोपिष्यत्, अगोप्स्यत् । अधूपायीत्, अधूपीत् । अपणायीत्, अपाणीत्, अपणीत्, अपनायीत्, अपानीत्, अपनीत् । शेषं सेट् गुपिवत् ॥

**उपान्त्यस्याऽसमानलोपि शास्वृदितो ङे ।४।२।३५॥** समानलोपि शासृ ऋदनुबन्धवर्जितस्य धातोरुपान्त्यस्य ङपरेणौ ह्रस्वो भवति ॥

**असमानलोपे सन्वल्लघुनि ङे ।४।१।६३॥** न विद्यते समानस्य लोपो यस्मिन् ङपरे णौ तस्मिन् द्वित्वे सति पूर्वस्य लघुनि धात्वक्षरे परे सनीव कार्यं भवति ॥ सन्यस्येतीत्वमुक्तमिहापि तथेत्याशयः ॥

---

११–ङीयस्य ङित्त्वादात्मनेपदम् । १२–धूगौदित इति वेट्, अत इत्यल्लोपः ।

१–व्यञ्जनादेरिति वा वृद्धिः ।

सन्यस्य ।४।१।५९॥ धातोर्द्वित्वे पूर्वस्याकारस्य सनि परे इकारो भवति ॥

लघोर्दीर्घोऽस्वरादेः ४।१।६४॥ अस्वरादेधातोर्ङ्परे असमानलोपे णौ द्वित्वे सति पूर्वस्य लघोर्लघुनि धात्वक्षरे परे दीर्घो भवति ॥

णेरनिटि ।४।३।८३॥ अनिट्यशिति प्रत्यये णेर्लुग् भवति । [२]अचीकमत, अचीकमेताम्, अचीकमन्त । अचकमत[३], अचकमेताम् ॥

आमन्ताल्वाय्येत्नावय् । ४।३।८५॥ आम्-अन्त्-आलु-आय्य-इत्नु-एषु प्रत्ययेषु परेषु णेरयादेशो भवति । लुकोऽपवादः । काम[४]याञ्चक्रे, चकमे, कामयिषीष्ट, कमिषीष्ट, कामयिषीढ्वम्, कामयिषीध्वम्, कमिषीध्वम्, कामयिता[५], कमिता, कामयिष्यते, कमिष्यते, अकामयिष्यत, अकमिष्यत ॥ आर्तियिष्टे[६], आर्तीत्, आर्तियिढ्वम्, आर्तियिध्वम्, आर्तियिड्ढ्वम्, ऋतीयिषीध्वम्, ऋत्यात्, ऋ[७]तीयितासे,

२-कम् धातोर्णिङि अनुबन्धलोपे उपान्त्यवृद्धौ अद्यतन्यां तप्रत्यये मध्ये ङप्रत्यये ह्रस्वत्वे द्वित्वादिकार्ये सन्वत्त्वादित्वे दीर्घे णिलोपेऽटि च रूपम् । ३-णिङ्विकल्पे ङे द्वित्वादि । ४-आमि णेरयादेशो अनुप्रयोगादिकं बोध्यम् । ५-णे गुणायादेशौ परत्वात् । ६-अत इत्यकारलोपः । स्वरादेस्तास्वित्यादिवृद्धिः । ७-अत इत्यलुक् ।

अर्तितासि, ऋतीयिष्यते, अर्तिष्यति, आर्तीयिष्यत, आर्तिष्यत् ।

**अथ कण्ड्वादयः । कण्डूग् गात्रविघर्षणे ॥**

**धातोः कण्ड्वादे र्यक् ।३।४।८।।** कण्ड्वादिभ्यो धातुभ्यः स्वार्थे यक् प्रत्ययो भवति । कण्डूयति, कण्डूयते । कित्त्वान्न गुणः । अत एव कित्करणाद् यक् धातुभ्य एव । द्विधा हि कण्ड्वादयः-धातवः प्रातिपदिकानि चेति ध्येयम् । धातुग्रहणमुत्तरार्थं स्पष्टप्रतिपत्तये इहैव कृतम् ॥ कण्डूयेत, कण्डूयेत्, कण्डूयताम्, कण्डूयतु, अकण्डूयत, अकण्डूयत्, अकण्डूयिष्ट, अकण्डूयीत्, कण्डूयाञ्चकार, कण्डूयाञ्चक्रे, कण्डूयिषीष्ट, कण्डूयिषीढ्वम्, कण्डूयिषीध्वम्, कण्डूय्यात्, कण्डूयितासे, कण्डूयितासि, कण्डूयिष्यति, कण्डूयिष्यते, अकण्डूयिष्यत, अकण्डूयिष्यत् ॥ **महीङ् वृद्धौ पूजायाञ्च ॥ हृणीङ् रोषलज्जयोः ॥** महीयते, हृणीयते, आत्मनेपदिनाविमौ ॥ **मन्तु अपराधे ॥ वल्गु पूजामाधुर्ययोः ॥** मन्तूयति, वल्गूयति । परस्मैपदिनाविमौ । **दुरज् भिषज् चिकित्सायाम् ॥** दुरज्यति, भिषज्यति, दुरज्येत्, भिषज्येत्, भिषज्यतु, अभिषज्यत् ॥

**योऽशिति ।४।३।८।।** व्यञ्जनान्ताद् धातोर्व्यञ्जनात्पर-

१-शवि लुगस्येत्यलुक् । २-अत इत्यल्लोपः । ३-दीर्घश्च्वीति दीर्घः ।

स्य यकारस्याशिति प्रत्यये परे लुग् भवति। अभिषजीत्[4]। अल्लोपस्य स्थानिवत्त्वान्न वृद्धिः। भिषजाञ्चकार, भिषज्यात्, भिषजिता, भिषजिष्यति, अभिषजिष्यत्॥ **सुखदुःख तत्क्रियायाम्**॥ सुखायति[5], दुःखायति, असुखायीत्[6], सुखायाञ्चकार, सुखाय्यात्, सुखायिता, सुखायिष्यति, असुखायिष्यत्। शेषं सामान्यम्, एवं दुःखायतेरपि॥

इति कण्ड्वादयः॥

## ॥ अथ चुरादयः॥

॥ **चुरण् स्तेये**॥ **चुरादिभ्यो णिच्** ।३।४।१७॥ चुरादिभ्यो धातुभ्यः स्वार्थे णिच् प्रत्ययो भवति। चोरयति[7], चोरयेत्, चोरयतु, अचोरयत्, अचूचुरत्[1], चोरयाञ्चकार, चोर्यात्[2], चोरयिता, चोरयिष्यति, अचोरयिष्यत्॥ **पूजण् पूजायाम्**॥ पूजयति, अपूपुजत्, पूज्यात्, पूजयिता॥ **चितण् संवेदने**॥ चेतयति, अचीचितत्॥ **चितुण् स्मृत्याम्**॥ चिन्तयति[3], अचिचिन्तत्, चिन्त्यात्॥ **कृतण् संशब्दने**॥

---

४–अत इत्यल्लोपः, पश्चाद् य् लोपः। ५–दीर्घश्च्वीति दीर्घः। ६–अत इत्यल्लोपः। ७–णिचि उपान्त्यगुणे सवि गुणायादेशौ।

१–णिचि गुणे ङे ह्रस्वत्वे द्वित्वादौ लघोरिति पूर्वदीर्घे णिलोपे अडागमे च रूपम्। २–णेरिति णिलोपः। ३–उदित्वादुदितः स्वरादिति नोन्तः, उपान्त्याभावान्न गुणः।

कॄतः कीर्त्तिः ।४।४।१२३॥ कॄतण् इत्येतस्य कीर्त् इत्ययमादेशो भवति ॥ कीर्तयति ॥

ऋदृवर्णस्य ।४।२।३७॥ धातोरुपान्त्यस्य ऋवर्णस्य ङपरे णौ वा ऋकारो भवति । अचीकृतत्, अचिकीर्तत् कीर्त्यात्, कीर्तयिता ॥ गणण् संख्याने ॥ गणयति ॥

ई च गणः ।४।१।६७॥ गणेर्ङपरे णौ द्वित्वे पूर्वस्येकारोऽकारश्चान्तादेशो भवति । अजीगणत्, अजगणत्, गणयामास, गण्यात्, गणयिता ॥ कथण् वाक्यप्रबन्धे ॥ कथयति, अचकथत् ॥ इमावदन्तौ ॥ युजण् संपर्चने ॥

युजादेर्नवा ।३।४।१८॥ युजादिभ्यो धातुभ्यः स्वार्थे णिच् प्रत्ययो वा भवति । योजयति, अयूयुजत् । योजति, योजेत्, योजतु, अयोजत्, अयोजीत्, युयोज, युज्यात्, योजिता, योजिष्यति, अयोजिष्यत् ॥ सहण् मर्षणे ॥ साहयति, असीसहत् । सहति, असहीत्, ससाह, सेहुः, सेहिथ, सह्यात्, सहिता, सोढा, सहिष्यति, असहिष्यत् ॥ इति चुरादयः ॥

## ॥ णिगन्त प्रक्रिया ॥

प्रयोक्तृव्यापारे णिग् ।३।४।२०॥ कर्त्तारं यः

४—णौ अत इत्यकारस्य लुक्, तस्य स्थानिवद् भावान्नोपान्त्यवृद्धिः । ५—णौ समानलोपित्वान्न सन्वद्भावः । ६—णिज्विकल्पे शव् । ७—न श्विजागृ इति वृद्धिनिषेधः । ८—सहलुभेच्छेति वेट् ।

प्रयुङ्क्ते-प्रेरयति स प्रयोक्ता । प्रयोक्तुर्व्यापारे वाच्ये धातोर्णिग् प्रत्ययो भवति वा । णकार उभयपदार्थः । णकारो वृद्ध्यर्थः । भवन्तं प्रयुङ्क्ते भावयति, भावयते, भावयेत्, भावयेत, भावयतु, भावयताम्, अभावयत्, अभावयत ॥

**ओजाऽन्तस्थापवर्गेऽवर्णे** ।४।१।६०॥ धातोर्द्वित्वे पूर्वस्योकारान्तस्यावर्णान्ते जान्तस्थापवर्गे परतः सनि परे इकारोऽन्तादेशो भवति ॥ णौ यत्कृतं तत्सर्वं स्थानिवद् भवति द्वित्वे कर्त्तव्ये ॥ अबीभवत्, अबीभवत, भावयामास, भावयाञ्चक्रे, भाव्यात्, भावयिषीष्ट, भावयिषीढ्वम्, भावयिषीध्वम्, भावयितासि, भावयितासे, भावयिष्यति, भावयिष्यते, अभावयिष्यत्, अभावयिष्यत ॥ पाचयति, पाचयते, पाचयेत्, पाचयेत, पाचयतु, पाचयताम्, अपाचयत्, अपाचयत । अपीपचत्, अपीपचत, पाचयाञ्चकार, पाचयाञ्चक्रे, पाच्यात्, पाचयिषीष्ट, पाचयितासि, पाचयितासे, पाचयिष्यति, पाचयिष्यते, अपाचयिष्यत्, अपाचयिष्यत ॥ कारयति, अचीकरत् ॥ रावयति, रावयते, अरीरवत्, अरीरवत । लावयति, लावयते, अलीलवत्, अलीलवत ॥

---

९-णौ वृद्ध्यावादेशौ । १०-ईगित इत्यात्मनेपदम् ॥

१-भूधातोर्णिग्यनुबन्धलोपे वृद्ध्यावादेशयोरद्यतन्यां दि प्रत्यये ङे च द्विस्वे कर्तव्ये स्थानिवद्भावाद् भू इत्यस्यैव द्वित्वे सन्वद्भावादोजान्तस्येति इत्वे दीर्घे च रूपम् । २-आमन्तेत्यय् । ३-णेरिति णिलोपः । ४-उपान्त्यवृद्धिः ।

पावयति, पावयते, अपीपवत्, अपीपवत ॥ शासयति, शासयते, अशशासत्, अशशासत[5] ॥ शेषं स्वयमुन्नेयम् ॥ ढौकृङ् गतौ। ढौकते, अढौकिष्ट, ॥ शव्विकरणः। ढौकमानं प्रयुङ्क्ते ढौकयति, ढौकयते, अडुढौकत्[6], अडुढौकत। राजयति, राजयते, अरराजत्, अरराजत ॥

घटादेर्ह्रस्वो दीर्घस्तु वा ञिणम्परे ।४।२।२४। घटादीनां धातूनां णौ परे ह्रस्वो भवति, ञिणम्परे तु णौ दीर्घो वा भवति ॥ स्मृं आध्याने ॥ अयं घटादिः शब्विकरणः। स्मरति, अस्मार्षीत्, सस्मार, सस्मर्थ[7], सस्मरिम, स्मर्यात्[8], स्मर्ता, स्मरिष्यति ॥ स्मरन्तं प्रयुङ्क्ते-स्मरयति[9], स्मरयते ॥

स्मृदृत्वरप्रथम्रदस्तॄस्पशेरः ४।१।६५॥ स्मृ-दृ-त्वर्-प्रथ-म्रद्-स्तॄ-स्पश्-एषां धातूनामसमानलोपे ङ परे णौ द्वित्वे सति पूर्वस्याऽकारोऽन्तादेशो भवति। असस्मरत्, असस्मरत ॥ दारयति, दारयते, अददरत्, अददरत। सन्वद्भावापवादोऽदादेशः परत्वाद्दीर्घमपि बाधते। स्तारयति, अतस्तरत्, अतस्तरत ॥

---

५-शास्वृदिद्वर्जनान्न ह्रस्वो न सन्वद्भाव इति नेत्वादि। ६-अयमृदित्।
७-ऋत इति नेट्। ८-ऋतश्चेति गुणः। ९-नामिन इति वृद्धौ घटादित्वाद् ह्रस्वः।

१-अघोषे शिट इति शिटो लुक्।

**भ्राज भास भाषदीपपीडजीवमीलकणरणवणभणश्रणह्वे हेठ् लुट् लुपलपां नवा ।४।२।३६॥** भ्राज्-भास्-भाष्-दीप्-पीड्-जीव्-मील्-कण्-रण्-वण्-भण्-श्रण् - ह्वे-हेठ्-लुट्-लुप्-लप्-एषां धातूनां ङपरे णौ उपान्त्यस्य ह्रस्वो वा भवति । भ्राजयति, अबिभ्रजत्, अबभ्राजत् । भासयते, अबीभसत, अबभासत । वर्त्तयति, अवीवृतत्[2], अववर्त्तत् । स्वापयति, असूषुपत्[3] ॥

**अर्तिरी ब्ली ह्री क्नुयीक्ष्माय्यातां पुः ।४।२।२१॥** ऋ-री-ब्ली-ह्री-क्नुय्-क्ष्माय्-एषामाकारान्तानां च धातूनां णौ परे पुरन्तो भवति । अर्पयति[4], आर्पयत्, आर्पिपत्[5] । दापयति, अदीदपत् ॥

**णौ क्रो जीङः ।४।२।१०॥** क्रीग्-जि-इङ्-इत्येतेषां णौ परे आकारोऽन्तादेशो भवति । क्रापयति, अचिक्रपत् । जापयति, अजीजपत् । अध्यापयति ॥

**णौ सन् ङे वा ।४।४।२७॥** सन् परे ङपरे च णौ परत इङो गादेशो वा भवति । अध्यजीगपत् । अध्यापिपत्[6] । ग्रापयति ॥

---

२–ऋदुवर्णस्येति वा ऋः । ३–स्वपेरिति ऋृति द्वित्वम् । ४–प्वागमे पुस्पाविति गुणः । ५–पूर्वो द्विरुक्त इति परस्य पि इत्यस्येकारस्य णित्वाल्लुक् । अपि र इति पि इत्यस्यैव द्वित्वं बोध्यम् । ६–पिशब्दस्य स्वरादेर्द्वितीय इति द्विरुक्तिः ।

**जिघ्रतेरिः** ।४।२।३८।। जिघ्रतेरुपान्त्यस्य ङपरे णाविकारो वा भवति ।। अजिघ्रिपत् । अजिघ्रपत् । स्थापयति ।

**तिष्ठतेः** ।४।२।३९।। तिष्ठतेरुपान्त्यस्य ङपरे णाविकारो भवति । अतिष्ठिपत् ।।

**रुहः पः** ।४।२।१४।। रुहेर्णौ परतः पकारोऽन्तादेशो वा भवति । रोपयति, रोहयति । अरूरुपत् , अरूरुहत् ।।

**पातेः** ।४।२।१७।। पांक् रक्षणे इत्येतस्य णौ परे लोऽन्तो भवति । पालयति, अपीपलत् ।।

**धूग् प्रीगोर्नः** ।४।२।१८।। धूग्-प्रीग्-इत्येतयो र्णौ परे नोऽन्तो भवति । धूनयति, अदूधुनत् । प्रीणयति, अपिप्रिणत् ।।

**पाशाछासावेव्याह्वो यः** ।४।२।२०।। पा-शा-छा-सा-वे-व्या-ह्वा एषां णौ परे योन्तो भवति । पाययति ।।

**ङे पिबः पिप्य्** ।४।१।३३।। ण्यन्तस्य पिबतेर्ङपरे पीप्य् इत्ययमादेशो भवति, न चायं द्विर्भवति । अपीप्यत् । ह्वाययति ।।

**णौ ङसनि** ।४।१।८८।। ह्वयतेः सस्वरान्तस्था ङपरे

---

७–इत्वेद्वित्वम् । एवमतिष्ठिपदित्यादावपि द्वित्वविधिरित्वानन्तरं बोध्यम् ।

१–णावात्सन्ध्यक्षरस्येत्यात्वे आत ऐरित्यैः ।

सन्परे च णौ विषये य्वृद् भवति। अजूहवत्, अजुहावत् ॥[२]

**शदेरगतौ शात्** ।४।२।२३॥ शीयतेरगतावर्थे णौ परे शात् इत्ययमादेशो भवति। शातयति पुष्पाणि, अशीशतत्। गतौ तु-शादयति, अशीशदत् ॥

**ञ्णिति घात्** ।४।३।१००॥ ञ्णिति प्रत्यये परे हन्तेर्घात् इत्ययमादेशो भवति। घातयति, अजीघतत् ॥

**ऊद् दुषो णौ** ।४।२।४०॥ दुषेरुपान्त्यस्य णौ परे ऊकारादेशो भवति। दूषयति, अदूदुषत् ॥

**कगेवनूजनैजृष्क्नसूरञ्जः** ।४।२।२५॥ कग्-वन्-जन-जॄ-क्नस्-रञ्ज्-एषां णौ परे ह्रस्वो भवति, ञिणम्परे तु णौ वा दीर्घो भवति। जनयति, अजीजनत्। रञ्जयति, अररञ्जत् ॥

**णौ मृगरमणे** ।४।२।५१॥ रञ्जेरुपान्त्यनकारस्य णौ परे मृगाणां क्रीडायामर्थे लुग् भवति। रजयति मृगान्, अरीरजत् ॥

**अमोऽकम्यमिचमः** ।४।२।२६॥ कम्यमिचमिवर्जस्यामन्तस्य धातोर्णौपरे ह्रस्वो भवति, ञिणम्परे तु णौ वा दीर्घो भवति। रमयति, अरीरमत्, गमयति, अजीगमत् ॥

२-ङपरे णौ विषये य्वृति णौ कृतस्य स्थानिवद्भावाद् हु इत्यस्य द्वित्वे भ्राज भासेति ह्रस्वत्वे अजूहवदिति, पक्षे अजुहावदिति बोध्यम्।

चुरादिण्यन्ताण्णौ पूर्वणिलोपे–चोरयन्तं प्रयुङ्क्ते चोरयति, अचूचुरत् । अचुचोरदिति तु ध्यान्ध्यविलसितमेव । इति णिगन्तप्रक्रिया ॥

## ॥ अथ सन्नन्तप्रक्रिया ॥

**तुमर्हादिच्छायां सन्नतत्सनः** ।३।४।२१॥ यो धातुरिषेः कर्म[१], इषिणैव च समानकर्तृकः[२] स तुमर्हः । तुमर्हाद् धातोरिच्छायामर्थे सन् प्रत्ययो वा भवति ॥

**सन्यङश्च** ।४।१।३॥ सन्नन्तस्य यङन्तस्य च धातोराद्य एकस्वरोऽवयवो द्विर्भवति । पठितुं[३]मिच्छति पिपठिषति[४], पिपठिषेत्, पिपठिषतु, अपिपठिषत्, अपिपठिषीत्[१], पिपठिषाञ्चकार[२], पिपठिष्यात्[३], पिपठिषिता, पिपठिषिष्यति, अपिपठिषिष्यत् ॥ अटितुमिच्छति अटिटिषति[४], आटिटिषत्[५], आटिटिषीत् । अत्तुमिच्छति जिघत्सति[६], अजिघत्सत्, अजिघत्सीत्, जिघत्सामास ॥

---

३–पठनं हीच्छायाः कर्म, इच्छायाः कर्ता च तस्य कर्तेति पठ्धातुस्तुमर्हः । एवमन्यत्राऽप्यूह्यम् । ४–सनीटि द्वित्यादिकार्ये सन्यस्येतीत्वे नाम्यन्तस्थेति षः । शवि लुगस्येत्यलुक् ।

१–इटि अत इत्यलुक् । सन्नन्तोऽनेकस्वरत्वात्सेडिति ध्येयम् । २–अनेकस्वरत्वादाम्यत इत्यलुक् । ३–अत इत्यलुक् । ४–स्वरादेरिति टिशब्दस्य द्वित्वम् । ५–स्वरादेस्तासु । ६–अदेर्घस्लृ सनद्यतनीति घस्लादेशे द्वित्वादिकार्ये इत्वे सस्त इति तः ।

**ग्रह गुहश्च सनः ।४।४।६०।।** ग्रहि गुहिभ्यामुवर्णान्ताच्च धातोर्विहितस्य सन आदिरिड् न भवति ।।

**रुदविदमुषग्रहस्वपप्रच्छः सन् च ।४।३।३२।।** रुद्-विद्-मुष्-ग्रह्-स्वप्-प्रच्छ्-एभ्यो धातुभ्यः परः सन् क्त्वा च किद्वद् भवतः । ग्रहीतुमिच्छति जिघृँक्षति, अजिघृक्षीत्, जिघृंक्षाम्बभूव, जिघृक्षिष्यति ।।

**उपान्त्ये ।४।३।३४।।** नामिन्युपान्त्ये सति धातोः परोऽनिट् सन किद्वद् भवति । गोढुमिच्छति जुघुक्षति, अजुघुक्षीत्, जुघुक्ष्यात् । भेत्तुमिच्छति बिभित्सति, अबिभित्सीत् । मोषितुमिच्छति मुमुषिषति, अमुमुषिषत्, अमुमुषिषीत् । स्वप्तुमिच्छति सुषुँप्सति, असुषुप्सीत् । प्रयोक्तृव्यापारे णिगन्तात्सनि तु-

**स्वपो णावुः ।४।१।६२।।** स्वपेर्णौ सति द्वित्वे कृते पूर्वस्योकारोऽन्तादेशो भवति । स्वापयितुमिच्छति सुष्वापयिषति, असुष्वापयिषीत्, सुष्वापयिषाञ्चकार । रोदितुमिच्छति रुरुदिषति, अरुरुदिषीत् । वेदितुमिच्छति विविदिषति, अविविदिषीत् ।

---

७-ग्रह गुह इतीड्निषेधः, कित्त्वाद् य्वृत्, द्वित्वादिकार्यम्, ढत्वे चतुर्थः, षढोरिति कः, षः । ८-आम्यत इत्यलुक् । तौ मुम इति स्त्रानुस्वारानुनासिकौ । ९-कित्त्वाद् य्वृति द्वित्वादि ।

**ऋस्मिपूङञ्जशौकृगृदृधृप्रच्छः** ।४।४।४८।। ऋ-स्मि-पूङ्-अञ्जू-अशू-कृ-गृ-दृ-धृ-प्रच्छ्-एभ्यः परस्य सन आदिरिड् भवति । प्रष्टुमिच्छति पिपृच्छिषति, अपिपृच्छिषीत् ॥

**नामिनोऽनिट्** ।४।३।३३।। नाम्यन्ताद् धातोरनिट् सन् क्विद्वद् भवति ॥

**स्वरहन्गमोः सनिधुटि** ।४।१।१०४।। स्वरान्तस्य धातोर्हन्तेर्गमेश्च धुडादौ सनि परे स्वरस्य दीर्घो भवति । भवितुमिच्छति बुभूषति, अबुभूषीत् , बुभूष्यात् । जेतुमिच्छति जिगीषति, अजिगीषीत् । जिगीषिता । चेतुमिच्छति चिकीषति, चिचीषति, स्तोतुमिच्छति तुष्टूषति । कर्तुमिच्छति चिकीर्षति, चिकीर्षिता हन्तुमिच्छति जिघांसति, अजिघांसीत् ॥

**सनीङश्च** ।४।४।२५।। इङ इणिकोश्चाज्ञाने वर्त्तमानयोः सनि परे गमुरादेशो भवति । अज्ञान इति इण एव विशेषणम् ॥

---

१०–क्त्वािद् गुणाभावः; दीर्घः पर्जन्यवल्लक्षणन्यायेन । ११–क्त्वािन्न गुणः । दीर्घः । जेर्गिरिति गिः ।

१–अनिट्सनि क्त्वािन्न गुणः, दीर्घः, चेः किर्वेति किः । २–अघोषे शिट इति शिड्लुक् । ३–क्त्वािद्गुणाभावे दीर्घे इरादेशो भ्वादेर्नामिन इति दीर्घः । ४–अडे हीति घः । शिड्हे इत्यनुस्वारः ।

**प्राग्वत्** ।३।३।७४।। सनः पूर्वो यो धातुस्तस्मादिव सन्नन्तात्कर्त्तर्यात्मनेपदं भवति । यत्पूर्वस्य धातोरनुबन्धेनोपपदेनार्थविशेषेण वाऽऽत्मनेपदं दृष्टं तत्सन्नन्तादतिदिश्यत इति यावत् । अध्येतुमिच्छति अधिजिगांसते, अध्यजिगांसत, अध्यजिगांसिष्ट, अधिजिगांसाञ्चक्रे, अधिजिगांसिसीष्ट । इण्-एतुमिच्छति जिगमिषति विदेहान्, अजिगमिषीत् । इक्-अध्येतुमिच्छति अधिजिगमिषति मातुः । इणो ज्ञाने प्रतीषिषति प्रत्यैषिषत्, प्रत्यैषिषीत् । अधीङो णिगन्तात्तु अध्यापयितुमिच्छति अधिजिगापयिषति, अध्यापिपयिषति, अध्यजिगापयिषीत्, अध्यापिपयिषीत् ॥

**वौ व्यञ्जनादेः सन् चाय्वः** ।४।३।२५।। अकारे इकारे चोपान्त्ये सति व्यञ्जनादेर्धातोः परः सन् क्त्वा च सेटौ वा किद्वद् भवतः, यकारान्तात् वकारान्ताच्च न भवतः । द्योतितुमिच्छति दिद्युतिषते, दिद्योतिषते, अदिद्युतिषीत्, अदिद्योतिषीत् । अदिद्युतिषिष्ट । अदिद्योतिषिष्ट । लेखितुमिच्छति लिलिखिषति, लिलेखिषति, अलिलिखिषीत्, अलिलेखिषीत् । वर्तितुमिच्छति विवर्तिषते, अवि-

५-स्वरहनिति दीर्घः, शिड्हे इत्यनुस्वारः । ६-स्वरादे द्वितीयइति-सशब्दस्य द्वित्वे सन्यस्येतीः । ७-सनि णौ गादेशे पुः । ८-गादेश-विकल्पे आत्वे पौ पिशब्दस्य द्वित्वम् । ९-द्युतेरिरिति पूर्वस्य इः । १०-द्युद्भ्य इति विकल्पेनात्मनेपदम् ।

वर्तिषत, अविवर्तिषिष्ट । विवृत्सति[11], अविवृत्सीत् । निनर्तिषति[12], निनृत्सति[13], अनिनर्तिषीत् , अनिनृत्सीत् ।

**इवृधभ्रस्जदम्भश्रियूर्णुभरज्ञपिसनितनिपतिवृद्-दरिद्रः सनः ।४।४।४७॥** इवन्तेभ्य ऋध्–भ्रस्ज्–दम्भ–श्रि–यु–ऊर्णु– भर –ज्ञप् – सन्–तन्–पत्–वृग्–ऋदन्तेभ्यो दरिद्रातेश्च परस्य सन आदिरिड् वा भवति । देवितुमिच्छति दिदेविषति । अय्व इति पर्युदासान्न क्विद्वद्भावः । दुद्यूषति, अदिदेविषीत् , अदुद्यूषीत् ॥

**ऋध ईर्त् ।४।१।१७॥** ऋधः सकारादौ सनि परे ईर्त्[1] इत्यादेशो भवति न चास्य द्विः । अर्दिधिषति[2], आर्दिधिषीत् । इडभावे ईर्त्सति, ऐर्त्सीत् । भ्रष्टुमिच्छति बिभर्जिषति[3], बिभ्रज्जिषति[4], बिभर्क्षति[5], बिभ्रक्षति[6], अबिभर्जिषीत् , अबिभ्रज्जिषीत् , अबिभर्क्षीत् , अबिभ्रक्षीत् । दम्भितुमिच्छति दिदम्भिषति । इडभावे–

**दम्भो धिप्धीप् ।४।१।१८॥** दम्भेः सकारादौ सनि

११–वृद्भ्यः स्यसनोरित्यात्मनेपदविकल्पे न वृद्भ्य इतीण्निषेधः ।
१२–कृतचृतेति वेट् । १३–कित्त्वान्न गुणः ।

१–इडभावे कित्त्वाद् गुणाभावे अनुनासिके चेत्यूट् , दीर्घः । २–इटि गुणे स्वरादेरिति धिशब्दस्य द्वित्वम् । ३–भृज्जो भर्जिति भर्जादेशः । ४–पक्षे सस्य शषाविति शः, तृतीय इति तृतीयः । ५–इडभावे यजसृजेति षः, षढोरिति कः, नाम्यन्तस्थेति षः । ६–भर्जादेशाभावे संयोगस्यादाविति सकारलुक् । ततः षत्वादि ।

परे धिप् धीप् इत्येतावादेशौ भवतो न चास्य द्विः । धिप्सति, धीप्सँति, अधिप्सीत्, अधीप्सीत् । श्रयितुमिच्छति शिश्रयिषति, शिश्रीर्षति ॥ युक् मिश्रणे ॥ अदादिरयम् । यवितुमिच्छति यियविषति, यूयूषति । ऊर्णुवितुमिच्छति ऊर्णुनुविषति, ऊर्णुनविषति, ऊर्णुनूषति, और्णुनुविषीत्, और्णुनविषीत्, और्णुनूषीत् । भर इति शव् विकरणे भृधातुः । भर्तुमिच्छति बिभरिषति, बुभूर्षति, बिभरिषते, बुभूर्षते ।

**ज्ञप्याप्यो ज्ञीपीप् न च द्विः सि सनि** ।४।१।१६॥ ज्ञपेरापेश्च सकारादौ सनि परे क्रमाद् ज्ञीप् ईप् इत्येतावादेशौ भवतः, न चानयोरेकस्वरोंशो द्विर्भवति । आप्तुमिच्छति ईप्सति, ऐप्सीत् । ज्ञपयितुमिच्छति जिज्ञपयिषति, ज्ञीप्सति । तनितुमिच्छति तितनिषति ॥

**तनो वा** ।४।१।१०५॥ तनोतेर्धुडादौ सनि परे स्वरस्य दीर्घो वा भवति । तितांसति[१२], तितंसति । पतितुमिच्छति पिपतिषति ॥

---

७–कित्वान्न गुणः । ८–कित्वाद् गुणाभावे स्वरहनिति दीर्घः । ९–इटि गुणावादेशौ । ओर्जान्तस्थेतीः । १०–वोर्णोरिति ङित्वाद् गुणाभावे धातोरित्युव् । ११–इटि गुणावादेशौ । १२–इडभावे दीर्घे शिड्हे इत्यनुस्वारः ।

**रभलभशकपतपदामिः ।४।१।२१॥** रभ्–लभ्–शक्–पत्–पद् एषां स्वरस्य सकारादौ सनि परे इकार आदेशो भवति, न चैषां द्विः। पित्सति[13]। वरीतुमिच्छति विवरीषति[14], विवरिषति, वुवूर्षति। विवरीषते, विवरिषते, वुवूर्षते[1]। तरीतुमिच्छति तितरीषति, तितरिषति, तितीर्षति। दरिद्रितुमिच्छति दिदरिद्रिषति, दिदरिद्रासति। अर्तुमिच्छति अरिरिषति, आरिरिषीत्[2]। स्मेतुमिच्छति सिस्मयिषते, असिस्मयिषीष्ट[3]। पवितुमिच्छति पिपविषते[4]। तदनुबन्धग्रहणे नाऽतदनुबन्धकस्य। पुपूषति, पुपूषते[5]॥

**न बदनं संयोगादिः ।४।१।५॥** स्वरादेर्धातोर्द्वितीयांशस्यैकस्वरस्य बदनाः संयोगस्याद्या द्विर्न भवन्ति। ततो अञ्जेः जिशब्दस्य द्वित्वम्[6]। अञ्जितुमिच्छति अञ्जिजिषति, आञ्जिजिषीत्। अशितुमिच्छति अशिशिषते। करीतुमिच्छति चिकरीषति, चिकरिषति। गलीतुमिच्छति जिगलिषति, जिगलीषति, जिगरीषति, जिगरिषति। आर्दितुमिच्छति आदिदरिषते, आदिदरिषिष्ट। आरब्धु-

१३–कित्वाद् गुणाभावः। १४–इटि गुणः। वृतो नवेति वा दीर्घः। १–इडभावे कित्वाद् गुणाभावे ओष्ठ्यादुरित्युरादेशे भ्वादेर्नामिन इति दीर्घः। २–अशित्यस्सन्नित्यात्लुक्। ३–ऋस्मीति इटि गुणे रिशब्दस्य द्विरुक्तिः। ४–स्मिपूङितीटि गुणायादेशौ। ५–अत्र पूङ्धातुः। ग्रहगुहश्च सन इतीण् निषेधः। ६–इटि जि शब्दस्य द्वित्वम्।

मिच्छति ईप्सते, आर्प्सिष्ट । लब्धुमिच्छति लिप्सते । अलिप्सिष्ट, स्थातुमिच्छति तिष्ठासति ।

**मिमीमादामित्स्वरस्य** ।४।१।२०॥ मि-मी-मा-इत्येतेषां दासंज्ञकानां च स्वरस्य सकारादौ सनि परे इत् इत्ययमादेशो भवति, न चैषां द्विः । दातुमिच्छति दित्सति दित्सते वा वस्त्रम् । विधातुमिच्छति विधित्सति विधित्सते वा जिनपूजाम् । पदिंच् गतौ । प्रतिपत्तुमिच्छति प्रतिपित्सते श्रुतम् । प्रत्यपित्सिष्ट ॥ अथ स्वार्थसन्नन्ताः ॥

**गुप्-तिजो गर्हाक्षान्तौ सन्** ।३।४।५॥ गुप् तिज् इत्येताभ्यां क्रमेण गर्हायां क्षान्तौ च वर्तमानाभ्यां स्वार्थे सन् प्रत्ययो भवति । गुपिर्गतौ शव्विकरण आत्मनेपदी ।

**स्वार्थे** ।४।४।६१॥ स्वार्थे विहितस्य सन आदिरिड् न भवति । जुगुप्सते । गर्हते इत्यर्थः । अजुगुप्सिष्ट ॥ तिजिः क्षमानिशानयोः शव्विकरण आत्मनेपदी ॥ तितिक्षते, सहत इत्यर्थः । अतितिक्षिष्ट ॥

**कितः संशयप्रतीकारे** ।३।४।६॥ कितो धातोः संशये प्रतीकारे च वर्तमानात् स्वार्थे सन् प्रत्ययो भवति । कित् धातुः शव्विकरणः आत्मनेपदी । विचिकित्सति, संशेते

---

[illegible] इति [illegible] । ८—[illegible] इति सत्वे [illegible] इति प्रथमस्ततः षः । कित्वान्न गुणः । ९—कित्वान्न गुणः ।

इत्यर्थः। चिकित्सति व्याधिम्, प्रतिकरोतीत्यर्थः। निग्रहो विनाशोऽपि चेह प्रतीकारः। चिकित्सति चौरम्, निगृह्णातीत्यर्थः। चिकित्सति क्षेत्रे तृणानि, नाशयतीत्यर्थः। अचिकित्सीत्।

**शान् दान् मान् बधान्निशानार्जव विचार-वैरूप्ये दीर्घश्चेतः** ।३।४।७।। शान्-दान्-मान्-बध् इत्येतेभ्यो यथासंख्यं निशाने आर्जवे विचारे वैरूप्ये चार्थे वर्त्तमानेभ्यः स्वार्थे सन् प्रत्ययो भवति, दीर्घश्चैषां द्विर्वचने सति पूर्वस्येकारस्य ॥ दानी तेजने। शानी अवखण्डने। मानि पूजायाम्। बधि बन्धने। एते शब्विकरणाः। तत्र निशाने शीशांसते, अशीशांसिष्ट, शीशांसति, अशीशांसीत्। आर्जवे दीदांसते, दीदांसति, अदीदांसिष्ट, अदीदांसीत्। विचारे मीमांसते, अमीमांसिष्ट। वैरूप्ये बीभत्सते, अबीभत्सीष्ट ॥ इति सन्नन्तप्रक्रिया ॥

## ॥ अथ यङ्न्त प्रक्रिया ॥

**व्यञ्जनादेरेकस्वराद् भृशाभीक्ष्ण्ये यङ् वा।** ३।४।९ भृशत्वविशिष्टे आभीक्ष्ण्यविशिष्टे चार्थे वर्त्तमानाद् धातोर्व्यञ्जनादेरेकस्वराद् यङ्प्रत्ययो वा भवति। स्वरादेरनेक-स्वराच्च धातोर्नायं विधिः। अवयवक्रियाणां क्रियान्तराव्य-वधानेन यथोचितक्रमेण साकल्येन निष्पत्तिर्भृशत्वम्।

---

१–गडदेति चतुर्थः, अघोष इति प्रथमः।

फलातिरेको वा भृशत्वम् । प्रधानक्रियायाः क्रियान्तराव्यवधानेनाऽऽवृत्तिराभीक्ष्ण्यम् । फलातिशयो यथावत्क्रियानिष्पत्तिश्च भृशत्वं, पौनःपुन्यमाभीक्ष्ण्यमिति यावत् । ङित्त्वादात्मनेपदी यङन्तः ॥

**आगुणावन्यादेः ।४।१।४८॥** धातोर्यङन्तस्य द्वित्वे सति पूर्वस्य नीमुरीरिरन्तवर्जितस्य आकारो गुणश्चासन्नौ भवतः । अकारस्य आकार इवर्णादेश्च गुण इति यावत् । न्यादिरागमो वक्ष्यमाणो बोध्यः । भृशं पुनः पुनर्वा पचतीति पापच्यते[2] । पापच्येत, पापच्यताम् । अपापच्यत ॥

**योऽशिति ।४।३।८०॥** व्यञ्जनान्ताद् धातोः परस्य यकारस्याऽशिति प्रत्यये परे लुग् भवति । अपापचिष्ट[3], पापचाञ्चक्रे, पापचिषीष्ट, पापचिता, पापचिष्यते, अपापचिष्यत ॥

**अट्यर्तिसूत्रिमूत्रिसूच्यशूर्णोः ।३।४।१०॥** अट्-ऋ-सूत्र-मूत्र-सूच-अश्-ऊर्णु-एभ्यो धातुभ्यो भृशाभीक्ष्ण्ये वर्तमानेभ्यो यङ् प्रत्ययो वा भवति । एषु केषाञ्चिद्व्यञ्जनादित्वात्केषाञ्चिदनेकस्वरत्वादूर्णोतेश्च उभयविरहादप्राप्ते विधिरयम् । भृशं पुनः पुनर्वाऽटतीत्यटाट्यते[4] । आटाटिष्ट,

---

२—सन्यङश्चेति द्वित्वं पूर्वस्याऽऽत्वम् । ३—अत इत्यलुक्, ततो यलोपः, यङन्तोऽनेकस्वरत्वात् सेट् । ४—स्वरादेरिति ट्यशब्दस्य द्वित्वम्, द्वित्वे व्यञ्जनस्येति य् लोपे आत्वं बोध्यम् ।

अटाटिता । पुनः पुनरतिशयेन वा इयर्तीति अरार्यते, आरार्यत, आरारिष्ट, अरारिता । पुनः पुनरतिशयेन वा सूत्रयते इति सोसूत्र्यते[2], असोसूत्रिष्ट । पुनः पुनरतिशयेन वा मूत्रयते इति मोमूत्र्यते, मोमूत्रिता । पुनः पुनरतिशयेन वा सूचयते इति सोसूच्यते, असोसूचिष्ट । पुनः पुनरतिशयेन वाऽश्नुतेऽश्नाति वा अशाश्यते[3], आशाशिष्ट । पुनः पुनर्भृशं वोर्णोतीत्यूर्णोनूयते, और्णोनूयिष्ट ॥

**गत्यर्थात् कुटिले** ।३।४।११॥ व्यञ्जनादेरेकस्वराद् गत्यर्थात् कुटिल एवार्थे वर्तमानाद् धातोर्यङ् भवति, न भृशाभीक्ष्ण्ये ॥

**मुरतोऽनुनासिकस्य** ।४।१।५१॥ अकारात्परो योऽनुनासिकस्तदन्तस्य धातोर्यङन्तस्य द्वित्वे सति पूर्वस्य मुरन्तो भवति । कुटिलं क्रामतीति चङ्क्रम्यते, अचङ्क्रमिष्ट ॥

**गॄलुपसदचरजपजभदशदहो गर्ह्ये** ।३।४।१२॥ गर्ह्य एवार्थे वर्तमानेभ्यो गॄ-लुप्-सद्-चर्-जप्-जभ्-दश्-दह्-इत्येतेभ्यो यङ्प्रत्ययो भवति, न भृशादिषु ॥

१-यङि क्ययङ्याशीरिति गुणः, अयि र इति र्य इत्यस्य द्वित्वम् । ततः पूर्वस्य आत्वम् । २-सूत्रमूत्रसूचा अदन्ताः, यङि अत इत्यलुक्, द्वित्वे पूर्वस्य गुणः । ३-स्वरादेरिति श्य इत्यस्य द्वित्वं पूर्वस्याऽऽत्वम् । ४-नुशब्दस्य द्वित्वम्; दीर्घश्च्वीति दीर्घः । ५-म्वागमे तौ मुम इति स्वानुस्वारानुनासिकौ ।

**ग्रो यङि** ।२।३।१०१।। यङि प्रत्यये परे ग्रिरते रेफस्य लकारादेशो भवति । गर्हितं गिलति जेगिल्यते, अजेगिलिष्ट । गर्हितं लुम्पति लोलुप्यते ।

**न वृद्धिश्चाविति क्ङिल्लोपे** ।४।३।११।। कितो ङितश्च लोपे सति अविति प्रत्यये गुणो वृद्धिश्च न भवतः । लोप इहादर्शनमात्रम् । तेनाकारयकारलोपाभ्यां यङोऽदर्शने सति न गुणः । लोलुपितासे, लोलुपिष्यते । गर्हितं निषीदति निषासद्यते, न्यषासदिष्ट ।।

**चरफलाम्** ।४।१।५३।। चर्-फल्-ञिफला इत्येषां यङन्तानां द्वित्वे सति पूर्वस्य मुरन्तो भवति ।।

**ति चोपान्त्यातोऽनोदुः** ।४।१।५४।। यङन्तानां चर्-फल्-ञिफला इत्येतेषां तकारादौ च प्रत्यये उपान्त्यस्यात उरादेशो भवति, तस्य गुणो न भवति । गर्हितं चरति चञ्चुर्यते, अचञ्चूरिष्ट, गर्हितं फलति पम्फुल्यते, अपम्फुलिष्ट ।।

**जपजभदहदशभञ्जपशः** ।४।१।५२।। जप्-जभ्-दश्-दह-भञ्ज-पश् एषां यङन्तानां द्वित्वे सति पूर्वस्य मुरन्तो भवति । गर्हितं जपति जञ्जप्यते, अजञ्जपिष्ट । गर्हितं

---

६—ऋतामितीरादेशे द्वित्वे पूर्वस्य गुणो रो लः । ७—उ इत्यादेशे भ्वादेर्नामिन इति दीर्घः । तौ मुम इति स्वानुस्वारानुनासिकौ ।

दशति दन्दश्यते, अदन्दशिष्ट। गर्हितं जभते इति जञ्जभ्यते, अजञ्जभिष्ट। गर्हितं दहति दन्दह्यते, अदन्दहिष्ट। गर्हितं भनक्तीति बम्भंज्यते,[1] अबम्भजिष्ट। गर्हितं पशति[2] पम्पश्यते, अपम्पशिष्ट॥

**न गृणाशुभरुचः** ।३।४।१३॥ गृणातिशुभिरुचिभ्यो भृशाभीक्ष्ण्यादौ यङ् न स्यात्। गर्हितं गृणाति, भृशं शोभते, भृशं रोचते वाक्यमेव॥

**ईर्व्यञ्जनेऽयपि** ।४।३।९७॥ गा-पा-स्था-सा-दा-माहाक् इत्येषां धातूनामन्त्यस्य यपूवर्जिते क्ङित्यशिति व्यञ्जनादौ प्रत्यये परे ई भवति। पुनः पुनर्भृशं वा गायतीति जेगीयते,[3] अजेगीयिष्ट। पुनः पुनर्भृशं वा पिबतीति पेपीयते पेपीयिता। पुनः पुनर्भृशं वा तिष्ठतीति तेष्ठीयते,[4] अतेष्ठीयिष्ट। पुनः पुनर्भृशं वा स्यतीति सेषीयते,[5] सेषीयाञ्चक्रे। सेषीयिता। दासंज्ञः-पुनः पुनरतिशयेन वा ददातीति देदीयते, अदेदीयिष्ट। पुनः पुनर्भृशं वा दधातीति देधीयते, अदेधीयिष्ट। पुनः पुन-

---

१-यङि उपान्त्यनलोपः। २-पश बन्धने शव्विकरणः परस्मैपदी। ३-गै धातोरादित्यात्वे ईकारादेशः, ततो द्विरुक्तिः, पर्जन्यवल्लक्षणप्रवृत्या दीर्घश्च्वीति दीर्घः। ४-अघोषे शिट इति शिड्लुक्। ५-षो इति धातोः षः स इति सत्वे आदित्यात्वम्।

भृशं वा मातीति मेमीयते, अमेमीयिष्ट। पुनः पुनरतिशयेन वा जहातीति जेहीयते, अजेहीयिष्ट ॥

घ्राध्मोर्यङि ।४।३।९८॥ घ्राध्मोर्यङि परे ईकारोन्तादेशो भवति। पुनः पुनर्भृशं वा जिघ्रतीति जेघ्रीयते, अजेघ्रीयिष्ट। पुनः पुनर्भृशं वा धमतीति देध्मीयते अदेध्मीयिष्ट ॥

हनोघ्नीर्वधे। ।४।३।९९॥ हन्तेर्हिंसायां वर्त्तमानस्य यङि घ्नी इत्यादेशो भवति। पुनः पुनर्भृशं वा हन्तीति जेघ्नीयते, अजेघ्नीयिष्ट। गतौ तु—जङ्घन्यते, अजङ्घनिष्ट ॥

क्ङिति यि शय् ।४।३।१०५॥ शीङः क्ङिति यकारादौ प्रत्यये शय् इत्यादेशो भवति। शाशय्यते, अशाशयिष्ट ॥

ऋतो रिः ।४।३।१०९॥ धातोरधातो र्वा ऋदन्तस्य ऋतः स्थाने रिरित्ययमादेशो भवति, च्वि-यङ्-यक्-क्येषु प्रत्ययेषु परेषु। पुनः पुनरतिशयेन वा करोतीति चेक्रियते, अचेक्रीयिष्ट। चेक्रीयिता ॥

ऋमतां रीः ।४।१।१५॥ ऋकारवतां धातूनां यङन्तानां द्वित्वे सति पूर्वस्य रीरन्तादेशो भवति ॥

---

६ –न्यागमे म्नामिति पञ्चमः। अङ्के हीति घः।

नृतेर्यङि ।२।३।९५।। नृतेर्धातोर्नकारस्य यङ्विषये णो न भवति । नरीनृत्यते, अनरीनृतिष्ट, नरीनृतिता । पुनः पुनरतिशयेन वा भिनत्तीति बेभिद्यते, बेभिदिता । पुनः पुनर्भृशं वा छिनत्तीति चेच्छिद्यते, चेच्छिदिता । पुनः पुनरतिशयेन वा पृच्छतीति परीपृच्छ्यते, अपरीपृच्छिष्ट । पुनः पुनरतिशयेन वा स्मरतीति सास्मर्यते[3], सास्मरिता ॥

वञ्चस्रंसध्वंसभ्रंशकसपतपदस्कन्दोऽन्तो नीः ४।१।५० ॥ वञ्च्-स्रंस्-ध्वंस्-भ्रंश्-कस्-पत्-पद्-स्कन्द्-एषां यङन्तानां द्वित्वे सति पूर्वस्य नीरन्तोऽवयवो भवति । पुनः पुनरतिशयेन वा वञ्चतीति वनीवच्यते[4], अवनीवचिष्ट । पुनः पुनरतिशयेन वा स्रसत इति सनीस्रस्यते । असनीस्रसिष्ट । पुनः पुनर्भृशं वा ध्वंसत इति दनीध्वस्यते, अदनीध्वसिष्ट । पुनः पुनर्भृशं वा भ्रंशत इति बनीभ्रश्यते, अबनीभ्रशिष्ट । पुनः पुनरतिशयेन वा कसतीति चनीकस्यते, अचनीकसिष्ट । पुनः पुनरतिशयेन वा पततीति पनीपत्यते, अपनीपतिष्ट । पुनः पुनरतिशयेन वा पद्यत इति पनीपद्यते अपनीपदिष्ट । पुनः पुनरतिशयेन वाऽऽस्कन्दतीत्याचनीस्कद्यते, आचनीस्कदिष्ट ॥

---

१–स्वरेभ्य इति द्विरुक्तिः, अघोषे इति प्रथमः । २–यङि ऋृत् । ३–क्ययङिति गुणे द्वित्वम् । ४–यङि नो व्यञ्जनस्यैति उपान्त्यनकारलुप् ।

**चायः की ।४।१।८६॥** चायृगित्यस्य यङि परे की इत्ययमादेशो भवति। पुनः पुनरतिशयेन वा चायतीति चेकीयते, अचेकीयिष्ट। पुनःपुनरतिशयेन वा वष्टीति वावश्यते, अवावशिष्ट। पुनः पुनरतिशयेन वा भवतीति बोभूयते[६], अबोभूयिष्ट, बोभूयाञ्चक्रे, बोभूयिता॥ इति यङन्तप्रक्रिया॥

## ॥ अथ यङ्लुबन्तप्रक्रिया॥

**बहुलं लुप् ।३।४।१४॥** यङो लुप् बहुलं भवति।
तिवा शवानुबन्धेन, निर्दिष्टं यद् गणेन च। एकस्वरनिमित्तं च, पञ्चैतानि न यङ्लुपि॥ तेनेह यङो ङित्त्वेऽप्यात्मनेपदं न, अनुबन्धनिर्दिष्टत्वात् 'इङित' इत्यस्य। श्यादयोऽपि न, दिवादिभ्य इत्यादिना गणनिर्दिष्टत्वात्। "यङ्लुप्चे" त्यादिगणसूत्राच्चादादित्वाच्छवपि न। यङ्लुबन्तं परस्मैपदं शेषत्वात्, शेषात्परस्मैपदमिति सूत्रात्। पुनः पुनरतिशयेन वा भवतीति बोभवीति, बोभोति[१]। बोभूतः[२], बोभुवति[३]। बोभवीषि, बोभोषि, बोभूथः, बोभूथ। बोभवीमि, बोभोमि, बोभूवः, बोभूमः। बोभूयात्, बोभूयुः बोभवीतु, बोभोतु,

---

५–अयङीति पर्युदासान्न य्वृत्। ६–ङिति गुणाप्रवृत्तौ दीर्घश्च्वीति पर्जन्यवल्लक्षणप्रवृत्त्या दीर्घः।

१–यङ्तुरुस्तोरितीदागमे गुणावादेशौ पूर्वस्य त्वागुणेति गुणः। २–अवेच्छितो ङित्त्वान्न गुणः। ३–अन्तो न इति नलुक्। ङित्त्वाद् गुणाभावे उव्।

बोभूतात्, बोभूहि[४], बोभूतात्, बोभूत, बोभवानि। अबोभवीत्, अबोभोत्, अबोभवुः[५]। अबोभूत्। वस्तुतस्तु न वृद्धिरित्यस्य अविति प्रत्यये यः क्वितो ङित्तश्च लोप इत्यर्थः। एवं यङ्लुपोऽनैमित्तिकत्वाद् गुणो भवत्येव। बेभिदितेत्यादौ यङन्ते तु यङो ङित्त्वाल्लुकः स्थानिवत्त्वाच्च न गुण इति ध्येयम्। ततश्च अबोभोदित्येव रूपम्। अत एव 'भवतेरि' त्यादिसूत्रे बृहद्वृत्तौ अबो[६]भोदिति प्रत्युदाहरणमपि सङ्गच्छते। एवं च मतान्तरसङ्ग्रहार्थमेव क्वितोङित्तश्च लोपे सतीत्यादिव्याख्या बृहद्वृत्तावादृतेति प्रतिभाति। अबोभोताम्, अबोभूवन्[७], अबोभूवम्, अबोभोम। बोभवाञ्चकार। बोभूयात्, बोभविता, बोभविष्यति, अबोभविष्यत्।

**रिरौ च लुपि** ।४।१।५६।। ऋमतां धातूनां यङो लुपि द्वित्वे सति पूर्वस्य रिरौ रीश्चान्तोऽवयवो भवति। पुनः पुनरतिशयेन वा करोतीति चरीकरीति, चरिकरीति, चर्करीति, चरीकर्ति, चरिकर्त्ति चर्कर्ति, चरीकृतः, चरिकृतः, चर्कृतः। चरीक्रति, चरिक्रति, चर्क्रति। अचरीकरुः, अचरिकरुः,

४–अविच्छितो ङित्वान्न गुणः। ५–द्व्युक्तजक्षेति पुस्, पुस्पाविति गुणेऽवादेशः। ६–सिज्लुपि गुणः। भवतेरिति नेह प्रवर्तते, तिव् निर्दिष्टत्वात्। एवं च सिज्लुप्यत्र तामादावपि च गुणः। अशित्त्वान्न ङित्त्वमिति ध्येयम्। ७–अभुव इति पर्युदासान्न पुस्। गुणे भुवो व इत्यूः। ८–ईदागमे गुणः।

अचर्करुः। अचरीकारीत्, अचरिकारीत्, अचर्कारीत्, अचरीकारिष्टामित्यादि। चर्करिता, चरीकरिता, चरिकरिता। नरीनृ[12]तीति, नरिनृतीति, नर्नृतीति, नरीनर्ति, नरिनर्ति, नर्नर्ति। वरीवृतीति, वरिवृतीति, वर्वृतीति, वरीवर्ति, वरिवर्ति, वर्वर्ति। पाप्रच्छीति, पा[10]प्रष्टि, पापृ[11]ष्टः पापृच्छति। पाप्रश्मि। पापृश्मः॥ इति यङ्लुबन्तप्रक्रिया॥

## ॥ अथ परस्मैपदप्रक्रिया॥

**शेषात् परस्मै ।३।३।१००॥** येभ्यो धातुभ्यो येन निमित्तेनात्मनेपदमुक्तं तद्रहिताद् धातोः कर्त्तरि परस्मैपदं भवति। भवति, जयति, तिष्ठतीत्यादि॥

**परानोः कृगः ।३।३।१०१॥** परानुभ्यामुपसर्गाभ्यां परात् करोतेः कर्तरि परस्मैपदमेव भवति। गित्वात्प्राप्तस्य विधिर्नियमार्थो बोध्यः। पराकरोति, अनुकरोति॥

**प्रत्यभ्यतेः क्षिपः ।३।३।१०२॥** प्रत्यभ्यतिभ्य उपसर्गेभ्यः परात् क्षिपेः कर्त्तरि परस्मैपदमेव भवति। प्रतिक्षिपति, अभिक्षिपति, अतिक्षिपति॥

**प्राद्वहः ।३।३।१०३॥** प्रपूर्वाद्वहेः कर्त्तरि परस्मैपदमेव भवति। प्रवहति॥

---

९—इटि गुणः। १०—अनुनासिके च च्छ्व इति शः, यजसृजेति षः। तवर्गस्येति टवर्गः। ११—ङित्वाद् य्वृत्, शः, षः, टः। १२—द्व्युक्तोपान्तस्येति गुणनिषेधः।

**परेर्मृषश्च** ।३।३।१०४॥ परिपूर्वान्मृषेर्वहेश्च कर्तरि परस्मैपदमेव भवति । परिमृष्यति, परिवहति ॥

**व्याङ्परेरमः** ।३।३।१०५॥ व्याङ्परिभ्यः परात् रमेः कर्त्तरि परस्मैपदं भवति । विरमति, विरमेत् , विरमतु, व्यरमत्, व्यरंसीत्[1] , विरराम, विरेमतुः[2], विरेमिथ, विररन्थ[3], विरम्यात्, विरन्ता[4], विरंस्यति[5], व्यरंस्यत् ॥ आरमति, परिरमति ॥

**वोपात्** ।३।३।१०६॥ उपाद् रमेः कर्त्तरि परस्मैपदं भवति वा । उपरमति भार्याम् । उपरमयतीत्यर्थः । उपरमत्यवद्यात् । एवमुपरमते ॥

**अणिगि प्राणिकर्तृकानाप्याण्णिगः** ।३।३।१०७॥ अणिगवस्थायां यः प्राणिकर्तृकोऽकर्मकश्च धातुस्तस्मात् णिगन्तात्कर्त्तरि परस्मैपदमेव भवति । शेते मैत्रः, शाययति मैत्रम्, अशीशयत् । आस्ते चैत्रः, आसयति चैत्रम्, आसीसयत् ॥

**चल्याहारार्थेङ्बुधयुधप्रुद्रुस्रुनशजनः** ।३।३।१०८॥ चलिरिह कम्पने । चल्यर्थेभ्य आहारार्थेभ्य इङ्-बुध्-युध्-प्रु-द्रु-स्रु-नश्-जन्-इत्येतेभ्यश्च णिगन्तेभ्यः कर्त्तरि परस्मैपदं

---

१–यमिरमिनमीतीट् सोन्तश्च । शिड्हे इत्यनुस्वारः । २–अनादेशादेरित्येवं द्वित्वक्त्यभावश्च । ३–म्नामिति पञ्चमः । ४–म्नामिति पञ्चमः ५–शिड्हेइत्यनुस्वारः ।

भवति । चल्यर्थः-चलयति, अचीचलत्, कम्पयति, अचकम्पत् । आहारार्थः-भोजयति, अबूभुजत्, आदयति, आदिदत्, खादयति, अचीखदत् । अध्यापयति, अध्यजीगपत्, अध्यापिपत् । बोधयति, अबूबुधत्, योधयति, अयूयुधत्, प्रावयति, अपिप्रवत्, द्रावयति, अदिद्रवत्, स्रावयति, असिस्रवत्, नाशयति, अनीनशत्, । जनयति, अजीजनत् ॥ इति परस्मैपदप्रक्रिया ॥

## ॥ अथात्मनेपदप्रक्रिया ॥

**इङितः कर्तरि ।३।३।२२॥** इकारेतो ङकारेतश्च धातोः कर्त्तर्यात्मनेपदं भवति । इदित्-एधते । ङित्-शेते ॥

**निविशः ।३।३।२४॥** निपूर्वाद्विशः कर्त्तर्यात्मनेपदं भवति । निविशते, न्यविक्षत, निवेष्टासे ॥

**परिव्यवात् क्रियः ।३।३।२७॥** परि-वि-अव इत्येतेभ्य उपसर्गेभ्यः परात् क्रीणातेः कर्त्तर्यात्मनेपदं भवति । परिक्रीणीते, पर्यक्रेष्ट । विक्रीणीते, अवक्रीणीते ॥

**परावेर्जेः ।३।३।२८॥** परा-वि इत्येताभ्यामुपसर्गाभ्यां पराज्जयतेः कर्त्तर्यात्मनेपदं भवति । पराजयते, पराजयत,

---

६-णिति वृद्धिः, घटादेरिति घटादित्वाद् ह्रस्वः ७-णौ क्रीत्यात्वे पुः ।
८-णौ सनीति गादेशो वा । ९-ओजन्तिस्थेति पूर्वस्य इः ।
१०-कगेवनू इति ह्रस्वः ।

१-हशिट इति सक्, यजसृजेति षः, षढोरिति कः, षः ।

पराजेष्ट, पराजेढ्वम् , पराजेड्ढ्वम् । पराजिग्ये, पराजिग्यिढ्वे, पराजिग्यिध्वे, पराजेषीढ्वम् , पराजेतासे । विजयते ॥

**अन्वाङ्परेः** ।३।३।३४॥ अनु–आङ्–परि इत्येभ्य उपसर्गेभ्यः परात् क्रीडतेः कर्त्तर्यात्मनेपदं भवति । अनुक्रीडते, अन्वक्रीडिष्ट, अनुचिक्रीडे, अनुक्रीडिषीष्ट, अनुक्रीडितासे, आक्रीडते, परिक्रीडते ॥

**भुनजोऽत्राणे** ।३।३।३७॥ पालनादन्यत्रार्थे वर्तमानाद् भुनक्तेः कर्त्तर्यात्मनेपदं भवति । अन्नं भुङ्क्ते, अभुक्त, बुभुजे, भुक्षीष्ट, भोक्तासे । पालने तु–महीं भुनक्ति ॥

**शदेः शिति** ।३।३।४१॥ शदेः शिद्विषयात्कर्तर्यात्मनेपदं भवति । शीयते, अशीयत । अशिति तु–अशदत् , शशाद ॥

**म्रियतेरद्यतन्याशिषि च** ।३।३।४२॥ म्रियतेरद्यतन्याशीर्विषयाच्छिद्विषयाच्च कर्त्तर्यात्मनेपदं भवति । म्रियते, अमृत, मृषीष्ट । अन्यत्र तु–ममार, मरिष्यति ॥

**द्युद्भ्योऽद्यतन्याम्** ।३।३।४५॥ द्युतादिभ्योऽद्यतनीविषये कर्त्तर्यात्मनेपदं वा भवति । अद्युतत् , अद्योतिष्ट ॥

**क्रमोऽनुपसर्गात्** ।३।३।४७॥ अविद्यमानोपसर्गात्क्रमेः कर्त्तर्यात्मनेपदं भवति । क्रमते, अक्रंस्त[२] ॥

२–क्रम इति नेट ।

**वेः स्वार्थे ।३।३।५०॥** पादविक्षेपेऽर्थे विद्यमानाद् वेः परात् क्रमेः कर्त्तर्यात्मनेपदं भवति । साधु विक्रमते वाजी ॥

**प्रोपादारम्भे ।३।३।५१॥** आरम्भेऽर्थे वर्त्तमानात् प्रोपाभ्यां परात्क्रमेः कर्त्तर्यात्मनेपदं भवति । प्रक्रमते, उपक्रमते । प्रारभते इत्यर्थः ॥

**आङो ज्योतिरुद्गमे ।३।३।५२॥** आङः परात्क्रमेः ज्योतिषां चन्द्रादीनामूर्ध्वगमनेऽर्थे वर्त्तमानात्कर्त्तर्यात्मनेपदं भवति । आक्रमते भानुः । उदयतीत्यर्थः ॥

**नुप्रच्छः ।३।३।५४॥** आङ्पूर्वान्नौतेः पृच्छतेश्च कर्त्तर्यात्मनेपदं भवति । आनुते शृगालः, उत्कण्ठितः शब्दं करोतीत्यर्थः । अत्रार्थ एवायं विधिर्नान्यत्र । आपृच्छते गुरून्, वियुज्यमानः पृच्छतीत्यर्थः । अत्रार्थ एवायं विधिः । आपृच्छत, आप्रष्ट[1], आपप्रच्छे, आप्रक्षीष्ट[2], आप्रष्टासे आप्रक्ष्यते ॥

**यमः स्वीकारे ।३।३।५९॥** उपाद् यमः स्वीकारेऽर्थे वर्त्तमानात्कर्त्तर्यात्मनेपदं भवति । कन्यामुपयच्छते, परिणयतीत्यर्थः ॥

**वा स्वीकृतौ ।४।३।४०॥** स्वीकृतौ वर्तमानाद् यमेः

---

१–घुड् ह्रस्वादिति सिज्लोपे अनुनासिके चेति शादेशे यजसृजेति षः । टवर्गः । २–शादेशे यजसृजेति षः, षढोरिति कः षः ।

पर आत्मनेपदविषयः सिच् किद्वद् वा भवति । उपायँत,[3] उपायंस्त, उपायसाताम्, उपायंसाताम्, उपयेमे, उपयंसीष्ट, उपयन्तासे ॥

**संविप्रावात्** ।३।३।६३॥ सम्-वि-प्र-अव एभ्य उपसर्गेभ्यः परात्तिष्ठतेः कर्त्तर्यात्मनेपदं भवति । संतिष्ठते, वितिष्ठते, प्रतिष्ठते, अवतिष्ठते ॥

**इश्च स्थादः** ।४।३।४१॥ तिष्ठतेर्दासंज्ञाच्च धातोः पर आत्मनेपदविषयः सिच् किद्वद् भवति, तत्सन्नियोगे च स्थादोरन्तस्येकारादेशो भवति । प्रास्थित,[4] प्रतस्थे, प्रस्थातासे ॥

**अवात्** ।३।३।६७॥ अवपूर्वाद् गिरतेः कर्त्तर्यात्मनेपदं भवति । अवगिरते, अवगिलते, अवागरीष्ट, अवागरिष्ट, अवागलीष्ट, अवागलिष्ट,[5] अवागीर्ष्ट, अवजगरे, अवजगले ॥

**अननोः सनः** ।३।३।७०॥ सन्नन्ताज्जानातेः कर्त्तर्यात्मनेपदं भवति स चेदनोरुपसर्गात्परो न भवति । धर्मं जिज्ञासते, अजिज्ञासीष्ट ॥

**श्रुवोऽनाङ्प्रतेः** ।३।३।७१॥ सन्नन्ताच्छृणोतेः

---

३–सिचः कित्त्वाद् यमिरमीति मकारलोपे धुड् ह्रस्वाद्दिति सिज्लुक् । पक्षे शिड्हे इत्यनुस्वारः । ४–कित्त्वाद् गुणाभावः, धुड् ह्रस्वादिति मिज्लुक् । ५–इट् सिजाशिषोरात्मने इति वृतो नवेति दीर्घः । पक्षे ऋवर्णादिति कित्त्वम्, ऋतामितीरि भ्वादेरिति दीर्घः । ६–स्कृच्छृत इति गुणः ।

कर्त्तर्यात्मनेपदं भवति स चेदाङ्प्रतिभ्यामुपसर्गाभ्यां परो न भवति । शुश्रूषते गुरून् ॥

**स्मृदृशः** ।३।३।७२॥ स्मृदृशिभ्यां सन्नन्ताभ्यां कर्त्तर्यात्मनेपदं भवति । सुस्मूर्षते पूर्ववृत्तम् , दिदृक्षते देवम् ॥

**ईगितः** ।३।३।९५॥ ईकारेतो गकारेतश्च धातोः फलवति कर्त्तर्यात्मनेपदं भवति । यजते, पचते, कुरुते ॥

**ज्ञोऽनुपसर्गात्** ।३।३।९६॥ अविद्यमानोपसर्गाज्जानातेःकर्तर्यात्मनेपदं भवति फलवति कर्तरि । गां जानीते, अज्ञास्त, जज्ञे ।

**वदोऽपात्** ।३।३।९७॥ अपपूर्वाद् वदतेः फलवति कर्त्तर्यात्मनेपदं भवति। एकान्तमपवदते, अपावदिष्ट, अपोदे, अपवदितासे ॥ इत्यात्मनेपदप्रक्रिया ॥

## ॥ अथ त्याद्यर्थप्रक्रिया ॥

**तत्साप्यानाप्यात्कर्मभावे कृत्यक्तखलर्थाश्च** ।३।३।२१॥ आत्मनेपदं कृत्यक्तखलर्थाश्च प्रत्ययाः सकर्मकाद् धातोः कर्मणि अकर्मकादविवक्षितकर्मकाच्च भावे भवन्ति । क्रियते कटश्चैत्रेण। भूयते त्वया । क्रियते भवता, । अत्र

७–कित्त्वाद् गुणाभावे स्वरहन्गमोरिति दीर्घः । ८–कित्त्वाद् गुणाभावे दीर्घे ओष्ठ्यादित्युर् । दीर्घः । ९–सनः कित्त्वाद् गुणाभावे यजसृजेति षः, षढोरिति कः षः ।

१–न्स्कसंयोगादिति कित्त्वे यजादिवचेरिति वृति, द्वित्वादिकार्यम् ।

२–रिः शेति रिः । ३–दीर्घश्च्वीति दीर्घः, [illegible] ।

करोतिरविवक्षितकर्मको बोध्यः ॥

**इङितः कर्त्तरि** ।३।३।२२॥ इकारेतो ङकारेतश्च धातोः कर्त्तर्यात्मनेपदं भवति। एधते, शेते ॥

**श्रुसद्वस्भ्यः परोक्षा वा** ।५।२।१॥ श्रु-सद्-वस् एभ्यो धातुभ्यो भूतार्थवृत्तिभ्यः परोक्षाविभक्तिर्वा भवति। उपशुश्राव। पक्षे यथाकालं प्रत्ययाः। उपाशृणोत्, उपाश्रौषीत्। उपससाद। पक्षे-उपासीदत्, उपासदत्। अनूवास, पक्षे अन्ववसत्, अन्ववात्सीत् ॥

**अद्यतनी** ५।२।४॥ भूतेऽर्थे वर्त्तमानाद् धातोरद्यतनी-विभक्तिर्भवति। अभूत्, अकार्षीत् ॥

**विशेषाविवक्षाव्यामिश्रे** ।५।२।५॥ अनद्यतनादि-विशेषस्याविवक्षायां व्यामिश्रणे च सति भूतेऽर्थे वर्त्तमानाद् धातोरद्यतनीविभक्तिर्भवति। अकार्ष कटम् ॥

**वाद्यतनी पुरादौ** ।५।२।१५॥ भूतानद्यतने परोक्षे चापरोक्षे चार्थे वर्त्तमानाद् धातोः पुरा इत्यादावुपपदे अद्य-तनीविभक्तिर्भवति वा। अवात्सुरिह पुराच्छात्राः। पक्षे-अवसन्, ऊषुरिति वा ॥

४-श्रौतीति सीदादेशः। ५-लृदिदित्यादिनाऽङ्। ६-यज्ञादीति य्वृत्, समानदीर्घः। ७-सस्त इति तादेशः। ८-इन्ध्यसंयोगाद्दिति क्त्वे यजादीति य्वृति द्वित्वादिकार्ये घस्वस इति षः।

**स्मे च वर्त्तमाना ।५।२।१६॥** भूतानद्यतने परोक्षे-चापरोक्षे वर्त्तमानाद्धातोः स्मशब्दे पुरादौ चोपपदे वर्त्तमाना विभक्तिर्भवति । वसन्तीह पुराच्छात्राः । पृच्छन्ति स्म पुरोधसम् ॥

**पुरायावतोर्वर्त्तमाना ।५।३।७॥** पुरायावतो र्निपात-योरुपपदयोर्वर्त्स्यति धात्वर्थे वर्त्तमानाद् धातोर्वर्त्तमाना विभक्तिर्भवति । पुरा भुङ्क्ते, यावद् भुङ्क्ते, भोक्ष्यते इत्यर्थः ॥

**कदाकर्ह्योर्न वा ।५।३।८॥** कदाकर्ह्योरुपपदयोर्वर्त्स्य-त्यर्थे वर्त्तमानाद् धातोर्वर्त्तमाना विभक्तिर्वा भवति । कदा भुङ्क्ते, भोक्ष्यत इत्यर्थः । पक्षे–कदा भोक्ष्यते । कदा भोक्ता । कर्हि भुङ्क्ते । पक्षे कर्हि भोक्ष्यते, कर्हि भोक्ता ॥

**सत्सामीप्ये सद्वद्वा ।५।४।१॥** वर्त्तमानस्य सामीप्ये भूते भविष्यति चार्थे वर्त्तमानाद् धातोर्वर्त्तमानावत्प्रत्यया वा भवन्ति । कदाऽऽगतोऽसि ? अयमागच्छामि, अयमागमम् । कदा गमिष्यसि ? एष गच्छामि, एष गमिष्यामि ॥

**सतीच्छार्थात् ।५।४।२४॥** वर्त्तमानेऽर्थे वर्त्तमानाद् धातोरिच्छार्थकात्सप्तमी वा भवति । इच्छेत्, इच्छति ॥

**आशिष्याशीः पञ्चम्यौ ।५।४।३८॥** आशीर्विशिष्टे-

ऽर्थे वर्त्तमानाद् धातोराशीः पञ्चम्यौ विभक्ती भवतः। जीयात्, जयतात् ॥

**माङ्यद्यतनी** ।५।४।३९॥ माङ्युपपदे धातोरद्यतनी-विभक्तिर्भवति। सर्वविभक्त्यपवादः। मा कार्षीदधर्मम् ॥

**सस्मे ह्यस्तनी च** ।५।४।४०॥ स्मशब्दसहिते माङ्यु-पपदेधातोर्ह्यस्तनी चकारादद्यतनी च विभक्तिर्भवति। मा स्म करोत्, मा स्म कार्षीत् ॥

**धातोः सम्बन्धे प्रत्ययाः** ।५।४।४१॥ धात्वर्थानां विशेषणविशेष्यभावे सति अयथाकालमपि प्रत्ययाः साधवो भवन्ति। वसन् ददर्श। भावि कृत्यमासीत् ॥

**इच्छार्थे कर्मणः सप्तमी** ।५।४।८९॥ इच्छार्थे धाता-वुपपदे तुल्यकर्तृकेऽर्थे वर्त्तमानात्कर्मभूताद् धातोर्विशेष्य-विशेषणभावे सति सप्तमीविभक्तिर्भवति। भुञ्जीयेतीच्छति ॥

॥ इतित्याद्यर्थप्रक्रिया ॥

## ॥ अथ नामधातुप्रक्रिया ॥

तत्र नाम्न परतः काम्यक्यङ्क्यन्णिच्क्विप्क्यङ् प्रत्ययेषु सत्सु तदन्तस्य क्रियावाचकत्वाद् धातुत्वमिति स नामप्रकृतिकत्वाद् धातुर्नामधातुः। काम्यादय उच्यन्ते।

१—अमाङेति पर्युदासान्नाट्। २—अमाङेति नाट्।

**द्वितीयायाः काम्यः ।३।४।२२॥** द्वितीयान्तान्नाम्न इच्छायामर्थे काम्यप्रत्ययो वा भवति ॥

**ऐकार्थ्ये ।३।२।८॥** ऐकार्थ्यमैकपद्यम्, तन्निमित्तस्य स्यादेर्लुप् भवति। पुत्रमिच्छति पुत्रकाम्यति[3], अपुत्रकाम्यत् पुत्रकाम्यतु, पुत्रकाम्येत्, अपुत्रकाम्यीत्[4], पुत्रकाम्याञ्चकार ॥

**व्यञ्जनात्पञ्चमान्तस्थायाः सरूपे वा ।१।३।४७॥** व्यञ्जनात्परस्य पञ्चमस्यान्तस्थायाश्च सरूपे वर्णे परे लुग् वा भवति। पुत्रकाम्यात्[1], पुत्रकाम्यिता पुत्रकाम्यिष्यति, अपुत्रकाम्यिष्यत् ॥

**अमाव्ययात्क्यन् च ।३।४।२३॥** अमकारान्तादनव्ययाच्च द्वितीयान्तान्नाम्न इच्छायामर्थे क्यन् प्रत्ययो वा भवति काम्यश्च ॥

**क्यनि ।४।३।११२॥** क्यनि परेऽवर्णान्तस्य ईकारोऽन्तादेशो भवति। दीर्घत्वापवादः। पुत्रमिच्छति पुत्रीयति, अपुत्रीयत्, पुत्रीयतु, पुत्रीयेत्, अपुत्रीयीत्[2], पुत्रीयाञ्चकार, पुत्रीय्यात्, पुत्रीयिता, पुत्रीयिष्यति, अपुत्रीयिष्यत्, अमेत्युक्तेः—इदंकाम्यति, ऐदंकाम्यीत् ॥

**आधाराच्चोपमानादाचारे ।३।४।२४॥** अमाव्ययादुपमानभूताद् द्वितीयान्ताद् आधाराच्चाचारेऽर्थे

३–शवि लुगास्येत्यलुक्। ४–अत इत्यलुक्।

१–अत इत्यलुक्, ततो यलुग्वा। २–लुगास्येत्यलुक्।

क्यन्प्रत्ययो वा भवति। पुत्रमिवाचरति पुत्रीयतिच्छात्रम्। प्रासादे इवाचरति प्रासादीयति कुट्यां भिक्षुः। धातुसंज्ञाप्रयोजके प्रत्यये चिकीर्षिते उपसर्गसमानाकार पूर्वपदं पृथक् क्रियते। प्रासादीयत्, प्रासादीयीत् ॥

**कर्तुः क्विप्गल्भक्लीबहोडात्तु ङित्** ।३।४।२५॥ कर्तुरुपमानान्नाम्न आचारेऽर्थे क्विप् प्रत्ययो वा भवति, गल्भक्लीबहोडेभ्यः पुनः स एव ङित्। तत एभ्य आत्मनेपदम्। अश्व इवाचरति अश्वति[3], आश्वत्[4], आश्वीत्[5], अश्वाञ्चकार, अश्व्यात्, अश्विता। प्रगल्भ इवाचरति प्रगल्भते, प्रागल्भत, प्रागल्भिष्ट, प्रगल्भाञ्चक्रे। क्लीबते, होडते ॥

**क्यङ्** ।३।४।२६॥ कर्तुरुपमानादाचारेऽर्थे क्यङ्प्रत्ययो वा भवति। हंस इवाचरति हंसायते[6], अहंसायिष्ट ॥

**सो वा लुक्च** ।३।४।२७॥ स इत्यावर्तते। तत्रैकं पञ्चम्यन्तमपरं षष्ठ्यन्तम्। सकारान्तात्कर्तुरुपमानादाचारेऽर्थे क्यङ्प्रत्ययो भवति अन्त्यसकारस्य च लुग् वा भवति। पय इवाचरति पयायते[7], पयस्यते[8], अपयायिष्ट,

**क्यो वा** ।४।३।८१॥ धातोर्व्यञ्जनात्परस्य क्यस्याऽशिति

---

३–शवि लुगस्येत्यलुक्। ४–स्वरादेरिति वृद्धिः। ५–लुगस्येत्यलुक्। आदिवृद्धिः। ६–दीर्घश्च्वीति दीर्घः। ७–दीर्घश्च्वीति दीर्घः। ८–अय्व्यञ्जने इत्युक्तेः पदत्वाभावान्न रुः।

प्रत्यये परे लुग्वा स्यात् । अपयसिष्ट, अपयस्यिष्ट । पयायिता, पयसिता[१], पयस्यिता, पयायिष्यते, पयसिष्यते, पयस्यिष्यते ॥

**ओजोऽप्सरसोः** ।३।४।२८॥ ओजःशब्दादप्सरःशब्दाच्च कर्तुरुपमानभूतादाचारेऽर्थे क्यङ् प्रत्ययो वा भवति सलोपश्च । ओजस्वीवाचरति ओजायते[१], औजायिष्ट । अप्सरायते, आप्सरायिष्ट ॥

**फेनोष्मबाष्पधूमादुद्वमने** ।३।४।३३॥ फेन–ऊष्मन्–बाष्प–धूम–एभ्यः कर्मभ्य उद्वमनेऽर्थे क्यङ्प्रत्ययो वा भवति । फेनमुद्वमति फेनायते, अफेनायिष्ट ।

**नं क्ये** ।१।१।२२॥ नकारान्तं नाम क्ये प्रत्यये परे पदसंज्ञं स्यात् । एवमूमाष्यते[२], बाष्पायते, धूमायते ॥

**सुखादेरनुभवे** ।३।४।३४॥ सुखादिभ्यः कर्मभ्योऽनुभवेऽर्थे क्यङ्प्रत्ययो वा भवति । सुखमनुभवति सुखायते, असुखायिष्ट । दुःखमनुभवति दुःखायते, अदुःखायिष्ट ॥

**शब्दादेः कृतौ वा** ।३।४।३५॥ शब्दादिभ्यः कर्मभ्यः करोत्यर्थे क्यङ् प्रत्ययो वा भवति । शब्दं करोति शब्दायते, अशब्दायिष्ट ॥

---

९–क्यो वेति वा यलुक् । १०–अत इत्युलुकि वा यलुक् ।

१–ओजः शब्दो वृत्तिविषये तद्वतीति बोध्यम् । दीर्घश्च्वीति दीर्घः ।

२–पदत्वान्नलोपे दीर्घश्च्वीति दीर्घः ।

**तपसः क्यन्** ।३।४।३६।। तपःशब्दात्कर्मणः करोत्यर्थे क्यन्प्रत्ययो वा भवति। तपः करोति तपस्यति, अतपसीत्[2], अतपस्यीत् ।।

**नमोवरिवश्चित्रङोऽर्चासेवाश्चर्ये** ।३।४।३७।। नमस्-वरिवस्-चित्रङ् इत्येभ्यः शब्देभ्यः कर्मभ्यो यथासंख्यं पूजासेवाश्चर्येष्वर्थेषु क्यन्प्रत्ययो वा भवति। नमस्करोति नमस्यति देवान्, अनमसीत्, अनमस्यीत्। नमसिता, नमस्यिता। वरिवः सेवां करोति वरिवस्यति गुरून्, अवरिवसीत्, अवरिवस्यीत्। चित्रमाश्चर्यं करोति चित्रीयते। चित्रङ् इति ङित्करणादात्मनेपदम्, अवयवेष्वचरितार्था अनुबन्धाः समुदायमुपकुर्वन्ति। अचित्रीयिष्ट ।।

**णिज्बहुलं नाम्नः कृगादिषु** । ३।४।४२।। कृगादीनां धातूनामर्थे नाम्नो णिच्प्रत्ययो भवति बहुलम् ।।

**त्रन्त्यस्वरादेः** ।७।४।४३।। तृप्रत्ययस्याऽन्त्यस्वरादेश्चावयवस्य इमनि णीष्ठेयस्सु च प्रत्ययेषु परेषु लुग्भवति। मुण्डं करोति मुण्डयति च्छात्रम्। अमुमुण्डत्। पटुं करोति पटयति[3], अपपटत्[4]। लघुं करोति लघयति, अललघत्। आदिना पटुमाचष्टे पटयतीत्यादि। एवमन्येऽपि प्रसिद्धा

२–क्यो वेत्यस्य अत इति लुकि कृते प्रवृत्तिरित्यलुकः स्थानिवद्भावाद् व्यञ्जनादेर्वेति न प्रवर्तते इति ध्येयम्। ३–उलुकः स्थानिवद्भावान्न वृद्धिः। ४–णौ समानलोपीति नेत्त्वादीति बोध्यम्।

ज्ञातव्याः। बहुलग्रहणं हि प्रयोगानुसरणार्थम्। तेन ओदनस्य पाकं करोतीत्यादौ न भवति ॥

**सत्यार्थवेदस्याः** ।३।४।४४।। सत्य-अर्थ-वेद-इत्येतेषां णिच्सन्नियोगे आकारोऽन्तादेशो भवति। सत्यमाचष्टे करोति वा सत्यापयति। असससत्यपत्। अर्थमाचष्टे करोति वा अर्थापयति, आर्तथपत्। वेदमाचष्टे करोति वा वेदापयति, अविवेदपत् ॥ इति नामधातुप्रक्रिया ॥

## ॥ अथ भावकर्मप्रक्रिया ॥

**क्यः शिति** ।३।४।।७०।। सर्वस्माद् धातोर्भावकर्मविहिते शिति क्यः प्रत्ययो भवति। तत्साप्यानाप्यादित्यादिना कर्मणि सकर्मकेभ्यो भावे चाऽकर्मकेभ्य आत्मनेपदप्रत्यया बोध्याः। यदर्थे प्रत्ययः स उक्तः। उक्ते कर्तरि कर्मणि च प्रथमा। अनुक्ते कर्त्तरि तृतीया, कर्मणि चानुक्ते द्वितीया। [2]क्रियते कटश्चैत्रेण। अक्रियत, क्रियताम्, क्रियेत॥

**भावकर्मणोः** ।३।४।६८।। सर्वस्माद् धातो र्भावकर्मविहितेऽद्यतन्यास्ते परे ञिच् प्रत्ययो भवति तलुक् च। अ[3]कारि ॥

---

१-अत्र अन्त्यस्वरादेरिति न प्रवर्तते आकारविधानसामर्थ्यात्। प्वागमः शवि गुणायादेशौ। २-रिः शक्येति रि इत्यादेशः, क्यस्य कित्त्वान्न गुणः। ३-ञिचि नामिन इति वृद्धिः।

**स्वर-ग्रह-दृश्-हन्भ्यः स्यसिजाशीःश्वस्तन्यां ञिट् वा ।३।४।६९॥** स्वरान्ताद् धातो ग्रह-दृश्-हन्-इत्येतेभ्यो धातुभ्यश्च विहितासु भावकर्मविषयासु स्यसिजाशीःश्वस्तनीषु ञिट् प्रत्ययो वा भवति । अकारिषाताम्, अकृषाताम्, अकारिषत, अकृषत, अकारिष्ठाः, अकृथाः । अकारिढ्वम्, अकारिध्वम् अकारिड्ढ्वम्, अकृढ्वम्, अकृड्ढ्वम् । चक्रे, चकृढ्वे । कारिषीष्ट, कृषीष्ट । कारिषीढ्वम्, कारिषीध्वम्, कृषीढ्वम् । कारितासे, कर्तासे । कारिष्यते, करिष्यते, अकारिष्यत, अकरिष्यत ॥ दीयते, अदीयत ॥

**आत ऐः कृञ्ञौ ।४।३।५३॥** आकारान्तस्य धातोर्ञ्णिति कृतिप्रत्यये ञौ च परे ऐकारान्तादेशो भवति । अदायि, अदायिषाताम्, अदिषाताम्, अदायिढ्वम्, अदायिध्वम्, अदायिड्ढ्वम्, अदिढ्वम्, अदिड्ढ्वम् । ददे, दायिषीष्ट, दासीष्ट, दायितासे, दातासे, दायिष्यते, दास्यते, अदायिष्यत, अदास्यत ॥ पीयते, अपायि, अपायिषाताम्, अपासाताम् । एवं ज्ञादीनामपि । गृह्यते, अग्राहि, अग्राहिषाताम्, अग्रहीषाताम् । जगृहे, जगृहिढ्वे, जगृहिध्वे । ग्राहिषीष्ट, ग्रही-

---

४-ञिटि वृद्धिः, षः । ५-ऋवर्णादिति कित्वाद् गुणवृद्ध्यभावः । ६-ईर्व्यञ्जन इति ईः । ७-आयादेशः । ८-इश्च स्थाद इति इः कित्वं च

१-ग्रहव्रश्चेति य्वृत् । २-इटि गृह्णोऽपरोक्षायामिति दीर्घः ।

षीष्ट, ग्राहितासे, ग्रहीतासे । दृश्यते, अदर्शि[3], अदर्शिषाताम्, अदृक्षाताम्[4], अदर्शिषत, अदृक्षन्त । ददृशे, दर्शिषीष्ट दृक्षीष्ट, दर्शितासे, द्रष्टासे, दर्शिष्यते, द्रक्ष्यते । हन्यते, अवधि[5], अघानि[6], अवधिषाताम्, अघानिषाताम् ॥

**हनः सिच् ।४।३।३८॥** हन्तेः पर आत्मनेपदविषयः सिच् किद्वद् भवति । अहसाताँ[7]म्, जघ्ने[8], घानिषीष्ट, हंसीष्ट घानिता, हन्ता, घानिष्यंते[9] ॥

**ये नवा ।४।२।६२॥** खन्-सन्-जन् इत्येषां धातूनां ये क्ङिति प्रत्यये अन्तस्याऽऽकारो वा भवति । खायते[10], खन्यते, अखायत, अखन्यत, अखानि, अखनिषाताम्[11], अखनिषत । चख्ने[12], खनिषीष्ट, खनितासे । सायते, सन्यते, असानि, असनिषाताम् । सेने, सनिषीष्ट, सनितासे ॥

**तनः क्ये ।४।२।६३॥** तनोतेरन्तस्य क्ये परे आकारो वा भवति । तायते, तन्यते । अतानि, अतनिषाताम्, तेने, तनिषीष्ट, तनितासे ।

---

३–ञिटि गुणः । ४–हशिट इति सक्, यजसृजेति षः, षढोरिति कः, नाम्यन्तस्थेति षः । स्वरेऽत इत्यलोपः । ५–अद्यतन्यां वा त्विति वधादेशः, अत इत्यलुक्, तस्य स्थानिवत्त्वान्न वृद्धिः । ६–ञिणवीति घनादेशः । ७–यमिरमीति न लोपः । ८–अङेहीति घः, गमहनेत्युपान्त्यलुक् । ९–हनृत इतीट् । १०–आत्वे समानदीर्घः । ११–स्ताद्यशित इतीट् । १२–कित्त्वाद् गमहनेत्युपान्त्यलुक् ।

**मोऽकमियमिरमिनमिगमिवमाचमः** ।४।३।५५॥ कम्–यम्–रम्–नम्–गम्–वम्–आचम्–एतैर्विना मान्तस्य धातोर्ञ्णिति कृति ञौ च परे वृद्धिर्न भवति। शम्यते, अशमि, शेमे, शमितासे। भावे आत्मनेपदम्, शान्तौ शमेरकर्मकत्वात्। भावे चौत्सर्गिकमेकवचनं युष्मदस्मत्सामानाधिकरण्याभावात् क्रियायाश्च संख्याभावात्। अविवक्षितकर्मकादपि–किं करोतीति क्रियाप्रश्ने पचतीत्युत्तरे क्रियामात्रस्यैव विवक्षा, तावतैव जिज्ञासानिवृत्तेः। इत्थमेव कर्मणोऽविवक्षाऽन्यत्राप्यूह्या। तत्र भावे आत्मनेपदं क्यश्चेति पच्यते, अपाचि, पेचे, पक्षीष्ट[1], पक्तासे, पक्ष्यते। कम्यादेस्तु कम्यते, अकामि, अकमिषाताम्, यम्यते, अयामि, उपायामि, उपायसाताम्[2], उपायंसाताम्, उपयेमे, उपायंसीष्ट, उपायन्तासे[3], रम्यते, अरामि, रेमे, रंसीष्ट, रन्तासे। नम्यते, अनामि, अनंसाताम्, नेमे, नंसीष्ट, नन्तासे। गम्यते, अगामि॥

**गमो वा** ।४।३।३७॥ गमेः परे आत्मनेपदविषये सिजाशिषौ किद्वद् वा भवतः। अगसाताम्[4], अगंसाताम्, जग्मे, गसीष्ट, गंसीष्ट, गन्ता, गंस्यते। वम्यते, अवामि, अवमिषाताम्, वेमे[6], ववमे, वमिषीष्ट, वमितासे। आचम्यते,

१–चज इति कः, नाम्यन्तस्थेति षः। २–वा स्वीकृताविति कित्त्वे यमिरमीति मकारलोपः। पक्षे शिड्हे इत्यनुस्वारः। ३–म्नामिति पञ्चमः। ४–गमो वेति कित्त्वे यमिरमीति मकारलोपः। पक्षे शिड्हे इत्यनुस्वारः। ५–इन्ध्यसंयोगादिति कित्त्वे गमहनेत्युपान्त्यलोपः ६–जॄभ्रमेति वा एकारो द्वित्वनिषेधश्च।

आचामि, आचमिषाताम् , आचेमे, आचमिषीष्ट । उपसर्गान्तर-पूर्वान्निरुपसर्गाच्च चमेर्वृद्धिर्न भवति । अचमि । पठ्यते, अपाठि, अपठिषाताम् , पेठे, पठिषीष्ट, पठितासे । स्थीयँते, अस्थीयत, अस्थायि, तस्थे, स्थासीष्ट, स्थातासे । भूयते, अभावि । अनुभूयते, अन्वभावि, अन्वभाविषाताम् , अन्वभविषाताम् , अनुबभूवे, अनुबभूविद्वे, अनुबभूविध्वे, अनुभाविषीष्ट, अनुभविषीष्ट, अनुभावितासे, अनुभवितासे, अनुभाविष्यते, अनुभविष्यते, अन्वभाविष्यत, अन्वभविष्यत ॥ उपसर्गवशाद् धातोरर्थान्तरवृत्तितयाऽकर्मकोऽपि सकर्मकः । उपस्थीयते, उपास्थायि, उपास्थायिषाताम् , उपास्थासाताम् , उपतस्थे, उपस्थायिषीष्ट, उपस्थासीष्ट, उपस्थायिषीढ्वम् , उपस्थासीध्वम् , उपस्थायिता, उपस्थाता ॥ "लज्जासत्ता-जागरण-स्थितिवृद्धिक्षयजीवितमरणे । शयनक्रीडारुचि-दीप्त्यादौ, धातुरकर्मक इष्टः शास्त्रे" ॥१॥ निष्कर्षस्तु–धातु-वाच्यव्यापारफलयोः सामानाधिकरण्येऽकर्मकता क्रियायाः, तयोर्वैयधिकरण्ये पुनः सकर्मकता । तदुक्तम्–"फलव्यापार-योरेक-निष्ठतायामकर्मकः । धातुस्तयोर्धर्मिभेदे, सकर्मक उदाहृतः ॥१॥ इति । क्रियाया अकर्मकत्वसकर्मकत्वे तद्वाचकधातुषूपचर्यंते । भावो धात्वर्थः क्रिया । फलाश्रयः कर्म व्यापाराश्रयश्च कर्ता ॥ "धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोप-

७–ईर्व्यञ्जन इति ईः । ८–सकर्मकत्वात्कर्मणि त्यादिः, दीर्घश्च्वीति दीर्घः । ९-ञिटि वृद्धावाव् । पक्षे गुणप्रवादेशौ ।

सङ्ग्रहात् । प्रसिद्धेरविवक्षातः, कर्मणोऽकर्मिका क्रिया ॥१॥ उत्तपते पाणिम् , तपति रविः । शब्दायति मेघः । नदी वहति । पचति चैत्रः ॥ "गौणे कर्मणि दुह्यादेः, प्रधाने नीहृकृष्वहाम् । बुद्धिभक्षार्थयोः शब्दकर्मकाणां निजेच्छया ॥१॥ प्रयोज्यकर्मण्यन्येषां ण्यन्तानां त्यादयो मताः ॥ इति । दुह्यादेर्गौणे कर्मणि त्यादेश्च प्रधाने कर्मणि त्यादयः । बुद्ध्यर्थभक्षार्थशब्दकर्मकाणां ण्यन्तानां प्रयोज्ये कर्मणि मुख्ये वा त्यादयः । अन्येषां ण्यन्तानां तु प्रयोज्ये कर्मणि त्यादय इत्याशयः । यदर्थं क्रियाऽऽरभ्यते तन्मुख्यं कर्म, तत्सिद्धये च यदन्यत्क्रियया‌ऽऽप्यते तद् गौणं कर्मेति विवेकः । गां दोग्धि पयः, गौः पयो दुह्यते । अजां नयति ग्रामम् , अजा ग्रामं नीयते । एवमन्यदप्यूह्यम् ॥ दुहादयश्च यथा- "दुह् याच्पच्दण्डरुधिप्रच्छिचिब्रूशासूजिमन्थमुषो नीहृकृष्वहश्च ।" एषां धातूनामर्थे वर्त्तमाना अन्येऽपि द्विकर्मकाः, अर्थनिबन्धनं हि द्विकर्मकत्वमिति ध्येयम् ॥

इति भावकर्मप्रक्रिया ॥

## ॥ अथ कर्मकर्तृप्रक्रिया ॥

यदा सौकर्यातिशयादि द्योतयितुं कर्तृव्यापारो न विवक्ष्यते तदा कारकान्तराण्यपि कर्तृसंज्ञां लभन्ते, स्वव्यापारे स्वतन्त्रत्वात् । तदुक्तम्-"स्वव्यापारेषु कर्तृत्वं, सर्वत्रैवास्ति *कारके । व्यापारभेदापेक्षायां, करणत्वादिसम्भवः ॥१॥* इति ।

एवं च कर्तृव्यापारापेक्षया पूर्वं करणत्वादिसद्भावेऽपि सम्प्रति कर्तृव्यापाराविवक्षायां स्वव्यापारे कर्तृत्वात्कर्तरि विभक्तिः करणादेः। यथा साध्वसिश्छिनत्ति, स्थाली पचतीत्यादि। कर्मणस्तु कर्तृत्वविवक्षायां कर्मणोऽभावात् प्राक् सकर्मका अपि सम्प्रत्यकर्मका इति तेभ्यो भावे कर्त्तरि च प्रत्ययः। तत्र भावे-पच्यते ओदनेन, भिद्यते काष्ठेनेत्यादि। कर्तरि प्रत्यये तु-

**एकधातौ कर्मक्रिययैकाकर्मक्रिये ।३।४।८६॥** एकस्मिन् धातौ कर्मस्थक्रियया पूर्वदृष्टया एका=अभिन्ना सम्प्रत्यकर्मिका क्रिया यस्य तस्मिन् कर्तरि कर्मकर्तृरूपे धातो ञिक्यात्मनेपदानि तथा भवन्ति। कर्मणि भावे वा यथा भवन्ति तथा भवन्तीत्याशयः। यत्र कर्मणि क्रियाकृतो विशेष उपलभ्यते सा क्रिया कर्मस्था पाकादिका। पच्यते ओदनः स्वयमेव, क्रियते कटः स्वयमेव, अभेदि काष्ठं स्वयमेव ॥

**रुधः ।३।४।८९॥** रुधो धातोः कर्मकर्तरि ञिचून भवति। अरुद्ध गौः स्वयमेव ॥

**स्वरदुहो वा ।३।४।९०॥** स्वरान्ताद् धातोर्दुहेश्च कर्मकर्तरि ञिच् वा न भवति। अकृत अकारि वा कटः स्वयमेव। अदुग्ध अदोहि वा गौः स्वयमेव ॥

---

१-धुड् ह्स्वादिति सिज्लुक्। सिजाशिषाविति कित्त्वान्न गुणः। अघ इति घः, तृतीयः। २-भ्वादेर्दादेरिति घः, अघ इति चतुर्थः। तृतीय इति तृतीयः, गुणस्तु कित्त्वान्न।

**भूषार्थसन्किरादिभ्यश्च ञिक्यौ ।३।४।९३॥** भूषार्थेभ्यः सन्नन्तेभ्यः किरादिभ्यो ण्यादिभ्यश्च धातुभ्यः कर्मकर्तरि ञिक्यौ न भवतः । अलंकुरुते अलंकरिष्यते अलमकृत वा कन्या स्वयमेव ॥ इति कर्मकर्तृप्रक्रिया ॥

## अथ कृदन्ते कृत्यप्रक्रिया

**आ तुमोऽत्यादिः कृत् ।५।१।१॥** धातोर्विधीयमानस्त्यादिवर्जितो वक्ष्यमाणः प्रत्ययस्तुममभिव्याप्य कृत्संज्ञो भवति ॥

**ते कृत्याः ।५।१।४७॥** ध्यण्–तव्य–अनीय–य–क्यप् इत्येते प्रत्ययाः कृत्यसंज्ञका भवन्ति। ते च तत्साप्यानाप्यादिति भावकर्मणोर्बोध्याः ॥

**ऋवर्णव्यञ्जनाद् घ्यण् ।५।१।१७॥** ऋवर्णान्ताद् व्यञ्जनान्ताच्च धातोर्घ्यण् प्रत्ययो भवति । कार्यम्,[3] हार्यम्, धार्यम्, पाच्यम्[4] ॥

**क्तेऽनिटश्चजोः कगौ घिति ।४।१।१११॥** क्तेऽनिटो धातोश्चकारजकारयोः स्थाने घिति प्रत्यये यथासंख्यं कगौ भवतः। भङ्ग्यम्,[5] योग्यम्, भोग्यम्[6] ॥

---

३–कृदन्तेभ्यः सर्वेभ्य एव नामसंज्ञायां स्यादिविभक्तिः, नामिन इति वृद्धिः। ४–ञ्णितीति वृद्धिः । ५–म्नां धुडिति पञ्चमः । ६–लघोरुपान्त्यस्येति गुणः ।

**वचोऽशब्दनाम्नि ।४।१।११९॥** अशब्दसंज्ञायां गम्यमानायां वचेर्घ्यणि को न भवति । वाच्योऽर्थः । शब्दे तु वाक्यम् ॥

**प्रैषानुज्ञावसरे कृत्यपञ्चम्यौ ।५।४।२९॥** प्रैषानुज्ञावसरेषु गम्यमानेषु धातोः कृत्यप्रत्ययाः पञ्चमी च विभक्ति भवति ॥ न्यत्कारपूर्विका प्रेरणा प्रैषः । अनुज्ञा कामचारानुमतिः । अतिसर्ग इति यावत् । अवसरः प्राप्तकालता । निमित्तभूतकालोपनतिरिति यावत् ॥

**शक्तार्हे कृत्याश्च ।५।४।३५॥** शक्तेऽर्हे च कर्तरि गम्यमाने धातोः कृत्याः सप्तमी च भवति । भवता खलु कटः कार्यः । अत्र हि भवान् हि प्रेषितोऽनुज्ञातः शक्तोऽर्हः, भवतोऽवसरः कटकरणे इति वा गम्यते । एवमन्यत्रापि यथायथमूह्यम् ॥

**निप्राद् युजः शक्ये ।४।१।११६॥** निप्राभ्यां परस्य युजः शक्येऽर्थे गम्यमाने ध्यणि परे गो न भवति । नियोक्तुं शक्यो नियोज्यः, प्रयोक्तुं शक्यः प्रयोज्यः । अन्यत्र तु नियोग्यः प्रयोग्यः ॥

**भुजो भक्ष्ये ।४।१।११७॥** भक्ष्येऽर्थे ध्यणि परे गो न स्यात् । भुज्यत इदं भोज्यमन्नादि । अन्यत्र भोग्या भूः ॥

**त्यजयजप्रवचः** ।४।१।११८॥ त्यज्–यज्–प्रवच् एषां घ्यणि कगौ न भवतः। अत एव निषेधाच्छङ्कितकीत्यपवादं बाधित्वा यजे र्घ्यणिति बोध्यम्। त्याज्यम्, याज्यम्। वचेः सोपर्गस्य चेत्प्रपूर्वस्यैव निषेध इति प्रग्रहणात्सूच्यते। प्रवाच्यः पाठः॥

**उवर्णादावश्यके** ।५।१।१९॥ अवश्यंभावे द्योत्ये उवर्णान्ताद् धातोर्घ्यण् भवति। अवश्यं भवितुं शक्यादि लाव्यम्, पाव्यम्, भाव्यम्। अवश्यंशब्देनाऽप्यवश्यंभावो द्योत्यते। लाव्यमवश्यम्, पाव्यमवश्यम्॥

**कृत्येऽवश्यमो लुक्** ।३।२।१३८॥ अवश्यम्, शब्दस्य कृत्यप्रत्ययान्ते उत्तरपदे लुक् अन्तादेशो भवति। समासस्य चरमपदमुत्तरपदम्। अवश्यकार्यम्, अवश्यलाव्यम्। नामनाम्नेति मयूरव्यंसकादित्वाद्वा समासः। समासविकल्पे अवश्यम्कार्यमित्यादि वाक्यमेव। एवं तव्यादावपि॥

**घ्यण्यावश्यके** ।४।१।११५॥ अवश्यंभावे द्योत्ये जाते घ्यणि प्रत्यये परतो धातोश्चजोः कगौ न भवतः। अवश्यपाच्यम्। अवश्यं पाच्यम्। रञ्ज्यमवश्यम्॥

**तव्यानीयौ** ।५।१।२७॥ धातोः परौ तव्य अनीय

१—नामिन इति वृद्धौ य्यक्य इत्यादू।

इत्येतौ प्रत्ययौ भवतः। शयितव्यम्[2], शयनीयम्। वस्तव्यम्[3], वसनीयम्॥

**असरूपोऽपवादे वोत्सर्गः प्राक् क्तेः ।५।१।१६॥** इतः सूत्रादारभ्य स्त्रियां क्तिरित्यतः प्राक् योऽपवादस्तद्विषयेऽसमानरूप औत्सर्गिकः प्रत्ययो वा भवति। कर्त्तव्यः[4] करणीयः कार्यो वा कटस्त्वया। अवश्यं लाव्यं लवितव्यं[5] लवनीयम्। एवमन्यत्रापि बोध्यम्॥

**य एच्चातः ।५।१।२८॥** स्वरान्ताद् धातोर्यः प्रत्ययो भवति, अन्त्याकारस्य चैकारो भवति। चेयम्, जेयम्, देयम्, धेयम्, ध्येयम्[6], ग्लेयम्, गेयम्, नेयम्, शेयम्, लव्यम्[7], भव्यम्, ऋवर्णान्तात्तु घ्यणेव॥

**शकितकिचतियतिशसिसहियजिभजिपवर्गात् ।५।१।२९॥** शक्-तक्-चत्-यत्-शस्-सह्-यज्-भज्-एभ्यः पवर्गान्तेभ्यश्च धातुभ्यो यः प्रत्ययो भवति। घ्यणोऽपवादः। शक्यम्, तक्यम्, चत्यम्, यत्यम्, शस्यम्, सह्यम्, यज्यम्, भज्यम्, गोप्यम्, लभ्यम्, गम्यम्। यजेस्त्यजयजेति-निषेधाद् भजेश्च बाहुलकाद् घ्यणपि। तथा च सूत्रम्—

**बहुलम् ।५।१।२॥** अधिकारोऽयम्। कृत्प्रत्ययो यथा

---

२–इति गुणावादेशौ। ३–इण्निषेधः। ४–इण्निषेधे गुणः। ५–इति गुणावादेशौ। ६–आत्सन्ध्यक्षरेत्याइत्वम्। ७–गुणे व्यक्य इस्यवादेशः।

निर्दिष्टादर्थादेरन्यत्रापि बहुलं[1] भवति। याज्यम्, भोग्यम्[2]। आवश्यके तु भाज्यम्॥

**यममदगदोऽनुपसर्गात्** ।५।१।३०॥ यम्-मद्-गद्-एभ्योऽनुपसर्गेभ्यो यः प्रत्ययो भवति। यम्यम्, मद्यम्, गद्यम्। यमोऽनुपसर्गादेवेति नियमः। नियम्यमिति बाहुलकात्। माद्यत्यनेनेति मद्यम्, बाहुलकात्करणेऽपि। प्रमाद्यम्, निगाद्यम्[3]॥

**क्षय्यजय्यौ शक्तौ** ।४।३।९०॥ क्षि-जि इत्येतयोः शक्तौ गम्यमानायां यप्रत्यये अयन्तादेशो निपात्यते। क्षेतुं शक्यः क्षय्यो[4] व्याधिः। जेतुं शक्यो जय्यः शत्रुः। अर्हार्थे क्षेयं जेयम्॥

**क्रय्यः क्रयार्थे** ।४।३।९१॥ क्रीणातेर्यप्रत्यये अयन्तादेशो निपात्यते क्रयाय चेत्प्रसारितोऽभिधेयो भवति। क्रेतारः क्रीणीयुरिति बुद्धया आपणे प्रसारितं क्रय्यम्। अन्यत्र तु क्रेयं नो धान्यं न चास्ति प्रसारितमापणे॥

**वह्यं करणे** ।५।१।३४॥ वहेः करणे यो निपात्यते। वहन्ति अनेन वह्यं शकटम्, वाह्यमन्यत्॥

**नाम्नो वदः क्यप् च** ।५।१।३५॥ अनुपसर्गान्नाम्नः

१—क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः, क्वचिद्विभाषा, क्वचिदन्यदेव। विधेर्विधानं बहुधा समीक्ष्य, चतुर्विधं बाहुलकं वदन्ति॥१॥ २—घ्यणि क्तेऽनिट इति गः। ३—सोपसर्गाद् घ्यण्। ४—गुणे निपातनादयादेशः।

पराद् वदेः क्यप् यश्च प्रत्ययौ भवतः। ब्रह्मोद्यम्[5], ब्रह्मवद्यम्। सत्योद्यम्, सत्यवद्यम्॥

**हत्याभूयं भावे** ।५।१।३६॥ अनुपसर्गान्नाम्नः परौ हत्या भूय इत्येतौ भावे क्यबन्तौ निपात्येते। ब्रह्मणो हननं ब्रह्महत्या[6], भ्रूणहत्या। स्त्रीत्वं लोकात्। भवते नपुंसके भावे क्यप्। ब्रह्मभूयं गतः, देवभूयं गतः, ब्रह्मत्वं देवत्वं गत इत्यर्थः। हन्ते र्भावेध्यण्[1] न भवत्यनभिधानात्॥

**खेयमृषोद्ये** ।५।१।३७॥ खेय-मृषोद्य इत्येतौ क्यबन्तौ निपात्येते। खनेर्घ्यणोऽपवादः क्यप्, अन्त्यस्वरादेरेकारश्च। खेयम्, निखेयम्, उत्खेयम्। मृषापूर्वाद्वदतेः[2] क्यप्। मृषोद्यम्, कर्मणि भावे वा। उच्छ्रायसौन्दर्यगुणा मृषोद्याः॥

**दृवृग्स्तुजुषेतिशासः** ।५।१।४०॥ दृ-वृ-स्तु-जुष्-इ-शास्-एभ्यः क्यप् भवति॥

**ह्रस्वस्य तः पित्कृति** ।४।४।११४॥ ह्रस्वान्तस्य धातोः पिति कृत्प्रत्यये तोऽन्तो भवति। आदृत्यः, प्रावृत्यः, स्तुत्यः, अवश्यस्तुत्यः, । जुष्यः, एतीतीणिकोर्ग्रहणम्। इत्यः, अधीत्यः[3]। शिष्यः[3]। आशासेस्तु आशास्यम्॥

**ऋदुपान्त्यादकृपिचृदृचः** ।५।१।१४॥ ऋदुपान्त्याद्

---

५—क्यपि यजादिवचेरिति य्वृति समासे नाम्नो न इति नलोपे सन्धिः।

६—हन्तेः स्त्रीभावे क्यप् तकारश्चान्तादेशः। समासे नलोपे आदित्याप्।

१—परत्वात्क्यबेव न घ्यण्। २—पूर्वं पूर्वोत्तरपदयोः कार्यं पश्चात् सन्धिकार्यम्। ३—क्यपि इसास इतीसादेशे नाम्यन्तस्थेति षः।

धातोः कृपि चृति ऋचिवर्जितात् क्यप्प्रत्ययो भवति। वृत्यम्, गृध्यम्। अकृपिचृदृच इति किम्? कल्प्यम्, चर्त्यम्, अर्च्यम् ॥

**कृवृषिमृजिशंसिगुहिदुहिजपो वा ।५।१।४२॥** कृ-वृष्-मृज्-शंस्-गुह्-दुह् जप्-एभ्यः क्यप् प्रत्ययो वा भवति। कृत्यम्, कार्यम्, वृष्यम्, वर्ष्यम्, मृज्यम्, मार्ग्यम्, आवश्यके मार्ज्यम्। शस्यम्, शंस्यम्। गुह्यम्, गोह्यम्, दुह्यम्, दोह्यम्। जप्यम्, जाप्यम् ॥

**व्याप्ये घुरकेलिमकृष्टपच्यम् ।५।१।४॥** घुरकेलिम इत्येतौ प्रत्ययौ कृष्टपच्यशब्दश्च व्याप्ये कर्तरि भवति। भज्यते स्वयमेव भङ्गुरं काष्ठम्। स्वयमेव पच्यन्ते पचेलिमा माषाः। भिदेलिमास्सरलाः। कृष्टे स्वयमेव पच्यन्त इति कृष्टपच्याः शालयः ॥

**रुच्याऽव्यथ्यवास्तव्यम् ।५।१।१५॥** रुच्य-अव्यथ्य-वास्तव्य एते कर्तरि निपात्यन्ते। रोचते इति रुच्यो

४-पवर्गान्तत्वाद्ये गुणे ऋर इति लः। ५-व्यञ्जनाद् घ्यण्। ६-अनावश्यके घ्यणि लघूपान्त्यगुणे मृजोऽस्येति वृद्धौ क्तेऽनिट इति गः। ७-नो व्यञ्जनस्येति नलोपः। ८-क्यब्विकल्पबलाद् घ्यण् ९-क्तेऽनिट इति गत्वे म्नामिति पञ्चमः। १०-य प्रत्ययो निपात्यते। ११-रोचतेर्नञ्पूर्वाद्व्यथतेश्च क्यप्प्रत्ययो वसतेस्तु तव्यण् निपात्येते। ञ्णितीति वृद्धिः।

मोदको मैत्राय। न व्यथत इत्यव्यथ्यो मुनिः। वसतीति वास्तव्यः॥

भव्यगेयजन्यरम्यापात्याप्लाव्यं नवा ।५।१।७॥ भव्य-गेय-जन्य-रम्य-आपात्य-आप्लाव्य-एते कर्तरि वा निपात्यन्ते। भवत्यसाविति भव्यः। पक्षे भाव्यमनेन। अनावश्यके तु भव्यम्[12]। गायतीति [1]गेयो माणवकः साम्नाम्। गेयानि सामानि। जायते इति जन्यः। जन्यम्[2]नेन। रमयतीति रम्यः, अन्तर्भावितण्यर्थः। रम्यमनेन। स्वयमेवापततीत्यापात्यः। आपात्यमनेन। आप्लवतेऽसावाप्लाव्यः, आप्लाव्यम्[3]नेन, आप्लव्यमिति वा॥

प्रवचनीयादयः ।५।१।८॥ प्रवचनीयादयः शब्दाः कर्त्तरि अनीयप्रत्ययान्ता वा निपात्यन्ते। प्रवक्ति प्रब्रूते वा प्रवचनीयो गुरुः शासनस्य। उपतिष्ठते इत्युपस्थानीयः शिष्यो गुरोः। रमयतीति रमणीयो देशः। मादयतीति मदनीया योषित्। दीपयतीति दीपनीयं चूर्णम्। मोहयतीति मोहनीयं कर्म। ज्ञानं दर्शनमावृणोतीति ज्ञानावरणीयं दर्शनावरणीयं कर्म। बहुलाधिकारादेव सिद्धे प्रपञ्चार्थमिदम्॥

---

१२–स्वरान्तत्वाद्यप्रत्यये गुणे य्यक्य इत्यव्। अवश्यंभावे घ्यणि वृद्धिः, आव्॥

१–कर्तरि ये आत एत्वम्। २–न जन वध इति वृद्धिनिषेधः। ३–आवश्यके घ्यणि रूपमिदम्। ये त्वाप्लव्यम्।

**स्वरात्** ।२।३।८५।। अदुरुपसर्गान्तःशब्दस्थाद् रषृवर्णात्परस्य कृद्विषयस्य नकारस्य स्वरादुत्तरस्य णो भवति। णत्वविषये अलचटतवर्गशसान्तर इति सर्वत्र द्रष्टव्यम्। प्रयाणीयम्, प्रवहणीयम्, प्रभवणीयम्। स्वरादिति किम्? प्रभग्नः, प्रभुग्नः ॥

**नाम्यादेरेव ने** ।२।३।८६।। अदुरुपसर्गान्तःशब्दस्थाद् रषृवर्णात् परस्य नागमे सति नाम्यादेरेव धातोः परस्य स्वरादुत्तरस्य कृद्विषयस्य नकारस्य णो भवति। प्रेङ्खणीयम्। इखु गतौ शब्विकरणः। नाम्यादेरेवेति किम्? प्रकम्पनीयम् ॥

**व्यञ्जनादेर्नाम्युपान्त्याद्वा** ।२।३।८७।। अदुरुपसर्गान्तः शब्दस्थाद् रषृवर्णात्परो यो व्यञ्जनादिर्नाम्युपान्त्यो धातुस्ततः परस्य कृद्विषयस्य स्वरादुत्तरस्य नकारस्य णो वा भवति। प्रकोपणीयम्, प्रकोपनीयम्। प्रमेहणीयम्, प्रमेहनीयम् ॥ इति कृदन्ते कृत्यप्रक्रिया ॥

## ॥ अथ पूर्वकृदन्तप्रकरणम् ॥

**कर्त्तरि** ।५।१।३।। कृत्प्रत्ययोऽर्थविशेषनिर्देशमन्तरेण कर्तरि भवति ॥

**णकतृचौ** ।५।१।४८।। धातोः परौ णकतृचौ प्रत्ययौ कर्तरि भवतः। पाचकः, पक्ता, पठिता, कारकः, कर्ता,

४–म्नामिति पञ्चमे सति णत्वम्। ५–ञ्णितीति वृद्धिः। ६–चज इति कः।

एधकः, एधिता, गोपकः, गोप्ता[7], गोपिता, संहिता[8], सोढा[9], वोढा ॥

अर्हे तृच् ।५।४।३७॥ अर्हे कर्तरि वाच्ये धातोस्तृच् प्रत्ययो भवति । भवान् कन्याया वोढा, वोढुमर्हतीत्यर्थः ॥

तुः ।४।४।५५॥ अनात्मनेपदविषयात्क्रमः परस्य तृचस्तृनश्च स्ताद्यशित आदिरिट् स्यात् । क्रमिता । आत्मनेपदविषयात्तु प्रक्रन्ता[1] ॥

अच् ।५।१।४९॥ धातोरच् प्रत्ययो भवति कर्तरि । करः[2], हरः, पचः, पठः, उद्वहः ॥

लिहादिभ्यः ।५।१।५०॥ लिहादिभ्यो धातुभ्योऽच् प्रत्ययो भवति कर्तरि । पृथग्योगो बाधकबाधनार्थः । लेहः[3], शेषः, मेषः, देवः, देहः, एषु नाम्युपान्त्यलक्षणस्य वक्ष्यमाणस्य कस्य बाधनम् । बहुलाधिकारात् क्वचित्कोऽपि, अनिमिषः[4] । श्वपचः[5], कद्वदः[6], रसावहः[7], एषु अणं बाधते । आकृतिगणोऽयम् । नदी[8], तरी, देवी, चोरी । गौरादित्वान् ङीः ॥

---

७–धूगौदित इति वेट्, उपान्त्यगुणः । ८–सहलुभेच्छेति वेट् । ९–हो धुडिति ढः, अध इति धः, टवर्गः, सहिवहेरिति ढलोप ओत्वं च ।

१–म्नामिति पञ्चमः । २–नामिन इति गुणः । ३–लघोरुपान्त्यस्येति गुणः । ४–न निमिषतीत्यनिमिषः । ५–श्वानं पचतीति विग्रहः, नाम्नो न इति नलोपः । ६–कुत्सितं वदतीति विग्रहः, रथवदे इति कदादेशः । ७–रसमावहतीति विग्रहः । ८–अस्य ङ्यामित्यलुक् ।

**ब्रुवः** ।५।१।५१।। ब्रुवो धातोरचि ब्रुव इति निपात्यते । ब्राह्मणमात्मानं ब्रवीति ब्राह्मणब्रुवः । अणवचादेशगुणबाधनार्थं निपातनम् ॥

**नन्द्यादिभ्योऽनः** ।५।१।५२।। नन्द्यादिभ्यो धातुभ्यो नामगणे दृष्टेभ्योऽनः प्रत्ययो भवति कर्तरि । नन्दनः, मदनः, शोभनः, वर्धनः, सहनः, रमणः, लवणः, निपातनाण्णत्वम् । आकृतिगणोऽयम् ॥

**ग्रहादिभ्यो णिन्** ।५।१।५३।। ग्रहादिभ्यो धातुभ्यो नामगणदृष्टेभ्यो णिन् प्रत्ययो भवति कर्तरि । ग्राही, स्थायी[9] । ग्रहादिराकृतिगणः ॥

**नाम्युपान्त्यप्री कृ-गृ-ज्ञः कः** ।५।१।५४।। नाम्युपान्त्येभ्यो धातुभ्यः प्री-कृ-गृ-ज्ञा इत्येतेभ्यश्च कः प्रत्ययो भवति कर्तरि । ककार इत् । बुधः[10], कृशः, प्रीणातीति प्रियः[11] किरतीति किरः[12], गिलतीति गिलः[13] । जानातीति । ज्ञः[14] ॥

**उपसर्गादातो डोऽश्यः** ।५।१।५६।। उपसर्गात्परात् श्यैङ्वर्जितादाकारान्ताद् धातोर्डः प्रत्ययो भवति कर्तरि । प्रज्ञः[15], प्रह्वः[16], प्रस्थः, सुग्लः[17] ॥

---

९—आत ऐरित्यैः आयादेशः, । १०—कित्वान्न गुणः । ११—संयोगादितीय् । १२—ऋतामितीर्, १३—नवा स्वरे इति लः । १४—इडेत्पुसीत्यालोपः । १५—डित्यन्त्य इत्यालोपः । १६—आत्वे आलोपः । १७—आदित्यात्वे डित्यन्त इत्यालुक् ।

**व्याघ्राघ्रे प्राणिनसोः** ।५।१।५७॥ व्याघ्र आघ्रा इत्येतौ शब्दौ जिघ्रतेर्यथासंख्यं प्राणिनि नासिकायां चार्थेड-प्रत्ययान्तौ निपात्येते कर्तरि ॥ विविधं विशेषेण दूरादितोऽ-प्याजिघ्रतीति व्याघ्रः[1] प्राणी । आजिघ्रतीत्याघ्रा[2] नासिका । शापवादः ॥

**घ्राध्मापाट्धेदृशः शः** ।५।१।५८॥ घ्रा–ध्मा–पा–धे–दृश् एभ्यः शः प्रत्ययो भवति कर्तरि । जिघ्रतीति जिघ्रः[3] । उद्धमतीत्युद्धमः । पिबतीति पिबः । जगज्जीव-पिबं शिवं वदन् । उद्धयः[4] । ट्धे इति टिन्निर्देशो ङ्यर्थ इति बृहद्वृत्तिः । उद्धयी, विधयी, उत्पश्यतीत्युत्पश्यः ॥

**नृत्खन्रञ्जः शिल्पिन्यकट्** ।५।१।६४॥ नृतिखनि-रञ्जिभ्यः शिल्पिनि कर्तर्यकट् प्रत्ययो भवति । शिल्पं कर्म-कौशलम् । तद्वान् शिल्पी । नर्तकः, नर्तकी[5] खनकः, खनकी । रजकः[6], रजकी ॥

**गस्थकः** ।५।१।६६॥ गायतेः शिल्पिनि कर्तरि थकः प्रत्ययो भवति । गाथकः, गाथिका[7] ॥

**टनण्** ।५।१।६७॥ गायतेः शिल्पिनि कर्तरि टनण्

१–डित्यन्त्य इत्यालुक् । २–स्त्रीत्वं लोकात् । ३–शे शवि जिघ्रादेशे लुगस्येति शव्यकारस्य शेऽकारस्य च लुक् । ४–शित्यात्वाभावादया-देशः । ५–अकटि गुणे टित्वात् अणञेयेकणिति डीः, अस्य ङ्यामि-त्यलुक् । ६–अकट् घिनोश्चेति नलुक् । ७–आदित्यापि अस्यायत्त-दितीत्वम् ।

प्रत्ययो भवति । गायनः गायनी ॥

तिक्कृतौ नाम्नि ।५।१।७१॥ आशिषि विषये संज्ञायां गम्यमानायां धातोस्तिक् कृतश्च सर्वे प्रत्ययाः कर्तरि भवन्ति ॥

अहन् पञ्चमस्य क्विक्ङिति ।४।१।१०७॥ हन्-वर्जितस्य पञ्चमान्तस्य धातोः स्वरस्य क्वौ धुडादौ च क्ङिति प्रत्यये दीर्घो भवति । शम्यादिति शान्तिः । वर्धिषीष्ट वर्धमानः ॥

कर्मणोऽण् ।५।१।७२॥ कर्मणो निर्वर्त्यविकार्यप्राप्य-रूपात्परस्माद् धातोरण्प्रत्ययो भवति कर्तरि । अजाद्यपवादः । कुम्भं करोति कुम्भकारः[11] । काण्डं लुनाति काण्डलावः[12] । सूत्रधारः, भारवाहः, द्वारपालः ॥

शीलिकामिभक्ष्याचरीक्षिक्षमो णः ।५।१।७३॥ कर्मणः परेभ्यः शीलि-कामि-भक्षि-आचरि-ईक्षि-क्षम्-इत्येतेभ्यो धातुभ्यो णः प्रत्ययो भवति कर्त्तरि ॥ धर्मं शीलयति धर्मशीलः[13] । धर्मं कामयते धर्मकामः[14] । अण्यन्तात्त्वणेव ॥

---

८–आदित्यात्वे आत ऐरित्यैत्वे आयादेशः । स्त्रियां टित्वान्ङीः । ९–म्नामिति पञ्चमः । १०–आनशि अतो म इति मोन्तः । ११–कुम्भं करोतीति लौकिकविग्रहे कुम्भ अम् कृ इति स्थितेऽणि, कुम्भ अस् कृ अ इति जाते वृद्धौ गतिकारकेति परिभाषया स्याद्युत्पत्तेः प्रागेव ङस्युक्तमिति समासे ऐकार्थ्ये इति स्यादि लुपि नामसंज्ञादिकार्यम् । एवमन्यत्रापि समासः कृदन्तविषये बोध्यः । १२–अणि वृद्धावाव् । १३–णे णेरनिटीति णिलोपः । १४–णे णिलोपः ।

**अतः कृकमिकंसकुम्भकुशाकर्णीपात्रेऽनव्ययस्य** ।२।३।५॥ अकारात् परस्याऽनव्ययसम्बन्धिनो रेफस्य कृ-कमि-कंस-कुम्भ-कुशा-कर्णी-पात्रस्थेषु कखपफेषु परेषु सो भवति तौ चेन्निमित्तनिमित्तिनावेकत्र समासे भवतः। पयस्कामी। वायुमेव भक्षयति वायुभक्षः। कल्याणमाचरति कल्याणाचारा। सुखं प्रतीक्षते सुखप्रतीक्षः॥

**मोऽकमियमिरमिनमिगमिवमाचमः** ।४।३।५५॥ मान्तस्य धातोः कम्-यम्-रम्-नम्-गम्-वम्-आचम् एभ्यो वर्जितस्य ञिणति कृत्प्रत्यये ञौ च परे वृद्धिर्न भवति। बहुं क्षमते बहुक्षमः। अणन्तत्वाभावादाप्। बहुक्षमा॥

**गायोऽनुपसर्गाट्टक्** ।५।१।७४॥ कर्मणः परादनुपसर्गाद् गायतेः टक् प्रत्ययो भवति कर्तरि। सामानि गायति सामगः, सामगी॥

**आतो डोऽह्वावामः** ।५।१।७६॥ कर्मणः परादनुपसर्गाद् ह्वावामावर्जितादाकारान्ताद् धातोर्डः प्रत्ययो भवति कर्तरि। गां ददाति गोदः। ह्वादेस्त्वण्। स्वर्गं ह्वयते स्वर्गह्वायः। धान्यं माति धान्यमायः॥

१-अणि वृद्धौ रुत्वे सत्वे स्त्रियां ङीः। २-टकि आत्वे इडेत्पुसीत्यालुक्। ३-डित्यन्त इत्यालोपः। ४-अणि आत्वे आत ऐरित्यैकारादेशे आय्। ५-आत ऐरित्यैत्वे आय्।

**आशिषि हनः** ।१।५।८०॥ आशिषि गम्यमानायां कर्मणः पराद् हन्तेर्डो भवति कर्तरि । शत्रुं वध्यात् शत्रुहः । पापहः । दुःखहः ॥

**क्लेशादिभ्योऽपात्** ।५।१।८१॥ क्लेशादिभ्यः कर्मभ्यः परादपपूर्वाद् हन्तेर्डो भवति कर्तरि । क्लेशमपहन्ति क्लेशापहः । क्लेशादयः प्रयोगगम्याः ॥

**अचित्ते टक्** ।५।१।८३॥ कर्मणः पराद् हन्तेरचित्तवति कर्तरि टक् प्रत्ययो भवति । वातं हन्ति वातघ्नं तैलम् । जायां हन्ति जायाघ्नास्तिलकालकाः । पतिघ्नी पाणिरेखा । अचित्त इति किम् ? पापघाती यतिः ॥

**ब्रह्मादिभ्यः** ।५।१।८५॥ ब्रह्मादिभ्यः कर्मभ्यः पराद् हन्तेष्टक् प्रत्ययो भवति कर्तरि । ब्रह्म हन्ति ब्रह्मघ्नः । कृतघ्नः । बाहुलकात्संप्रदानेऽपि । गां हन्ति यस्मै स गोघ्नोऽतिथिः । अचित्ते पूर्वेण सिद्धे चित्तवदर्थ आरम्भः ॥

**राजघः** ।५।१।८८॥ राज्ञः कर्मणः पराद् हन्तेष्टक् प्रत्ययः कर्तरि घादेशश्च निपात्यते । राजानं हन्ति राजघः ॥

**कुक्ष्यात्मोदराद् भृगः खिः** ।५।१।९॥ कुक्षि-आत्मन्-उदर-एभ्यः कर्मभ्यः पराद् भृगो धातोः खिः प्रत्ययो भवति कर्तरि । खकार इत् ।

---

६–अन्त्यस्वरादिलोपः । ७–टकि गमहनेत्युपान्त्यलुकि हनोह्न इति घ्नः । ८–अणि ञ्णिति घादिति घात इत्यादेशः ।

**खित्यनव्ययारुषो मोऽन्तो ह्रस्वश्च ।३।२।१११॥** स्वरान्तस्यानव्ययस्य अरुस्शब्दस्य च खित्प्रत्ययान्ते उत्तरपदे मोऽन्तो भवति यथासंभवं ह्रस्वश्चान्तादेशो भवति । कुक्षिमेव बिभर्ति कुक्षिम्भरिः[1] । आत्मानमेव बिभर्ति आत्मम्भरिः[2] । उदरमेव बिभर्ति उदरम्भरिः ॥

**अर्होऽच् ।५।१।९१॥** कर्मणः परादर्हतेरच् प्रत्ययो भवति कर्तरि । पूजामर्हति पूजार्हो द्विजः । पूजार्हा[3] ब्राह्मणी ॥

**धनुर्दण्डत्सरुलाङ्गलाङ्कुशर्ष्टियष्टिशक्तितोमरघटाद् ग्रहः ।५।१।९२॥** धनुस्–दण्ड–त्सरु–लाङ्गल–अङ्कुश–ऋष्टि–यष्टि–शक्ति–तोमर–घट एभ्यः कर्मभ्यः पराद् ग्रहेरच् प्रत्ययो भवति कर्तरि । धनुर्गृह्णाति धनुर्ग्रहः[4] । दण्डग्रहः । घटग्रहः । लिङ्गविशिष्टस्यापि । घटीग्रहः ॥

**सूत्राद् धारणे ।५।१।९३॥** सूत्रात्कर्मणः पराद् ग्रहेर्ग्रहणपूर्वके धारणेऽर्थे वर्तमानाद् अच् प्रत्ययो भवति कर्तरि । सूत्रं गृह्णाति गृहीत्वा धारयति सूत्रग्रहो मेधावी । सूत्रग्राहो[5] यो गृह्णाति न तु धारयति ॥

**आयुधादिभ्यो धृगोऽदण्डादेः ।५।१।९४॥** दण्डादीन् वर्जयित्वा आयुधादिभ्यः कर्मभ्यः पराद् धृगो धातोरच्-

---

१—मोन्तत्वे तौ मुम इति स्वानुस्वारानुनासिकौ, नामिन इति गुणः ।
२—नाम्नो न इति नलोपे मोन्तः । ३—स्त्रियामादित्याप् । ४—अन्तर्वर्तिविभक्त्या पदत्वे सोरुरिति [illegible] । ५—अणि ञ्णितीति वृद्धिः ।

प्रत्ययो भवति कर्तरि। धनुर्धरति धनुर्धरः शक्तिधरः। चक्रधरः। हलधरः। आदिग्रहणाद् भूधरः, पयोधरः। दण्डादेस्तु – दण्डधारः, कर्णधारः। सूत्रधारः। आयुधादयः प्रयोगगम्याः॥

**हृगो वयोऽनुद्यमे** ।५।१।९५॥ कर्मणः पराद् हरतेर्वयसि अनुद्यमे च गम्यमाने अच् प्रत्ययो भवति कर्तरि। प्राणिनां कालकृतावस्था वयः। उद्यम उत्क्षेपणमाकाशस्थस्य वा धारणम्। तदभावोऽनुद्यमः। अस्थि हरत्यस्थिहरः श्वशिशुः। कवचहरः कुमारः। मनोहरः प्रासादः। अन्यत्र भारहारः॥

**आङः शीले** ।५।१।९६॥ कर्मणः परादाङ्पूर्वाद् हरतेः शीले गम्यमाने अच्प्रत्ययो भवति कर्तरि। शीलं स्वाभाविकी प्रवृत्तिः। पुष्पाण्याहरतीत्येवंशीलः पुष्पाहरः। लिहादिप्रपञ्चप्रकरणमिदम्॥

**दृतिनाथात्पशाविः** ।५।१।९७॥ दृति–नाथ आभ्यां कर्मभ्यां पराद् हरतेः पशौ कर्तरि इः प्रत्ययो भवति। दृतिं हरति दृतिहरिः श्वा। नाथं हरति नाथहरिः सिंहः। अन्यत्राण्–दृतिहारः॥

***रजः फलेमलाद् ग्रहः*** ।५।१।९८॥ रजस्–फल–मल-

---

६–अन्तर्वर्तिविभक्त्या पदत्वाद्रुत्वम्। ७–अणि नामिनोऽकलीति वृद्धिः। ८–अणि नामिनोऽकलिहलेरिति वृद्धिः।

एभ्यः कर्मभ्यः परात् ग्रहेरिर्भवति कर्तरि । रजांसि गृह्णाति रजोग्रहिः कञ्चुकः । फलानि गृह्णाति फलेग्रहिर्वृक्षः । सूत्रनिर्देशादेत्वम् । मलं गृह्णाति मलग्रहिः कम्बलः ॥

**शकृत्स्तम्बाद्वत्सव्रीहौ कृगः ।५।१।१००॥** शकृत्स्तम्बाभ्यां कर्मभ्यां परात् कृगो यथासङ्ख्यं वत्से व्रीहौ च कर्तरि इः प्रत्ययो भवति । शकृत्करिर्वत्सः । स्तम्बं गुच्छं करोति स्तम्बकरिर्व्रीहिः । अन्यत्राण् । स्तम्बकारः ॥

**किंयत्तद्बहोरः ।५।१।१०१॥** किम्–यद्–तद्–बहु एभ्यः कर्मभ्यः परात् करोतेरः प्रत्ययो भवति कर्तरि । किं करोति किंकरः[२] । यत्करः । चौर्ये तस्करः[१] बहुकरः ॥

**संख्याहर्दिवाविभानिशाप्रभाभाश्चित्रकर्त्राद्यन्तानन्तकारबाह्वरुर्धनुर्नान्दीलिपिलिविबलिभक्तिक्षेत्रजङ्घाक्षपाक्षणदारजनिदोषादिनदिवसाट्टः ।५।१।१०३॥** संख्या–अहन्–दिवा–विभा–निशा–प्रभा–भास्–चित्र–कर्तृ–आदि–अन्त–अनन्त–कार–बाहु–अरुस्–धनुस्–नान्दी–लिपि लिबि–वलि–भक्ति–क्षेत्र–जङ्घा–क्षपा–क्षणदा–रजनि–दोषा–दिन–दिवस–एभ्यः कर्मभ्यः परात् करोतेष्टः प्रत्ययो भवति कर्तरि । संख्येत्यर्थप्रधानमपि । तेनैकादिपरिग्रहः । अहे-

१–रुत्वे घोषवतीत्युत्वेऽवर्णस्येत्योः । २–तौ मुम इति स्वानुस्वारानुनासिकौ ।

त्वाद्यर्थ आरम्भः । संख्यां करोति संख्याकरः । एककरः । बहुकरी ॥

**हेतुतच्छीलानुकूलेऽशब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदात्** ।५।१।१०३॥ हेतु – तच्छीला – नुकूलेषु कर्तृषु शब्दादिवर्जितात्कर्मणः परात्करोतेष्टः प्रत्ययो भवति । हेतुः प्रतीतशक्तिकं कारणम् । तच्छीलं तत्स्वभावः । अनुकूल आराध्यचित्तानुवर्ती । यशः करोति यशस्करी[४] विद्या । यशोहेतुरित्यर्थः । क्रीडां करोतीति क्रीडाकरः । क्रीडायां फलनैरपेक्ष्येण प्रवर्तमान इत्यर्थः । वचनकरः । आज्ञानुवर्तीत्यर्थः ॥

**भृतौ कर्मणः** ।५।१।१०४॥ कर्मन्शब्दात्कर्मणः परात्करोतेर्भृतौ गम्यमानायां कर्तरि टो भवति । भृतिर्वेतनम्, कर्ममूल्यमिति यावत् । कर्मकरो भृत्यः । कर्मकरी दासी ॥

**क्षेमप्रियमद्रभद्रात्खाण्** ।५।१।१०५॥ क्षेम–प्रिय–भद्र–भद्र–एभ्यः कर्मभ्यः परात्करोतेः ख अण् इत्येतौ प्रत्ययौ भवतः कर्तरि । क्षेमं करोति क्षेमङ्करः, क्षेमकारः[२] । प्रियङ्करः, प्रियकारः ॥

---

३–टे टित्त्वात्स्त्रियां ङीः । अस्य ङ्यामित्यलुक् । ४–हत्वेऽतः कृकमीति सः । टित्त्वात्स्त्रियां ङीः । ५–नाम्नो न इति नलोपः । स्त्रियां टित्त्वान्ङीः ।

१–खिति मोन्ते तौ मुम इति स्वानुस्वारानुनासिकौ । २–अणि नामिनोऽकलीति वृद्धिः ।

**मेघर्तिभयाभयात्खः** ।५।१।१०६।। मेघ-ऋति-भय-अभय एभ्यः कर्मभ्यः परात्करोतेः खप्रत्ययो भवति। मेघान् करोति मेघङ्करः, मेघङ्करा। ऋतिर्गतिः सत्यता वा, ऋतिंकरः। भयङ्करं श्मशानम् ॥

**प्रियवशाद्वदः** ।५।१।१०७।। प्रिय-वश आभ्यां कर्मभ्यां पराद् वदेः खो भवति। प्रियं वदति प्रियंवदः। वशं वदति वशंवदः ॥

**परिमाणार्थमितनखात्पचः** ।५।१।१०९।। सर्वतो मानं परिमाणम्। तदर्थाः प्रस्थद्रोणाल्पबह्वादयः शब्दाः, तेभ्यो मितनखाभ्यां च कर्मभ्यां परात्पचेः खः प्रत्ययो भवति कर्त्तरि। प्रस्थं पचतीति प्रस्थंपचा स्थाली। अल्पं पचन्ति अल्पंपचा मुनयः। मितम्पचा ब्राह्मणी। नखम्पचा यवागूः ॥

**कूलाभ्रकरीषात्कषः** ।५।१।११०।। कूल-अभ्रक-रीष-एभ्यः कर्मभ्यः परात्कषेः खः प्रत्ययो भवति। कूलं कषति कूलंकषा नदी। अभ्रंकषो गिरिः। करीषंकषा वात्या ॥

**सर्वात्सहश्च** ।५।१।१११।। सर्वशब्दात्कर्मणः परात् सहेः कषेश्च खः प्रत्ययो भवति। सर्वं सहते सर्वंसहो मुनिः। सर्वंसहा वसुधा। सर्वंकषो खलः ॥

---

३–मोन्ते तौ मुम इति स्वानुस्वारानुनासिकौ।

**मन्याण्णिन्** ।५।१।११६॥ कर्मणः परान्मन्यतेर्णिन् प्रत्ययो भवति कर्तरि । पण्डितं मन्यते बन्धुं पण्डितंमानी बन्धोः ॥

**क्यङ्मानिपित्तद्धिते** ।३।२।५०॥ क्यङ्प्रत्यये मानिनि शब्दे चोत्तरपदे पिति तद्धिते च प्रत्यये परे परतः स्त्रलिङ्गशब्दोऽनूङ् पुंवद् भवति । दर्शनीयां मन्यते भार्यां दर्शनीयमानी भार्यायाः ॥

**कर्तुः खश्** ।५।१।११७॥ प्रत्ययार्थात्कर्तुः कर्मणः परान्मन्यतेः खश् प्रत्ययो भवति । यदा प्रत्ययार्थः कर्ताऽऽत्मानमेव पण्डितत्वादिना धर्मेण विशिष्टं मन्यते तदायं कर्म, तत्रायं विधिः । पण्डितमात्मानं मन्यते पण्डितंमन्यः ।

**एजेः** ।५।१।११८॥ कर्मणः परादेजयतेः खश् भवति कर्तरि । जनमेजयति जनमेजयः । अरिमेजयः ॥

**शुनीस्तनमुञ्जकूलास्यपुष्पाद् ट्धेः** ।५।१।११९॥ शुनी-स्तन-मुञ्ज-कूल-आस्य-पुष्प-एभ्यः कर्मभ्यः परात् ट्धेः

---

४–णिनि ञ्णितीति वृद्धौ नामत्वे सौ इन् हन्निति दीर्घः । ५–खशः शित्त्वात् श्यप्रत्ययः, खित्यनव्ययेति मोन्तः, लुगस्येत्यलुक् । ६–खशि नामिन इति गुणे शवि अयादेशः, लुगस्य ।

खश् प्रत्ययो भवति । शुनीं धयति शुनीन्धयः[1] । स्तनन्धयः ॥

**नाडीघटीखरीमुष्टिनासिकावाताद् ध्मश्च** ।५।१।१२०॥ नाडी-घटी-खरी-मुष्टि-नासिका-वात एभ्यः कर्मभ्यः पराद् धमतेष्ट्धेश्च खश् भवति । नाडीं धमति नाडीन्धमः[2] । नाडीं धयति नाडीन्धयः । ङ्यन्त निर्देशात्तदभावे खश् प्रत्ययो न भवति । अत एव ह्रस्वत्वमपि न । नाडिं धमति नाडिध्मः, नाडिधः[3] ।

**पाणिकरात्** ।५।१।१२१॥ पाणि-कर आभ्यां कर्मभ्यां पराद् धमतेः खश् प्रत्ययो भवति । पाणिन्धमाः करन्धमाः पन्थानः ॥

**कूलादुद्रुजोद्वहः** ।५।१।१२२॥ कूलात्कर्मणः पराभ्याम् उद्रुज् उद्वह् इत्येताभ्यां परः खश् प्रत्ययो भवति । कूलमुद्रुजति कूलमुद्रुजो[4] गजः । कूलमुद्वहति कूलमुद्वहा नदी ॥

**वहाभ्राल्लिहः** ।५।१।१२३॥ वहाभ्राभ्यां कर्मभ्यां

---

१—खशि शवि अयादेशो लुगस्य । मोऽन्तः । ह्रस्वत्वं तु न, शुनीति ङ्यन्तनिर्देशात् । केचिद् ह्रस्वमपीच्छन्ति । शुनिन्धयः । २—खशि श्रौतीति धमादेशः, मोन्तः । शवि लुगस्य । इहापि ह्रस्वत्वे मतभेदः । ३—डप्रत्यये आत्वेऽन्त्यस्वरादिलुक् । ४—अविच्छितो ङित्त्वान्नोपान्त्यगुणः ।

परालिलहेः खश् भवति। वहः स्कन्धः, तं लेढि वहंलिहो[5] गौः। अभ्रंलिहः प्रासादः॥

**बहुविध्वरुस्तिलात्तुदः** ।५।१।१२४॥ बहु-विधु-अरुस्-तिल एभ्यः कर्मभ्यः परात्तुदेः खश् भवति। बहुं तुदति बहुन्तुदं युगम्। विधुन्तुदो राहुः। अरुन्तुदो[6] मर्मावित्॥

**ललाटवातशर्धात्तपाजहाकः** ।५।१।१२५॥ ललाट-वात-शर्ध एभ्यः कर्मभ्यः परेभ्यो यथासङ्ख्यं तप्-अज्-हाक् इत्येतेभ्यो धातुभ्यः खश् प्रत्ययो भवति। ललाटं तपति ललाटन्तपः सूर्यः। लिपिर्ललाटन्तपनिष्ठुराक्षरा। वातमजन्ति वातमजा मृगाः। शर्धोऽपानशब्दस्तं जहाति शर्धंजहा माषाः॥

**असूर्योग्राद् दृशः** ।५।१।१२६॥ असूर्योग्राभ्यां कर्मभ्यां पराद् दृशेः खश् भवति। सूर्यमपि न पश्यन्ति असूर्यंपश्या[7] राजदाराः। असामर्थ्येऽपि गमकत्वात्समासः। उग्रं पश्यति उग्रम्पश्यः॥

**इरंमदः** ।५।१।१२७॥ इरापूर्वान्माद्यतेः खश् भवति श्याभावश्च निपात्यते। इरा सुरा तया माद्यति इरम्मदो[8]

५—ङित्वान्न गुणः। ६—मोन्ते सकारस्य संयोगान्तत्वाल्लुक्। ७—नञत् इत्यः। खशि पश्यादेशः। खकि लुगस्य। ८—मोन्तो ह्रस्वश्च खित्यनव्ययस्येत्यनेन।

हस्ती । मेघज्योतिरिरम्मदः ॥

**नग्नपलितप्रियान्धस्थूलसुभगाढ्यातदन्तच्व्यर्थेऽच्वेर्भुवः ख्रिष्णुखुकञौ** ।५।१।१२८॥ नग्न-पलित-प्रिय-अन्ध-स्थूल-सुभग-आढ्य एभ्यस्तदन्तेभ्यश्चाच्व्यन्तेभ्यश्च्व्यर्थे वर्तमानेभ्यः पराद् भवतेः ख्रिष्णुखुकञौ प्रत्ययौ भवतः कर्तरि । अनग्नो नग्नो भवति नग्नम्भविष्णुः[1] । नग्नं भावुकः[2] । अननग्नोऽनग्नो भवत्यनग्नंभविष्णुः, अनग्नं भावुकः । सुनग्नं भविष्णुः । सुनग्नं भावुकः ॥

**कृगः खनट् करणे** ।५।१।१२९॥ नग्नादिभ्योऽच्व्यन्तेभ्यश्च्व्यर्थे वर्तमानेभ्यः परात्कृगः खनट् प्रत्ययो भवति करणे । अनग्नो नग्नः क्रियतेऽनेनेति नग्नंकरणं[3] द्यूतम् । अननग्नोऽनग्नः क्रियतेऽनेनेत्यनग्नंकरणः पटः । एवमन्यदप्यूह्यम् ॥

**नाम्नो गमः खड्डौ च विहायसस्तु विहः** ।५।१॥१३२॥ नाम्नः पराद् गमेः खड् ड इत्येतौ खश्च प्रत्यया भवन्ति कर्तरि विहायस् शब्दस्य च विहादेशो भवति । तुरो गच्छति तुरंगः[4], तुरगः, तुरंगमः । विहायसा

---

१—ख्रिष्णौ गुणावादेशौ मोन्तः । २—खुकञि नामिनोऽकलीति वृद्ध्यामवादेशः, मोन्तः । ३—खनटि नामिन इति गुणः । मोन्तः । ४—खडि डित्यन्त्यस्वरादिलोपः । मोन्तः । डेऽन्त्यस्वरादिलोपः, खे तु मोन्त एव ।

गच्छति विहंगः, विहगः, विहंगमः ॥

चरेष्टः ।५।१।१३८॥ आधारवाचिनो नाम्नः पराच्चरेष्टः प्रत्ययो भवति कर्तरि । कुरुषु चरति कुरुचरः । वनेचरः । सप्तम्या अलुप् । निशाचरः, निशाचरी ॥

पुरोऽग्रतोऽग्रेषु सर्तेः ।५।१।१४०॥ पुरस्-अग्रतस्-अग्रे एभ्यो नामभ्यः परात्सर्तेष्टो भवति कर्तरि । पुरः सरति पुरःसरः । पुरस्सरी । अग्रतः सरः अग्रेसरः । एदन्तत्वं निपातनात् ॥

स्थापास्नात्रः कः ।५।१।१४१॥ नाम्नः परेभ्यः स्था-पा-स्ना-त्रा एभ्यः कः प्रत्ययो भवति कर्तरि । समे तिष्ठति समस्थः । द्वाभ्यां मुखशुण्डाभ्यां पिबति द्विपः ॥

निनद्याः स्नातेः कौशले ।२।३।२०॥ निनदीशब्दाभ्यां परस्य स्नातेः सम्बन्धिनः सकारस्य समासे षो भवति । नद्यां स्नाति नदीष्णः प्रतरणे । कुशल इत्यर्थः । आतपात्त्रायते आतपत्रम् ॥

शोकापनुदतुन्दपरिमृजस्तम्बेरमकर्णेजपं प्रियालसहस्तिसूचके ।५।१।१४३॥ शोकापनुद-तुन्दपरिमृज-

---

५-विहादेशेऽन्त्यस्वरादिलोपे मोन्तः । ६-शषसे इति वा सः । पक्षे रः पदान्त इति विसर्गः । ७-के इडेदित्यालोपः । ८-के आलोपः, रषृवर्णादिति णः । ९-के आदित्यात्वे इडेत्पुसित्यालुक् ।

स्तम्बेरम–कर्णेजप एते शब्दा यथासंख्यं प्रिय-अलस-हस्ति-सूचक एष्वर्थेषु कप्रत्ययान्ता निपात्यन्ते। शोकमपनुदति शोकापनुदः प्रियः। तुन्दं परिमार्ष्टि तुन्दपरिमृजोऽलसः। स्तम्बे रमते स्तम्बेरमो हस्ती। संज्ञायां सप्तम्यलुक्। कर्णे जपति कर्णेजपः सूचकः॥

**दुहेर्डुघः** ।५।१।१४५॥ नाम्नः पराद् दुहेर्डुघः प्रत्ययो भवति कर्तरि। कामान् दुग्धे पूरयति कामदुघा[1]॥

**भजो विण्** ।५।१।१४६॥ नाम्नः पराद् भजेर्विण् प्रत्ययो भवति कर्तरि। अर्धं भजते अर्धभाक्[2]। सुखभाक्। शृणोति तस्मादपि यः स पापभाक्। एतद्विषये वक्ष्यमाणः क्विब् नेति द्रष्टव्यम्॥

**मन्वन्क्वनिप्विच् क्वचित्** ।५।१।१४७॥ नाम्नः पराद् धातोर्मन्–वन्–क्वनिप्–विच् एते प्रत्ययाः क्वचिद् भवन्ति कर्तरि। सुशृणाति सुशर्मा[3], सुदामा, केवलादपि। शर्म, दाम। घृतं पिबति घृतपावा[4]॥

**वन्याङ् पञ्चमस्य** ।४।२।६५॥ धातोः पञ्चमस्य वनि प्रत्यये परे आकारो भवति। विजायते इति विजावा[5]। सुधी-

१–डिरयन्त्यस्वरादिलोपे स्त्रियामाप्, दीर्घः। २–णिति ञ्णितीति वृद्धौ सौ च–च ज इत्यादि। ३–मनि नामिन इति गुणः। सौ नि दीर्घ इत्यादि। ४–वनि सौ नि दीर्घ इत्यादि। ५–वन्यात्वे समानदीर्घः, सौ दीर्घादि।

यते इति सुधीवा। प्रातरित्वा[7]। शुभंया:[8]। केवलादपि। रेट्[9], रोट्[10]॥

क्विप् ।५।१।१४८॥ नाम्नः पराद् धातोः क्विप्प्रत्ययो भवति कर्तरि क्वचित्। उखेन उखया वा स्रंसते उखास्रत्, वहाद् भ्रश्यते वहाभ्रट्, घञुपसर्गस्य बहुलमिति वक्ष्यमाणसूत्रे बहुलग्रहणादुखवहयो दीर्घः। पर्णानि ध्वंसते पर्णध्वत्। केवलादपि। गीः, कीः[11], लूः॥

स्पृशोऽनुदकात् ।५।१।१४९॥ उदकवर्जितान्नाम्नः परात् स्पृशेः क्विप् प्रत्ययो भवति कर्तरि। घृतं स्पृशतीति घृतस्पृक्[12]॥

त्यदाद्यन्यसमानादुपमानाद् व्याप्ये दृशष्टक्सकौ च ।५।१।१५२॥ त्यदादेरन्यशब्दात्समानशब्दाच्चोपमानभूतात्कर्मणि वर्तमानात्पराद् दृशेर्व्याप्य एव टक् सकौ क्विप् च प्रत्यया भवन्ति॥

अन्यत्यदादेराः ।३।२।१५२॥ अन्यशब्दस्य त्यदादेश्च

---

६–धीधातोः क्वनिप्। ७–ह्रस्वस्य त इति तोन्तः। ८–शुभमित्यव्ययम्। विजित्। तौ मुम इति स्वानुस्वारानुनासिकौ। ९–त्रिच्युपान्त्यगुणः, तृतीयत्वादि। १०–नो व्यञ्जनस्येति नलोपः। पदान्ते स्रंसध्वंसेति दः। वहाभ्रडिति। यजसृजेतिषः तृतीयप्रथमत्वे। ११–किति ऋतामितीरि भ्वादेर्नामिन इति दीर्घः। १२–ऋत्विगित्यादिना गः।

दृग्-दृश-दृक्षेषूत्तरपदेषु आकारोन्तादेशो भवति। स्य इव दृश्यते त्यादृशः[13], त्यादृक्षः[14], त्यादृक्षा, त्यादृक्[15]। अन्यादृशः[16], अन्यादृक्षः, अन्यादृक्। एवं तादृशः, यादृशः इत्यादि।

दृग्दृशदृक्षे ।३।२।१५१॥ दृग्-दृश-दृक्ष इत्येतेषूत्तरपदेषु समानस्य सादेशो भवति। समान इव दृश्यते सदृशः, सदृक्षः, सदृक्॥

इदं किमीत्की ।३।२।१५३॥ इदंशब्दः किंशब्दश्च दृग्-दृश-दृक्षेषूत्तरपदेषु परेषु यथासंख्यमीकाररूपः कीकाररूपश्च भवति। अभेदनिर्देशः सर्वादेशार्थः। अयमिव दृश्यते ईदृशः। ईदृक्षः, ईदृक्। किमिव दृश्यते कीदृशः, कीदृक्षः, कीदृक्॥

कर्तुर्णिन् ।५।१।१५३॥ कर्तृवाचिन उपमानभूतान्नाम्नः पराद् धातोर्णिन् प्रत्ययो भवति कर्तरि। उष्ट्र इव क्रोशति उष्ट्रक्रोशी। ध्वाङ्क्ष इव रौति ध्वाङ्क्षरावी, खर इव नदति खरनादी। सिंह इव नर्दति सिंहनर्दी॥

अजातेः शीले ।५।१।१५४॥ अजातिवाचिनो नाम्नः पराद् धातोः शीलेऽर्थे वर्तमानाण्णिन् प्रत्ययो भवति कर्तरि।

---

१३—अन्त्यस्यात्वं समान दीर्घः। १४—यजसृजेति षः, षढोरिति कः, नाम्यन्तस्थेति षः, स्त्रियामादित्याप्, दीर्घः। १५—ऋत्विगित्यादिना गः। १६—अन्त्यस्यात्वम्। १—णामिन इति वृद्धावाव।

उष्णं भुङ्क्ते इत्येवंशील उष्णभोजी शीतभोजी। [२]प्रस्थायी, प्रतिबोधी, प्रयायी। संभोक्तेति बाहुलकाच्छीलेऽपि वक्ष्यमाणस्तृन्नेव। जातेः परान्न भवति, शालीन् भोक्ता। शीले वक्ष्यमाणस्तृन्नेव॥

**साधौ ।५।१।१५५॥** नाम्नः परात्साधावर्थे वर्त्तमानाद् धातोर्णिन् प्रत्ययो भवति कर्त्तरि। अशीलार्थ आरम्भः। साधु करोति साधुकारी, साधु[३]दायी, चारुनर्त्ती, सुष्ठुगामी। साधु वादयति साधु गायतीत्यादावनभिधानाद् बाहुलकाद् वा न भवति॥

**ब्रह्मभ्रूणवृत्रात् क्विप् ।५।१।१६१॥** ब्रह्मन्-भ्रूण-वृत्र एभ्य स्त्रिभ्यः कर्मभ्यः पराद् भूतेऽर्थे वर्त्तमानाद् धातोः क्विप् प्रत्ययो भवति कर्तरि। ब्रह्माणं हतवान् ब्र[४]ह्महा। भ्रूणहा, वृत्रहा॥

**कृगः सुपुण्यपापकर्ममन्त्रपदात् ।५।१।१६२॥** सुशब्दात् पुण्य-पाप-कर्म-मन्त्र-पद एभ्यः कर्मभ्यश्च परात्करोतेर्भूतेऽर्थे वर्त्तमानात् क्विप् प्रत्ययो भवति कर्तरि। सुष्ठु कृतवान्सु[५]कृत्, पुण्यं कृतवान् पुण्यकृत्, पापकृत्, कर्मकृत्, मन्त्रकृत्, पदकृत्॥

**दृशः क्वनिप् ।५।१।१६६॥** कर्मणः पराद् दृशे-

२-३-आत ऐरित्यैः, आयादेशः। शब्दशक्तिस्वाभाव्यात्साध्वादिशब्दोपादानं विना न तदर्थप्रतीतिरिति तदुपादानमिति बोध्यम्। ४- इनहनिति दीर्घे, नलोपः। ५-ह्रस्वस्य त इति तोऽन्तः।

भूतेऽर्थे वर्त्तमानात् क्वनिप् प्रत्ययो भवति कर्त्तरि । मेरुं दृष्टवान् मेरुदृश्वा, विश्वदृश्वा, पारदृश्वा ॥

**सहराजभ्यां कृग्युधेः ।५।१।१६७॥** सहशब्दात् राजन् शब्दाच्च कर्मणः परात्करोतेर्युधेश्च भूतेऽर्थे वर्त्तमानाद् धातोः क्वनिप् प्रत्ययो भवति कर्तरि । सहकृतवानिति सहकृत्वा,[६] सहकृत्वनः[७] । सह युद्धवान् सहयुध्वा, सहयुध्वनः । राजकृत्वा, राजकृत्वनः ॥

**सप्तम्याः ।५।१।१६१॥** सप्तम्यन्तान्नाम्नः पराज्जनेर्भूतेऽर्थे डः प्रत्ययो भवति कर्तरि । सरसि जातं सरोजम्[१] । मनसि जातं मनोजम्, अप्सु जातम् अब्जम्[२] ॥

**अजातेः पञ्चम्याः ।५।१।१७०॥** पञ्चम्यन्ताद् जातिवाचिनो नाम्नः पराद् भूतेऽर्थे जनेर्डो भवति । बुद्धेर्जातो बुद्धिजः संस्कारः । संस्काराज्जाता संस्कारजा[३] स्मृतिः । सन्तोषजं सुखम् ॥

**क्वचित् ।५।१।१०१॥** उक्तादन्यत्रापि क्वचिल्लक्ष्यानुसारेण डः प्रत्ययो भवति । उक्तान्नाम्नोऽन्यतोऽपि यथा—केन जातः किंजोऽनिर्ज्ञातपितृकः । न जातोऽर्जः[४] । अनुजातोऽनुजः ॥

---

६–कित्त्वाद् गुणाभावः, तोन्तः । ७–शसादौ न वमन्तेति निषेधः ।

१–डित्यन्त्यस्वरादिलोपः, सकारस्य रुत्वे उत्वे चावर्णस्येत्योः । २–धुट इति तृतीयः । ३–स्त्रियामाप् । ४–नलोपो नञिति नकारलोपः ।

**क्तक्तवतू** ।५।१।१७४॥ धातोर्भूतेऽर्थे वर्त्तमानात् क्तक्तवतू प्रत्ययौ भवतः। तत्र तत्साप्यानाप्यादिति भावकर्मणोः क्तः, क्तवतुस्तु कर्तर्येव। क्रियते स्म कृतः[५]। करोति स्म कृतवान्[६]॥

**आरम्भे** ।५।१।१०॥ आदिकर्मणि भूतादित्वेन विवक्षिते वर्त्तमानाद् धातोः कर्तरि क्तो वा स्यात्। प्रकृतः कटं भवान्। कर्तुमारब्धवानित्यर्थः। पक्षे–प्रकृतः कटो भवता॥

**श्लिष्–शीङ्–स्थाऽऽस्–वस–जन–रुह–जॄ–भजेः क्तः** ।५।१।९॥ श्लिष्–शीङ्–स्था–आस्–वस्–जन्–रुह्–जॄ–भज् एभ्यः क्त–प्रत्ययः कर्तरि वा भवति। आश्लिष्टः[७] कान्तां कामुकः। पक्षे भावकर्मणोः॥

**न डीङ्-शीङ्-पूङ्-धृषि-क्ष्विदि-स्विदि-मिदः** ।४।३।२७॥ डीङ्–शीङ्–पूङ्–धृष्–क्ष्विद्–स्विद्–मिद् एभ्यः परौ सेटौ क्तक्तवतू न किद्वद् भवतः। अतिशयितो[८] गुरुं शिष्यः। पक्षेऽतिशयितो गुरुः शिष्येण॥

**दोसोमास्थ इः** ।४।४।११॥ दो–सो–मा–स्था–एषां तादौ किति प्रत्यये इरन्तादेशो भवति। उपस्थितो गुरुं शिष्यः। उपासितो[९] गुरुं शिष्यः॥

---

५–अनिट्, कित्त्वान्न गुणः। ६–अभ्वादेरिति दीर्घः, ऋदुदित इति नोऽन्तः। ७–तवर्गस्येति टवर्गः। ८–इट्यकित्त्वाद् गुणायादेशौ॥ ९–उप आस्। स्वाद्यशित इतीट्।

**क्षुधवसस्तेषाम्** ।४।४।४३।। क्षुधिवसिभ्यां परेषां क्तक्तवतुक्त्वानामादिरिड् भवति । अनूषितो[1] गुरुं भवान् ।

**आः खनिसनिजनः** ।४।२।६०।। खनादीनां धुडादौ क्ङिति प्रत्यये परेऽन्तस्याकारादेशो भवति । अनुजातो[2] माणवको माणविकाम् । विजाता वत्सं गौः, आरूढो[3] वृक्षं भवान् ।।

**रदादमूर्च्छमदः क्तयोर्दस्य च** ।४।२।६९।। मूर्च्छिमदिवर्जिताद् रेफदकारान्ताद् धातोः परस्य क्तक्तवतोस्तकारस्य तत्सन्नियोगे धातुदकारस्य च नकारो भवति । अनु-जीर्णो[4] वृषलीं चैत्रः । अनुप्राप्य जीर्ण इत्यर्थः । विभक्ता भ्रातरो धनम् ।।

**क्षैशुषिपचो मकवम्** ।४।२।७८।। क्षैशुषिपचिभ्यः परस्य क्तयोस्तकारस्य क्रमात् मकव इत्येते आदेशाः स्युः । क्षामः क्षामवान्, शुष्कः, शुष्कवान्, पक्वः[5] पक्ववान्,

**गत्यर्थाकर्मकपिबभुजेः** ।५।१।११।। गत्यर्थेभ्योऽकर्मकेभ्यश्च धातुभ्यः पिबभुजिभ्यां च भूतादौ क्तो वा भवति

---

१–यजादिवचेरिति य्वृत्, घस्वस इति षः । २–डीयश्व्येदित इतीड् निषेधः । ३–हो धुडिति ढः, अध इति धः, टवर्गः, ढस्तड्ढे इति ढलोपो दीर्घश्च । ४–ऋवर्णेतीड्निषेधः, इर्, भ्वादेरिति दीर्घः, रदादिति नः, णः, ५–चज इति गः, अघोष इति कः ।।

कर्तरि । गतो[६] मैत्रो ग्रामम् । आसितो भवान्, शयितो भवान् । पयः पीतो[७] वत्सः । अन्नं भुक्तो[८] भवान् ॥

**ज्ञानेच्छार्चार्थञीच्छील्यादिभ्यः क्तः ।५।२।९२॥** ज्ञानार्थेभ्य इच्छार्थेभ्योऽर्चार्थेभ्यो ञीद्भ्यः शीलादिभ्यश्च धातुभ्यः सत्यर्थे वर्त्तमानेभ्यः क्तः प्रत्ययो भवति । राज्ञो ज्ञातः, राजानं जानातीत्यर्थः। राज्ञामिष्टः । वेट इतीड्निषेधः। राज्ञ इच्छन्तीत्यर्थः । राज्ञां पूजितः[९] । शीलितः, शीलयतीत्यर्थः। सेट्क्तयोरिति णिलोपः । रक्षितः रक्षयतीत्यर्थः ।

**आदितः ।४।४।७२॥** आकारानुबन्धाद् धातोः परयोः क्तक्तवत्वोरादिरिड् न भवति । मिन्नः, क्ष्विण्णः, स्विन्नः, धृष्टः, सुप्तः[१०], भीतः ।

**ऋल्वादेरेषां तो नोऽप्रः ।४।२।६८॥** पूर्वर्जिताद् ऋकारान्ताद् धातोर्ल्वादिभ्यश्च परेषां क्तिक्तक्तवतूनां तकारस्य नकार आदेशो भवति ॥

**ऋवर्ण श्र्यूर्णुगः कितः ।४।४।५८॥** ऋवर्णान्ताद् धातोः श्रयतेरूर्णुगश्चैकस्वराद्विहितस्य कितः प्रत्ययस्यादिरिड् न भवति । [११]तीर्णः, तीर्णवान् । कीर्णः, कीर्णवान् । गीर्णः, गीर्णवान् । कृषाद्यन्तर्गणो ल्वादिः ॥

६—यमिरमीत्यन्तलोपः । ७—ईर्व्यञ्जन इति ईः । ८—चज इति, गः, अघोष इति कः । २—राज्ञः पूजयतीत्यर्थः । १०—स्वपेरिति य्वृत् । ११—ऋवर्णेति नेट् । इर् दीर्घः । नत्वणत्वे ।

**उवर्णात्** ।४।४।५९॥ उवर्णान्तादेकस्वराद्धातोर्विहितस्य क्ति आदिरिड् न भवति। लूनः, लूनवान्, लीनः, लीनवान्॥

**लुभ्यञ्चेर्विमोहार्चे** ।४।४।४४॥ लुभ्यञ्चिभ्यां यथासङ्ख्यं विमोहेऽर्चायां च वर्त्तमानाभ्यां परेषां क्तक्तवतुक्त्वामादिरिड् वा भवति। विमोहनमाकुलीकरणम्। अर्चा पूजा। विलुभिताः केशाः, आकुलीकृता इत्यर्थः।

**अञ्चेरनर्चायाम्** ।४।२।४६॥ अञ्चेरनर्चायामेव वर्त्तमानस्योपान्त्य–नकारस्य लुग् भवति। अञ्चिता गुरवः, पूजिता इत्यर्थः॥

**पूङ्क्लिशिभ्यो नवा** ।४।४।४५॥ पूङः क्लिशिभ्यां च परेषाम् क्तक्तवतुक्त्वामादिरिड् वा भवति। पवितः, पूतः क्लिशितः, क्लिष्टः। बहुवचनेन चित् शिच्च क्लिशिर्गृह्यते॥

**डीयश्व्यैदितः क्तयोः** ।४।४।६२॥ डीयतेः श्वयतेरैदिद्भ्यश्च धातुभ्यः परयोः क्तयोरादिरिड् न भवति।

**सूयत्याद्योदितः** ।४।२।७०॥ सूयत्यादिभ्यो नवभ्य ओदिद्भ्यश्च परस्य क्तयोस्तकारस्य नकारादेशो भवति। डीनः डीनवान्। उड्डीनः, शूनः, शूनवान्। ओलस्जैत्–

---

१–ऋल्वादेरिति नत्वम्। २–न डीङित्यादिना क्त्विनिषेधाद् गुणाभावेशौ। ३–यजादीति य्वृत्, दीर्घमव इति दीर्घः। सूयत्यादीति नः।

लग्नः[४], लग्नवान्, त्रसै–त्रस्तः, त्रस्तवान् ॥

**वेतोऽपतः** ।४।४।६३॥ पतिवर्जिताद् यत्र क्वचिद् विकल्पितेटो धातोरेकस्वरात्परयोः क्तयोरादिरिड् न भवति। नशौच्–नष्टः[५], नष्टवान्, शान्तः[६], शान्तवान्, सोढः[७], सोढवान्। अपत इति किम्? पतितः, पतितवान्। ञिमिदा–मिन्नः[८], मिन्नवान्। श्विता–श्वित्तः, श्वित्तवान् ॥

**नवा भावारम्भे** ।४।४।७३॥ आरम्भ आदिक्रिया। आदितो धातोर्भावे आरम्भे च विहितयोः क्तयोरादिरिड् वा न भवति। मिन्नम्[९]अनेन, प्रमिन्नः[१०] ॥

**श्वसजपवमरुषत्वरसंघुषास्वनामः** ।४।४।७६॥ श्वस्–जप्–वम्–रुष्–त्वर्–संघुष्–आस्वन्–अम्–एभ्यः परयोः क्तयोरादिरिड् वा न भवति। आश्वस्तः, आश्वसितः, जप्तः, जपितः, वान्तः[११], वमितः, रुष्टः रुषितः ॥

**मव्यविश्रिविज्वरित्वरेरुपान्त्येन** ।४।१।१०९॥ मव्यादीनामनुनासिकादौ क्वौ धुडादौ च प्रत्यये वकारस्यो-

४–संयोगस्यादाविति स्लुक्, च ज इति गः, सूयत्यादीति नः। ५–यजसृजेति षः, रधादित्वाद्वेट्। ६–उदित्वात्क्त्वायां वेट्। अहन् पञ्चमस्यैति दीर्घः, म्नामिति वर्गान्त्यः। ७–सहलुभेति वेट्, हो धुडिति ढः, अध इति धः, तवर्गस्येति टः, सहिवहेरित्योद् ढलोपश्च। ८–रदादिति नः। ९–भावे क्तः। १०–आरम्भे क्तः। ११–अहन् पञ्चमस्यैति दीर्घः, म्नामिति वर्गान्त्यः।

पान्त्येन सह ऊड् भवति । तूर्णः[1], त्वरितः, संघुष्टः संघुषितः, आस्वान्तः[2], आस्वनितः, अभ्यान्तः, अभ्यमितः ॥

**णौ दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्तम्** ।४।४।७५॥ णौ सति दमादीनां क्तान्तानां दान्तादयो वा निपात्यन्ते । दान्तः[3], दमितः शान्तः, शमितः । पूरै-पूर्णः[4], पूरितः, एषु णिलुग् निपात्यते । दास-दस्तः, दासितः, स्पष्टः[5], स्पाशितः, छन्नः, छादितः । एषु णिलोपह्रस्वौ । ज्ञप्तः, ज्ञापितः, संज्ञपितः । अत्र क्वचिद् ह्रस्वश्च, इडभावस्तु सर्वत्र ॥

**सेट्क्तयोः** ।४।३।८४॥ सेट्कयोः क्तयोः परतो णेर्लुग् भवति । कारितः[6], कारितवान् । कथितः[7], कथितवान्, रचितः भावितः[8] ॥

**स्फायः स्फी वा** ।४।१।९४॥ स्फायतेः क्तयोः परतः स्फी इत्ययमादेशो वा भवति । स्फीतः ।

**य्वोः प्वय्व्यञ्जने लुक्** ।४।४।१२२॥ पौ यकाररहित व्यञ्जनादौ च प्रत्यये यकार वकारयो र्लुग् भवति । स्फातः[9] ॥

---

१–मव्यवीत्यूट्, रदादिति नः, णत्वम् । २–अहन्निति दीर्घः, म्नामिति पञ्चमः । ३–णिलुकि दीर्घपञ्चमौ णावुपान्त्यस्य वृद्धेरमोऽकमीति ह्रस्वः । ४–नत्वणत्वे । ५–यजसृजेति षः । ६–णिचि वृद्धिः । ७–अलोपस्य स्थानिवत्त्वान्न वृद्धिः । ८–णिचि वृद्धिः । अवादेशः । ९–ऐदित्त्वादिण्निषेधः ।

**क्तयोरनुपसर्गस्य** ।४।१।९२॥ अनुपसर्गस्य प्यायः क्तयोः परयोः पी इत्ययमादेशो भवति। पीनम्, पीनवत्[10]। अनुपसर्गस्येति किम्? प्रप्यानो[11] मेघः॥

**प्राद् दागस्त आरम्भे क्ते** ।४।४।७॥ आरम्भे – आदिकर्मणि वर्त्तमानस्य प्रशब्दादुत्तरस्य दागः स्थाने क्त-प्रत्यये परे त्तादेशो वा भवति। प्रत्तः[12], प्रदातुमारब्धवानित्यर्थः। पक्षे दद्‌आदेशो वक्ष्यमाणः। प्रदत्तः॥

**निविस्वन्ववात्** ।४।४।८॥ एभ्यः परस्य दागः क्ते परे त्तादेशो वा भवति॥

**दत्ति** ।३।२।८८॥ दा इत्येतस्य यस्तकारादिरादेशः तस्मिन् परे नाम्यन्तस्योपसर्गस्य दीर्घोऽन्तादेशो भवति। नीत्तम्, वीत्तम्, सूत्तम्, अनूत्तम्, अवत्तम्। पक्षे–निदत्तमित्यादि॥

**स्वरादुपसर्गाद्दस्तिकित्यधः** ।४।४।९॥ स्वरान्तादुपसर्गात्परस्य धावर्जितस्य दासंज्ञकस्य तकारादौ किति प्रत्यये परे त्तादेशो भवति। प्रत्तः॥

**दत्** ।४।४।१०॥ धावर्जितस्य दासंज्ञकस्य तादौ किति

---

१०–सूयत्यादीति नः। ११–य्वोः प्वयीति यलोपः। १२–धुटो धुटीति तलोपो वा।

परे दत् इत्ययमादेशो भवति । दत्तः ॥ निर्दितः[1] । निर्दितवान्, सितः, सितवान्, मितः, मितवान् । स्थितः, स्थितवान् ॥

**छाशोर्वा** ।४।४।१२॥ छोशो इत्येतयोर्धात्वोस्तादौ किति प्रत्यये परे इरन्तादेशो वा भवति । अवच्छितः[2], अवच्छातः । निशितः, निशातः ॥

**धागः** ।४।४।१५॥ दधातेस्तादौ किति प्रत्यये परे हिरादेशो भवति । विहितः, विहितवान् ॥

**वाऽवाप्योस्तनिक्रीधाग्नहोर्वपी** ।३।२।१५६॥ अवशब्दस्योपसर्गस्य तनिक्रीणात्योः परयोरपि शब्दस्य च धाग्नहोः परयोर्यथासंख्यं वपि इत्येतावादेशौ वा भवतः । पिहितः, अपिहितः, पिनद्धम्, अपिनद्धम्[3] ॥

**यपि चादो जग्ध्** ।४।४।१६॥ तादौ किति प्रत्यये यपि चादेर्जग्ध इत्ययमादेशो भवति । जग्धः[4] । इष्टम्, उप्तम्, ऊढम्[5], उक्तम्, उषितम्[6], आहूतः[7], उतः[8],

---

१–दोधातोः क्ते आत्सन्ध्यक्षरस्येत्यात्वे इत्वम् । २–स्वरेभ्य इति द्वित्वेऽघोष इति प्रथमः । ३–अनिट्, क्ते नहाहोरिति धः, अध इति धः, तृतीयस्तृतीय इति दः । ४–अध इति धः, धुटो धुटीति धलोपः । ५–य्वृति हो धुटीति ढः, अध इति धः, तवर्गस्येति ढः, ढस्तड्ढे इति ढलोपदीर्घौ । ६–य्वृति वसत्तीति इट्, घस्वस इति षः । ७–य्वृति दीर्घमिति दीर्घः । ८–य्वृत् ।

सुप्तः[9], गृहीतः[10], मृष्टः[11], भृष्टः[12]।

**तत्र क्वसुकानौ तद्वत्** ।५।२।२॥ तत्र परोक्षामात्रविषये धातोः परौ क्वसुकानौ प्रत्ययौ भवतः। तौ च परोक्षावद् भवतः। तत्र क्वसुः परस्मैपदत्वात्कर्तरि, कानस्त्वात्मनेपदत्वाद् भावकर्मणोरपि। परोक्षावद्भावाद् द्वित्वादि, कित्त्वाद् गुणाभावः। शुश्रुवान्[1], चकृवान्, चक्राणः[2]॥

**घसेकस्वरातः क्वसोः** ।४।४।८३॥ घसेकस्वरादादन्ताच्च धातोः परस्य परोक्षायाः क्वसोरादिरिड् भवति। जक्षिवान्[3], आदिवान्[4], ऊचिवान्[5], पेचिवान्[6], ईयिवान्[7], पेचानः[8], ययिवान्[9], पपिवान्, तस्थिवान्[10]।घसे-

९—स्वपेरिति य्वृत्। १०—इटि गृहण इति दीर्घः, ग्रहव्रश्चेति य्वृत्।
११—य्वृति अनुनासिके चेति शः; यजसृजेति षः, टवर्गः।
१२—य्वृति संयोगस्यादाविति सलोपः, यजेति षः, टवर्गः।

१—श्रुवस् इति स्थिते वक्ष्यमाणनियमादिडभावे सौ ऋदुदित इति नोन्ते न्स्महतोरिति दीर्घे संयोगान्तलोपादि। २—कृधातोः काने द्वित्वादि ३—गमहनेत्युपान्त्यलोपः, एकस्वरत्वादिट्, अघोष इति प्रथमः, घस्वस इति षः। ४—अद् धातोर्द्वित्वे अस्यादेरित्यात्वे समानदीर्घः। एकस्वरत्वादिट्, एवमग्रेऽपि, द्वित्वानन्तरमेकस्वरत्वं बोध्यम्। ५—यजादिवचेरिति य्वृति द्वित्वे समानदीर्घः। ६—अनादेशादेरित्येत्वम्। ७—इण इतीयादेशे द्वित्वे समानदीर्घः। ८—अनादेशादेरित्येः। ९—इडेत्पुसीत्यालुक्। १०—अघोषे शिटो लुक्।

स्स्वरात इति किम्? बभूवान्। स्क्रसितिति सिद्धे नियमार्थमिदम् "एभ्य एव क्वसोरादिरिड् भवती"ति ॥

**गमहनविद्लृविशदृशो वा ।४।४।८४॥** एभ्यः परस्य क्वसोरादिरिड् वा भवति। जग्मिवान्[११],

**मो नो म्वोश्च ।२।१।६७॥** मकारान्तस्य म्वादेरन्तस्य पदान्ते वर्तमानस्य मकारवकारयोश्च परयोर्नकारादेशो भवति। स चासन् परे। जगन्वान्[१२]। जघ्निवान्, जघन्वान्, विविदिवान्, विविद्वान्[१३], विविशिवान्, विविश्वान्, ददृशिवान्[१४], ददृश्वान् ॥

**शत्रानशावेष्यति तु सस्यौ ।५।२।२०॥** सदर्थे वर्त्तमानाद् धातोः शत्रानशौ प्रत्ययौ भवतः, एष्यति= भविष्यन्तीविषयेऽर्थे स्यप्रत्ययसहितौ शत्रानशौ भवतः। शतृ-यान्[१५], यास्यन्। आनश्-शयानः[१६]। पचन्[१७], पक्ष्यन्[१८] ॥

**अतो म आने ।४।४।११५॥** धातोर्विहिते आने प्रत्यये परे अकारस्य मोन्तो भवति। पचमानः, शयि-

---

११-गस्य जः, गमहनेत्युपान्त्यलोपः, अङ इति घः। १२-मो न इति नः। १३-कित्त्वान्न गुणः। १४-ऋतोऽत्, कित्त्वान्न गुणः। १५-ऋदुदित इति नोन्तः,। १६-शीङ एरित्येत्वेऽय्। १७-शवि लुगस्येत्यलोपः, ऋदुदित इति नोऽन्तः, संयोगान्तलोपः। १८-अनिट्। च ज इति कः, नाम्यन्तःस्थेति षः।

ष्यमाणः, करिष्यन्[१], करिष्यमाणः, विद्यमानः[२], वर्त्तमानः ॥

**आसीनः** ।४।४।११६॥ आस्तेः परस्य आनस्यादेरीकारो निपात्यते । आसीनः, उदासीनः, उपासीनः ॥

**अवर्णादश्नोऽन्तो वाऽतुरीङ्योः** ।२।१।११५॥ श्नावर्जितादवर्णात्परस्याऽतुः स्थाने अन्त आदेशो वा भवति ईप्रत्यये ङीप्रत्यये च परे । तुदन्ती[३], तुदती । भान्ती[४], भाती ॥

**श्यशवः** ।२।१।११६॥ श्यात् शवश्च परस्याऽतुरीङ्योः परयोरन्त इत्यादेशो भवति । दीव्यन्ती[५], पचन्ती[६] ॥

**तौ माङ्याक्रोशेषु** ।५।२।२१॥ माङि उपपदे आक्रोशे गम्यमाने सति शत्रानशौ प्रत्ययौ भवतः । मा पचन् वृषलो ज्ञास्यति । एवं मा पचमानः[७] ।

**वा वेत्तेः क्वसुः** ।५।२।२२॥ सत्यर्थे वर्त्तमानाद्वेत्तेर्धातोः क्वसु प्रत्ययो वा भवति । तत्त्वं विद्वान्[८], विदन् ॥

---

१–हन्नृत इतीट । २–दिवादेः श्यः, शिदविदिति ङित्त्वम् । ३–तुदादेः शः, लुगस्येत्यलोपः, क्लीबे औरीः । ४–समानदीर्घः । ५–दिव् धातोः शतरि श्ये भ्वादेरिति दीर्घः, क्लीबे औरीः । स्त्रियां त्वधातूदिति ङीः, अन्तादेशः, लुगस्य । ६–शव्, लुगस्य । ७ शवि अतो म इति मः । ८–विद् क्वसुः, ऋदुदित इति नोन्तः । न्स्महतोरिति दीर्घः । सिलोपसंयोगान्तलोपौ ।

**पूङ्यजः शानः** ।५।२।२३॥ सत्यर्थे वर्त्तमानाभ्यां पवतियजिभ्यां परः शानः प्रत्ययो भवति । पवमानः[9], यजमानः ॥

**वयःशक्तिशीले** ।५।२।२४॥ सत्यर्थे वर्त्तमानाद् धातोर्वयःशक्तिशीलेषु गम्यमानेषु शानः प्रत्ययो भवति । वयः प्राणिनां कालकृता बाल्याद्यवस्था । कतीह शिखण्डं वहमानाः । शक्तिः सामर्थ्यम् । कतीह हस्तिनं निघ्नानाः[10] । शीलं स्वभावः । कतीह परान् निन्दमानाः[11] ॥

**धारीङोऽकृच्छ्रेऽतृश्** ।५।२।२५॥ अकृच्छ्रः सुखसाध्यः । अकृच्छ्रे सत्यर्थे वर्त्तमानाद् धारेरिङश्च परोऽतृश् प्रत्ययो भवति । धारयन्[12] आचाराङ्गम् । अधीयन्[13] द्रुमपुष्पीयम् ॥

**तृन् शीलधर्मसाधुषु** ।५।२।२७॥ शीले धर्मे साधौ च सत्यर्थे वर्त्तमानाद् धातोस्तृन् प्रत्ययः कर्तरि भवति । शीलं स्वभावः, धर्मः कुलाद्याचारः, साध्विति क्रियाविशेषणम् । कर्ता[1] कटम् ॥

---

९–शवि मोन्तः, गुणावादेशौ १०–शानेऽवित्त्वान्ङित्वे गमहनेत्युपान्त्य-लोपः, हनोह्नन इति घ्नादेशः । ११–अतो मः । १२–धृधातोर्णिचि शवि गुणायादेशौ । १३–अधिपूर्वादिङ्धातोरतृशि अवित्त्वान्ङित्वे गुणाभावे धातोरितीय् ।

१–नामिन इति गुणः, सेर्डा, तृन्नुदन्तेति षष्ठीनिषेधात्कर्मणि द्वितीया ।

भ्राज्यलंकृग्निराकृग्भूसहिरुचिवृतिवृधिचरिप्रजनापत्रप इष्णुः ।५।२।२८॥ एभ्यः शीलादिसत्यर्थे वर्त्तमानेभ्य इष्णुः प्रत्ययो भवति । भ्राजनशीलो भ्राजनधर्मा साधु भ्राजते वा भ्राजिष्णुः । अलं पूर्वः कृग्-अलंकरिष्णुः । निर्–आ–कृग्–निराकरिष्णुः । भू–भविष्णुः, सहिष्णुः, रोचिष्णुः, वर्तिष्णुः, वर्धिष्णुः, चरिष्णुः । प्रजन्-प्रजनिष्णुः । अप त्रप्–अपत्रपिष्णुः ॥

उदः पचिपतिपदिमदः ।५।२।२९॥ उत्पूर्वेभ्यः शीलादिसत्यर्थे वर्त्तमानेभ्य एभ्य इष्णु भवति । उत्पचिष्णुः, उत्पतिष्णुः, उत्पदिष्णुः, उन्मदिष्णुः ॥

भूजेः ष्णुक् ।५।२।३०॥ शीलादौ सत्यर्थे वर्तमानाभ्यां भूजिभ्यां ष्णुक् प्रत्ययो भवति । भूष्णुः, जिष्णुः ॥

स्थाग्लाम्लापचिपरिमृजिक्षेः स्नुः ।५।२।३१॥ एभ्यः शीलादौ सत्यर्थे वर्त्तमानेभ्यः स्नुप्रत्ययो भवति । स्थास्नुः, ग्लास्नुः, म्लास्नुः, पक्ष्णुः, परिमार्क्ष्णुः, क्षेष्णुः ॥

त्रसिगृधिधृषिक्षिपः क्नुः ।५।२।३२॥ शीलादिसत्यर्थे वर्तमानेभ्य एभ्यः क्नुः प्रत्ययो भवति । त्रस्नुः, गृध्नुः, धृष्णुः, क्षिप्नुः ॥

---

२–तृतीयस्येति पञ्चमः । ३–आत्सन्ध्यक्षरस्येत्यात्वम् । ४–चजः कगम्, षः, णः । ५–लघोरिति गुणे मृजोऽस्य वृद्धिः, चजः कगम्, प्रथमः, षः, णः । ६–गुणः, षः, णः ।

**सन् भिक्षाशंसेरुः ।५।२।३३।।** शीलादौ सत्यर्थे वर्त्तमानात्सन्नन्ताद् धातोर्भिक्षेराशंसेश्च पर उः प्रत्ययो भवति । चिकीर्षुः, भिक्षुः, आशंसुः ॥

**विन्द्वीच्छू ।५।२।३४।।** शीलादौ सत्यर्थे वर्त्तमानाद् वेत्तेरिच्छतेश्च उः प्रत्ययो यथासंख्यं नोपान्त्य-छकारान्तादेशौ च निपात्येते । वेदनशीलो विन्दुः, एषणशील इच्छुः । *बिन्दुः प्रकृत्यन्तरमौणादिकः* ॥

**शॄवन्देरारुः ।५।२।३५।।** शीलादौ सत्यर्थे वर्त्तमानाभ्यां शॄवन्दिभ्यामारुः प्रत्ययो भवति । विशरारुः, वन्दारुः ॥

**शीङ्श्रद्धानिद्रातन्द्रादयिपतिगृहिस्पृहेरालुः ।५।२।३७।।** एभ्यः शीलादौ सत्यर्थे वर्त्तमानेभ्य आलुः प्रत्ययो भवति । शयालुः । श्रत्पूर्वो धाग्-श्रद्धालुः, निद्रालुः । तद् द्राति-तन्द्रालुः । निपातनात्तदो दस्य नः । पतिगृहिस्पृहयोऽदन्ता श्चौरादिकाः । पतयालुः, गृहयालुः, स्पृहयालुः ॥

**जागुः ।५।२।४८।।** शीलादौ सत्यर्थे वर्त्तमानाज्जागर्ते-

---

७-अत इत्यल्लोपः, क्रुगः सनि चिकर्ष इत्यत उर्बोध्यः ।

१- गुणायादेशौ । २-णिच्यत इत्यलोपः, स्वरस्य परे इति स्थानिवत्त्वान्न वृद्धिः, गुणायादेशौ ।

रूकः प्रत्ययो भवति । जागरूकः ॥

**शमष्टकाद् घिनण्** ।५।२।४९॥ शीलादौ सत्यर्थे वर्त्तमानेभ्यः शमादिभ्योऽष्टाभ्यो धातुभ्यो घिनण् प्रत्ययो भवति ॥ शाम्यतीत्येवंशीलः शमी । मोऽकमीति वृद्धिनिषेधः । तमी, दमी, श्रमी, भ्रमी, क्षमी, प्रमादी[३], उन्मादी । अकर्मकादित्येव, तेन 'अरण्यं भ्रमिता', तृन् ॥

**युजभुजभजत्यजरञ्जद्विषदुषद्रुहदुहाऽभ्याहन** : ।५।२।५०॥ एभ्यः शीलादौ सत्यर्थे वर्त्तमानेभ्यो घिनण् भवति । योगी[४], भोगी, भागी, त्यागी, रागी[५], द्वेषी, दोषी, द्रोही, दोही, अभ्याघाती[६] । अकर्मकादित्येव, गां दोग्धा, तृन् ॥

**वृङ्भिक्षिलुण्टिजल्पिकुट्टाट्टाकः** ।५।२।७२॥ एभ्यः शीलादौ सत्यर्थे वर्तमानेभ्यः टाकः प्रत्ययो भवति । वृणीते इत्येवंशीलो वराकः, वराकी[७], भिक्षाकः, लुण्टाकः, कुट्टाकः, जल्पाकः ॥

**सृघस्यदो मरक्** ।५।२।७३॥ एभ्यः शीलादौ सत्यर्थे वर्त्तमानेभ्यो मरक् प्रत्ययो भवति । सरणशीलः सृमरः, घस्मरः, अद्मरः ॥

---

३–ञ्णितीति वृद्धिः । ४–क्तेऽनिट इति गः । ५–अकट्घिनोरिति नलोपः । ६–ञ्णिति घादिति घादादेशः । ७–स्त्रियां टित्त्वान्ङीः, एवमन्यत्रापि ।

**भञ्जिभासिमिदो घुरः ।५।२।७४॥** एभ्यः शीलादौ सत्यर्थे वर्त्तमानेभ्यो घुरः प्रत्ययो भवति । भज्यते इत्येवंशीलं भङ्गुरं काष्ठम् । भासुरः । मेदुरः ।

**विति छिद् भिदः कित् ।५।२।७५॥** एभ्यः शीलादौ सत्यर्थे वर्त्तमानेभ्यः किद् घुरः प्रत्ययो भवति। वेत्तीत्येवंशीलो विदुरः, छिद्यते भिद्यते स्वयमेव छिदुरः, भिदुरः ॥

**भियो रुरुकलुकम् ।५।२।७६॥** शीलादौ सत्यर्थे वर्त्तमानाद् बिभेते रु–रुक–लुक इति प्रत्ययत्रयं किद् भवति । भीरुः, भीरुकः, भीलुकः ॥

**सृजीणनशाष्ट्वरप् ।५।२।७७॥** सृ–जि–इण्–नश् एभ्यः शीलादौ सत्यर्थे वर्तमानेभ्यः कित् ट्वरप् प्रत्ययो भवति । प्रसरणशीलः प्रसृत्वरः, जित्वरः इत्वरः, नश्वरः ॥

**गत्वरः ।५।२।७८॥** गमेष्ट्वरप् मकारस्य च तकारो निपात्यते । गत्वरी ॥

**स्म्यजसहिंसदीपकम्पकमनमो रः ।५।२।७९॥** स्म्यादिभ्यः शीलादौ सत्यर्थे वर्त्तमानेभ्यो रः प्रत्ययो भवति । स्मयनशीलं स्मेरं मुखम् । जसूच् मोक्षणे, न जस्यतीत्यजस्रम् ।

---

१–क्तेऽनिट इति गः । म्नामिति पञ्चमो ङः । २–ह्रस्वस्य त इति तोन्तः, एवमग्रेऽपि । ३–नञ्तत् ।

शब्दशक्तिस्वाभाव्यादयमजस्रशब्दः क्रियायाः सातत्यमाह। क्रियाविशेषणमजस्रमित्यव्ययं तु नित्यार्थम्। हिंस्रः, दीप्रः, कम्प्रः, कम्रा युवतिः, नम्रः॥

**तृषि धृषि स्वपो नजिङ्** ।५।२।८०॥ एभ्यः शीलादौ सत्यर्थे वर्तमानेभ्यो नजिङ् प्रत्ययो भवति। तृष्णक्, तृष्णजौ, धृष्णक्, स्वप्नक्[१]॥

**स्थेशभासपिसकसो वरः** ।५।२।८१॥ स्थादिभ्यः शीलादौ सत्यर्थे वर्त्तमानेभ्यो वरः प्रत्ययो भवति। स्थावरः, ईश्वरः। ईश्वरा। ईश्वरीति त्वौणादिके वरटि टित्त्वात् ङीः। भास्वरः, पेस्वरः, विकस्वरः। प्रमदेरपि प्रमद्वरः।

**शंसंस्वयंविप्राद् भुवो डुः** ।५।२।८४॥ शं-सं-स्वयं -वि-प्र=एतेभ्यः पराद् भुवो वर्त्तमाने डुः प्रत्ययो भवति। शम्भुः, सम्भुः, स्वयम्भुः, विभुः, प्रभुः। इति शीलाद्यर्थकाः।

**उणादयः** ।५।२।९३॥ बहुलमित्यनुवर्तते। सत्यर्थे वर्त्तमानाद् धातोरुणादयः प्रत्ययाः स्युर्बहुलम्। कारुः[२], वायुः[३], पायुर्गुदम्॥

---

४-ङित्त्वान्न य्वृत्।

१-डित्यन्त्य इति टिलोपः। तौ मुम इति स्वानुस्वारानुनासिकौ।

२-कृधातोरुणि नामिन इति वृद्धिः। ३-आत ऐः, आयादेशः।

**संज्ञासु धातुरूपाणि, प्रत्ययाश्च ततः परे।**
**कार्यमनुबन्धोपपदं, विज्ञातव्यमुणादिषु ॥१॥**

**क्रियायां क्रियार्थायां तुम् णकच् भविष्यन्ती** ।५।३।१४॥ यस्माद् धातोस्तुमादि तद्व्याप्या या क्रिया साऽर्थः प्रयोजनं यस्याः सा क्रियार्था, तस्यां, क्रियायामुपपदे वर्त्स्यत्यर्थे वर्त्तमानाद्धातोस्तुम् णकच् भविष्यन्ती प्रत्यया भवन्ति। भोक्तुं भोजको भोक्ष्ये इति व्रजति। कर्तुं कारकः करिष्यामीति व्रजति ॥

**तुमश्च मनःकामे** ।३।२।१४०॥ तुम् प्रत्ययान्तस्य सम्-शब्दस्य च प्रत्येकं मनसि कामे चोत्तरपदे लुगन्तादेशो भवति। भोक्तुं मनोऽस्य भोक्तुमनाः, सम्यङ् मनोऽस्य समनाः। गन्तुं कामोऽस्य गन्तुकामः। सम्यक् कामोऽस्य सकामः ॥

**क्त्वा तुमम् भावे** ।५।१।१३॥ क्त्वा तुम् अम् इत्येते प्रत्यया भावे वेदितव्याः।

**शक धृष ज्ञारभलभसहार्हग्लाघटास्तिसमर्थार्थे च तुम्** ।५।४।९०॥ शक्याद्यर्थेषु धातुषु समर्थार्थेषु नामसु च चकारादिच्छार्थेषु धातुषूपपदेषु कर्मभूताद् धातोस्तुमम् प्रत्ययो भवति। इह कर्मभूतादिति सामर्थ्याद् शकादिष्वर्ह-

---

४—संज्ञाशब्देषु धातवः ततः परे प्रत्ययाः, अनुबन्धास्तदाश्रितं कार्यं चोपपदं च स्वयमूह्यमित्याशयः। ५—समीपोच्चारिते। ६—चज इति गः, अघोष इति कः। ७—अभ्वादेरिति दीर्घः। ८—म्नां धुड्वर्गे। ९—धात्वर्थमात्रे।

पर्यन्तेषु इच्छार्थेषूपपदेषु च सत्स्वेव विशेषणं बोध्यम्। शक्नोति पारयति वा भोक्तुं[१०]म्। एवं धृष्णोतीत्यध्यवस्यति वा जानाति वेत्ति वा, आरभते प्रक्रमते वा, लभते विन्दते वा, सहते क्षमते वा, अर्हति प्राप्नोति वा, ग्लायति म्लायति वा, घटते युज्यते वा, अस्ति विद्यते वा, समर्थोऽलं प्रभवतीष्टे वा। समर्थार्थे गम्यमानेऽपि, यथा—द्रष्टुं चेक्षुः, योद्धुं[२] धनुः। इच्छति वष्टि वा भोक्तुम्॥

कालवेलासमये तुम्वाऽवसरे ।५।४।३॥ कालवेलासमयशब्देषूपपदेषु अवसरे गम्यमाने धातोस्तुम् प्रत्ययो वा भवति। कालो वेला समयो वा भोक्तुम्। पक्षे कालो भोजनस्य॥

पदरुजविशस्पृशो घञ् ।५।३।१६॥ एभ्यो धातुभ्यो घञ् प्रत्ययः कर्तरि भवति। पा[३]दः, रो[४]गः, वे[५]शः, स्पर्शः॥

भावाकर्त्रोः ।५।३।१८॥ भावे कर्तृवर्जिते कारके च वाच्ये धातोर्घञ् प्रत्ययो भवति॥

घञि भावकरणे ।४।२।५२॥ रञ्जेरुपान्त्यनकारस्य

---

१०—चज इति गः, प्रथमः।

१—अः सृजिदृशोरित्यः, यजसृजेति षः, टवर्गः। २—अध इति धः, तृतीयस्तृतीय इति दः। ३—ञ्णितीति वृद्धिः। ४—क्तेऽनिट इति गः, उपान्त्यगुणः। ५—उपान्त्यगुणः।

भावकरणे घञि परे लुग् भवति। रागः, पाकः। कर्तृवर्जिते कारके समाहारः, आहार इत्यादि॥

भूश्र्यदोऽल् ।५।३।२३॥ भू-श्रि-अद् इत्येतेभ्यः सोपसर्गेभ्यो भावाकर्त्रोरल् प्रत्ययो भवति। प्रभवः, उपाश्रयः, विघसः[11]॥

नेर्नदगदपठस्वनक्वणः ।५।३।२६॥ नेरुपसर्गात्परेभ्यो नदादिभ्यो धातुभ्यः परो भावाकर्त्रोरल् प्रत्ययो वा भवति। निनदः, निनादः[12], निगदः, निगादः, निपठः, निपाठः, निस्वनः, निस्वानः, निक्वणः, निक्वाणः॥

युवर्णवृदृवशरणगमृद्ग्रहः ।५।३।२८॥ इवर्णान्तेभ्य उवर्णान्तेभ्यो वृदृवशरणगमिभ्य ऋकारान्तेभ्यो ग्रहेश्च धातोर्भावाकर्त्रोरल् स्यात्। घञोऽपवादः। चयः, निश्चयः[13], क्रयः, यवः। लवः, स्तवः, पवः, वरः, प्रवरः, दरः, आदरः, वशः, रणः, गमः, अवगमः। कृ-करः, तृ-तरः, ग्रहः। समूहावसरक्रियाभ्यावृत्तिषु बाहुलकाद् घञ्। वारः। परिवार इति ण्यन्तादच्॥

६-क्तेऽनिट इति गः, उपान्त्यवृद्धिः। ७-समाह्रियतेऽसौ समूहः। नामिन इति वृद्धिः। ८-अन्नादिः। ९-नामिन इति गुणः। १०-अयादेशः। ११-घस्लृसनेति घस्लादेशः। १२-ञ्णितीति वृद्धिः, पक्षे घञ्। १३-निर्दुरिति सः, तवर्गस्येति शः।

**वर्षादयः क्लीबे** ।४।३।२९।। वर्षादयः शब्दा अलन्ताः क्लीबे यथादर्शनं भावाकर्त्रोर्[1]निपात्यन्ते । वर्षं भयं धनं वनं खलं पदं युगम् ।।

**संमदप्रमदौ हर्षे** ।५।३।३३।। संमदः प्रमद इत्येतौ हर्षेऽलन्तौ निपात्येते ।।

**निघोद्घसंघोद्घनापघनोपघ्नं निमितप्रशस्त-गणात्याधानाङ्गासन्नम्** ।५।३।३६।। हन्तेर्निघादयः शब्दाः कृतघत्वादयो निमितादिषु वाच्येष्वलन्ता निपात्यन्ते । समन्तान्मितं निमितम्, निघा[2]-वृक्षाः, उद्घः-प्रशस्तः, संघः-प्राणिसमूहः, लोहोद्घनः—यस्मिन् लौहस्य कुट्टनादि विधीयते तत् । अपघनोऽङ्गम्, उपघ्न आसन्नः ।।

**मूर्तिनिचिताभ्रे घनः** ।५।३।३७।। मूर्तिः-काठिन्यम्, निचितं-निरन्तरम्, अभ्रं-मेघः । एष्वर्थेषु हन्तेरल् प्रत्ययो घनादेशश्च निपात्यते । घनः, काठिन्यमित्यर्थः । घनाः केशाः, निरन्तरा इत्यर्थः । घनो मेघः ।।

**हनो वा वध् च** ।५।३।४६।। अनुपसर्गाद् हन्तेर्भावेऽल् प्रत्ययो भवति तत्सन्नियोगे च हन्तेर्वधादेशः । हननं वधः, पक्षे घातः[3] ।।

---

१—णत्वगुणाभावौ निपातनात् । २—तुल्यारोहपरिणाहाः । ३—ञ्णिति घादिति घादादेशः ।

व्यधजपमद्भ्यः ।५।३।४७॥ व्यध्-जप्-मद्-एभ्यो-ऽनुपसर्गेभ्यो भावाकर्त्रोरल् भवति । व्यधः, जपः, मदः ॥

नवा क्वणयमहसस्वनः ।५।३।४८॥ अनुपसर्गेभ्य एभ्यो भावाकर्त्रोरल् वा भवति । क्वणः, यमः, हसः, स्वनः । पक्षे क्वाणः, यामः, हासः, स्वानः ।

ग्रहः ।५।३।५५॥ उत्पूर्वाद् ग्रहेर्भावाकर्त्रोर्घञ् भवति । अलोऽपवादः । उद्ग्राहः । उद इत्येव, ग्रहः, विग्रहः । परिग्रहस्तु कर्त्तरि ॥

नियश्चानुपसर्गाद्वा ।५।३।६०॥ अनुपसर्गान्नयतेर्युदुद्रोश्च भावाकर्त्रोर्घञ् वा भवति। पक्षेऽल् । नायः, नयः, यावः, यवः, दावः, दवः, द्रावः, द्रवः ॥

वेरशब्दे प्रथने ।५।३।६९॥ प्रथनमिह विस्तीर्णता । वेः परात् स्तृणातेरशब्दविषये प्रथने घञ् भवति । विस्तारः पटस्य शब्दविषये प्रथने छादनादौ चालेव । तृणस्य विस्तरः, छादनमित्यर्थः । अहो द्वादशाङ्गस्य विस्तरः ॥

स्थादिभ्यः कः ।५।३।८२॥ स्थादिभ्यो धातुभ्यो यथादर्शनं भावाकर्त्रोः कः प्रत्ययो भवति । उत्थः, उत्थानमित्यर्थः । सन्तिष्ठन्त्यस्यामिति संस्था । व्यव-

१–इडेत्पुसीत्यालोपः । एवमग्रेऽपि बोध्यम् । उदः स्थेति स्लुक् । अग्रे स्त्रियामाप् दीर्घश्च ।

तिष्ठन्तेऽनयेति व्यवस्था। प्रस्नान्त्यस्मिन्निति प्रस्नः। प्रपिबन्त्यस्यामिति प्रपा। विहन्यतेऽनेनेति विघ्नः[2]॥

**ट्वितोऽथुः** ।५।३।८३॥ ट्वितो धातो र्भावाकर्त्रो-रथुः प्रत्ययो भवति। वेपथुः, वमथुः, श्वयथुः, नन्दथुः॥

**ड्वितस्त्रिमक् तत्कृतम्** ।५।३।८४॥ ड्वितो धातो-र्भावाकर्त्रोस्त्रिमक् प्रत्ययो भवति तेन धात्वर्थेन कृतमित्य-स्मिन्नर्थे। पाकेन निर्वृत्तं पक्त्रिमम्[3]। कृत्रिमम्, उप्त्रिमम्[4]॥

**यजिस्वपिरक्षियतिप्रच्छो नः** ।५।३।८५॥ एभ्यो भावाकर्त्रोर्नः प्रत्ययो भवति। यज्ञः[5], स्वप्नः, रक्ष्णः, यत्नः, प्रश्नः[6]॥

**उपसर्गाद् दः किः** ।५।३।८७॥ उपसर्गपूर्वकाद् दासं-ज्ञकाद् धातोर्भावाकर्त्रोः किः प्रत्ययो भवति। आदिः[7], आधिः, निधिः, सन्धिः[8], समाधिः॥

**व्याप्याद्दाधारे** ।५।३।८८॥ व्याप्यात्=कर्मणः पराद् दासंज्ञकाद् धातोरधिकरणे कारके किर्भवति। जलधिः[9], इषुधिः।

---

२—गमहनेत्युपान्त्यलोपः, हनो घ्न इति घ्नः। ३—चजः कगम्। ४—यजादीति य्वृत्। ५—तवर्गस्येति ञः। ६—अनुनासिके चेति शः, न शादिति न ञः। ७—इडेदित्यालोपः। ८—तौ मुम इति स्वानु-स्वारानुनासिकौ। ९—इडेदित्यालोपः, स्याद्युत्पत्तेः प्रागेव जल अस् धि इत्यस्य समासः, एवमन्यत्रापि।

**अन्तर्द्धिः** ।५।३।८९।। अन्तःपूर्वाद् धाधातोर्भावाकर्त्रोः किः प्रत्ययो निपात्यते ।। अन्तर्धिः ।

**स्त्रियां क्तिः** ।५।३।९१।। धातोर्भावाकर्त्रोः स्त्रीलिङ्गे क्तिः प्रत्ययो भवति । घञादेरपवादः । कृतिः, मतिः, लूनिः, जग्धिः[3] ।।

**सातिहेतियूतिजूतिज्ञप्तिकीर्ति** ।५।३।९४।। एते शब्दाः स्त्रियां भावाकर्त्रोः क्तिप्रत्ययान्ता निपात्यन्ते । सिनोतेः सुनोतेः स्यतेर्वा आत्वमित्वाभावश्च निपात्यते । सातिः । हिनोतेर्गुणे हन्तेर्वाऽन्त्यस्वरादेरेत्वे हेतिः । यौतेर्जवतेश्च दीर्घत्वे यूतिः, जूतिः । ज्ञपयतेर्ज्ञप्तिः । कीर्तयतेः कीर्तिः ।।

**गापापचो भावे** ।५।३।९५।। एभ्यो भावेऽर्थे स्त्रियां क्तिर्भवति । गा इति सामान्यग्रहणम् । प्रगीतिः, गीतिः पिबतेः प्रपीतिः, पचतेः पक्तिः ।।

**स्थो वा** ।५।३।९६।। तिष्ठतेर्भावेऽर्थे स्त्रियां क्तिर्वा भवति । स्थितिः, उपस्थितिः । पक्षेऽङ् ।।

---

१–यमिरमीति मलोपः । २–ॠल्वादेरिति नः । ३–यपि चेति जग्धादेशे अघ इति धत्वे धुटो धुटीति धलोपः । ४–सुनोतेः सिनोतेर्वाऽऽत्वं स्यतेरात्वमित्वाभावश्च । ५–णेरनिटीति णिलोपः । ६–ईर्व्यंजन इतीत्वम् । ७–च जः कगम् । ८–दो सो इतीत्वम् ।

**उपसर्गादातः** ।५।३।११०॥ उपसर्गेभ्यः आकारान्तेभ्यो धातुभ्यः स्त्रियां भावाकर्त्रोरङ् प्रत्ययो भवति। उपदा, आधा-आस्था, संस्था, व्यवस्था ॥

**आस्यटिव्रज्यजः क्यप्** ।५।३।९७॥ एभ्यः परो भावेऽर्थे स्त्रियां क्यप् प्रत्ययो भवति। आस्या[९], अट्या, व्रज्या, परिव्रज्या। इज्या[१०] ॥

**कृगः श च वा** ।५।३।१००॥ करोतेर्भावाकर्त्रोः स्त्रियां शः प्रत्ययो वा भवति चकारात् क्यप् च। क्रिया[११], कृत्या[१२], कृतिः। भावकर्मणोः शे क्योऽन्यत्र रेरियादेशः ॥

**मृगयेच्छायाच्ञातृष्णाकृपाभाश्रद्धान्तर्धा** ।५।३।१०१॥ एते शब्दाः स्त्रियां निपात्यन्ते। तत्रेच्छा भाव एव। शेषास्तु भावाकर्त्रोः। मृगयतेः शः शव् च क्यापवादो निपात्यते मृगया[१३]। इच्छतेः शः क्याभावश्च। इच्छा। याचितृष्योर्नङ्। याच्ञा[१४], तृष्णा[१५], कृपेरङ्, रेफस्य च ऋकारः। कृपा। भातेरङ्, भा, श्रत्पूर्वाद-

---

९–स्त्रियामाप् दीर्घः। १०–यजादिवचेरिति य्वृत्। ११–रिः शक्येति रिः संयोगादितीयादेशः। १२–ह्रस्वस्य तः। १३–मृगधातोर्णिग्यत इत्यलोपे शे शवि नामिन इति गुणेऽयादेशो लुगस्येत्यलुक्याब्दीर्घौ। १४–तवर्गस्येति ञः। १५–रषृवर्णात् ॥

न्तःपूर्वाच्च धाधातोरङ्, श्रद्धा[1], अन्तर्धा।

**परेः सृचरेर्यः ।५।३।१०२॥** परिपूर्वाभ्यां सृचरिभ्यां स्त्रियां यः प्रत्ययो भवति भावाकर्त्रोः। परिसर्या[2], परिचर्या ॥

**वाऽटाट्यात् ।५।३।१०३॥** अटतेर्यङन्तात् स्त्रियां यः प्रत्ययो वा भवति भावाकर्त्रोः। अटाट्या[3]।

**जागुरश्च ।५।३।१०४॥** जागर्तेः स्त्रियामः प्रत्ययो यश्च भवति भावाकर्त्रोः। जागरा[4], जागर्या ॥

**शंसिप्रत्ययात ।५।३।१०५॥** शंसेः प्रत्ययान्तेभ्यश्च धातुभ्यो भावाकर्त्रोः स्त्रियामः प्रत्ययो भवति। प्रशंसा, अटाटा[5], गोपाया[6], मीमांसा[7], चिकीर्षा[8], पुत्रकाम्या[9] ॥

**क्तेटो गुरोर्व्यञ्जनात् ।५।३।१०६॥** क्तेटो गुरुमतो

---

१-इडेदित्यालोपः, स्त्रियामाब्दीर्घौ। २-नामिन इति गुणः। ३-अट् धातोर्यङि द्वितीयैकस्वरस्य द्व्यस्याद्वित्वेऽन्त्यस्वरादिलोपे आगुणेत्यात्वे आब्दीर्घौ। ४-नामिन इति गुणः। ५-अटाट्य अ इत्यत्रातो लोप इत्यलोपे य्वोऽशितीति यकारलोपे आब्दीर्घौ। ६-अशवि ते वेति वाऽऽयः, अङ्यलोपः। ७-मान् धातोः शान् दानिति सनि द्वित्वादौ पूर्वस्य दीर्घे शिट्यनुस्वारेऽङ्यलोपे आब् दीर्घौ। ८-कृधातोः सनि कित्त्वाद् गुणाभावे स्वरान्तत्वाद्दीर्घे ऋतामितीरि द्वित्वादौ भ्वादेरिति दीर्घे नाम्यन्त इति षः, अङ्याब्दीर्घौ। ९-पुत्रमिच्छतीति काम्यः।

व्यञ्जनान्ताद् धातोर्भावाकर्त्रोः स्त्रियामः प्रत्ययो भवति । ईहा, ऊहा, ईक्षा, परीक्षा, उपेक्षा, अपेक्षा, शिक्षा, दीक्षा, भिक्षा ॥

**षितोऽङ्** ।५।३।१०७॥ षिद्भ्यो धातुभ्यो भावाकर्त्रोः स्त्रियामङ् प्रत्ययो भवति । क्षमा, घटा, त्वरा, प्रथा, व्यथा, जरा[10] ॥

**भिदादयः** ।५।३।१०८॥ भिदादयः शब्दाः स्त्रियामङ् प्रत्ययान्ता यथादर्शनं निपात्यन्ते । भिदा, छिदा, दया, रुजा, पृच्छा[11] ॥

**भीषिभूषिचिन्तिपूजिकथिकुम्बिचर्चिस्पृहितोलिदोलिभ्यः** ।५।३।१०९॥ एभ्यो ण्यन्तेभ्यः स्त्रियां भावाकर्त्रोरङ् भवति । भीषा[12], भूषा, चिन्ता, पूजा, कथा[13], कुम्बा, चर्चा, स्पृहा, तोला, दोला यथादर्शनमन्यत्रापि, पीडा ॥

**णिवेत्त्यासश्रन्थघट्टवन्देरनः** ।५।३।१११॥ ण्यन्तेभ्यो वेत्त्यासश्रन्थघट्टवन्दिभ्यश्च धातुभ्यः स्त्रियां भावाकर्त्रोरनः प्रत्ययो भवति । कारणा[1], कामना, लक्षणा, भावना, वेदना, उपासना, श्रन्थना, घट्टना, वन्दना ॥

---

१०-ऋवर्णेति गुणः । ११-ग्रहव्रश्चेति य्वृत् । १२-णिलोपः । १३-णावकारलोपः, अङि णिलोपः, आब्दीर्घौ ॥ १-णिलोपः ।

**इषोऽनिच्छायाम् ।५।३।११२॥** इषेरनिच्छायां वर्त्तमानात् स्त्रियां भावाकर्त्रोरनो भवति । एषणा[2], पिण्डैषणा[3] । बाहुलकादिच्छायामपि, पुत्रैषणा[4] ।

**क्रुत्सम्पदादिभ्यः क्विप् ।५।३।११४॥** क्रुधादिभ्योऽनुपसर्गपूर्वेभ्यः पदादिभ्यश्च समादिपूर्वेभ्यो धातुभ्यः स्त्रियां भावाकर्त्रोः क्विप्प्रत्ययो भवति । क्रुत्[5], मुत्, गीः[6], दिक्[7], स्रक्[8], सम्पत्, विपत्, प्रतिपत् ॥

**क्वौ ।४।४।१२०॥** शासोऽवयवस्याऽऽसः स्थाने क्वाविसादेशो भवति । आशीः[9] ॥

**ऊर्याद्यनुकरणच्विडाचश्च गतिः ।३।१।२॥** ऊर्यादयोऽनुकरणानि च्व्यन्ता डाजन्ताश्च शब्दा उपसर्गाश्च धातोः सम्बन्धिनो गतिसंज्ञा भवन्ति ।

**गतिकारकस्य नहिवृतिवृषिव्यधिरुचिसहितनौ क्वौ ।३।२।८५॥** गतिसंज्ञस्य कारकवाचिनश्च नह्यादिषु क्विबन्तेषूत्तरपदेषु परेषु दीर्घोऽन्तादेशः स्यात् । उपानत्[10] ॥

**भ्यादिभ्यो वा ।५।३।११५॥** बिभेत्यादिभ्यो धातुभ्यः स्त्रियां भावाकर्त्रोः क्विप् वा भवति । भीः, पक्षे यथायथं

२–शुद्धिरित्यर्थः, मार्गणं वा । ३–पिण्डस्य एषणा । ४–पुत्रेच्छेत्यर्थः । ५–विरामे वा । ६–पदान्ते दीर्घः । ७–ऋत्विज्दिशृदृश् इति गः । ८–अः सृजीत्यः । ९–पदान्ते दीर्घः । १०–नहाहोरिति धः ।

क्त्यादिः । भीतिः, भूः, भूतिः, दृक्[११], दृष्टिः[१२] ।

**नञोऽनिः शापे** ।५।३।११७।। नञः परात् धातोः शापे गम्यमाने स्त्रियां भावाकर्त्रोरनिः प्रत्ययो भवति । तस्याजननिरेवास्तु ।।

**ग्लाहाज्यः** ।५।३।११८।। एभ्यः स्त्रियां भावाकर्त्रोरनिः प्रत्ययो भवति । ग्लानिः[१३], हानिः, ज्यानिः । बाहुलकान्म्लानिः[१४] ।।

**प्रश्नाख्याने वेञ्** ।५।३।११९।। प्रश्ने आख्याने च गम्यमाने धातोः स्त्रियां भावाकर्त्रोरिञ् प्रत्ययो वा भवति । कां कारिमकार्षीः[१] । सर्वां[२] कारिम् ।।

**पर्यायार्हर्णोत्पत्तौ च णकः** ।५।३।१२०।। पर्याये, अर्हणं योग्यता तस्मिन्, ऋणे, उत्पत्तौ प्रश्नाख्यानयोश्च गम्यमानेषु धातोः स्त्रियां भावाकर्त्रोर्णकः प्रत्ययो भवति । क्त्याद्यपवादः । पर्यायः क्रमः, भवत आसिका[३], शायिका, अग्रगामिका वा वर्तते । आसितुं शयितुमग्रे गन्तुं च भवतः क्रम इत्यर्थः । अर्हति इक्षुभक्षिकाम्[४] । ऋणं यत्परस्मै धार्यते, इक्षुभक्षिकां मे धारयति । उत्पत्तिर्जन्म । इक्षुभक्षिका मे उदपादि, प्रश्ने कां कारिकामकार्षीः ? । आख्यानं प्रति-

११–ऋत्विजिति गः । १२–यजसृजेति षः, टवर्गः । १३–आत्सन्ध्यक्षरस्येत्यात्वम् । १४–आत्सन्ध्यक्षरस्येत्यात्वे समानदीर्घः ।

१–प्रश्ने । २–आख्याने । ३–ञ्णितीति वृद्धिः । स्त्रियामापि समानदीर्घे अस्याऽयत्तदितीः । ४–इक्षूणां भक्षणमित्यर्थः ।

वचनम् । सर्वां कारिकामकार्षम् ॥

**भावे** ।५।३।१२२॥ भावे धात्वर्थनिर्देशे, स्त्रियां धातोर्णकः प्रत्ययो भवति । आसिका, जीविका, कारिका । बाहुलकाद्-ईक्षा, ईहा, ऊहेत्यादि ॥

**क्लीबे क्तः** ।५।३।१२३॥ क्लीबे भावेऽर्थे धातोः क्तप्रत्ययो भवति । घञाद्यपवादः । हसितं छात्रस्य । स्मितं मुनेः । नृत्तं मयूरस्य ॥

**अनट्** ।५।३।१२४॥ क्लीबे भावेऽर्थे धातोरनट् प्रत्ययो भवति । गमनं भोजनं वचनं हसनं वा छात्रस्य ॥

**उपसर्गात् खल्घञोश्च** ।४।४।१०८॥ उपसर्गात्परस्य लभेः स्वरात्परः खल्घञोर्ञिर्णमोश्च परयोर्नोऽन्तो भवति । उपलम्भनम् ।

**रम्यादिभ्यः कर्तरि** ।५।३।१२६॥ रम्यादिभ्यो धातुभ्यो यथादर्शनं कर्त्तर्यनट् प्रत्ययो भवति । रमणः, रमणी[५], कमनः, कमनी । कामनः कामनी ।

**कारणम्** ।५।३।१२७॥ कृगः कर्तर्यनट् वृद्धिश्च निपात्यते । करोतीति कारणम् । कर्तरीति किम् ? करणम् ॥

**भुजिपत्यादिभ्यः कर्मापादाने** ।५।३।१२८॥ भुज्यादिभ्यः पत्यादिभ्यश्च धातुभ्यो यथासंख्यं कर्मण्यपादाने चानट् भवति । भुज्यते तदिति भोजनमपूपादि । आच्छाद[६]-

---

५–स्त्रियामणञेत्यादिना टित्त्वान्ङीः । अस्य ङ्यामित्यलोपः ।

६–णावुपान्त्यवृद्धिर्णिलोपः, स्वरेभ्य इति द्विः ।

नम्, वसनम्, आभरणम्। प्रपतत्यस्मादिति प्रपतनः, प्रस्रवणः, अपादानम्॥

**करणाधारे।५।३।१२९॥** करणाधारयोरर्थयोर्धातोरनट् भवति। घञाद्यपवादः। करणे-एषणी, लेखनी। आधारे-मत्स्याधानी, मसिधानी, शयनम्, आसनम्, अधिकरणम्॥

**पुंनाम्नि घः।५।३।१३०॥** पुंसोनाम संज्ञा पुंनाम, तत्र गम्यमाने धातोः करणाधारयोरर्थयोर्घः प्रत्ययो भवति।

**एकोपसर्गस्य च घे।४।२।३४॥** एकोपसर्गस्याऽनुपसर्गस्य च छदेर्घपरे णौ ह्रस्वो भवति। प्रच्छदः, दन्तच्छदः, प्लवः, प्रणवः, करः, प्रत्ययः, शरः, आधारे-एत्य कुर्वन्त्यस्मिन्नित्याकरः, भवः, लयः, विषयः, भरः, प्रहरः, प्रसरः, अवसरः॥

**गोचरसंचरवहव्रजव्यजखलापणनिगमबकभगकषाकषनिकषम्।५।३।१३१॥** गोचरादयः शब्दा यथायथं करणाधारयोर्घप्रत्ययान्ता निपात्यन्ते। घञोऽपवादः। गावश्चरन्त्यस्मिन्निति गोचरो देशः। व्युत्पत्तिमात्रमिदम्, विषयस्य तु संज्ञा, अन्यद्धि व्युत्पत्तिनिमित्तमन्यच्च प्रवृत्तिनिमित्तम्। "अनेकान्तात्मकं वस्तु, गोचरः सर्वसंविदाम्"। करणे संचरोऽश्वादिः। वहो वृषस्कन्धदेशः। अधिकरणे-व्रजो गोष्ठं

१-स्त्रियामणत्रेत्यादिना ङीः। अस्य ङ्यामित्यलोपः। २-णावुपान्त्यवृद्धिः, एकोपसर्गेति ह्रस्वः, णिलोपः, स्वरेभ्य इति द्विः। ३-अदुरुपसर्गेति णः।

समुदायो वा, व्यजत्यनेन व्यैंजः, खलन्त्यस्मिन् खलः, एत्य पणायन्त्यस्मिन्नित्यापणः, निगमो देशादिः, वक्तीति बकः, बाहुलकात्कर्तरि घः, निपातनाद् बः। भर्गः। अधिकरणे-कष आकषो निकषः॥

व्यञ्जनाद् घञ् ।५।३।१३२॥ व्यञ्जनान्ताद् धातोः पुंनाम्नि करणाधारे घञ्प्रत्ययो भवति। घापवादः। वेदः, एत्य पचन्त्यस्मिन्नित्यापाकः, आरामः, लेखः, बन्धः, वेगः रागः, रङ्गः क्रमः॥

रभोऽपरोक्षाशवि ।४।४।१०३॥ रभतेः स्वरात्परः परोक्षाशव्वर्जिते स्वरादौ प्रत्यये परे नान्तो भवति। आरम्भः। भावेघञ्।

लभः ।४।४।१०४॥ लभतेः स्वरात्परः परोक्षाशव्वर्जिते स्वरादौ प्रत्ययेपरे नोन्तो भवति। लम्भनम्, भावेऽनट्।

घञ्युपसर्गस्य बहुलम् ।३।२।८६॥ घञन्ते उत्तरपदे परे उपसर्गस्य बहुलं दीर्घोऽन्तादेशो भवति। प्रासाद.॥

अवात् तॄस्तॄभ्याम् ।५।३।१३३॥ अवपूर्वाभ्यां

४-विपूर्वादज्धातोर्निपातनाद्वीभावो न। ५-६-७-क्तेऽनिट इति को गश्च यथायथम्।

१-ञ्णिति वृद्धिः। २-विज् धातुः, क्तेऽनिट इति गः। ३-उपान्त्यवृद्धिः, क्तेऽनिट इति गः। अधिकरणे तु न नलोप इति रङ्गः, म्नामिति पञ्चमः। ४-एवं शमादयोऽपि, मोऽक्रमीति वृद्धिनिषेधः। ५-उपान्त्यवृद्धिः।

तॄस्तॄभ्यां करणाधारयोः पुंनाम्नि घञ् प्रत्ययो भवति। अवतारः, अवस्तारः। बाहुलकादुत्तारः॥

**न्यायावायाध्यायोद्यावसंहारावहाराधारदारजारम्** ।५।३।१३४॥ एते शब्दाः पुंनाम्नि करणाधारयोर्घञन्ता निपात्यन्ते। न्याय[6]ः, आ वयन्ति वायन्ति वा तत्रेत्यावाय[7]ः, अध्याय[8]ः, उद्याव[9]ः, संहारः, अवहारः, आधारः, दार[10]ाः पुंसि च भूम्न्येव। जार[11]ः॥

**इकिश्तिव् स्वरूपार्थे** ।५।३।१३८॥ स्वरूपेऽर्थे चाभिधेये इ-कि-श्तिव् इत्येते प्रत्यया भवन्ति। भञ्जिः, क्रुधिः, वेत्तिः। अर्थे -यजेरङ्गानि, भुजिः क्रियते, पचति वर्त्तते[12]॥

**दुःस्वीषतः कृच्छ्राकृच्छ्रार्थात् खल्** ।५।३।१३९॥ कृच्छ्रं दुःखमकृच्छ्रं सुखम्। कृच्छ्रार्थवृत्तेर्दुरोऽकृच्छ्रार्थवृत्तिभ्यां स्वीषद्भ्यां पराद् धातोर्भावकर्मणोरर्थयोः खल्प्रत्ययो भवति। कृत्यादीनामपवादः। दुःखेन सुखेनेषद्वा शय्यते इति दुःशयं सुशयमीषच्छेयं[1] भवता॥

**निर्दुर्बहिराविष्प्रादुश्चतुराम्** ।२।३।९॥ निरादीनां सम्बन्धिनो रेफस्य कखपफेषु परेषु षो भवति। दुष्[2]करः

६-निपूर्व इण् धातुः। ७-वे धातुर्वैधातुर्वा। निपातनादात्सन्ध्येत्यात्वबाधः। ८-अधि पूर्व इङ् धातुः। ९-उदुपसर्गो यु धातुः। १०-दॄधातुः। ११-जॄधातुः। १२-श्तिवः शित्त्वाच्छविरूपम्।

१-तवर्गस्येति चः, प्रथमादिति छः। २-निस् दुसिति षः।

सुकर ईषत्करः कटो भवता ॥

**शासूयुधिदृशिधृषिमृषातोऽनः** ।५।३।१४१॥ कृच्छ्राकृच्छ्रार्थदुःस्वीषत्पूर्वेभ्यः शास्प्रभृतिभ्य आकारान्तेभ्यश्च धातुभ्यो भावकर्मणोरर्थयोरनः प्रत्ययो भवति। दुःशासनः सुशासन ईषच्छासनः[3], दुर्योधनः सुयोधनः, दुर्दर्शनः, दुर्धर्षणः दुर्मर्षणः। दुरुत्थानं[4] सूत्थानमीषदुत्थानम्। दुष्पानं[5] सुपानमीषत्पानम् ॥

**प्राक्काले** ।५।४।४७॥ परकालेन धात्वर्थेन तुल्यकर्तृके प्राक्कालेऽर्थे वर्त्तमानाद्धातोः सम्बन्धे क्त्वा वा भवति।

**निषेधेऽलंखल्वोः क्त्वा** ।५।४।४४॥ निषेधे वर्त्तमानयोरलं-खलुशब्दयोरुपपदयोर्धातोः क्त्वा प्रत्ययो वा भवति। अलं कृत्वा, खलु कृत्वा। न कर्तव्यमित्यर्थः ॥

**अनञः क्त्वो यप्** ।३।२।१५४॥ नञ्वर्जिताद् व्याप्यात् पूर्वपदाद् यदुत्तरपदं तदवयवस्य क्त्वा प्रत्ययस्य यबादेशः स्यात्।

**परावरे** ।५।४।४५॥ परे अवरे च गम्यमाने धातोः क्त्वा वा भवति। अतिक्रम्य[6] नदीं पर्वतः, नद्या पर इत्यर्थः। अप्राप्य[7] नदीं पर्वतः। नद्या अर्वागित्यर्थः ॥

---

३–तस्य चः शस्य छः। ४–उदः स्थेति सलोपः। ५–निस् दुसिति षः। ६–अतिशब्देन गतिसमासः स्याद्युत्पत्तेः प्रागेव। एवमन्यत्रापि।
७–प्रोपसर्ग आप् धातुः, पूर्ववत्समासः।

**निमील्यादिमेङस्तुल्यकर्तृके** ।५।४।४६।। तुल्यो धात्वर्थान्तरेण कर्ता यस्य स तुल्यकर्तृकस्तस्मिन्नर्थे वर्त्तमानेभ्यो निमील्यादिभ्यो मेङश्च धातोः सम्बन्धे सति क्त्वा वा भवति। अक्षिणी निमील्य हसति। मुखं व्यादाय स्वपिति। [8]अयपीत्युक्तेर्नैकारः। पादौ [9]प्रसार्य स्वपिति। दन्तान् प्रकाश्य जल्पति ।।

**क्त्वा** ।४।३।२९।। धातोः परः सेट् क्त्वा किद्वन्न भवति। शिशुरयं भक्षयि[10]त्वोपजातः। पूर्वं हसनादि पश्चान्नीमोलनादि। अ[11]पमित्य याचते। पूर्वं याचते, पश्चादपमयते इत्यर्थः ।।

**जृव्रश्चः क्त्वः** ।४।४।४१।। जृ[1]व्रश्चिभ्यां परस्य क्त्वाप्रत्ययस्यादिरिड् भवति। जरीत्वा, जरित्वा, व्रश्चि[2]त्वा ।।

**ऊदितो वा** ।४।४।४२।। ऊदितो धातोः परस्य क्त्वाप्रत्ययस्यादिरिड् वा भवति। दमित्वा, दा[3]न्त्वा। शमित्वा, शान्त्वा, अञ्चित्वा, पवि[4]त्वा, पूत्वा ।।

---

८–ईर्व्यञ्जन इत्यत्र। ९–णौ वृद्धिः, पश्चात् क्त्वादिः, णिलोपः। १०–ण्यन्तस्याऽक्त्वाद् गुणेऽयादेशः। ११–क्त्वामामादित्यात्वे दोसोमेतीत्वे यपि ह्रस्वस्येति तोन्तः।

१–वृतो नवेति वा दीर्घः। २–क्त्वेत्यकित्वान्न य्वृत्। ३–अहन्पञ्चमस्येति दीर्घः। म्नामिति पञ्चमः। ४–पूङिति वेट्, इट् पक्षे क्त्वेति कित्वनिषेधः।

**स्कन्दस्यन्दः ।४।३।३०॥** स्कन्दिस्यन्दिभ्यां परः क्त्वा किद्वन्न भवति । स्कन्दित्वा[5], स्कन्त्वा, स्यन्दित्वा[6], स्यन्त्वा ॥

**क्षुधक्लिशकुषगुधमृडमृदवदवसः ।४।३।३१॥** एभ्यः परः क्त्वा सेट् किद्वद् भवति । क्षुधित्वा[7], क्लिशित्वा क्लिष्ट्वा[8], कुषित्वा, गुधित्वा, मृडित्वा, मृदित्वा, उदित्वा[9], उषित्वा[10] लुभित्वा[11], अञ्चित्वा, पूत्वा[12], रुदित्वा, विदित्वा[13], मुषित्वा, गृहीत्वा[14], सुप्त्वा[15], पृष्ट्वा[16], द्युतित्वा[17], द्योतित्वा ॥

**जनशो न्युपान्त्ये तादिः क्त्वा ।४।३।८३॥** जकारान्ताद् धातोर्नशेश्च नकारे उपान्त्ये सति तकारादिः क्त्वा किद्वद्वा भवति । रक्त्वा[18], रङ्क्त्वा, भक्त्वा, भङ्क्त्वा, नशित्वा[19], नष्ट्वा, नंष्ट्वा ॥

---

५–औदित्त्वाद्वेट् । ६–औदित्त्वाद्वेट् । ७–क्षुधवस इतीट् । ८–पूङ्क्लिशिभ्य इतीण्निषेधे यजसृजेति षः, तवर्गस्येति टवर्गः । ९–यजादिवचेरिति य्वृत् । १०–य्वृति घस्वस इति षः, इट् तु क्षुधवस इत्यनेन । ११–लुभ्यञ्चेरितीट्, वौव्यञ्जनादेरिति किद्वा । १२–पूङिति वेट् । १३–सेट्, स्वपेरिति कित्त्वम् । १४–ग्रहव्रश्चेति य्वृत् । गृह्णण इति दीर्घः १५–यजादीति य्वृत् । १६–ग्रहव्रश्चेति य्वृत्, अनुनासिके चेति शः, यजसृजेति षः । टवर्गः । १७–वौ व्यञ्जनादेरिति वा कित् । १८–नो व्यञ्जनस्येति नलोपः, क्तेऽनिट इति गः, अघोष इति प्रथमः । पक्षे म्नामिति पञ्चमः । १९–औदित्त्वाद्वेट्, पक्षे नशो धुटीति नोऽन्तः, यजसृजेति षः, तवर्गस्येति टः, शिड्हे इत्यनुस्वारः ।

**ऋतृषमृषकृशवञ्चलुञ्चथफः सेट्** ।४।३।२४। ऋत्-तृष्-मृष्-कृश्-वञ्च्-लुञ्च् इत्येतेभ्यो न्युपान्त्याभ्यां थकारफकारान्ताभ्यां च विहितः क्त्वा सेट् किद्वा भवति । ऋतित्वा, अर्तित्वा, तृषित्वा, तर्षित्वा, मृषित्वा, मर्षित्वा[20], कृशित्वा, कर्शित्वा, वचित्वा, वञ्चित्वा लुचित्वा, लुञ्चित्वा, श्रथित्वा, श्रन्थित्वा, ग्रथित्वा, ग्रन्थित्वा, गुफित्वा, गुम्फित्वा ॥

**लघोर्यपि** ।४।३।८६।। लघोः परस्य णेर्यपि परेऽयादेशो भवति । णिलोपापवादः । प्रशमय्य, प्रविगणय्य ॥

**वाऽऽप्नोः** ।४।३।८७।। आप्नोतेः परस्य णेर्यपि अयादेशो वा भवति । प्रापय्य, प्राप्य ॥

**मेङो वा मित्** ।४।३।८८।। मेङो यपि परे मिदादेशो वा भवति । अपमित्य, अपमाय ॥

**क्षेः क्षीः** ।४।३।८९।। क्षेर्यपि परे क्षी इत्यादेशो भवति । प्रक्षीय ॥ प्रजग्ध्य ॥

**यपि** ।४।२।५६।। हनिमनीनां वनतेस्तनादीनां च नान्तानामन्तस्य यपि परे लुग् भवति । प्रहत्य, प्रमत्य प्रतत्य ॥

---

२०—औदित्वाद्वेट् ।

१—णावुपान्त्यस्य वृद्धावमोऽकमीति ह्रस्वः । २—ह्रस्वस्य त इति तोऽन्तः ।

**वाऽमः ।४।२।५७।।** यमिरमिनमिगमीनां मान्तानामन्तस्य यपि प्रत्यये लुग् वा भवति । नियत्य, नियम्य, विरत्य, विरम्य, प्रणत्य[3], प्रणम्य, आगत्य, आगम्य ॥

**खणम् चाऽऽभीक्ष्ण्ये ।५।४।४८।।** आभीक्ष्ण्ये परकालेन तुल्यकर्तृके प्राक्कालेऽर्थे वर्त्तमानाद्धातोः सम्बन्धे खणम् भवति । चकारात् क्त्वा च भवति ॥

**भृशाभीक्ष्ण्याविच्छेदे द्विः प्राक्तमबादेः ।७।४।७३।।** भृशाभीक्ष्ण्याविच्छेदेषु द्योत्येषु यत्पदं वाक्यं वा वर्तते तत्तमबादिप्रत्ययेभ्यः प्रागेव द्विरुच्यते । भृशं कात्स्न्येनेत्यर्थः । आभीक्ष्ण्यम् पौनःपुन्यम्, अविच्छेदः सातत्यम् । भोजं भोजं व्रजति, भुक्त्वा[4] भुक्त्वा । आभीक्ष्ण्ये द्विरुक्तिः ॥ घाटं[5] घाटं घटं घटं वा ददाति ॥

**अन्यथैवंकथमित्थमः कृगोऽनर्थकात् ।५।४।५०।।** अन्यथा-एवं-कथम्-इत्थम् एभ्यः परात्तुल्यकर्तृकेऽर्थे वर्त्तमानात्करोतेरनर्थकाद् धातोः सम्बन्धे खणम् वा भवति । अन्यथाकारमेवंकारं कथंकारमित्थंकारं वा भुङ्क्ते । अन्यथैवं कथमित्थं वा भुङ्क्ते इत्यर्थः । अनर्थकादिति किम्? अन्यथाकृत्वा शिरो भुङ्क्ते । अत्र कृगोऽप्रयोगे शिरसः कर्मत्वं न स्यात् ।

---

३–अदुरुपसर्गान्तरेणेति णः । ४–चजः कगमिति गः । अत्रोपे प्रथम इति प्रथमः । ५–घटादेरिति वा दीर्घः ।

**यथातथादीर्ष्योत्तरे** ।५।४।५१॥ यथातथाशब्दाभ्यां परात्तुल्यकर्तृकेऽर्थे वर्त्तमानादनर्थकात्करोतेर्धातोः सम्बन्धे सति खणम् वा भवति ईर्ष्यश्चेत् पृच्छते उत्तरं ददाति । कथं भवान् भोक्ष्यते इति पृष्ट ईर्ष्यया आह–यथाकारमहं भोक्ष्ये तथाकारमहं भोक्ष्ये किं तवानेन । ईर्ष्योत्तर इति किम् ? यथाकृत्वाऽहं भोक्ष्ये तथा द्रक्ष्यसि ॥

**शापे व्याप्यात्** ।५।४।५२॥ व्याप्यात्–कर्मणः परात्तुल्यकर्तृकेऽर्थे वर्त्तमानात्करोतेर्धातोः सम्बन्धे खणम् वा भवति शापे गम्यमाने । इह कृग् नाऽनर्थकः । शाप आक्रोशः । चौरङ्कारमाक्रोशति । चौरं कृत्वेत्यर्थः । चौरशब्दमुच्चार्येति तात्पर्यम् । त्वं चौर इत्येवमाक्रोशतीति यावत् । शाप इति किम् ? यथार्थकथने मा भूत् । चौरं कृत्वा हेतुभिः कथयति । अत्र पाक्षिकोऽपि खणम् न ॥

**स्वाद्वर्थाददीर्घात्** ।२।४।५३॥ स्वाद्वर्थे वर्त्तमानाच्छब्दाददीर्घान्ताद् व्याप्यात्परात्तुल्यकर्तृकेऽर्थे वर्त्तमानात्करोतेः धातोः सम्बन्धे खणम् वा भवति । स्वादुङ्कारं भुङ्क्ते ॥

**विद्दृग्भ्यः कार्त्स्न्ये णम्** ।५।४।५४॥ कार्त्स्न्ये व्याप्यात् परेभ्यस्तुल्यकर्तृके प्राक्कालेऽर्थे वर्त्तमानेभ्यो विदिभ्यो दृशेश्च धातोः सम्बन्धे णम् वा भवति । इह सक-

१–खित्यनव्ययेति मोन्तः, तौ मुमो व्यञ्जने स्वाविति स्वानुस्वारानुनासिकौ ।

मेका विदो गृह्यन्ते, व्याप्यात् परेभ्य इत्युक्तेः। अतिथिवेदं भोजयति। यं यमतिथिं जानाति लभते विचारयति वा तं तं सर्वं भोजयतीत्यर्थः। कन्यादर्शं वरयति, यां यां कन्यां पश्यति तां तां सर्वां वरयतीत्यर्थः। अकात्स्न्ये तु अतिथिं विदित्वा भोजयति, कन्यां दृष्ट्वा वरयति॥

**यावतो विन्दजीवः ।५।४।५५॥** कात्स्न्ये यावच्छब्दात्पराभ्यां विन्दजीविभ्यां तुल्यकर्तृकेऽर्थे वर्तमानाभ्यां धातोः सम्बन्धे णम् वा भवति। यावद्वेदं भुङ्क्ते। यावल्लभते तावद् भुङ्क्ते इत्यर्थः। जीवेरपूर्वकाल एव। यावज्जीवमधीते। यावज्जीवति तावदधीत इत्यर्थः॥

**कृग्ग्रहोऽकृतजीवात् ।५।४।६१॥** अकृतजीव इत्येताभ्यां व्याप्याभ्यां पराभ्यां यथासङ्ख्यं करोतिगृह्णातिभ्यां तस्यैव धातोः सम्बन्धे सति णम् वा भवति। अकृतकारं करोति, अकृतं करोतीत्यर्थः। जीवग्राहं गृह्णाति, जीवन्तं गृह्णातीत्यर्थः॥

**शुष्कचूर्णरूक्षात्पिषस्तस्यैव ।५।४।६०॥** शुष्कचूर्णरूक्षेभ्यो व्याप्येभ्यः परात्पिषेर्णम् वा स्यात्तस्यैव धातोः सम्बन्धे सति। शुष्कपेषं पिनष्टि, शुष्कं पिनष्टीत्यर्थः। एवं चूर्णपेषं, रूक्षपेषम्॥

**हनश्च समूलात् ।५।४।६३॥** समूलशब्दव्याप्यात्पर-

स्माद्धन्तेः कषेश्च तस्यैव धातोः सम्बन्धे सति णम् वा भवति। समूलघातं हन्ति[1]। समूलं हन्तीत्यर्थः। समूलकाषं कषति समूलं कषतीत्यर्थः ॥

**व्याप्याच्चेवात्** ।५।४।७१॥ व्याप्यात्कर्मणश्चकारात्कर्तुश्चोपमानार्थात्परस्तस्यैव धातोः सम्बन्धे सति णम् वा भवति। सुवर्णनिधायं[2] निहितः। सुवर्णमिव निहित इत्यर्थः। काकनाशं नष्टः। काक इव नष्ट इत्यर्थः। इति क्त्वादिप्रत्ययाधिकारः। अयमेवोत्तरकृदन्त इत्यप्युच्यते ॥

## ॥ अथ कारकप्रकरणम् ॥

**क्रियाहेतुः कारकम्** ।२।२।१॥ क्रियायाः कारणं कर्त्रादि कारकसंज्ञं भवति। क्रिया[3]हेतुश्च पदार्थानां क्रियानिर्वर्त्तिका शक्तिः, तस्माच्छक्तिः कारकम्। सा च सहभूर्यावद्द्रव्यभाविनी च क्रियाकाल एव व्यज्यते इति क्रियायोग एव कारकमिति क्रियाशून्यस्य हेत्वादेः क्रियायां निमित्तत्वेऽपि न कारकत्वम् ॥

---

१–मूलमप्यपरित्यज्येति समूलम्। साकल्येऽव्ययीभावः, मूलेन सह वर्तते इति बहुव्रीहिर्वा। ञ्णिति घादिति घात्। २–णमि आत ऐरित्यैः, आयादेशः। ३–फलव्यापारौ धात्वर्थः क्रियोच्यते। फलव्यापारयोर्वैयधिकरण्ये सकर्मिका, तयोः सामानाधिकरण्ये सकर्मिका सोच्यते। इय क्रिया पदार्थशक्त्यैव निर्वर्त्यते इति शक्तिः कारकम्। तत्र कर्ता स्ववृत्तिव्यापारनिर्वर्त्तकः, कर्म च स्ववृत्तिफलनिर्वर्तकम्। करणादिकं च परवृत्तिक्रियानिर्वर्तकम्।

**स्वतन्त्रः कर्ता ।२।२।२॥** क्रियायां जनकः क्रियासिद्धावपराधीनः प्राधान्येन विवक्षितः कारकविशेषः कर्तृसंज्ञः स्यात्[४] ॥

**नाम्नः प्रथमैकद्विबहौ ।२।२।३१॥** एकत्वद्वित्वबहुत्वविशिष्टेऽर्थे वर्त्तमानान्नाम्नः परा यथासंख्यं सि औ जस् लक्षणा प्रथमा विभक्ति र्भवति । द्वितीयादिविध्यन्यथानुपपत्त्या कर्मत्वाद्यतिरिक्तेऽर्थमात्रे प्रथमा भवति । कर्मादिरप्यभिहितोऽर्थमात्रमिति बोध्यम् । एवं लाक्षणिकमलिङ्गमसङ्ख्यं शक्तिप्रधानं द्योत्यमपि चार्थमात्रमेव । तदयं सङ्क्षेपः—द्वितीयादिविनिर्मुक्तो नामाऽर्थोऽर्थमात्रं, स्वार्थद्रव्यलिङ्गसंख्याकारकलक्षणः समग्रोऽसमग्रो वा । तत्र शब्दस्यार्थे प्रवृत्तिनिमित्तं स्वरूपजातिगुणक्रियाद्रव्यसम्बन्धादिरूपं त्वतलादिप्रत्ययवाच्यं स्वार्थः । स्वरूपे—डित्थः, डवित्थः । जातौ—गौः, अश्वः । गुणे—शुक्लः, कृष्णः । क्रियायाम्—कारकः, पाचकः । द्रव्ये—दण्डी, कुण्डली । सम्बन्धे—राजपुरुषः ॥

४—तदुक्तं शब्दमहार्णवन्यासे—

"निष्पत्तिमात्रे कर्तृत्वं, सर्वत्रैवास्ति कारके ।
व्यापारभेदापेक्षायां, करणत्वादिसम्भवः ॥१॥
फलार्थी यः स्वतन्त्रः सन्, फलायारभते क्रियाम् ।
नियोक्ता परतन्त्राणां, स कर्ता नाम कारकम् ॥२॥" इति ।

आमन्त्र्ये ।२।२।३२॥ सिद्धस्याभिमुखीकरणं सम्बोधनम्, तदेवेहामन्त्रणम्, तद्विषय आमन्त्र्यः। तस्मिन्नर्थे वर्त्तमानान्नाम्न एकद्विबहौ यथासंख्यं प्रथमा विभक्ति भवति। हे वीतराग! हे मुने!॥

कर्तुर्व्याप्यं कर्म ।२।२।३॥ कर्त्रा क्रियया यद्विशेषेणाप्तुमिष्यते तद्व्याप्यम्, तत्कारकं कर्मसंज्ञं भवति, यत्कर्म कर्त्रा क्रियते तद् व्याप्यसंज्ञं भवतीत्यपि सूत्रार्थः।

कर्मणि द्वितीया ।२।२।४०॥ गौणान्नाम्नः कर्मणि कारके द्वितीया भवति। तत्कर्म त्रेधा—निर्वर्त्त्यं विकार्यं प्राप्यं च। यदसज्जायते जन्मना वा प्रकाश्यते तद् निर्वर्त्त्यम्, यथा घटं करोति, सुतं प्रसूते। प्रकृत्युच्छेदेन गुणान्तराधानेन वा यद्विकृतिमापाद्यते तद् विकार्यम्, यथा काष्ठं दहति, यष्टिं तक्ष्णोति। यत्र क्रियया कृतो विशेषो नास्ति तत्प्राप्यम्, यथा—जिनबिम्बं पश्यति। सम्यक्त्वं प्रतिपद्यते। कर्मादिप्रत्ययेनोक्तमर्थमात्रमित्युक्ते-रुक्ते कर्मादौ प्रथमैवेति कर्मादावनुक्त एव द्वितीयादिकं बोध्यम्। एवं त्रिविधमप्येतदिष्टानिष्टानुभयभेदात्त्रिविधम्। तदेतन्नवविधमपि कर्म प्रधानगौणभेदादष्टादशविधम्। प्रधानक्रियाजन्यफलाश्रयः प्रधानमितरदप्रधानम्। यदर्थं क्रियाऽऽरभ्यते तत्प्रधानम्, तत्सिद्धये तु यदन्यत्क्रियया व्याप्यते तदप्रधानमिति यावत्। एतद् द्वैविध्यं च दुहि-भिक्षि-रुधि-प्रच्छि-चिग्-ब्रूग्-शास्त्वर्थेषु

धातुषु याचि[1]-जयति प्रभृतिषु नीहृकृष्वहेषु च भवति। दुहादिभ्यः कर्मणि प्रत्यये गौणं कर्मोक्तं भवति, तस्मात्ततः प्रथमा, मुख्याच्च द्वितीयैव। न्यादिषु तु मुख्यं कर्म कर्मणि प्रत्यये सत्यभिहितमिति ततः प्रथमाऽन्यत्र द्वितीया। गां दोग्धि पयः, गौः पयो दुह्यते। अजां ग्रामं नयति, अजा ग्रामं नीयते।

गतिबोधाहारार्थशब्दकर्मनित्याकर्मणामनीखाद्यदिह्वाशब्दायक्रन्दाम् ।२।२।५॥ गत्यर्थबोधार्थाहारार्थानां शब्दकर्मणां नित्याकर्मणां च धातूनां नीखाद्यदिह्वयति-शब्दायति-क्रन्दवर्जितानामणिगवस्थायां यः कर्ता स णौ कर्मसंज्ञो भवति। गच्छति मैत्रो ग्रामम्, गमयति मैत्रं ग्रामम्। बुध्यते शिष्यो धर्मम्, बोधयति गुरुः शिष्यं धर्मम्। भुङ्क्ते बटुरोदनम्, भोजयति बटुमोदनम्। जल्पति मैत्रो द्रव्यम्, जल्पयति मैत्रं द्रव्यम्। शब्दो यदा न क्रिया किन्तु व्याप्यस्तदापि कर्मसंज्ञा, शब्दः कर्म=क्रिया व्याप्यं च येषामित्यर्थात्। शृणोति शब्दं चैत्रः, श्रावयति शब्दं चैत्रम्। आस्ते मैत्रः, आसयति मैत्रं चैत्रः। कालाध्वभावदेशैश्च सर्वेऽपि धातवः सकर्मका एवेत्यन्य-कर्मापेक्षया नित्याकर्मका बोध्याः। नित्यग्रहणमविवक्षितकर्मकत्वेनाकर्मकव्यावृत्तये। तत्र हि वा कर्मसंज्ञा, यथा पचति चैत्रः, पाचयति चैत्रं चैत्रेण वा। न्या-

---

१—याचिरिहानुनये इति भिक्षेः पृथङ् निर्देश इति।

दिवर्जनं किम्? नयति भारं चैत्रः, नाययति भारं चैत्रेण। गत्यर्थानामकर्मकाणां च ण्यन्तानां प्रयोज्यमेव कर्म कर्मप्रत्ययेनोच्यते। गमयति ग्रामं चैत्रम्, गम्यते ग्रामं चैत्रः। आसयति मासं मैत्रम्, आस्यते मासं मैत्रश्चैत्रेण। बोधार्थादीनां तु ण्यन्तानामुभयत्र कर्मणि यथेच्छं कर्मणि प्रत्ययः। बोध्यते शिष्यं धर्मः, बोध्यते धर्मं शिष्य इति वा।

स्मृत्यर्थदयेशः ।२।२।११॥ स्मरणार्थानां दयतेरीशश्च व्याप्यं कर्म वा भवति। मातरं स्मरति, मातुः[1] स्मरति। सर्पिषो दयते, सर्पिर्दयते, लोकानीष्टे, लोकानामीष्टे॥

रुजार्थस्याऽज्वरिसन्तापे र्भावे कर्तरि ।२।२।१३॥ पीडार्थस्य धातोर्ज्वरिसंतापिवर्जितस्य व्याप्यं वा कर्मसंज्ञं भवति भावश्चेद्रुजार्थस्य कर्ता भवति। चौरं चौरस्य वा रुजति रोगः। ज्वरिसन्ताप्योस्तु नित्यमेव। आघूनं ज्वरयति, अत्याशिनं सन्तापयति व्याधिः। भाव इति किम्? मैत्रं रुजति श्लेष्मा[2]।

जासनाटक्राथपिषो हिंसायाम् ।२।२।१४॥ एषां हिंसायां वर्त्तमानानां व्याप्यं कर्म वा भवति। चौरं चौरस्य वोज्जासयति नाटयति क्राथयति पिनष्टि वा॥

निप्रेभ्यो घ्नः ।२।२।१५॥ निप्राभ्यां परस्य हिंसायां

---

१–शेषषष्ठी। २–श्लेष्मा द्रव्यं, न भावः।

वर्तमानस्य हन्ते र्व्याप्यं वा कर्म भवति । चौरं चौरस्य वा निप्रहन्ति निहन्ति प्रहन्ति प्रणिहन्ति वा ।

**अधेः शीङ्स्थास आधारः ।२।२।२०॥** अधेः सम्बद्धानां शीङ्स्था–आस् इत्येतेषां य आधारस्तत्कारकं कर्मसंज्ञं भवति । ग्राममधिशतेऽधितिष्ठत्यध्यास्ते वा मैत्रः ॥

**उपान्वध्याङ्वसः ।२।२।२१॥** उपान्वध्याङ्पूर्वस्य वसतेराधारः कर्मसंज्ञो भवति । ग्राममुपवसत्यनुवसत्यधिवसत्यावसति वा मैत्रः ॥

**वाऽभिनिविशः ।२।२।२२॥** अभिनीतिविशिष्टोपसर्गसमुदायपूर्वस्य विशतेराधारः कर्मसंज्ञो वा भवति । ग्रामं ग्रामे वाऽभिनिविशते । व्यवस्थितविभाषेयम् । कल्याणेऽभिनिविशते । अत्र कल्याणमिति न प्रयोगः ।

**कालाध्वभावदेशं वा कर्म चाकर्मणाम् ।२।२।२३॥** अकर्मकाणां धातूनां प्रयोगे, कालो मुहूर्त्तादिरूपः, अध्वा गन्तव्यं क्रोशादि, भावः क्रिया गोदोहादिरूपा, देशो जनपदग्रामनदीपर्वतादिः–एते आधारभूताः कर्मसंज्ञा वा भवन्ति, अकर्मसंज्ञा अपि वा भवन्ति । सन्नियोगशिष्ट-

३–नेङ्मेति णः ।

१–निवसतीत्यर्थः । भोजननिवृत्त्यर्थयोगे नेति बोध्यम् ।

त्वात्सहैवेति गम्यते। मासमास्ते, मास आस्यते, मासमास्यते[२]। पक्षे मासे आस्ते। क्रोशं स्वपिति, क्रोशः सुप्यते, क्रोशं सुप्यते, क्रोशे सुप्यते। ओदनपाकं शेते, ओदनपाकः शय्यते। ओदनपाकं शय्यते, ओदनपाके शेते। ग्रामं वसति, ग्राम उष्यते, ग्राममुष्यते, ग्रामे उष्यते॥

गौणात्समयानिकषाहाधिगन्तरान्तरेणातियेनतेनैर्द्वितीया ।२।२।३३॥ आख्यातपदेनासमानाधिकरणं गौणम्। तस्माद् गौणान्नाम्नः समयादिभिर्निपातैर्युक्ताद् द्वितीयाविभक्तिर्भवति। षष्ठ्यपवादः। समया[३] निकषा वा पर्वतं नदी। हा देवदत्तं वर्धते व्याधिः। धिग् जाल्मम्[४]। अन्तराऽन्तरेण वा निषधं नीलं च विदेहाः। अन्तरेण सम्यक्त्वं न मोक्षः। अति वृद्धं कुरून् महद् बलम्। कुर्वतिक्रमेण वृद्धमित्यर्थः। येन पश्चिमां गतः, तेन पश्चिमां नीतः। येन तेनेति निपातो लक्षणे। बहुवचनात्प्रतियोगेऽपि। बुभुक्षितं न प्रति भाति किञ्चित्॥

द्वित्वेऽधोऽध्युपरिभिः ।२।३।३४॥ अधस् अधि उपरि एभिर्युक्ताद् गौणान्नाम्न एषामेव द्वित्वे सति

२–कर्मत्वाद्द्वितीयाऽकर्मकत्वाच्च भावे प्रत्ययः। ३–समीपार्थे द्वयं बोध्यम्। ४–जाल्मोऽसमीक्ष्यकारी।

द्वितीया भवति । षष्ठ्यपवादः । अधोऽधो[1] ग्रामं ग्रामाः । अध्यधिग्रामं क्षेत्राणि । उपर्युपरि ग्रामं ग्रामाः । द्वित्वे इति किम्? अधो गृहस्य ॥

**सर्वोभयाभिपरिणा तसा** ।२।२।३५॥ सर्वादिभिस्तसन्तैर्युक्ताद् गौणान्नाम्नो द्वितीया भवति । सर्वत उभयतोऽभितो वा ग्रामं वनानि । परितो ग्रामं क्षेत्राणि ॥

**उत्कृष्टेऽनूपेन** ।२।२।३९॥ उत्कृष्टेऽर्थे वर्त्तमानादनूपाभ्यां युक्ताद् गौणान्नाम्नो द्वितीया भवति । अनु सिद्धसेनं कवयः । उपोमास्वातिं संग्रहीतारः । तस्मादन्ये हीना इत्यर्थः ॥

**क्रियाविशेषणात्** ।२।२।४१॥ क्रियाया यद्विशेषणं तद्वाचिनो गौणान्नाम्नो द्वितीया भवति । स्तोकं पचति । सुखं शेते ॥

**कालाध्वनोर्व्याप्तौ** ।२।२।४२॥ व्याप्तिरत्यन्तसंयोगः । सम्बन्धिनीभिर्द्रव्यगुणक्रियाभिर्व्याप्तौ द्योत्यायां कालेऽध्वनि च वर्त्तमानाद् गौणान्नाम्नो द्वितीया भवति । मासं गुडधानाः, मासं कल्याणी, मासमधीते, क्रोशं पर्वतः, क्रोशं कुटिला नदी, क्रोशमधीते ॥ इति द्वितीया ॥

---

१–वीप्सायां द्विर्भावः ।

**सिद्धौ तृतीया** ।२।२।४३॥ क्रियाफलनिष्पत्तौ गम्यायां कालाध्ववाचिनो गौणान्नाम्नस्तृतीया विभक्तिर्भवति व्याप्तौ द्योत्याम् । मासेनावश्यकमधीतम् , क्रोशेन प्राभृतमधीतम् । सिद्धाविति किम् ? मासमधीत आचारो नाऽनेन गृहीतः, अत्र व्याप्तिमात्रं गम्यते ॥

**साधकतमं करणम्** २।२।२४॥ क्रियासिद्धौ यत्प्रकृष्टोपकारकत्वेनाऽव्यवधानेन विवक्षितं कारकं तत्साधकतमं, तत्करणसंज्ञं भवति ।

**हेतुकर्तृकरणेत्थंभूतलक्षणे** ।२।२।४४॥ हेतौ कर्तरि करणे इत्थंभूतलक्षणे चार्थे वर्त्तमानाद् गौणान्नाम्नस्तृतीया भवति । हेतौ–धनेन कुलम् । विद्यया यशः । कर्त्तरि–चैत्रेण कृतम् । करणे–परशुना छिनत्ति । दानेन लभते भोगान् । यदा तूपदेशमात्रं तदा दानेनेति हेतुमात्रं बोध्यम् । इत्थंभूतलक्षणे–अपि भवान् कमण्डलुना छात्रमद्राक्षीत् ॥ जटाभिस्तापसं जानीयात् । अत्र छात्रत्वादिकं प्रकारमापन्नस्य कमण्डल्वादिकं लक्षणम् ॥

**सहार्थे** ।२।२।४६॥ सहार्थस्तुल्ययोगो वर्तमानता च । सहार्थे शब्दादर्थाद्वा गम्यमाने गौणान्नाम्नस्तृतीया

२–फलसाधनयोग्यः पदार्थो हेतुः । ३–इत्थं कञ्चित्प्रकारं भूत आपन्न इत्थंभूतः, स लक्ष्यते येन स इत्थम्भूतलक्षणः । यथा छात्रत्वप्रकारमापन्नः कमण्डलुना लक्ष्यते इति कमण्डलुरित्थम्भूतलक्षणम् ॥

भवति। "एकेनापि सुपुत्रेण, सिंही स्वपिति निर्भयम्। सहैव दशभिः पुत्रै-र्भारं वहति गर्दभी" ॥ १ ॥ अत्र पूर्वार्धे सहार्थो विद्यमानताऽर्थाद् गम्या। उत्तरार्धे तु तुल्यक्रियायोगः शब्दवाच्यः। पुत्रेण सह स्थूल आगतो, गोमानित्यादावपि तुल्ययोगो बोध्यः। एवं साकं सार्धं समं सत्रा युगपदादिशब्दयोगेऽपि सहार्थत्वात्-तृतीया। एवं कार्त्स्न्येन साकल्येन सुखेन दुःखेन कष्टेनानवयवेनानायासेनेत्यादावपि सहार्थो गम्यते इति बोध्यम्। क्रियाविशेषणत्वे तु सुखादिषु द्वितीयैव। सुखं स्वपितीत्यादि ॥

यद्भेदैस्तद्वदाख्या २।२।४६॥ यस्य भेदिनः प्रकारवतोऽर्थस्य भेदैः प्रकारैर्विशेषैस्तद्वतस्तत्प्रकारवदर्थ-युक्तस्याख्या निर्देशो भवति, तद्वाचिनो गौणान्नाम्न-स्तृतीया भवति। अत्र यस्येति यत्पदेन यस्मान्ना-म्नस्तृतीयेष्टा तद्ग्रहणम्। अक्ष्णा काणः। अत्राक्षिप्रकारेण काणेनाक्षिमानुच्यते। एवं प्रकृत्या दर्शनीयः, गोत्रेण गार्ग्यः, वर्णेन गौर इत्यादि। लोके तथा प्रयोगे प्रसिद्धे सत्येव तृतीया। अक्ष्णा दीर्घ इत्यादि न प्रयुज्यते, अप्रसिद्धेरेवेति बोध्यम् ॥

कृताद्यैः ।२।२।४७॥ कृत इत्येवंप्रकारैर्निषेधार्थैर्यु-क्ताद् गौणान्नाम्नस्तृतीया भवति। कृतं तेन, भवतु

तेन, अलं वितण्डया, किं गतेन, सृतं बहूक्तेन ॥

**व्याप्ये द्विद्रोणादिभ्यो वीप्सायाम् ।२।२।५०॥** व्याप्ये वर्त्तमानेभ्यो द्विद्रोणादिभ्यो गौणान्नामभ्यो वीप्सायां तृतीया वा भवति । द्विद्रोणेन[१], द्विद्रोणं द्विद्रोणं वा धान्यं क्रीणाति ॥ इतितृतीया ॥

**कर्माभिप्रेयः सम्प्रदानम् ।२।२।२५॥** कर्मणा व्याप्येन क्रियया वा कारणभूतेन यमभिप्रेयते श्रद्धानुग्रहादिकाम्यया यमभिसम्बध्नाति तत्कारकं सम्प्रदानसंज्ञं भवति ॥

**स्पृहेर्व्याप्यं वा ।२।२।२६॥** स्पृहयतेर्धातो र्व्याप्यं वा सम्प्रदानसंज्ञं भवति ।

**क्रुधद्रुहेर्ष्यासूयार्थैर्यं प्रति कोपः ।२।२।२७॥** क्रुधाद्यर्थैर्धातुभिर्योगे यं प्रति कोपस्तत्कारकं सम्प्रदानसंज्ञं भवति ॥

**नोपसर्गात्क्रुधद्रुहा ।२।२।२८॥** उपसर्गात्पराभ्यां क्रुधि-द्रुहिभ्यां योगे यं प्रति कोपस्तत्कारकं सम्प्रदानसंज्ञं न भवति ॥

---

१—तृतीयया वीप्सोक्तेर्न द्वित्वम् । द्वितीया तु न वीप्सायामिति तदन्तस्य तत्र द्वित्वम् ।

१—क्रोधोऽमर्षः, द्रोहोऽपचिकीर्षा, ईर्ष्या परसम्पत्तौ चेतसो व्यारोषः, असूया गुणेषु दोषाविष्करणम् ।

**चतुर्थी** ।२।२।५३।। सम्प्रदाने वर्त्तमानाद् गौणान्नाम्नो ङेभ्यांभ्यस्लक्षणा चतुर्थी विभक्ति र्भवति। देवाय बलिं ददाति। द्विजाय गामुत्सृजति, शिष्याय धर्ममुपदिशति, राज्ञे कार्यमाचष्टे। एषु कर्मभिर्बल्यादिभिर्देवादयोऽभिसम्बध्यन्ते कर्त्रा। पत्ये शेते, युद्धाय सन्नह्यते, देवेभ्यो नमति, महाराजाय निवेदयति। एषु शयनादिक्रियया पत्यादयोऽभिसम्बध्यन्ते। पुष्पेभ्यः पुष्पाणि वा स्पृहयति। सम्प्रदानसंज्ञापक्षे धातोरकर्मकत्वात्पुष्पेभ्यः स्पृहित इत्यादि। मैत्राय क्रुध्यति, कुप्यति, रुष्यति, द्रुह्यति, अपचिकीर्षत्यपकरोतीर्ष्यति सूक्ष्यति असूयति वा। मैत्रमभिक्रुध्यति अभिद्रुह्यति वा। अभिपूर्वौ क्रुधिद्रुही सकर्मकौ ।।

**तादर्थ्ये** ।२।२।५४।। तस्मा अयं तदर्थस्तस्य भावे तादर्थ्ये सम्बन्धविशेषे गम्यमाने गौणान्नाम्नश्चतुर्थी भवति। षष्ठ्यपवादः। यूपाय दारु, कुण्डलाय हिरण्यम्, रन्धनाय स्थाली ।।

**रुचिकृप्यर्थधारिभिः प्रेयविकारोत्तमर्णेषु** ।२।२।५५।। रुच्यर्थैः कृप्यर्थैं र्धारिणा च धातुना योगे यथाक्रमं प्रेये विकारे उत्तमर्णे च वर्त्तमानाद् गौणान्नाम्नश्चतुर्थी भवति। प्रेयः प्रीयमाणः। श्रावकाय रोचते स्वदते वा

धर्मः। अभिलाषमुत्पादयतीत्यर्थः। प्रतिभान्नार्थयोगे तु षष्ठ्येव। सर्वेषामेतद् रोचते। क्वचित्तु सम्बन्धमात्रविवक्षायां षष्ठ्येव। रोचते मम घृतम्। कृप्यर्थे विकारे-मूत्राय कल्पते सम्पद्यते जायते वा यवागूः। अपायविवक्षायां पञ्चम्यपि। मूत्रं सम्पद्यते यवाग्वाः। शृङ्गाच्छरो जायते। धारिणोत्तमर्णे-चैत्राय शतं धारयति।

उत्पातेन ज्ञाप्ये ।२।२।५९।। उत्पात आकस्मिकं निमित्तम् तेन ज्ञाप्यमानेऽर्थे वर्त्तमानाद् गौणान्नाम्नश्चतुर्थी भवति। "वाताय कपिला विद्युदातपायातिलोहिनी। पीता वर्षाय विज्ञेया, दुर्भिक्षाय सिता भवेत् ॥१॥

तुमोऽर्थे भाववचनात् ।२।२।६१।। क्रियायां क्रियार्थायामुपपदे तुम् भवति, तस्य तुमोऽर्थे ये भावे घञादयः प्रत्यया उक्तास्तदन्ताद् गौणान्नाम्नः स्वार्थे चतुर्थी भवति। पाकाय व्रजति, पक्तुमित्यर्थः ॥

गम्यस्याऽऽप्ये ।२।२।६२।। प्रयोगं विना यदर्थो गम्यते स गम्यः, तस्य गम्यस्य तुमो व्याप्याद् गौणान्नाम्नश्चतुर्थी भवति। फलेभ्यो व्रजति, फलान्याहर्तुमित्यर्थः। प्रयोगे तु न, फलान्याहर्तुं याति ॥

गतेर्नवाऽनाप्ते ।२।२६३।। पादविहरणात्मकगतेर्व्याप्तेऽनाप्ते वर्त्तमानाद् गौणान्नाम्नश्चतुर्थी भवति। ग्रामं

ग्रामाय वा गच्छति । आप्ते तु ग्रामं गतः, प्राप्त इत्यर्थः । अत्र ग्रामायेति न भवति ॥

**मन्यस्याऽनावादिभ्योऽतिकुत्सने** ।२।२।६४ ॥ अतीव कुत्स्यतेऽनेनेत्यतिकुत्सनम् । तस्मिन् मन्यतेराप्ये वर्त्तमानान्नावादिगणवर्जिताद् गौणान्नाम्नश्चतुर्थी वा भवति । न त्वा तृणाय तृणं वा मन्ये । न त्वां नावं मन्ये ।

**हितसुखाभ्याम्** ।२।२।६५॥ हितसुखाभ्यां युक्ताद् गौणान्नाम्नश्चतुर्थी भवति वा । साधवे साधोर्वा हितं सुखं वा ॥

**तद् भद्रायुष्यक्षेमार्थार्थेनाशिषि** ।२।२।६६॥ हित-सुखभद्रायुष्य क्षेमार्थार्थैर्युक्ताद् गौणान्नाम्न आशिषि गम्य-मानायां चतुर्थी वा भवति । हितं सुखं भद्रमायुष्यं क्षेममर्थो वा जीवानां जीवेभ्यो वा भूयात् । एवं हिताद्यर्थैर्युक्तादपि । पथ्यं शं भद्रं दीर्घायुः कुशलं प्रयोजनं वा भूयाज्जीवेभ्यो जीवानां वा ॥

**परिक्रयणे** ।२।२।६७॥ परि क्रीयते नियतकालं स्वी-क्रियते येन तद्वेतनादि परिक्रयणम् । तस्मिन् वर्त्तमानाद् गौणान्नाम्नश्चतुर्थी वा भवति । करणत्वात्पक्षे तृतीया । शताय शतेन वा परिक्रीतः । सम्भोगाय परिक्रीतः कर्ताऽ-

१—नावान्नबुसशुककाकश्वशृगालेति नावादिः । आकृतिगणोऽयम् ।

स्मि तत्र नाऽक्रियम्। सम्भोगेन वा। शतादिना नियतकालं स्वीकृत इत्यर्थः।

**शक्तार्थवषड्नमःस्वस्तिस्वाहास्वधाभिः।२।२।६८॥** शक्तार्थैर्वषडादिभिश्च शब्दैर्युक्ताद् गौणान्नाम्नश्चतुर्थी भवति। शक्तोऽलं प्रभुः समर्थो वा मल्लो मल्लाय। वषडग्नये। नमोऽर्हद्भ्यः। स्वस्ति संघाय। इन्द्राय स्वाहा पितृभ्यः स्वधा।

॥ इति चतुर्थी ॥

**अपायेऽवधिरपादानम्।२।२।२९॥** सावधिकं गमनमपायः। विभाग इति यावत्। सच क्रियाजन्यः सम्बन्धनाशद्वारा। तत्र यदवधिभूतमपायेनानधिष्ठितं तत्कारकमपादानसंज्ञं भवति॥

**पञ्चम्यपादाने।२।२।६९॥** अपादाने कारके गौणान्नाम्नः पञ्चमीविभक्तिर्भवति। अपायो द्विविधः– कायसंसर्गपूर्वको बुद्धिसम्बन्धपूर्वकश्च। तत्राद्यो यथा–वृक्षात्पर्णं पतति। पतनं गमनविशेषो येन विभागो भवति, वृक्षसंसृष्टस्य पत्रस्य तदिह। एवं पर्वतादवरोहति, ग्रामादागच्छति, मेषान्मेषोऽप[illegible] द्वितीयो यथा–तत्र बुद्धिसंसर्गपूर्वको विभागो [illegible] पूर्वं बुद्धिविषयीकरणम्, पश्चात्ततो निवृत्तिः।

१–अपायजनकक्रियया ऽनाश्रितमित्यर्थः। विभागस्य द्विष्ठत्वादिति बोध्यम्।

पापाज्जुगुप्सते। अत्र पापं दुःखहेतुरिति तदुपकुश्यतीत्यर्थः। एवं च स्पष्टमेवात्र पूर्वं पापस्य बुद्धिविषयीकारः, पश्चान्निवृत्तिः। न ह्यज्ञाते विषये प्रवृत्तिनिवृत्ती भवतः। पापाद्विरमति, धर्मात्प्रमाद्यति, चौराद् बिभेति, उद्विजते, त्रायते, रक्षति वा। अध्ययनाद् भोजनाद्वा पराजयते, यवेभ्यो गां वारयति, उपाध्यायादन्तर्धत्ते, शृङ्गाच्छरो गोमयाद् वृश्चिको गोलोमाविलोमभ्यो दूर्वा वा जायते। हिमवतो गङ्गा प्रभवति। वलभ्याः शत्रुञ्जयः षड्योजनानि। कार्तिक्या आग्रहायणी मासे। चैत्रान्मैत्रः पटुरधिक ऊनो वा। माथुराः पाटलिपुत्रकेभ्य आढ्यतराः। अत्र सर्वत्र बुद्धिसंसर्गपूर्वकोऽपायः। अपादानत्वाविवक्षायां तु यथायोगं विभक्तयो बोध्याः। बलाहके विद्योतते विद्युत्, बीजेऽङ्कुरो जातः, ईश्वरस्य भयेन मिथ्या न वक्ति, चौरैर्बिभेति, इत्यादि॥

आङाऽवधौ।२।२।७०॥ अवधिर्मर्यादा, अभिविधिरपि मर्यादाविशेष एव। अवधौ वर्त्तमानादाङा युक्ताद् गौणान्नाम्नः पञ्चमी विभक्तिर्भवति। आपाटलिपुत्राद् वृष्टो मेघः। आकुमारेभ्यो यशो गीतं कृष्णस्य॥

पर्यपाभ्यां वर्ज्ये।२।२।७१॥ वर्जनीयेऽर्थे वर्त्तमानात् पर्यपाभ्यां युक्ताद् गौणान्नाम्नः पञ्चमी विभक्ति र्भवति।

---

१–पाटलिपुत्रं व्याप्याव्याप्य चेत्यर्थः।

परि अप वा पाटलिपुत्राद् वृष्टो मेघः । पाटलिपुत्रं वर्जयित्वेत्यर्थः ॥

**यतः प्रतिनिधिप्रतिदाने प्रतिना** ।२।२।७२॥ प्रतिनिधिर्मुख्यसदृशोऽर्थः । प्रतिदानं गृहीतस्य प्रत्यर्पणम्, विशोधनमित्यर्थः । प्रतिना योगे यतः प्रतिनिधिर्यतश्च प्रतिदानम्, तद्वाचिनो गौणान्नाम्नः पञ्चमी भवति । प्रद्युम्नो वासुदेवात्प्रति, अभयकुमारः श्रेणिकतः प्रति । सदृश इत्यर्थः । तिलेभ्यः प्रति माषानसौ प्रयच्छति । तिलान् गृहीत्वा माषान् ददातीत्यर्थः ।

**आख्यातर्युपयोगे** ।२।२।७३॥ आख्यातोपदेशकः तत्र वर्तमानाद् गौणान्नाम्नः पञ्चमी भवति नियमपूर्वकविद्याग्रहणविषये । उपाध्यायादधीते । उपयोगे किम्? नटस्य शृणोति । उपयोगे तु स्यादेव ॥

**गम्ययपः कर्माधारे** ।२।२।७४॥ गम्यस्य यबन्तस्य यत्कर्माधारश्च तत्र वर्तमानाद् गौणान्नाम्नः पञ्चमी भवति । द्वितीयासप्तम्योरपवादः । प्रासादात् प्रेक्षते । आसनात् प्रेक्षते । प्रासादमारुह्य आसने उपविश्य प्रेक्षत इत्यर्थः । यबन्तप्रयोगे तु न । प्रासादमारुह्य प्रेक्षते ॥

**प्रभृत्यन्यार्थदिक्शब्दबहिरारादितरैः** ।२।२।७५॥ प्रभृत्यर्थैर्दिक्शब्दैर्बहिरारादितर इत्येतैश्च शब्दैर्युक्ताद् गौणा-

न्नाम्नः पञ्चमी भवति। ततः प्रभृति, ग्रीष्मादारभ्य, हिमवत आरभ्य गङ्गां यावद् विदेहाः। मैत्राद् भिन्नोऽन्योऽर्थान्तरं व्यतिरिक्तो विलक्षणो हिरुक्पृथग् वा चैत्रः। दिशि दृष्टः शब्दो दिक्शब्दः। ग्रामादुत्तरस्यां दिशि वसति, कौशिक्याः पश्चिमायां विदेहावासाः। गण्डक्याः पूर्वो विदेहजनपदः। पश्चिमो रामाद् युधिष्ठिरः। दिक्शब्देनाऽप्रयुक्तेनापि, क्रोशाल्लक्ष्यं विध्यति। क्रमेणिङ्। परेणेति गम्यते। बहिर्ग्रामात्। आराद् ग्रामात् क्षेत्रम्। इतरश्चैत्रान्मैत्रः। तस्य द्वितीय इत्यर्थः।

**ऋणाद्धेतोः** ।२।२।७६॥ हेतुभूतं यदृणं तद्वाचिनो गौणान्नाम्नः पञ्चमी भवति। शताद् बद्धः। शतेन बद्ध इत्यादौ कर्तरि तृतीया। हेतु र्हि फलसाधनयोग्यः पदार्थः कर्त्रादिभ्योऽन्य उच्यते इति ध्येयम्॥

**गुणादस्त्रियां नवा।** ।२।२।७७॥ अस्त्रियां वर्त्तमानाद् हेतुभूतगुणवाचिनो गौणान्नाम्नः पञ्चमी वा भवति। जाड्याज्जाड्येन वा बद्धः, ज्ञानाज् ज्ञानेन वा मुक्तः। स्त्रियां तु हेतुतृतीयैव, बुद्ध्या मुक्तः॥

**आरादर्थैः** ।२।२।७८॥ दूरार्थैरन्तिकार्थैश्च शब्दैर्युक्ताद् गौणान्नाम्नः पञ्चमी वा भवति। ग्रामाद् ग्रामस्य वा

१-हेतौ तृतीया।

दूरम् । ग्रामाद् ग्रामस्य वाऽन्तिकम् । पक्षे शेषे षष्ठी । एवं विप्रकृष्टसन्निकृष्टादिशब्दयोगेऽपि ॥

**स्तोकाल्पकृच्छ्रकतिपयादसत्त्वे करणे ।२।२।७९॥** असत्त्वे[2] करणे वर्त्तमानेभ्यः स्तोकादिभ्यः पञ्चमी वा भवति । स्तोकात्स्तोकेन वा मुक्तः । एवमल्पादिशब्द-योगेऽपि ॥ इति पञ्चमी ॥

**अज्ञाने ज्ञः षष्ठी ।२।२।८०॥** अज्ञानेऽर्थे वर्तमानस्य जानातेः सम्बन्धिनि करणे वर्त्तमानाद् गौणान्नाम्नः षष्ठी बिभक्तिर्भवति । सर्पिषो जानीते । सर्पिरुपायेन प्रवर्तत इत्यत्र जानातेरज्ञानार्थता । तृतीयापवादः ॥

**शेषे ।२।२।८१॥** कर्मादिभ्योऽन्यः क्रियाकारकपूर्वकः कर्माद्यविवक्षालक्षणोऽश्रूयमाणक्रियः श्रूयमाणक्रियो वाऽस्येदं भावरूपः स्वस्वामिभावादिः सम्बन्धविशेषः शेषः । तत्र गौणान्नाम्नः षष्ठी भवति । राज्ञः[3] पुरुषः । जनकस्य[4] पुत्री सीता । पशोः[5] पादः, क्षीरस्य[6] विकारः, न माषाणामश्नी-यात्[7] । सुभाषितस्य[8] शिक्षते । न ते सुखस्य[9] जानते । न तस्य[10] सायमश्नीयात् । अन्नस्य[11] नो देहि ॥

---

२–यतो द्रव्ये प्रवृत्तिः स पर्यायो गुणोऽसत्त्वम्, असत्त्वरूपेणोच्यमानं द्रव्यादि चाऽसत्त्वम् । ३–स्वस्वामिभावः । ४–जन्यजनकभावः । ५–अवयवावयिभावः । ६–विकार्यविकारकभावः । ७–कर्माविवक्षा । ८–करणाविवक्षा । ९–सम्प्रदानाविवक्षा । १०–अपादानाविवक्षा । ११–अधिकरणाविवक्षा ।

रिरिष्टात्स्तादस्तादसतसाता ।२।२।८२॥ रिरिष्टात्–स्तात्–अस्तात्–अस्–अतस्–आत्–एतत्प्रत्ययान्तैर्युक्ताद् गौणान्नाम्नः षष्ठी विभक्ति भवति। उपरि उपरिष्टाद् वा गृहस्य। एवं परस्तादित्यादौ। पञ्चम्यपवादः॥

कर्मणि कृतः ।२।२।८३॥ कृदन्तस्य सम्बन्धिनि कर्मणि गौणान्नाम्नः षष्ठी भवति। द्वितीयापवादः। अपां स्रष्टा, पुरां भेत्ता, वर्षशतस्य पूरकः, पुत्रपौत्राणां दर्शकः। उदकस्य पिषः। ग्रामस्य गमनम्, गवां दोहः॥

कर्तरि ।२।२।८६॥ कृदन्तस्य कर्तरि गौणान्नाम्नः षष्ठी भवति। तृतीयापवादः। भवत आसिका॥

वैकत्र द्वयोः ।२।२।८५॥ द्विकर्मकेषु धातुषु द्वयोः कर्मणोरेकतरस्मिन् वा षष्ठी भवति। अन्यत्र पूर्वेण नित्यमेव। अजाया नेता विदेहानां विदेहान् वा। अजाया अजां वा नेता विदेहानाम्॥

द्विहेतोरस्त्र्यणकस्य वा ।२।२।८७॥ स्त्र्यधिकारविहिताभ्यामकारणकाभ्यामन्यस्य कर्तृकर्मषष्ठ्योः प्राप्तिहेतोः कृतः कर्तरि षष्ठी वा भवति। विचित्रा सूत्रस्य कृतिराचार्यस्याऽऽचार्येण वा। आश्चर्यो गवां दोहोऽगोपस्यागोपेन वा। अन्तर्धौ येनादर्शनमिच्छति, यस्येति वा॥

**द्विषोऽतृशः ।२।२।८४।।** अतृश्प्रत्ययान्तस्य द्विषः-कर्मणि गौणान्नाम्नः षष्ठी वा भवति । चौरस्य चौरं वा द्विषन् ॥

**कृत्यस्य वा ।२।२।८८।।** कृत्यस्य कर्तरि गौणान्नाम्नः षष्ठी वा भवति । भवतो भवता वा कार्यः पटः ॥

**नोभयोर्हेतोः ।२।२।८९।।** कर्तृकर्मणोः षष्ठीहेतोः कृत्यस्य सम्बन्धिनोः कर्तृकर्मणोरुभयोरेव षष्ठी न भवति । नेतव्या जनकपुरमजा द्विजेन । एकैकहेतोस्तु स्यादेव । उपस्थानीयो गुरुः शिष्यस्य ॥

**तृन्नुदन्ताव्ययक्वस्वानातृश् शतृङिणकच्खलर्थस्य ।२।२।९०।।** तृन उदन्तस्याव्ययस्य क्वसोरानस्य अतृशः शतु ङेः णकचः खलर्थस्य च कृतः सम्बन्धिनोः कर्मकर्त्रोः षष्ठी न भवति । तृन्–वदिता जनापवादान् । उदन्तः–कन्यामलङ्करिष्णुः । अव्ययम्–कटं कृत्वा । क्वसुः ओदनं पेचिवान् । तत्त्वं विद्वान् । आनेति कानशानानशां त्रयाणां ग्रहणम् । कटं चक्राणः, मलयं पवमानः, ओदनं पचमानः । अतृश्–तत्त्वार्थमधीयन् । शतृ–कटं कुर्वन् । ङि–परिषहान् सासहिः । णकच्–एधानाहारको व्रजति । खलर्थः–सुज्ञानं तत्त्वं भवता, ईषत्करः कटो भवता ॥

**क्तयोरसदाधारे ।२।२।९१।।** वर्तमानादाधाराच्चान्यस्मिन्नर्थे विहितौ यौ क्तक्तवतू तत्सम्बन्धिनोः कर्मकर्त्रोः

षष्ठी न भवति। कृतः कटो मैत्रेण। कटं कृतवान्। वर्तमाने-राज्ञां ज्ञातः। आधारे इदमेषां शयितमासितं वा॥

**वा क्लीबे** ।२।२।९२॥ क्लीबे विहितस्य क्तस्य कर्त्तरि षष्ठी वा न भवति। छात्रस्य छात्रेण वा हसितम्॥

**अकमेरुकस्य** ।२।२।९३॥ कमेरन्यस्योकप्रत्ययान्तस्य कर्मणि षष्ठी न भवति। भोगानभिलाषुकः। कमेस्तु दास्याः कामुकः। इति षष्ठी॥

**क्रियाश्रयस्याधारोऽधिकरणम्** ।२।२।३०॥ क्रिया-श्रयस्य कर्तुः कर्मणो वा य आधारस्तत्कारकमधिकरणसंज्ञं भवति। क्रियाश्रयस्याधिकरणमाधारसंज्ञं च भवतीति चार्थः। अधिकरणं षोढा-वैषयिकमौपश्लेषिकमभिव्यापकं सामीप्यकं नैमित्तिकमौपचारिकं च॥

**सप्तम्यधिकरणे** ।२।२।९५॥ गौणान्नाम्नोऽधिकरणे कारके सप्तमी भवति विभक्तिः। वैषयिकम्[1]-दिवि देवाः, मोक्षे इच्छा। औपश्लेषिकम्[2]-कटे आस्ते। अभिव्यापकम्[3]-तिलेषु तैलम्, गवि गोत्वम्। सामीप्यकम्[4]-वाप्या-मश्वः, गुरौ वासः। नैमित्तिकम्[5]-युद्धे सन्नह्यते, आतपे

१-अनन्यत्रभावो विषयस्तस्मै प्रभवति वैषयिकम्। २-एकदेशमात्र-संयोग उपश्लेषस्तत्र भवमौपश्लेषिकम्। ३-यस्याधेयेन समस्तावयव-संयोगस्तदभिव्यापकम्। ४-यदाधेयसन्निधिमात्रेण क्रियाहेतुस्तत्सामीप्य-कम्। ५-निमित्तमेव नैमित्तिकम्।

क्लाम्यति । औपचारिकम्[६]—स मे मुष्टिमध्ये तिष्ठति, ममाङ्गुल्यग्रे करिशतम् ॥

**स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैः** ।२।२।९८॥ एभिः शब्दैर्युक्ताद् गौणान्नाम्नः सप्तमी वा भवति । पक्षे शेषे षष्ठी । गवां गोषु वा स्वामीश्वरोऽधिपतिर्दायादः साक्षी प्रतिभूः प्रसूतो वा ॥

**व्याप्ये क्तेनः** । २।२।९९॥ क्तप्रत्ययान्ताद् य इन् तदन्तस्य व्याप्ये वर्त्तमानाद् गौणान्नाम्नः सप्तमी भवति । अधीती[१] व्याकरणे, इष्टी यज्ञे ॥

**तद्युक्ते हेतौ** ।२।२।१००॥ व्याप्येन संयुक्ते हेतौ[२] वर्त्तमानाद् गौणान्नाम्नः सप्तमी भवति । हेतुतृतीयापवादः । चर्मणि द्वीपिनं हन्ति, दन्तयोर्हन्ति कुञ्जरम् । केशेषु चमरीं हन्ति, सीम्नि पुष्कलको हतः ॥ १ ॥

**अप्रत्यादावसाधुना** ।२।२।१०१॥ असाधुशब्देन युक्ताद् गौणान्नाम्नः प्रत्यादिप्रयोगाभावे सप्तमी भवति । असाधुर्मातरि । प्रत्यादौ तु द्वितीयैव, असाधुर्मातरं प्रति ॥

**साधुना** ।२।२।१०२॥ साधुशब्देन युक्ताद् गौणा-

---

६—उपचारे भवमौपचारिकम् ।

१-अधीतमनेनेत्यर्थे क्तान्तादिष्टादित्वादिन् । २—हेतुरत्रनिमित्तं कारणम् ।

म्नाम्नोऽप्रत्यादौ सप्तमी भवति। साधुर्द्विजे। प्रत्यादौ तु द्वितीयैव ॥

**निपुणेन चार्चायाम्** ।२।२।१०३॥ निपुणशब्देन साधुशब्देन च युक्ताद् गौणान्नाम्नोऽप्रत्यादौ सप्तमी भवत्यर्चायां गम्यायाम्। षष्ठ्यपवादः। मातरि निपुणः, मातरि साधुः, अनर्चायां तु–निपुणो[3] मैत्रो मातुः।

**स्वेशेऽधिना** ।२।२।१०४॥ ईशितव्ये ईशे च वर्त्तमानादधिना युक्ताद् गौणान्नाम्नः सप्तमी भवति। अधिविदेहेषु[4] जनकः। अधिश्रेणिके[5] मगधाः ॥

**उपेनाधिकिनि** ।२।२।१०५॥ उपेन युक्तादधिकिनि वर्त्तमानाद् गौणान्नाम्नः सप्तमी भवति। उपखार्यां[6] द्रोणः ॥ उपनिष्के कार्षापणः[7] ॥

**यद्भावो भावलक्षणम्** ।२।२।१०६॥ यस्य सम्बन्धिन्या क्रिययाऽपरक्रिया लक्ष्यते तस्मिन् वर्त्तमानाद् गौणान्नाम्नः सप्तमी भवति। गोषु दुह्यमानासु गतश्चैत्रः। गोषु दुग्धास्वागतश्च। गम्यमानापि क्रिया कारकविभक्तिनिमित्तम्। वृक्षे शाखेत्यादौ आधारनिमित्त

---

३–मातैवेन निपुणं मन्यते न तु तथाऽस्तीत्यर्थः। ४–जनकस्य विदेहा ईशितव्या इत्यर्थः। ५–मगधानामीशः श्रेणिक इत्यर्थः। ६–खार्यां द्रोणोऽधिक इत्यर्थः। ७–निष्के कार्षापणोऽधिक इत्यर्थः। ८–भावः क्रिया। प्रसिद्धं लक्षणम्। अप्रसिद्धं लक्ष्यम्।

यथा गम्या भवति क्रिया। तथा च-आम्रेषु फलायमानेषु गतः पक्वेषु चागतः। जातेष्विति गम्यते। तदपेक्षया सप्तमी। एवं श्रेष्ठिषु भुञ्जानेषु दरिद्रा आसते, श्रेष्ठिष्वासीनेषु दरिद्रा भुञ्जते। दरिद्रेष्वासीनेषु श्रेष्ठिनो भुञ्जते, दरिद्रेषु भुञ्जानेषु श्रेष्ठिन आसते। इत्यादौ यत्रार्हाणां कर्तृत्वं तद्विपर्ययो वा तथाऽनर्हाणामकारकत्वं तद्विपर्ययो वा, तत्रापि भावलक्षण एव सप्तमी बोध्या॥

**षष्ठी वाऽनादरे** ।२।२।१०८॥ यद्भावो भावलक्षणं तस्मिन् वर्त्तमानाद् गौणान्नाम्नोऽनादरे गम्यमाने षष्ठी वा भवति। रुदतो लोकस्य प्राव्राजीत्। रुदन्तं लोकमनादृत्येत्यर्थः। पक्षे भावलक्षणसप्तमी। रुदति लोके प्राव्राजीत्॥

**सप्तमी चाविभागे निर्धारणे** ।२।२।१०९॥ जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य बुद्ध्या पृथक्करणं निर्धारणम्। निर्धारणे गम्यमाने गौणान्नाम्नः षष्ठी सप्तमी च भवति निर्धार्यमाणस्यैकदेशस्य समुदायेन सह कथञ्चिदैक्ये शब्दाद् गम्यमाने। नृणां नृषु वा द्विजः श्रेष्ठः। क्षत्रियः पुरुषाणां पुरुषेषु वा शूरतमः। गवां गोषु वा कृष्णा बहुक्षीरा॥ इति सप्तमी॥

---

१-अर्हाणां कारकत्वम्। २-अर्हाणामकारकत्वम्। ३-अनर्हाणामकारकत्वम्। ४-अनर्हाणां कारकत्वम्।

**पृथग्नाना पञ्चमी च ।२।२।११३॥** पृथग्नानाशब्दाभ्यां युक्ताद् गौणान्नाम्नः पञ्चमी तृतीया च भवति । पृथङ् मैत्रान्मैत्रेण वा । नाना चैत्राच्चैत्रेण वा ॥

**ऋते द्वितीया च ।२।२।११४॥** वर्जनार्थाद् ऋतेशब्देन युक्ताद् गौणान्नाम्नो द्वितीया-पञ्चमी च भवति । चित्रं यथाश्रयमृते । ऋते धर्मान्न सुखम् ॥

**विना ते तृतीया च ।२।२।११५॥** विनाशब्देन युक्ताद् गौणान्नाम्नो द्वितीया तृतीया पञ्चमी च भवति । विना वातं वाताद् वातेन वा ॥

**तुल्यार्थैस्तृतीयाषष्ठ्यौ ।२।२।११६॥** तुल्यार्थैर्युक्ताद् गौणान्नाम्नस्तृतीयाषष्ठ्यौ भवतः । मात्रा मातुर्वा *तुल्यः सदृशः समानः समो वा ।* तुलोपमाशब्दौ तु सादृश्ये, न सदृशे इति तद्योगे न भवति । कृष्णस्य तुलोपमा वा नास्ति ॥

**द्वितीयाषष्ठ्यावेनेनाऽनञ्चेः ।२।२।११७॥** एनप्रत्ययान्तेन युक्ताद् गौणान्नाम्नो द्वितीयाषष्ठ्यौ विभक्ती भवतो न चेत्सोऽञ्चेः परो भवति । पूर्वेण[1] ग्रामं ग्रामस्य वा । अनञ्चेरिति किम् ? प्राग्[2] ग्रामात् ॥

---

१–पूर्वोऽदूरो देश इत्यर्थे अदूरे एन इत्येनप्रत्ययः । २–एनप्रत्ययस्य लुबञ्चेरिति लुप् ।

**हेत्वर्थैस्तृतीयाद्याः** ।२।२।११८॥ हेत्वर्थैः शब्दैर्युक्तात् तत्समानाधिकरणाद् गौणान्नाम्नस्तृतीयाचतुर्थीपञ्चमीषष्ठीसप्तमीविभक्तयो भवन्ति । धनेन हेतुना, धनाय हेतवे धनाद्धेतोर्धनस्य हेतोर्धने हेतौ वा वसति । एवं कारणनिमित्तादिशब्दयोगेऽपि ॥

**सर्वादेः सर्वाः** ।२।२।११९॥ हेत्वर्थैर्युक्तात्तत्समानाधिकरणाद् सर्वादेः गौणान्नाम्नः सर्वा विभक्तयो भवन्ति । को हेतुः कं हेतुं केन हेतुना कस्मै हेतवे कस्माद् हेतोः कस्य हेतोः कस्मिन् हेतौ वसति । एवं कारणादावपि, यत्तदादावपि ॥

**असत्त्वारादर्थाट्टाङसिङ्यम्** ।२।२।१२०॥ असत्त्ववाचिनो दूरार्थादन्तिकार्थाच्च टा ङसि ङि अम् इत्येते प्रत्यया भवन्ति । दूरेण, दूराद् दूरे दूरं वा ग्रामस्य ग्रामाद्वा ।
दूरेणावसथान्मूत्रं, दूरात्पादावनेजनम् । दूरे च भाव्यं दस्युभ्यो, दूरं च कुपिताद् गुरोः ॥ १ ॥

**जात्याख्यायां नवैकोऽसङ्ख्यो बहुवत्** ।२।२।१२१। जातौ वाच्यायामेको जातिलक्षणोऽर्थः सङ्ख्यावाविविशेषणरहितो बहुवद्वा भवति । सम्पन्नो यवः, सम्पन्ना यवाः । जातिग्रहणं किम् ? चैत्रः । एक इति किम् ? संपन्नौ व्रीहियवौ । असङ्ख्य इति किम् ? एको व्रीहिः सम्पन्नः सुभिक्षं करोति ॥

**अविशेषणे द्वौ चास्मदः** ।२।२।१२२॥ अस्मदो द्वावेकश्चार्थो वा बहुवद् भवति न चेत्तस्य विशेषणं प्रयुज्यते। आवां ब्रूवः, वयं ब्रूमः। अहं ब्रवीमि, वयं ब्रूमः। अविशेषण इति किम्? ब्रूमो वयं सकलशास्त्रविचारदक्षाः॥ अहं पण्डितो ब्रवीमि। नाट्ये च दक्षा वयमित्यादौ तु दक्षत्वादिकं विधेयं न विशेषणम्। विशेषणं ह्यविधेयं यत्तदुच्यते, इति बहुवचनोपपत्तिः॥

**गुरावेकश्च** ।२।२।१२४॥ गौरवार्हेऽर्थे वर्तमानस्य शब्दस्य द्वावेकश्चार्थौ बहुवद्वा भवति। त्वं गुरुः, युवां गुरू, यूयं गुरवः। अप् दारेत्यादयः शब्दा एकादिष्वर्थेष्वपि तत्तल्लिङ्गसङ्ख्या एव, तथा शब्दस्वाभाव्यादिति बोध्यम्॥

## इति कारकपरिशिष्टम्॥

---

## अथ तद्धिताः।

### तत्रादौ संज्ञाधिकारः॥

**तद्धितोऽणादिः** ।६।१।१॥ इत ऊर्ध्वं वक्ष्यमाणोऽणादिः प्रत्ययस्तद्धितसंज्ञो भवति॥

**पौत्रादि वृद्धम्** ।६।१।२॥ परमप्रकृतेरपत्यवतो यत्पौ-

---

१–यः स्वयं नापत्यत्वेन बोधितो यस्याऽन्योऽपत्यत्वेन बुबोधयिषितस्स परमप्रकृतिस्तद्वाचकादित्यर्थः। यथा गर्गवत्सादयः।

त्राद्यपत्यं तद्वृद्धसंज्ञं भवति ॥

**वंश्यज्यायोभ्रात्रोर्जीवति प्रपौत्राद्यस्त्री युवा** ।६।१।३॥ स्त्रीवर्जितं प्रपौत्राद्यपत्यं वंश्ये ज्यायोभ्रातरि वा जीवति युवसंज्ञं भवति ॥

**सपिण्डे वयःस्थानाधिके जीवद्वा** ।६।१।४॥ परमप्रकृतेः स्त्रीवर्जितं प्रपौत्राद्यपत्यं वयःस्थानाभ्यां द्वाभ्यामप्यधिके सपिण्डे जीवति जीवदेव युवसंज्ञं वा भवति ।

**संज्ञा दुर्वा** ।६।१।६॥ या संज्ञा संव्यवहाराय हठान्नियुज्यते सा दुसंज्ञा वा भवति ॥

**त्यदादिः** ।६।१।७॥ सर्वाद्यन्तर्गतास्त्यदादयो दुसंज्ञा भवन्ति ॥

**वृद्धिर्यस्य स्वरेष्वादिः** ।६।१।८॥ यस्य शब्दस्य स्वरेषु मध्ये आदिः स्वरो वृद्धिसंज्ञो भवति स शब्दो दुसंज्ञो भवति ॥ इति तद्धित-संज्ञाप्रकरणम् ॥

**वाद्यात्** ।६।१।११॥ वा इति च आद्यादिति च द्वयमधिक्रियते । तत्र वाऽधिकारादित ऊर्ध्वं वक्ष्यमाणाः

---

२-वंश्यः पित्रादिरात्मनः कारणम् । ३-एकपितृक एकमातृको वा । ४-वयो यौवनादि, स्थानं पिता पुत्र इत्यादि । ५-ययोरेकः पूर्वः ससमस्तावन्योन्यस्य सपिण्डौ । ६-कृत्रिमा संज्ञेत्यर्थः । यथा देवदत्तः । ७-आरैदौद्रूपः ।

प्रत्यया विकल्प्यन्ते । तेन पक्षे समासो वाक्यं च प्रयुज्यते । आद्यादित्यधिकाराच्च सूत्रे यदादौ निर्दिष्टं तस्मात्प्रत्ययो भवति, नान्यस्मात् ॥

ङसोऽपत्ये ।६।१।२८॥ षष्ठ्यन्तान्नाम्नोऽपत्येऽर्थे यथाविहितमणादयः प्रत्यया भवन्ति ।

वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते ।७।४।१॥ ञिति णिति च तद्धिते परे पूर्वो यः प्रकृतिभागस्तस्य स्वराणां मध्ये य आदि स्वरस्तस्य वृद्धिरादेशो भवति ॥

अस्वयम्भुवोऽव् ।७।४।७०॥ स्वयंभूशब्दवर्जितस्यापदसंज्ञकस्योवर्णान्तस्य तद्धिते परे अव् इत्ययमादेशो भवति । औपगवः[१] । अस्वयंभुव इति किम् ? स्वायम्भुवः ॥

नोऽपदस्य तद्धिते ।७।४।६१॥ नकारान्तानामपदसंज्ञकानां तद्धिते परेऽन्त्यस्वरादेर्लुग् भवति ॥

अणि ।७।४।५२॥ अन् इत्येतदन्तस्याणि तद्धिते परेऽन्त्यस्वरादेर्लुग् न भवति । सौत्वनः[२] ॥

---

८–तेन सास्य देवतेत्यादौ तत्पदेन परामृष्टादिन्द्रादिप्रकृतेरेव प्रत्ययो भवति । ऐन्द्रं हविः ।

१–उप–समीपे गौर्यस्य स उपगुः, ततः उपगु ङस् इत्यत्र तस्यापत्यमित्यणि उपगु ङस् अ इति स्थिते एकार्थीभावो भवति । ततश्च नामसंज्ञायां सौ पदत्वमित्यैकपद्यनिमित्तस्य स्यादेर्लुकि आदिस्वरवृद्धिः, ततोऽव् ।

२–सुत्वनोऽपत्यम् । अन्त्यस्वरादिलोपनिषेध आदिवृद्धिः ।

**अत इञ्** ।६।१।३१।। अकारान्तान्ङसन्तान्नाम्नोऽपत्येऽर्थे इञ् प्रत्ययो भवति ।।

**अवर्णेवर्णस्य** ।७।४।६८।। अवर्णान्तस्येवर्णान्तस्य चापदस्य तद्धिते परे लुग् भवति । दाक्षिः[३], इः[४] ।

**बाह्वादिभ्यो गोत्रे** ।६।१।३२।। बाह्वादिभ्यो ङसन्तेभ्यः सति सम्भवे गोत्रेऽन्यथाऽपत्येऽर्थे इञ् प्रत्ययो भवति । स्वापत्यसन्तानस्य स्व-व्यपदेशकारणमृषिरनृषिर्वा यः प्रथमः पुरुषस्तदपत्यं गोत्रम् । बाहविः[५] । वार्कलिः[६], रामिः[७], कार्ष्णिः[८] । पाञ्चिः[९], आष्टिः[१०], आग्निशर्मिः[११] ।

**शीर्षःस्वरे तद्धिते** ।३।२।१०३।। शिरस् शब्दस्य स्वरादौ तद्धिते परे शीर्ष इत्ययमादेशो भवति । हास्तिशीर्षिः[१२], औडुलोमिः[१३], साखिः[१४], वाल्मीकिः[१५], आरुणिः । बिदादिगर्गादिभ्योऽप्यनन्तरापत्येऽनेनैव । बैदिः[१६], गार्गिः ।।

**भूयः सम्भूयोऽम्भोऽमितौजसःस्लुक् च** ।६।१।३६

३–दक्षस्यापत्यम् । ४–अस्यापत्यम्, अकारलोपे प्रत्यय एवावशिष्यते । ५–बाहोरपत्यम् ओरव । ६–वृकलस्यापत्यम् । ७–रामस्यापत्यम् । ८–कृष्णस्यापत्यम् । ९–पञ्चानामपत्यमन्त्यस्वरादिलुक् । १०–अष्टानामपत्यम् । ११–अग्निशर्मणोऽपत्यम् । १२–अलोपादिवृद्धी । १३–उडुलोम्नोऽपत्यम् । अन्त्यस्वरादिलोपवृद्धी । १४–आकृतिगणत्वात् । सख्युरपत्यम्, इकारलोपः । १५–वल्मीकस्याऽपत्यम् । १६–अत्र तु वृद्धापत्ये ।

भूयस्, सम्भूयस् अम्भस् अमितौजस् इत्येतेभ्योऽपत्येऽर्थे इञ् प्रत्ययो भवति, सकारलोपश्चैषाम्। भौयिः[17], साम्भूयिः, आम्भिः, आमितौजिः।

[1]व्यासवरुटसुधातृनिषादबिम्बचण्डालादन्त्यस्य चाऽक् ।६।१।३८।। व्यासादिभ्योऽपत्येऽर्थे इञ् प्रत्ययो भवति तत्सन्नियोगे चैषामक् इत्ययमन्तादेशो भवति ।।

[2]य्वः पदान्तात्प्रागैदौत् ।७।४।५।। ञ्णिति तद्धिते इवर्णोवर्णयोर्वृद्धिप्रसङ्गे तयोरेव स्थाने यौ यकारवकारौ पदान्तौ ताभ्यां प्राक् यथासंख्यमैत् औत् इत्येतावागमौ भवतः। वैयासकिः, वारुटकिः, सौधातकिः, नैषादकिः, बैम्बकिः, चाण्डालकिः ।।

पुनर्भूपुत्रदुहितृननान्दुरनन्तरेऽञ् ।६।१।३९।। पुनर्भू-पुत्र-दुहितृ-ननान्दृ इत्येतेभ्यो ङसन्तेभ्योऽनन्तरेऽपत्येऽर्थे अञ् प्रत्ययो भवति। पौनर्भवः, पौत्रः, दौहित्रः, नानान्द्रः।

बिदादेर्वृद्धे ।६।१।४१।। बिदादिभ्यो ङसन्तेभ्यो वृद्धेऽपत्येऽर्थे अञ् प्रत्ययो भवति। बैदः[3], और्वः, काश्यपः, भारद्वाजः ।।

१७—सलोपेऽकारलोपः।

१—व्यसनं व्यासः, तत्क्रियायोगात्पुरुषोऽपि व्यासः, तस्यापत्यम्। वीत्युपसर्गेकारस्य पदान्तस्य स्थाने यकारोऽपि पदान्त इति बोध्यम्। २—इवर्णादेरिति रः। ३—बिदस्य वृद्धापत्यम्। एवमग्रेऽपि वृद्धयल्लोपौ

**यञञोऽश्यापर्णान्तगोपवनादेः** ।६।१।१२६।। यञ-न्तस्याऽञन्तस्य च बहुत्वविशिष्टे गोत्रेऽर्थे वर्तमानस्य यः [४]स प्रत्ययस्तस्याऽस्त्रियां लुप् भवति । गोपवनादिभ्यः श्यापर्णान्तेभ्यो विहितं वर्जयित्वा । बिदस्य वृद्धापत्यानि बिदाः[५] । कश्यपाः, उर्वाः, भरद्वाजाः ॥

**गर्गादेर्यञ्** ।६।१।४२।। गर्गादिभ्यो ङसन्तेभ्यो वृद्धेऽपत्येऽर्थे यञ् प्रत्ययो भवति । गर्गस्य वृद्धापत्यं गार्ग्यः । वात्स्यः, गर्गाः, वत्साः । अनन्तरापत्ये तु बैदिः[६], गार्गिः ॥

**कुञ्जादेर्ञायन्यः** ।६।१।४७।। कुञ्जादिभ्यो ङसन्तेभ्यो वृद्धेऽपत्येऽर्थे ञायन्यः प्रत्ययो भवति । कौञ्जायन्यः[७], ब्राध्नायन्यः ॥

**स्त्रीबहुष्वायनञ्** ।६।१।४८।। कुञ्जादिभ्यो ङसन्तेभ्यो बहुत्वविशिष्टे वृद्धे स्त्रियां वा बहुत्वेऽपि आयनञ् प्रत्ययो भवति । कौञ्जायनाः[८] ॥

**अश्वादेः** ।६।१।४९।। अश्वादिभ्यो ङसन्तेभ्यो वृद्धेऽपत्ये आयनञ् प्रत्ययो भवति । आश्वायनः[९] । शाङ्खायनः ।

---

४–यञ् अञ् च । ५–प्रत्ययस्य लोपे ञितोऽभावान्न वृद्धिः । ६–इञि वृद्धयल्लोपौ । बिदस्यानन्तरापत्यमिति । ७–कुञ्जस्यापत्यं वृद्धम् । ८–कुञ्जस्याऽपत्यानि । ९–अश्वस्य वृद्धापत्यम् ।

बिदादि पाठादञपि, आश्वः । अनन्तरापत्ये आश्विः । बिदादिगर्गादिपाठात् शाङ्खः, शाङ्ख्यः, अनन्तरापत्ये शाङ्खिः ॥

**नडादिभ्य आयनण्** । ।१।५३॥ नडादिभ्यो ङसन्तेभ्यो वृद्धेऽपत्ये आयनण् प्रत्ययो भवति । नाडा[1]यनः । चारायणः । अनन्तरापत्ये तु नाडिः, चारिः ॥

**वृद्धाद् यूनि** ।६।१।३०॥ यून्यपत्ये विवक्षिते यः प्रत्ययः स परमप्रकृतेर्यो वृद्धप्रत्ययस्तदन्ताद् भवति । आद्यादित्यस्याऽपवादः । वृद्धापत्यप्रत्ययान्त एव युवापत्यप्रत्ययस्य प्रकृतिर्भवतीति यावत् ॥

**यञिञः** ।६।१।५४॥ वृद्धे विहितौ यौ यञिञौ तदन्ताद् युवापत्ये आयनण् प्रत्ययो भवति । गार्ग्यस्यापत्यं युवा गार्ग्या[2]यणः । दाक्षेरपत्यं युवा दाक्षा[3]यणः । स्त्रियां परत्वादेयणेव ।

**शिवादेरण्** ।६।१।६०॥ शिवादिभ्यो ङसन्तेभ्योऽपत्यमात्रेऽण् प्रत्ययो भवति । अत इञादेरपवादः । शैवः, प्रौष्ठः[4], प्रौष्ठिकः ॥

**ऋषिवृष्ण्यन्धककुरुभ्यः** ।६।१।६१॥ ऋ[5]षिवृष्ण्यन्ध-

---

१—नडस्य वृद्धापत्यम्, वृद्धयल्लोपौ । २—अकारलोपोऽवर्णेवर्णस्येत्यनेन । व्यञ्जनादिति यलोपः । ३—इकारलोपः, दक्षस्य युवापत्यम् । इञि आयनण् । रषृवर्णेति णः । ४—प्रोष्ठस्यापत्यम्, अवर्णेवर्णस्येत्यलोपः, एवं प्रौष्ठिकः । ५—ऋषयोवशिष्ठादयः, वृष्णयोऽन्धकाः कुरवश्च क्षत्रियाः प्रसिद्धाः ।

ककुरुवाचिभ्यः शब्देभ्योऽपत्ये अण् प्रत्ययो भवति । इञोऽपवादः । ऋषिः–वाशिष्ठः । वैश्वामित्रः, गौतमः । वृष्णि–वासुदेवः, आनिरुद्धः । अन्धक–श्वाफल्कः । कुरु–नाकुलः, साहदेवः ॥

**कन्यात्रिवेण्याः कनीनत्रिवणं च** ।६।१।६२॥ कन्याशब्दात् त्रिवेणीशब्दाच्चाऽपत्ये अण् प्रत्ययो भवति । तत्सन्नियोगे कनीनत्रिवण इत्येतौ च यथासंख्यमादेशौ भवतः । काँनीनो व्यासः कर्णश्च । त्रिवेण्या अपत्यं त्रैवणः ॥

**णश्च विश्रवसो विश्लुक् च वा** ।६।१।६५॥ विश्रवसो ङसन्ताद्पत्ये अण् प्रत्ययस्तत्सन्नियोगे णकारश्चान्तादेशो भवति णसन्नियोगे विश्शब्दलोपश्चास्य वा । विश्रवसोऽपत्यं वैश्रवणः, रावणः ॥

**भृग्वङ्गिरस्कुत्सवशिष्ठगोतमात्रेः** ।६।१।१२८॥ भृगु-अङ्गिरस् कुत्स वशिष्ठ गौतम अत्रि इत्येतेभ्यो यः प्रत्ययस्तदन्तस्य बहुत्वविशिष्टे गोत्रेऽर्थे वर्तमानस्य यो गोत्रार्थप्रत्ययस्तस्याऽस्त्रियां लुप् भवति । भृगवः, अङ्गि-

६–श्वफल्कस्यापत्यम्, उद्धवः । ७–कन्याया अपत्यम् । ८–विश्लोपे आदिस्वरस्य वृद्धिः ।

१–भृगोरपत्यानि । प्रत्ययलुकि जस्येदोदिति गुणः ।

रसः, कुत्साः, वशिष्ठाः, गोतमाः। ऋष्यणो लुप्। अत्रयः, इतोऽनिञ इत्येयणो लुप्॥

संख्यासंभद्रान्मातुर्मातुर् च ।६।१।६६॥ संख्यावाचिनः सम् भद्र इत्येताभ्यां च परो यो मातृशब्दस्तदन्तादपत्येऽण् प्रत्ययो भवति मातुश्च मातुरित्यादेशः। द्वयोर्मात्रोरपत्यं द्वैमातुरो[2] गणेशः। षाण्मातुरः स्कन्दः। शातमातुरो भरतः, सांमातुरः, भाद्रमातुरः॥

अदोर्नदीमानुषीनाम्नः ।६।१।६७॥ अदुसंज्ञकान्नदीनाम्नो मानुषीनाम्नश्चाऽपत्येऽण् प्रत्ययो भवति। एयणोऽपवादः। यामुनः[3], दैवदत्तः[4]॥

ङ्याप्त्यूङः ।६।१।७०॥ ङ्यन्तादाबन्तात्त्यन्तादूङन्ताच्च अपत्ये एयण् प्रत्ययो भवति। सौपर्णेयः[5], वैनतेयः, यौवतेयः॥

अकद्रूपाण्ड्वोरुवर्णस्यैये ।७।४।६९॥ कद्रूपाण्डुशब्दवर्जितस्य उवर्णान्तस्य एये तद्धिते परे लुग् भवति।

---

२–द्वयोर्मात्रोरपत्यमित्यर्थे द्विओस्मातृओसित्यवस्थायां तद्धितार्थे समासो विभक्तिलुगण् प्रत्ययो मातुरादेशश्चादिवृद्धिश्च। एवं षण्णां मातॄणामपत्यम्। संगता भद्रा वा माता भद्रस्य वा माता, तस्या अपत्यम्, शतस्य माता, तस्या अपत्यम्। ३–यमुनाया अपत्यम्। ४–देवदत्ताया अपत्यम्। ५–सुपर्णाया विनतायाश्चाऽपत्यम्।

कामण्डलेयः[6]।

**द्विस्वरादनद्याः** ।६।१।७१॥ द्विस्वराद् ङ्याप्त्यूङन्ताद् नदीवाचिनोऽपत्ये एयण् प्रत्ययो भवति। दात्तेयः[7]। नदीवाचिनस्तु सैतः, सैप्रः, रैवः।

**इतोऽनिञः** ।६।१।७२॥ इञन्तवर्जिताद् द्विस्वरादिकारान्तादपत्ये एयण् प्रत्ययो भवति। नाभेयः, नैधेयः[8]। अनिञ इति किम्? दाक्षायणः। अद्विस्वरात्तु मारीचः[9]॥

**शुभ्रादिभ्यः** ।६।१।७३॥ शुभ्रादिभ्योऽपत्ये एयण् प्रत्ययो भवति। इञादीनामपवादः। शौभ्रेयः, गाङ्गेयः, वैमात्रेयः[10]॥

**कल्याण्यादेरिन् चान्तस्य** ।६।१।७७॥ कल्याण्यादिभ्योऽपत्ये एयण् प्रत्ययो भवति इन् इत्ययमन्तस्य चादेशः। काल्याणिनेयः। माध्यमिनेयः॥

**हृद्भगसिन्धोः** ।७।४।२५॥ हृद्भगसिन्धु इत्येवमन्तानां ञ्णिति तद्धिते परे पूर्वपदस्योत्तरपदस्य च स्वरेष्वादेः स्वरस्य वृद्धिर्भवति। सौभागिनेयः[1]।

६–कमण्डल्वा अपत्यम्। ७–दत्ताया अपत्यम्। ८–नाभेर्निधेश्चापत्यम्।
९–मरीचेरपत्यम्। १०–विमातुरपत्यम्। इवर्णादेरिति रः।
१–सुभगाया अपत्यम्।

**अनुशतिकादीनाम्** ।७।४।२७।। अनुशतिक इत्येवमादीनां शब्दानां ञ्णिति तद्धिते परे पूर्वपदस्योत्तरपदस्य च स्वरेष्वादेः स्वरस्य वृद्धिर्भवति । पारस्त्रैणेयः[२] ।।

**कुलटाया वा** ।६।१।७८।। कुलटाशब्दादपत्ये एयण् प्रत्ययो भवति तत्सन्नियोगे इन् च वाऽन्तादेशः । कौलटिनेयः[३] । आदेश एव विकल्प्यते, कौलटेयः ।।

**चटकाण्णैरः स्त्रियां तु लुप्** ।६।१।७९।। चटकशब्दान्ङसन्तादपत्यमात्रे णैरः प्रत्ययो भवति, स्त्रियां त्वपत्ये विहितस्य णैरस्य लुप् । चाटकैरः[४], स्त्र्यपत्ये लुप्-चटका ।।

**क्षुद्राभ्य एरण् वा** ।६।१।८०।। क्षुद्रावाचिभ्यः शब्देभ्यो ङसन्तेभ्यः स्त्रीलिङ्गेभ्योऽपत्ये एरण् प्रत्ययो वा भवति । अङ्गहीना अनियतपुंस्का वा स्त्रियः क्षुद्राः । अणेयणोऽपवादः । काणेरः[५], काणेयः[६], दासेरः, दासेयः नाटेरः, नाटेयः ।

**गोधाया दुष्टे णारश्च** ।६।१।८१।। गोधाशब्दान्ङसन्ताद् दुष्टेऽपत्ये णारश्चकारादेरण् प्रत्ययो भवति । गौधारः[७], गौधेरः । अदुष्टे तु गौधेयः ।।

---

२-परस्त्रिया अपत्यम्, एकपदत्वाण्णत्वम् । ३-कुलस्याऽटा कुलटा, तस्या अपत्यम् । ४-चटकस्य चटकाया वाऽपत्यम् । ५-काण्या अपत्यम्, अवर्णेवर्णस्येतीकारलोपः । ६-ङ्याप्त्यूङ इत्येयण् । एवं दास्या नट्याश्चाऽपत्यम् । ७-गोधाया अपत्यम्, योऽहिना गोधायां जन्यते सः ।

**चतुष्पाद्भ्य एयञ्** ।६।१।८३।। चतुष्पादवाचिभ्यो ङसन्तेभ्योऽपत्ये एयञ् प्रत्ययो भवति । अणादीनामपवादः । शाबलेयः, बाहुलेयः, सौरभेयः[8] ।।

**वृद्धस्त्रियाः क्षेपे णश्च** ।६।१।८७।। वृद्धापत्यान्तात्स्त्रीवाचिनः शब्दादपत्ये णः प्रत्ययो भवति, चकारादिकण् च क्षेपे गम्यमाने । गार्गः, गार्गिको[9] वा जाल्मः ।।

**भ्रातुर्व्यः** ।६।१।८८।। भ्रातृशब्दादपत्ये व्यः प्रत्ययो भवति । भ्रातुरपत्यं भ्रातृव्यः ।।

**ईयः स्वसुश्च** ।६।१।८९।। भ्रातृशब्दात्स्वसृशब्दाच्चापत्ये ईयः प्रत्ययो भवति । भ्रात्रीयः[10], स्वस्रीयः ।।

**मातृपित्रादेर्डेयणीयणौ** ।६।१।९०।। मातृपित्रादेः स्वसृशब्दान्तान्मातृस्वसृपितृष्वसृशब्दाच्चापत्ये डेयणीयणौ प्रत्ययौ भवतः । मातृष्वसेयः[1], मातृष्वस्रीयः । पैतृष्वसेयः, पैतृष्वस्रीयः । परममातृष्वसुरपत्यमित्यादौ मातुः स्वशुरपत्यमित्यादौ च न भवति ।।

**श्वशुराद्यः** ।६।१।९१।। श्वसुरशब्दादपत्ये यः प्रत्ययो भवति । श्वशुर्यः[2] ।।

---

८–शबलाया बहुलायाः सुरभेश्चाऽपत्यम् । ९–गार्ग्या अपत्यम् । १०–इवर्णादेरिति रः ।

१–डित्यन्त्यस्वरादेर्लुक् । २–श्वशुरस्यापत्यम्, अवर्णेवर्णस्येत्यलोपः ।

**जातौ राज्ञः** ।६।१।९२।। राजन् शब्दादपत्ये जातौ गम्यमानायां यः प्रत्ययो भवति ।।

**अनोऽट्ये ये** ।७।४।५१।। अनित्येतदन्तस्य ट्यवर्जे ये प्रत्यये परे अन्त्यस्वरादेर्लुग् न भवति । राजन्यः[3] क्षत्रियजातिः ।।

**क्षत्रादियः** ।६।१।९३।। क्षत्रशब्दादपत्ये इयः प्रत्ययो भवति जातौ गम्यमानायाम् । क्षत्रियः, जातिश्चेत् ।।

**मनोर्याणौ षश्चान्तः** ।६।१।९४।। मनुशब्दादपत्ये य अण् इत्येतौ प्रत्ययौ भवतस्तद्योगे च मनुशब्दस्य षकारोऽन्तो भवति जातौ गम्यमानायाम् । मनुष्याः, मानुषाः, अपत्यमात्रविवक्षायां जातेरगम्यमानत्वेऽणेव, मानवः[4] । वृद्धापत्ये गर्गादित्वाद् यञ्, मानव्यः ।।

**माणवः कुत्सायाम्** ।६।१।९५।। कुत्सायां गम्यमानायां मानव इत्यपत्येऽणि नकारस्य णकारादेशो निपात्यते । मनोरपत्यं कुत्सितं मूढं माणवः ।।

**कुलादीनः** ।६।१।९६।। कुलशब्दान्तात्केवलाच्च कुलशब्दादपत्ये ईनः प्रत्ययो भवति । कुलीनः[5] । द्विजकुलीनः, ईषदसमाप्तं कुलं बहुकुलं तस्यापत्यं बहुकुलीनः ।।

---

३–नोऽपदस्येति प्राप्तो लोपो निषिध्यते । ४–मनोरपत्यम्, अस्वयम्भुवोऽवित्यव् । ५–कुलस्यापत्यम्, अवर्णलोपः ।

**यैयकञावसमासे वा** ।६।१।९७॥ कुलशब्दान्तात्केवलाच्च कुलशब्दादपत्ये य, एयकञ् इत्येतौ प्रत्ययौ वा भवतः, ताभ्यां मुक्ते ईनश्च, न चेत्कुलशब्दः समासे वर्तते । कुल्यः, कौलेयकः, कुलीनः, बहुकुल्यः, बाहुकुलेयकः, बहुकुलीनः । समासे तु । पूर्वेणेन एव ॥

**दुष्कुलादेयण् वा** ।६।१।९८॥ दुष्कुलशब्दादपत्ये एयण् प्रत्ययो वा भवति । दौष्कुलेयः । दुष्कुलीनः ॥

**महाकुलाद्वाऽञीनञौ** ।६।१।९९॥ महाकुलशब्दादपत्ये अञ् ईनञ् इत्येतौ प्रत्ययौ भवतो वा, ताभ्यां मुक्ते ईनश्च । माहाकुलः । माहाकुलीनः, महाकुलीनः ॥

**कुर्वादेर्ञ्यः** ।६।१।१००॥ कुरु इत्येवमादिभ्योऽपत्ये ञ्यः प्रत्ययो भवति । कौरव्यः, शाङ्क्व्यः, वृद्धेऽपि गर्गादिपाठाच्छाङ्क्व्यः ॥

**तिकादेरायनिञ्** ।६।१।१०७॥ तिक इत्येवमादिभ्योऽपत्ये आयनिञ् प्रत्ययो भवति । इञादेरपवादः । तैकायनिः । कौरव्यायणिः ॥

**द्विस्वरादणः** ।६।१।१०९॥ द्विस्वरादणन्तादपत्ये आयनिञ् प्रत्ययो भवति । पुत्रस्यापत्यं पौत्रः, तस्यापत्यं पौत्रायणिः ॥

---

६—अवर्णेवर्णस्येत्यनेन अकारलोपः ।

१—आदिस्वरवृद्ध्यकारलोपौ । २—कुरोः शङ्कोश्चाऽपत्यम् । अस्वयम्भुव इत्यव् । ३—अनन्तरापत्ये पुनर्भूइत्यादिनाऽण् ।

**अवृद्धाद्दोर्नवा** ।६।१।११०।। अवृद्धवाचिनो दुसंज्ञकादपत्ये आयनिञ् प्रत्ययो वा भवति। आम्रगुप्तायनिः[4], आम्रगुप्तिः[5] ।।

**पुत्रान्तात्** ।६।१।१११।। पुत्रशब्दान्तात् दुसंज्ञकादपत्ये आयनिञ् प्रत्ययो वा भवति। गार्गीपुत्रायणिः[6]। गार्गीपुत्रिः।

**अदोरायनिः प्रायः** ।६।१।११३।। अदुसंज्ञकादपत्ये आयनिः प्रत्ययो भवति प्रायः। ग्लुचुकायनिः[7], ग्लौचुकिः, त्रिपृष्ठायनिः, त्रैपृष्ठिः ।।

**राष्ट्रक्षत्रियात्सरूपाद्राजापत्ये द्रिरञ्** ।६।१।११४।। क्षत्रियवाचिसरूपात् राष्ट्रवाचिनो राष्ट्रवाचिस्सरूपाच्च क्षत्रियवाचिनो यथासंख्यं राजनि क्षत्रियेऽपत्ये चाञ् प्रत्ययो भवति, स च द्रिसंज्ञो भवति। विदेहानां राष्ट्रस्य राजा वैदेहः ।।

**बहुष्वस्त्रियाम्** ।६।१।१२४।। द्र्यन्तस्य शब्दस्य बहुषु वर्तमानस्य यो द्रिः प्रत्ययः तस्याऽस्त्रियां लुप् भवति। विदेहानां राष्ट्रस्य राजानो विदेहाः। एवं

४–आम्रगुप्तस्यापत्यम् । अकारलोपः । ५–अवर्णेवर्णस्येत्यकारलोपः । अत इञितीञ् प्रत्ययः । ६–गार्गीपुत्रस्यापत्यम्, वृद्धिरिति दुसंज्ञा। पक्षेऽत इञ् । ७–ग्लुचुकस्यापत्यम्, पक्षेऽत इञ् । ८–वृद्धअल्लोपौ ।

विदेहस्य राज्ञोऽपत्यं वैदेहः। बहुत्वे विदेहाः।

**सारवैक्ष्वाकमैत्रेयभ्रौणहत्यधैवत्यहिरण्मयम्** ।७।४।३०।। सारवादयः शब्दा अणादिप्रत्ययान्ताः कृताय्लोपादयो निपात्यन्ते। ऐक्ष्वाकः, इक्ष्वाकवः, पाञ्चालः पञ्चालाः।। सरूपादिति किम्? दाशरथिः, त्रैपृष्ठिः[२]।।

**पुरुमगधकलिङ्गसूरमसद्विस्वरादण्** ।६।१।११६।। पुरु-मगध-कलिङ्ग-सूरमस इत्येतेभ्यो द्विस्वरेभ्यश्च सरूपेभ्यो यथासंख्यं राजन्यपत्ये चार्थे द्रिरण् प्रत्ययो भवति। अञोऽपवादः। पौरवः, पुरवः। मागधः, मगधाः। कालिङ्गः, कलिङ्गाः। सौरमसः, सूरमसाः, आङ्गः, अङ्गाः, वाङ्गः, वङ्गाः। सर्वत्र बहुषु लुप्।।

**दुनादिकुर्वित्कोशलाजादाञ् ञ्यः** ।६।१।११८।। दुसंज्ञकेभ्यो नकारादिभ्यः कुरुशब्दाद् इकारान्तेभ्यश्च कोशल, अजाद इत्येताभ्यां च राष्ट्रवाचिभ्यः क्षत्रियवाचिभ्यश्च सरूपेभ्यो यथासंख्यं राजन्यपत्ये च ञ्यः प्रत्ययो भवति स च द्रिसंज्ञः। दु-आम्बष्ठ्यः, आम्बष्ठाः। नैषध्यः, निषधाः। कुरु-कौरव्यः, कुरवः।

१-वृद्धयुलोपौ। २-अत इञ्। त्रैपृष्ठस्तु दाशरथवत्समाधेयः। शिवादिपाठादण्। ३-पुरूणां पुरोर्मगधानां मगधस्य कलिङ्गानां कलिङ्गस्य सूरमसानां सूरमसस्य राजाऽपत्यं च। ४-वृद्धयकारेकारलोपावादेशा यथासंभवं बोध्याः।

इत्—आवन्त्यः, अवन्तयः। कौशल्यः, कौशल्या, कोशलाः। आजाद्यः, अजादाः ॥

**पाण्डोर्ड्यण्** ।६।१।११९॥ पाण्डुशब्दाद्राष्ट्रक्षत्रियवाचिनः सरूपाद् यथासङ्ख्यं राजन्यपत्ये चार्थे ड्यण् प्रत्ययो भवति सच द्रिसंज्ञः। पाण्ड्यः, पाण्डवः। पाण्डवा इति तु कुरुराजविशेषार्थात्पाण्डुशब्दादपत्ये शिवाद्यण् ॥

**शकादिभ्यो द्रेर्लुप्** ।६।१।१२०॥ शक इत्येवमादिभ्यः परस्य द्रिसंज्ञकस्य प्रत्ययस्य लुप् भवति। शकः[६], यवनः। शकादयः प्रयोगगम्याः ॥

**पितृमातुर्व्यडुलं भ्रातरि** ।६।२।६२॥ पितृमातृभ्यां षष्ठ्यन्ताभ्यां भ्रातरि वाच्ये यथासंख्यं व्यडुल इत्येतौ प्रत्ययौ भवतः। पितुर्भ्राता पितृव्यः। मातुर्भ्राता मातुलः ॥

**पित्रोर्डामहट्** ।३।२।६३॥ पितृमातृशब्दाभ्यां षष्ठ्यन्ताभ्यां मातापित्रो र्वाच्ययोर्डामहट् प्रत्ययो भवति। पितुः पिता पितामहः। पितुर्माता पितामही, मातुः

५—डित्त्वादन्त्यस्वरादिलोपः, बहुत्वे पाण्डवः। ६—संज्ञात्वाद् द्रिसंज्ञा, ञ्यस्य लुप्। ७—डित्त्वादन्त्यस्वरादिलोपः।

१—डित्त्वादन्त्यस्वरादि लोपः, स्त्रियां टित्त्वान्ङीः।

पिता मातामहः, मातुर्माता मातामही ॥ इत्यपत्याद्यर्थ-प्रक्रिया ॥

**रागाट्टो रक्ते** ।६।२।१॥ रज्यतेऽनेनेति रागः प्रसिद्धः कुसुम्भादिः । रागविशेषवाचिनो नाम्नस्तृतीयान्ताद् रक्तमित्येतस्मिन्नर्थे यथाविहितमणादिः प्रत्ययो भवति । कुसुम्भेन रक्तं वस्त्रं कौसुम्भम् । काषायम्, माञ्जिष्ठम्, हारिद्रम्, कौङ्कुमम् । वाऽधिकारात् पक्षे समासो वाक्यं च । एवं सर्वत्र तद्धितेऽभ्यूह्यम् ।

**लाक्षारोचनादिकण्** ।६।२।२॥ लाक्षा, रोचना इत्येताभ्यां तृतीयान्ताभ्यां रक्तमित्येतस्मिन्नर्थे इकण् प्रत्ययो भवति । अणोऽपवादः । लाक्षिकम् । रौचनिकम् ॥

**शकलकर्दमाद्वा** ।६।२।३॥ शकल-कर्दम-इत्येताभ्यां तृतीयान्ताभ्यां रागविशेषवाचिभ्यां रक्तमित्येतस्मिन्नर्थे इकण् प्रत्ययो वा भवति । शाकलिकम्, कार्दमिकम् । पक्षेऽण्-शाकलम्, कार्दमम् ॥

**नीलपीतादकम्** ।६।२।४॥ नीलपीतशब्दाभ्यां रागविशेषवाचिभ्यां तृतीयान्ताभ्यां रक्तमित्येतस्मिन्नर्थे यथासंख्यम् अ, क इत्येतौ प्रत्ययौ भवतः । नीलेन,

---

२–इह शुक्लस्य वर्णान्तरापादनं रञ्जनं बोध्यम् । ३–आलोपादिवृद्धी ।

...गाविशिष्टग्रहणान्नील्या वा रक्तम् नीलम्[४] । पीतेन ...ं पीतकम् । अणपवादः ॥

**चन्द्रयुक्तात्काले लुप्त्वप्रयुक्ते ।६।२।६॥** चन्द्रेण ...क्तं यन्नक्षत्रं तद्वाचिनस्तृतीयान्ताद् युक्तेऽर्थे यथा-...विहितं प्रत्ययो भवति स चेद् युक्तोऽर्थः कालो भवति, ...प्रयुक्ते तु कालवाचके शब्दे लुब् भवति ॥

**तिष्यपुष्ययोर्भाऽणि ।२।४।९०॥** तिष्यपुष्ययोर्यकारस्य भाणि[५] परतो लुग् भवति । पुष्येण चन्द्रयुक्तेन युक्तमहः पौषमहः । पौषोऽहोरात्रः । एवं तैषम् । अप्रयुक्ते इति किम् ? अद्य पुष्यः ।

**षष्ठ्याः समूहे ।६।२।९॥** षष्ठ्यन्तान्नाम्नः समूहेऽर्थे यथाविहितमणादयः प्रत्यया भवन्ति । चाषाणां समूहश्चाषम् । एवं यत्रापि न विशेषविहितं तत्राप्यणेव । ...कं बाकं शौकं भैक्षुकमित्यादयः[१] ॥

**भिक्षादेः ।६।२।१०॥** भिक्षादिभ्यः समूहेऽर्थे यथाविहि-...णादिः प्रत्ययो भवति । भैक्षम्, गार्भिणम्, यौवतम्[२] ॥

४–अवर्णेवर्णस्येति नीलीशब्देकारलोपः । ५–भं नक्षत्रम्, नक्षत्रवाचकादणीत्यर्थः ।

१–काकानां बकानां शुकानां भिक्षुकाणां च समूहः । २–भिक्षाणां गर्भिणीनां युवतीनां च समूहः । अवर्णेवर्णलोपावादिवृद्धिः ।

**गोत्रोक्षवत्सोष्ट्रवृद्धाजोरभ्रमनुष्यराजराजन्यराजपुत्रादकञ्** ।६।२।१२।। स्वापत्यसन्तानस्य स्वव्यपदेशकारिणः प्रथमपुरुषस्यापत्यं गोत्रम् । गोत्रप्रत्ययान्तेभ्य उक्षादिभ्यश्च समूहेऽकञ् प्रत्ययो भवति । अणोऽपवादः । औपगवकम्[३], गार्गकम्, औक्षकम्, वात्सकम्, औष्ट्रकम्, वार्धकम्[४], आजकम्, औरभ्रकम्, मानुष्यकम्, राजकम्, राजन्यकम्, राजपुत्रकम् ।।

**केदाराण्ण्यश्च** ।६।२।१३।। केदारशब्दात्समूहेऽर्थे ण्योऽकञ् च प्रत्ययौ भवतः । अचित्तेकणोऽपवादः । कैदार्यम्[६], कैदारकम् ।।

**कवचिहस्त्यचित्ताच्चेकण्** ।६।२।१४।। कवचिन् हस्तिन् इत्येताभ्यामचित्तवाचिभ्यः केदाराच्च समूहे इकण् प्रत्ययो भवति । कावचिकम्[७] ।।

**जातिश्च णितद्धितयस्वरे** ।३।२।५१।। परतः स्त्री जातिश्च णिप्रत्यये यकारादौ स्वरादौ च तद्धिते विषयभूते=उत्पत्स्यमाने तद्विवक्षायामेव पुंवद् भवत्यनूङ् । हस्तिनां लिङ्गाविशिष्टग्रहणाद् हस्तिनीनां वा समूहो

३–औपगवानां गर्गाणां उक्ष्णां समूहः । अलोप आदिवृद्धिः । नोऽपदस्ये-त्यन्त्यस्वरादिलोपः । ४–धुटो धुटीति दलोपः । ५–अन्त्यस्वरादिलोपः ।
६–केदाराणां समूहः । ७–कवचान्येषां सन्तीति कवचिनः, तेषां समूहः, नोऽपदस्येति लोपः ।

हास्तिकम्[८], आपूपिकम्, शाष्कुलिकम्, कैदारिकम् ॥

**धेनोरनञः** ।६।२।१५॥ धेनुशब्दात्समूहेऽर्थे इकण् प्रत्ययो भवति न चेत्स नञः परो भवति ॥

**ऋवर्णोवर्णदोसिसुसशश्वदकस्मात्त इकस्येतो लुक्** ।७।४।७१॥ ऋवर्णान्तादुवर्णान्ताद् दोस् शब्दादिसन्तादुसन्ताच्छश्वदकस्माद्वर्जितात्तकारान्ताच्च परस्येकप्रत्ययस्य सम्बन्धिन इकारस्य लुग् भवति। धैनुकम्[१]।

**ब्राह्मणमाणववाडवाद्यः** ६।२।१६॥ एभ्यः समूहे यः प्रत्ययो भवति। ब्राह्मण्यम्[२], माणव्यम्, वाडव्यम्।

**गणिकाया ण्यः** ।६।२।१७॥ गणिकाशब्दात् समूहे ण्यः प्रत्ययो भवति। गाणिक्यम्[३] ॥

**केशाद्वा** ।६।२।१८॥ केशशब्दात् समूहे ण्यः प्रत्ययो वा भवति। कैश्यम्, कैशिकम्[४]।

**वाऽश्वादीयः** ।६।२।१९॥ अश्वशब्दात् समूहे ईयः प्रत्ययो वा भवति। अश्वीयम्, आश्वम्[५] ॥

**गोरथवातात्त्रल्कट्यलूलम्** ।६।२।२४॥ गो-रथ-वात इत्येतेभ्यः समूहे यथासंख्यं त्रल् कट्यल् ऊल इत्येते

८–हस्तिनीशब्देऽवर्णेवर्णस्येतीकारलोपे नोऽपदस्येत्यन्त्यस्वरादिलोपः।
१–धेनूनां समूहः, आदिवृद्धिः। २–अवर्णेवर्णेत्यलोपः। ३–गणिकानां समूहः, अवर्णलोपादिवृद्धी। ४–अलोपादिवृद्धी। ५–पक्षे षष्ठ्याः समूह इत्यण्।

प्रत्यया भवन्ति। गोत्रा[६], रथकट्या, वातूलः ॥

**पाशादेश्च ल्यः** ।६।२।२५॥ पाशादिभ्यो गोरथवातेभ्यश्च समूहे ल्यः प्रत्ययो भवति। इकणादेरपवादः। पाश्या, तृण्या ॥ गव्याँ, रथ्या, वात्या ॥

**श्वादिभ्योऽञ्** ।६।२।२६॥ श्वन् प्रकारेभ्यः समूहेऽञ् प्रत्ययो भवति। शुनां समूहः शौवम्[७] ॥

**अनीनादट्यह्नोऽतः** ।७।४।६६॥ ईन्–अत्–अट्वर्जिते तद्धिते परे अपदस्याऽह्नो योऽकारस्तस्य लुग् भवति। आह्नम्[८][९], दाण्डम्[१०], चाक्रम् ॥

**खलादिभ्यो लिन्** ।६।२।२७॥ खलप्रकारेभ्यः समूहे लिन् प्रत्ययो भवति। खलानां समूहः खलिनी। पाशादित्वाल्ल्योऽपि। खल्या। ऊकानामूकिनी कुटुम्बानां कुटुम्बिनी। श्वादयः खलादयश्च प्रयोगगम्याः ॥

**ग्रामजनबन्धुगजसहायात्तल्** ।६।२।२८॥ एभ्यः समूहे तल् भवति। ग्रामता, जनता, बन्धुता, गजता, सहायता। लित्वात् स्त्रियामाप्। इति रक्ताद्यर्थाः ॥

**पुरुषात्कृतहितवधविकारे चैयञ्** ।६।२।२९॥

६–लित्वात्स्त्रियामाप्। ७–य्यक्य स्त्यव्। ८–नोऽपदस्येत्यन्त्यस्वरादिलोपे द्वारादेरित्यौः। ९–अह्नां समूहः। १०–दण्डिनां चक्रिणां च समूहः। नोऽपदस्येत्यन्त्यस्वरादिलोपः।

पुरुषशब्दात् कृते हिते वधे विकारे समूहे चार्थे एयञ् प्रत्ययो भवति। पुरुषेण कृतः, पुरुषाय हितः, पुरुषस्य वधो विकारो वा पौरुषेयः। पुरुषाणां समूहः पौरुषेयम्॥

**विकारे** ।६।२।३०॥ षष्ठ्यन्ताद्विकारे यथाविहित-मणादयः प्रत्ययाः स्युः। द्रव्यस्यावस्थान्तरं विकारः॥

**वाऽश्मनो विकारे** ।७।४।६३॥ अश्मन् शब्दस्याऽपदस्य विकारे विहिते तद्धिते परेऽन्त्यस्वरादेर्लुग् वा भवति। अश्मनो विकार आश्मः, आश्मनः। भास्मनः[1]। मार्तिकः॥

**त्रपुजतोः षोऽन्तश्च** ।६।२।३३॥ त्रपु जतु इत्येताभ्यां विकारे यथाविहितमण् प्रत्ययो भवति तयोश्च षोऽन्तो भवति। त्रापुषम्[2], जातुषम्॥

**पयोद्रोर्यः** ।६।२।३५॥ पयस् द्रु इत्येताभ्यां विकारे यः प्रत्ययो भवति। अणमयटोरपवादः। पयस्यम्[3]। द्रोर्दारुणो विकारो द्रव्यम्[4]॥

**प्राण्यौषधिवृक्षेभ्योऽवयवे च** ।६।२।३१॥ प्राण्यौ-षधिवृक्षवाचिभ्यः षष्ठ्यन्तेभ्योऽवयवे विकारे च यथाविहित-मणादयः प्रत्ययाः स्युः। कपोतस्यावयवः कापोतं सक्थि। कपोतस्य विकारः कापोतं मांसम्। दूर्वाया अवयवो

१–अणीत्यन्त्यस्वरादिलोपनिषेधः। २–त्रपुणो जतुनो वा विकारः। ३–अयीति पर्युदासादपदत्वान्न रुः। ४–अस्वयम्भुव इत्यव्।

दौर्वं काण्डम्। दूर्वाया विकारो दौर्वं भस्म। बिल्वस्यावयवो विकारो बैल्वं काण्डं भस्म च।

**अभक्ष्याच्छादने वा मयट्** ।६।२।४६।। षष्ठ्यन्ताद् भक्ष्याच्छादनवर्जिते विकारेऽवयवे च यथायोगं मयट् वा भवति। भस्मनो विकारो भस्ममयं भास्मनम्। अश्ममयम्, आश्मम्, आश्मनम्। दूर्वामयं दौर्वम्। भक्ष्याच्छादने त्वणेव। मौद्गः सूपः, कार्पासः पटः॥

**एकस्वरात्** ।६।२।४८।। एकस्वरान्नाम्नो यथासम्भवं भक्ष्याच्छादनवर्जे विकारेऽवयवे चार्थे नित्यं मयट् प्रत्ययो भवति। वाचो विकारो वाङ्मयम्[1], त्वङ्मयम्, मृन्मयम्, गीर्मयम्[2]॥

**दोरप्राणिनः** ।६।२।४९।। दुसंज्ञकादप्राणिवाचिनो यथायोगं भक्ष्याच्छादनवर्जिते विकारेऽवयवे च मयट् प्रत्ययो भवति। अणोऽपवादः। आम्रमयम्, शाकमयम्; तन्मयम्॥

**गोः पुरीषे** ।६।२।५०।। गोशब्दात् पुरीषेऽर्थे मयट् प्रत्ययो भवति। गोः पुरीषं गोमयम्। पुरीषादन्यत्र विकारे यप्रत्ययो वक्ष्यते॥

---

५-नाम्सिदिति पदत्वे नाम्नो न इति न लोपः। ६-यक्षेऽण्। अणीत्यन्त्यस्वरादिलोपनिषेधः।

१-चज इति कः, धुट इति तृतीयः, प्रत्यये चेति पञ्चमः। २-भ्वादेर्नामिन इति दीर्घः।

**तिलयवादनाम्नि** ।६।२।५२।। तिल यव इत्येताभ्यां विकारेऽवयवे च मयट् प्रत्ययो भवत्यनाम्नि। तिलमयम्, यवमयम्। नाम्नि त्वणेव, तैलं, यावः, स एव यावकः स्वार्थे कः।।

**पिष्टात्** ।६।२।५३।। पिष्टशब्दाद्विकारे मयट् प्रत्ययो भवत्यनाम्नि । पिष्टमयम् ।।

**नाम्नि कः** ।६।२।५४।। पिष्टशब्दान्नाम्नि विकारे कः प्रत्ययो भवति। पिष्टस्य विकारः पिष्टिका ।।

**ह्योगोदोहादीनञ् ह्वियङ्गुश्चाऽस्य** ।६।२।५५।। ह्योगोदोह शब्दाद्विकारे नाम्नि इनञ् प्रत्ययो भवति तत्सन्नियोगे च प्रकृतेर्हियङ्गु इत्यादेशः। ह्योगोदोहस्य विकारो हैयङ्गवीनं नवनीतं घृतं वा। असंज्ञायामणेव, ह्यौगोदोहमुदश्विदादि ।।

**अपो यञ् वा** ।६।२।५६।। अप् शब्दाद्विकारे यञ् प्रत्ययो वा भवति। अपां विकार आप्यम्, अम्मयम् ।।

**लुब्बहुलं पुष्पमूले** ।६।२।५७।। विकारावयवयोर्विहितस्य प्रत्ययस्य पुष्पे मूले वा विकारतयाऽवयवतया वा

---

३—आदित्यापि अस्यायत्तदितीत्वम् । ४—गवां दोहो गोदोहः, ह्यो गोदोहः, अस्वयम्भुव इत्यव् । आदिवृद्धिः । ५—धुट इति तृतीयः, प्रत्यये चेति पञ्चमः ।

विवक्षिते बहुलं लुप् भवति । मल्लिकाया विकारोऽवयवो वा पुष्पं मल्लिका, मालती, यूथिका । एष्वौषध्यणो द्रुमयटो वा लुप् । हरिद्राया मूलं हरिद्रा । बाहुलकात्क्वचिन्न, बैल्वानि पुष्पाणि फलानि वा । क्वचिद्विकल्पः, शिरीषाणि शैरीषाणि वा पुष्पाणि । क्वचिदन्यत्रापि, आमलकस्य विकारो वृक्ष आमलकी, बदरी । स्त्रीत्वं लोकात् ॥

फले ।६।२।५८॥ विकारेऽवयवे फले विवक्षिते प्रत्ययस्य लुप् भवति । आमलक्या विकारोऽवयवो वा फलमामलकम्, बदरम् । फले लुबन्तस्य क्लीबता । व्रीहिः, यवः । अत्र प्रकृतिलिङ्गता ॥

न द्विरद्रुवयगोमयफलात् ।६।२।६१॥ द्रुवयं गोमयं फलजातिवाचि च वर्जयित्वाऽन्यस्मान्नाम्नो विकारावयवयोर्द्विः प्रत्ययो न भवति । कापोतस्य विकारोऽवयवो वेति दोरप्राणिन इति मयण्न भवति ॥

॥ इति विकाराद्यर्थाः ॥

## अथ चातुरर्थिकाः—

निवासादूरभव इति देशे नाम्नि ।६।२।६९॥ षष्ठ्यन्तान्नाम्नो निवासेऽदूरभव इत्येतयोरर्थयोर्यथाविहितमणादिः प्रत्ययो भवति प्रत्ययान्तं चेद्देशस्य नामधेयं भवति ।

१–अत्र लुपि ङ्यादेर्गौणस्येत्यादिना स्त्रीप्रत्ययनिवृत्तौ लुबन्तस्य स्त्रीत्वात्पुनः स्त्रीप्रत्ययो बोध्यः ।

शिबीनां निवासः शैबः। शकलाया निवासः शाकलः[2]। विदिशाया अदूरभवं वैदिशं[3] नगरम्। वैदिशो जनपदः॥

**पूर्वपदस्थान्नाम्न्यगः** ।२।३।६४॥ पूर्वपदस्थाद् रषृवर्णादगकारान्तात्परस्य उत्तरपदस्थस्य नकारस्य णकार आदेशो भवति संज्ञायां विषये। वरं च तदनश्च वरानः, तस्यादूरभवा नगरी वाराणसी[4], वारणासी[5]॥

**तदत्रास्ति** ।६।२।७०॥ तदिति प्रथमान्तादत्रेति सप्तम्यर्थे यथाविहितमणादिः प्रत्ययो भवति यत्तत्प्रथमान्तं तच्चेदस्तीति भवति, प्रत्ययान्तं चेद्देशस्य नाम भवति। उदुम्बरा अस्मिन् देशे सन्तीत्यौदुम्बरं नगरम्। औदुम्बरः पर्वतो जनपदो वा॥

**तेन निर्वृत्ते च** ।३।२।७१॥ तेनेति तृतीयान्ताद् निर्वृत्तमित्येतस्मिन्नर्थे यथाविहितमणादिः प्रत्ययो भवति प्रत्ययान्तं चेद्देशस्य नाम भवति। कुशाम्बेन निर्वृत्ता कौशाम्बी नगरी। सहस्रेण निर्वृत्ता साहस्री परिखा[1]॥

**नद्यां मतुः** ।६।२।७२॥ तस्य निवासस्तस्यादूरभवस्तदत्रास्ति तेन निर्वृत्तं चेत्येतेषु चतुर्ष्वर्थेषु यथायोग्यं

---

२–अवर्णेवर्णस्येत्यालोप आदिवृद्धिः। ३–आलोपादिवृद्धी। ४–स्त्रियामणन्तत्वान्ङीः, अस्य ङ्यामित्यलोपः, संज्ञायां णत्वम्। ५–वरणा चाऽसिश्च, तयोरदूरभवा नगरी। इकारलोपादिवृद्धी। १–अकारलोपादिवृद्धी, स्त्रियामणन्तत्वान्ङीः।

मतुः प्रत्ययो भवति प्रत्ययान्तं चेन्नदीविषयं देशस्य नाम भवति ॥

**मावर्णान्तोपान्त्यापञ्चमवर्गान्मतोर्मो वः ।२।१।९४॥** मश्चावर्णश्च मावर्णौ तौ प्रत्येकमन्त्योपान्त्यौ यस्य तस्मान्मकारान्तान्मकारोपान्त्यादवर्णान्तादवर्णोपान्त्याच्च पञ्चमरहितवर्गान्ताच्च नाम्नः परस्य मतोर्मकारस्य वकार आदेशो भवति ॥

**अनजिरादिबहुस्वरशरादीनां मतौ ।३।२।७८॥** अजिरादिवर्जितबहुस्वराणां शरादीनां च मतौ प्रत्यये दीर्घोऽन्तादेशो भवति संज्ञायाम् । उदुम्बरा अस्यां सन्तीत्युदुम्बरावती नदी । शरावती[2] ॥

**मध्वादेः ।६।२।७३॥** मध्वादिभ्यश्चातुरर्थिको मतुः प्रत्ययो भवति प्रत्ययान्तं चेद्देशस्य नाम भवति । मध्वस्त्यत्र मधुमान्[3] । बिसवान् ॥

**नडकुमुदवेतसमहिषाड्डित् ।६।२।७४॥** नडादिभ्यो डिन्मतुः प्रत्ययो भवति चातुरर्थिको देशे नाम्नि । नड्वान्[4], कुमुद्वान् ॥

---

२–शराः सन्त्यत्रेति । अधातूदिति ङीः । ३–अम्वादेरिति दीर्घः । ऋदुदित इति नोन्तः, संयोगान्तलोपः, तस्याऽसत्त्वान्नलोपो न । ४–ङित्त्वादन्त्यस्वरादिलोपः ।

**नस्तं मत्वर्थे** ।१।१।२३॥ सकारान्तं तकारान्तं च नाम मत्वर्थे प्रत्यये परं पदसंज्ञं न भवति। वेतस्वान्[५]। महिष्मान्[६]॥

**नडशादाड्वलः** ।६।२।७५॥ नड शाद इत्येताभ्यां डित्वलः प्रत्ययो भवति। नड्वलं शाद्वलम्[१]॥

इति चातुरर्थिकाः॥

**साऽस्य पौर्णमासी** ।६।२।९८॥ प्रथमान्तात् षष्ठ्यर्थे यथाविहितमणादिः प्रत्ययो भवति, यत्तत्प्रथमान्तं तच्चेत्पौर्णमासी भवति, प्रत्ययान्तं चेन्नाम स्यात्। पौषी पौर्णमासी अस्य पौषो मासः, माघः, वैशाखः॥

**देवता** ।६।२।१०१॥ प्रथमान्तात् षष्ठ्यर्थे यथाविहितमणादिः प्रत्ययो भवति यत्तत्प्रथमान्तं देवता चेत्सा भवति। अर्हन् देवताऽस्येत्यार्हतः। जैनः, ऐन्द्रं हविः, वारुणश्चरुः॥

**महेन्द्राद्वा** ।६।२।१०३॥ महेन्द्रशब्दात्साऽस्य देवतेत्यस्मिन् विषये ईय इय इत्येतौ प्रत्ययौ वा भवतः। महेन्द्रीयम्, महेन्द्रियम्। पक्षेऽण्, माहेन्द्रं हविः॥

**वाय्वृतुपित्रुषसो यः** ।६।२।१०९॥ वायु-ऋतु-पितृ-उषस् इत्येतेभ्यः साऽस्य देवतेत्यस्मिन् विषये यः प्रत्ययो

---

५—नस्तमिति निषेधादपदत्वाद्रुत्वं न। ६—संज्ञाभङ्गभिया तृतीयो न।
१—अपदत्वाद् धुटस्तृतीय इति न।

भवति। अणोऽपवादः। वार्यव्यम्, ऋतव्यम्,।

**ऋतोरस्तद्धिते** ।१।२।२६॥ ऋकारस्य यकारादौ तद्धिते परे रादेशो भवति। पित्र्यम्, उषस्यम् ॥

**योद्धृ प्रयोजनाद् युद्धे** ।६।२।११३॥ प्रथमान्ताद् योद्धृवाचिनः प्रयोजनवाचिनश्च अस्येति षष्ठ्यर्थे युद्धेऽभिधेये यथाविहितमणादिः प्रत्ययो भवति। विद्याधरा योद्धारोऽस्य वैद्याधरं युद्धम्। दैवासुरम् ॥

**प्रहरणात् क्रीडायां णः** ।६।२।११६॥ प्रहरणवाचिनः प्रथमान्तादस्यामिति स्त्रीलिङ्गे सप्तम्यर्थे क्रीडायां णः प्रत्ययो भवति। दण्डः प्रहरणमस्यां क्रीडायां दाण्डा। मौष्टा। पादा क्रीडा ॥

**तद्वेत्त्यधीते** ।६।२।११७॥ द्वितीयान्ताद् वेत्त्यधीते वेत्येतयोरर्थयोर्यथाविहितमणादिः प्रत्ययो भतवि। मुहूर्त्तं वेत्ति मौहूर्त्तः, औत्पातः, नैमित्तः। मुहूर्त्तनिमित्तशब्दयोर्न्यायादिपाठमते इकणेव। मौहूर्तिकः, नैमित्तिकः। छन्दोऽधीते छान्दसः, व्याकरणं वेत्त्यधीते वा वैयाकरणः ॥

२—अस्वयम्भुवोऽवित्यव्, अपदत्वान्न वलोपः, अयीति पर्युदासात्, एवमग्रेऽपि। ३—ऋतोरस्तद्धित इति रः। ४—अयिति निषेधादपदत्वाद्रुत्वं न। ५—देवाश्चासुराश्च, तेषां समाहारद्वन्द्वः, देवासुरं योद्धारोऽस्य युद्धस्येत्यर्थः। ६—मुष्टिः प्रहरणमस्यां क्रीडायामित्यर्थः। इकारलोपः। १—य्वः पदान्तादित्यैत्।

**न्यायादेरिकण्** ।६।२।११८।। न्यायादिभ्यो वेत्त्यधीते वेत्यर्थे इकण् प्रत्ययो भवति। न्यायं वेत्त्यधीते वा नैयायिकः[2]। नैयासिकः[3] ॥

**पदक्रमशिक्षामीमांसासाम्नोऽकः** ।६।२।११६।। पदादिभ्यस्तद्वेत्त्यधीते वेत्यर्थे अकः प्रत्ययो भवति। पदकः, क्रमकः, शिक्षकः[4], मीमांसकः सामकः[5] ॥

**स-सर्वपूर्वाल्लुप्** ।६।२।१२७।। सशब्दपूर्वात्सर्वशब्दपूर्वाच्च वेत्त्यधीते वेत्यर्थे विहितस्य प्रत्ययस्य लुप् भवति। सवार्त्तिकः, ससंग्रहः। अत्राणो लुप् ॥

**संख्याकात् सूत्रे** ।६।२।१२८।। संख्यायाः परो यः कः प्रत्ययो विहितस्तदन्तात्सूत्रे वर्तमानान्नाम्नो वेत्त्यधीते वेत्यर्थे उत्पन्नस्य प्रत्ययस्य लुप् भवति। अष्टावध्यायाः परिमाणमस्येत्यष्टकं सूत्रम्। तद्वेत्त्यधीते वा अष्टकाः पाणिनीयाः। दशाऽध्यायाः परिमाणमस्येति दशकं सूत्रम्, तद्विदन्त्यधीयते वा दशका उमास्वातीयाः। परिमाणे वक्ष्यमाणः कः, ततोऽणो लुप् ॥

**प्रोक्तात्** ।६।२।१२९।। प्रोक्तार्थप्रत्ययान्तान्नाम्नो वेत्त्यधीते वेत्यर्थे उत्पन्नस्य प्रत्ययस्य लुप् भवति।

---

२—य्वः पदान्तादित्यैत्। ३—न्यासमधीते वेत्ति वा। य्वः पदान्तादित्यैत्। ४—शिक्षामधीते वेत्ति वा। आलोपवृद्धी। ५—नोऽपदस्येत्यन्त्यस्वरादिलोपः।

गोतमेन प्रोक्तं गौतमम् । अण् । तद्वेत्त्यधीते वेति गौतमः, अणो लुप् । गौतमा[६] । भद्रबाहुना प्रोक्तं भाद्रबाहवं वेत्त्यधीते वा भाद्रबाहवः । भाद्रबाहवाः ॥

**तेन छन्ने रथे ।६।२।१३१॥** तृतीयान्ताच्छन्ने रथे वाच्ये यथाविहितमणादिः प्रत्ययो भवति । वस्त्रेण छन्नो रथो वास्त्रः । चर्मणा छन्नो रथश्चार्मणः[७] ॥

**तत्रोद्धृते पात्रेभ्यः ।६।२।१३८॥** सप्तम्यन्तात्पात्रवाचिन उद्धृत इत्यस्मिन्नर्थे यथाविहितमणादिः प्रत्ययो भवति । शरावेषूद्धृत ओदनः शारावः ॥

**स्थण्डिलाच्छेते व्रती ।६।२।१३९॥** स्थण्डिलशब्दात्सप्तम्यन्ताच्छेते इत्यस्मिन्नर्थे यथाविहितमणादिः प्रत्ययो भवति, योऽसौ शेते स चेद् व्रती भवति । स्थण्डिल एव शेते स्थाण्डिलो भिक्षुः । अन्यत्र शयनान्निवृत्त इत्यर्थः ॥

**संस्कृते भक्ष्ये ।६।२।१४०॥** सप्तम्यन्तात्संस्कृते भक्ष्येऽर्थे यथाविहितमणादिः प्रत्ययो भवति । सत उत्कर्षाधानं संस्कारः । भ्राष्ट्रे संस्कृता भ्राष्ट्रा यवाः । भ्राष्ट्रा अपूपाः ॥

---

६–अत्राणो लुप्तत्वादणन्तत्वाभावान्न ङीः, किन्त्वाबेव, पूर्वोऽण् तु गौण इति ध्येयम् । ७–अणीत्यन्त्यस्वरादिलोपनिषेधः, णत्वम्, आदिवृद्धिः ।

शूलोखाद्यः ।६।२।१४१॥ शूलोखाशब्दाभ्यां सप्तम्यन्ताभ्यां संस्कृते भक्ष्येऽर्थे यः प्रत्ययो भवति। शूले संस्कृतं शूल्यं मांसम्। उखायामुख्यम् ॥

क्षीरादेयण् ।६।२।१४२॥ क्षीरशब्दात्सप्तम्यन्तात्संस्कृते भक्ष्येऽर्थे एयण् प्रत्ययो भवति। क्षीरे संस्कृतं भक्ष्यं क्षैरेयम् ॥

दध्न इकण् ।६।२।१४३॥ दधिशब्दात्सप्तम्यन्तात्संस्कृते भक्ष्येऽर्थे इकण् प्रत्ययो भवति। दध्नि संस्कृतं भक्ष्यं दाधिकम् ॥

क्वचित् ।६।२।१४५॥ अपत्यादिभ्योऽन्यत्राप्यर्थे क्वचिद्यथाविहितमणादिः प्रत्ययो भवति। चक्षुषा गृह्यते इति चाक्षुषं रूपम्। श्रावणः शब्दः। रासनो रसः। त्वाचः स्पर्शः। दृशदि पिष्टा दार्षदाः सक्तवः। सम्प्रति युज्यते सांप्रतं साम्प्रतः। एवमन्येऽपि प्रयोगा यथादर्शनमुन्नेयाः॥ इति साऽस्य देवताद्यर्थप्रक्रिया ॥

## ॥ अथ शैषिक प्रक्रिया ॥

शेषे ।६।३।१॥ अधिकारोऽयम्। उपयुक्तादन्यः शेषः। अपत्यादिभ्यः संस्कृतभक्ष्यपर्यन्तेभ्यो योऽन्योऽर्थः स शेषः। स च प्राग्जितात्कृतादिरर्थः सप्तदशसंख्याकः। तत्रादौ बोधसौकर्याय कृताद्यर्थेषु प्रत्येकं प्रत्यया उच्यन्ते। पश्चाच्छेषेऽर्थे वक्ष्यन्ते ॥

**तत्र कृतलब्धक्रीतसम्भूते** ।६।३।९४।। सप्तम्यन्तात्कृते लब्धे क्रीते सम्भूते चार्थे यथायोगमणादय एयणादयश्च प्रत्यया भवन्ति। यदन्येनोत्पादितं तत्कृतम्। यत्प्रतिग्रहादिना प्राप्तं तल्लब्धम्, यन्मूल्येन स्वीकृतं तत्क्रीतम्, यत्सम्भाव्यते संमाति वा तत्सम्भूतम्। स्रुघ्ने देशविशेषे कृतो लब्धः क्रीतः सम्भूतो वा स्रौघ्नः ॥

**कुशले** ।६।३।९५।। सप्तम्यन्तात्कुशलेऽर्थे यथाविहितमणादय एयणादयश्च प्रत्यया भवन्ति। मथुरायां कुशलो माथुरः ॥

**जाते** ।६।३।९८।। सप्तम्यन्ताद् जातेऽर्थे यथाविहितमणादय एयणादयश्च प्रत्यया भवन्ति। मथुरायां जातो माथुरः। मिथिलायां जातो मैथिलः ॥

**सोदर्यसमानोदर्यौ** ।६।३।११२।। सोदर्यसमानोदर्यशब्दौ जातेऽर्थे यप्रत्ययान्तौ निपात्येते। समानोदरे जातः सोदर्यः समानोदर्यः। निपातनात्पक्षे समानस्य सभावः। भ्रातृष्वेवाऽभिधानमेतच्च कृमिमलादिषु, निपातनादेव। नाम्नीत्यधिकाराद्वेति बोध्यम् ॥

**कालाद्देये ऋणे** ।६।३।११३।। सप्तम्यन्तात्कालविशेषवाचिनो देयेऽर्थे यथाविहितमणादिः प्रत्ययो भवति, यत्तद्देयं तच्चेदृणं भवति। मासे देयमृणं मासिकम्,

आर्धमासिकम्[1] । सांवत्सरिकम् ।

**साधुपुष्यत्पच्यमाने ।६।३।११७॥** सप्तम्यन्तात्काल-विशेषवाचिनः साधौ पुष्यति पच्यमाने चार्थे यथा-विहितमणादिरिकणादिश्च प्रत्ययो भवति । शिशिरे साधु शैशिरं तैलम् । वसन्ते पुष्यन्ति वासन्त्यः[2] कुन्द-लताः । शरदि पच्यन्ते शारदाः शालयः ॥

**उप्ते ।६।३।११८॥** सप्तम्यन्तात्कालवाचिन उप्तेऽर्थे यथाविहितमणादिरिकणादिश्च प्रत्ययो भवति । शरद्युप्ताः शारदा यवाः ॥

**व्याहरति मृगे ।६।३।१२१॥** सप्तम्यन्तात्कालवाचिनो व्याहरत्यर्थे यथाविहितमणिकणादयः प्रत्यया भवन्ति व्या-हरंश्चेन्मृगो भवति । निशायां व्याहरति नैशिको नैशो वा शृगालः । इकण् पक्षेऽण् ॥

**जयिनि च ।६।३।१२२॥** सप्तम्यन्तात् कालवाचिनो जयिन्यर्थे यथाविहितमणिकणादयः प्रत्यया भवन्ति । निशासहचरितमध्ययनं निशा, तत्र जयी साभ्यासो नैशिको नैशो वा बटुः । निशाध्ययनाभ्यासवानित्यर्थः ॥

**भवे ।६।३।१२३॥** सप्तम्यन्ताद् भवेऽर्थे यथाविहि-तमणादय एयणादयश्च प्रत्यया भवन्ति । स्रुघ्ने भवः

१–मासस्यार्धमर्धमासस्तत्र देयमृणमित्यर्थः । २–स्त्रियामणन्तत्वान्ङीः ।

सत्तावान् स्रौघ्नः, माथुरः, मैथिलः ॥

दिगादिदेहांशाद् यः ।६।३।१२४॥ दिगादिभ्यो देहावयववाचिनश्च सप्तम्यन्ताद् भवेऽर्थे यः प्रत्ययो भवति । दिशि भवं दिश्यम् । वर्गे भवो वर्ग्यः, पक्ष्यः, आद्यः, अन्त्यः, मुख्यः वंश्यः ॥ मूर्ध्नि भवो मूर्धन्यः, अनोऽट्ये इति निषेधः । दन्त्यः, ओष्ठ्य-तालव्यो जघन्यः ॥

मध्यादिनण्णेया मोन्तश्च ।६।३।१२६॥ मध्य-शब्दात् सप्तम्यन्ताद् भवेऽर्थे दिनण् ण ईय इत्येते प्रत्यया भवन्ति तत्सन्नियोगे च मागमो भवति । मध्ये भवा माध्यन्दिनाः, माध्यमाः, मध्यमीयाः ॥

जिह्वामूलाङ्गुलेश्चेयः ।६।३।१२७॥ जिह्वामूल अङ्गुलि इत्येताभ्यां मध्यशब्दाच्च भवेऽर्थे ईयः प्रत्ययो भवति । जिह्वामूलीयः, अङ्गुलीयः । मध्यीयः ॥

वर्गान्तात् ।६।३।१२८॥ वर्गशब्दान्तात् सप्तम्यन्ताद् भवेऽर्थे ईयः प्रत्ययो भवति । कवर्गीयः, मध्यवर्गीयः ॥

ईनयौ चाऽशब्दे ।६।३।१२९॥ वर्गशब्दान्ताद् सप्तम्यन्ताद् भवेऽर्थे ईन य इत्येतौ चकारादीयश्च प्रत्यया भवन्ति न चेत्स भवार्थः शब्दो भवति ।

१—अनीतिपर्युदासादपदत्वाद्दलिगुदिरिति गो न ।

भैरतवर्गीणः। भरतवर्ग्यः, भरतवर्गीयः। शब्दे तु पूर्वेण कवर्गीय इत्येव ॥

**चतुर्मासान्नाम्नि** ।६।३।१३३॥ चतुर्मासशब्दात् सप्तम्यन्ताद् भवेऽर्थेऽण् प्रत्ययो भवति समुदायश्चेन्नाम भवति। चतुर्षु मासेषु भवा चातुर्मासी, आषाढी कार्तिकी फाल्गुनी च पौर्णमासी भण्यते जैनैः।

**गम्भीरपञ्चजनबहिर्देवात्** ।६।३।१३५॥ एभ्यस्तत्र भवे ञ्यः प्रत्ययो भवति। गाम्भीर्यः, पाञ्चजन्यः ॥

**प्रायोऽव्ययस्य** ।७।४।६५॥ अव्ययस्यापदसंज्ञकस्य तद्धिते परेऽन्त्यस्वरादेः प्रायो लुग् भवति। बहिर्भवो बाह्यः, दैव्यः ॥

**छन्दसो यः** ।६।३।१४७॥ छन्दःशब्दाद् ग्रन्थवाचिनस्तस्य व्याख्याने तत्र भवे चार्थे यः प्रत्ययो भवति। छन्दसो व्याख्यानं तत्र भवो वा छन्दस्यः ॥

**शिक्षादेश्चाऽण्** ।६।३।१४८॥ शिक्षादिभ्यः छन्दःशब्दाच्च ग्रन्थवाचिनस्तस्य व्याख्याने तत्र भवे चार्थेऽण् प्रत्ययो भवति। शिक्षाया व्याख्यानं तत्र भवो वा शैक्षः, नैरुक्त इत्यादिः ॥

---

२–रष्ट्वर्णादिति णः। ३–तद्धितार्थे समासः, द्विगोर्लुगिति लुक् तु न, विधानसामर्थ्यात्। १–अपदत्वाद्वुर्न।

**प्रायो बहुस्वरादिकण्** ।६।३।१४३।। बहुस्वराद् ग्रन्थप्राचिनस्तस्य व्याख्याने तत्र भवे चार्थे प्राय इकण् प्रत्ययो भवति। षत्वणत्वयोर्व्याख्यानं तत्र भवं वा षात्वणत्विकम्, आख्यातिकम्। नैरुक्त इत्यादि तु शिक्षादित्वात्। अत एव प्रायो ग्रहणम्।

**तत आगते** ।६।३।१४९।। पञ्चम्यन्तादागतेऽर्थे यथाविहितमणादय एयणादयश्च प्रत्यया भवन्ति। सुघ्नादागतः स्रौघ्नो दूतः, महेश्वरादागतानि माहेश्वराणि पाणिनिसूत्राणि ।।

**पितुर्यो वा** ।६।३।१५१।। पितृशब्दाद् योनिसम्बन्धवाचिनः पञ्चम्यन्तादागतेऽर्थे यः प्रत्ययो वा भवति। पित्र्यम्[2]। पक्षे—

**ऋत इकण्**। ६।३।१५२।। ऋकारान्ताद्विद्यायोनिसम्बन्धवाचिनः पञ्चम्यन्तादागतेऽर्थे इकण् प्रत्ययो भवति। पैतृकम्[3], मातृकम्, हौतृकम् ।।

**आयस्थानात्** ।६।३।१५३।। स्वामिग्राह्यो भागो यत्रोत्पद्यते तदायस्थानमित्युच्यते। आयस्थानवाचिनः पञ्चम्यन्तादागतेऽर्थे इकण् प्रत्ययो भवति। आपणिकम्,

**द्वारादेः** ।७।४।६।। द्वार इत्येवमादीनां यौ यकारव-

२–ऋतो र इति रः। ३–ऋवर्णोवर्णेतीकारलुक्।

कारौ तयोः समीपस्य स्वरेष्वादेः स्वरस्य वृद्धिप्रसङ्गे ताभ्यामेव प्राक् ऐत् औत् इत्येतावागमौ भवतो ञ्णिति तद्धिते परे । दौवारिकम्[४] ।

**नृहेतुभ्यो रूप्यमयटौ वा ।६।३।१५६॥** नृवाचिभ्यो हेतुवाचिभ्यश्च पञ्चम्यन्तेभ्य आगतेऽर्थे रूप्य मयट् इत्येतौ प्रत्ययौ वा भवतः । देवदत्तरूप्यम् , देवदत्तमयम् । पक्षे यथाप्राप्तम् , दैवदत्तम् । समाद्धेतोरागतं समरूप्यम् , सममयम् । पक्षे गह्रादिपाठादीयः । समीयम् ॥

**प्रभवति । ६।३।१५७॥** पञ्चम्यन्तात्प्रभवत्यर्थे यथाविहितमणादय एयणादयश्च प्रत्यया भवन्ति । प्रभवोऽत्र प्रथममुपलभ्यमानता । हिमवतः प्रभवति तत्र प्रथममुपलभ्यते इति हैमवती[१] गङ्गा ॥

**त्यदादेर्मयट् ।६।३।१५८॥** त्यदादिभ्यः पञ्चम्यन्तेभ्यः प्रभवत्यर्थे मयट् प्रत्ययो भवति । तस्माद् प्रभवति तन्मयम्[२] , भवन्मयम्[३] ॥

**तस्येदम् ।६।३।१६०॥** षष्ठ्यन्तादिदमित्यर्थे यथाविहितमणादय एयणादयश्च प्रत्यया भवन्ति । उपगोरिदमौपगवम् । स्रौघ्नम् ॥

---

४--द्वारादायस्थानादागतमित्यर्थः । १--स्त्रियामणन्तत्वान्ङीः । २--प्रत्यये चेति पञ्चमः । ३--धुटस्तृतीय इति तृतीये प्रत्यये चेति पञ्चमः ।

**हलसीरादिकण्** ।६।३।१६१॥ हलसीर इत्येताभ्यां षष्ठ्यन्ताभ्यामिदमित्यर्थे इकण् प्रत्ययो भवति। हालिकम्, सैरिकम् ॥

**अदेवासुरादिभ्यो वैरे** ।६।३।१६४॥ द्वन्द्वात् षष्ठ्यन्ताद् देवासुरादिवर्जिताद् इदमर्थे वैरे अकल् प्रत्ययो भवति। काकोलूकस्येदं वैरं काकोलूकिका, अहिनकुलिका ॥

**रथात्सादेश्च वोढ्रङ्गे** ।६।३।१७५॥ रथात्केवलात् सपूर्वाच्च षष्ठ्यन्तादिदमर्थे यः प्रत्ययो भवति स रथस्य वोढरि रथाङ्गे एव च भवति। रथस्याऽयं वोढा रथ्योऽश्वः। रथस्येदमङ्गं रथ्यं चक्रं युगं वेत्यादि। इह तु न-रथस्येदं स्थानम् ॥

**वाहनात्** ।६।३।१७८॥ वाहनवाचिनस्तस्येदमित्यर्थेऽञ् प्रत्ययो भवति, इदमर्थश्चेद् वाह्यं पन्था उपकरणं भवति। अश्वस्यायमाश्वो रथः पन्था वा, आश्वं पल्ययनम्। अन्यत्र न-अश्वस्यायं घासः ॥

**तेन प्रोक्ते** ।६।३।१८१॥ प्रकर्षेण व्याख्यातमध्यापितं वा प्रोक्तम्। प्रोक्तेऽर्थे तृतीयान्तान्नाम्नो यथाविहितमणेयणादयः प्रत्यया भवन्ति। भद्रबाहुना प्रोक्तानि भाद्रबाहवान्युत्तराध्ययनानि। याज्ञवल्क्येन प्रोक्तानि

४-लित्वात् स्त्रियामाप्। अस्याऽयत्तदितीत्वम्। ५-अस्वयम्भुव इत्यव्, दुसंज्ञापक्षे दोरीये भद्रबाहवीयम्, १ कन्न्यत्राप्यूह्यम्।

याज्ञवल्क्यानि ब्राह्मणानि ॥

उपज्ञाते ।६।३।१९१॥ प्रथमत उपदेशेन विना वा ज्ञातमुपज्ञातं प्रथमतः कृतं वा । उपज्ञातेऽर्थे तृतीयान्तान्नाम्नो यथाविहितमणेयणादयः प्रत्यया भवन्ति । भद्रबाहुनोपज्ञाता भाद्रबाहवी[६] संहिता ॥

कृते ।६।३।१९२॥ तृतीयान्तादुत्पादितेऽर्थे यथाविहितमणादयः प्रत्यया भवन्ति । शिवेन कृतो ग्रन्थः शैवः । वररुचिना कृतानि वाररुचानि वार्तिकानि ॥

अमोऽधिकृत्य ग्रन्थे ।६।३।१९८॥ द्वितीयान्तादधिकृत्य कृते ग्रन्थेऽर्थे यथाविहितमणादयः प्रत्यया भवन्ति । सुभद्रामधिकृत्य कृतो ग्रन्थः सौभद्रः ॥

द्वन्द्वात्प्रायः ।६।३।२०१॥ द्वन्द्वात्समासाद् द्वितीयान्तादधिकृत्य कृते ग्रन्थेऽर्थे प्रायः ईयः प्रत्ययो भवति । वाक्यपदे अधिकृत्य कृतो ग्रन्थो वाक्यपदीयम् । प्रायो ग्रहणाद् गौणमुख्ये अधिकृत्य कृतो ग्रन्थो गौणमुख्यम् । अत्राणेव ॥

अभिनिष्क्रामति द्वारे ।६।३।२०२॥ द्वितीयान्तादभिनिष्क्रामत्यर्थे यथाविहितमणादिः प्रत्ययो भवति ।

६–स्त्रियामणन्तत्वान्ङीः ।

तच्चेदभिनिष्क्रामद् द्वारं भवति। स्रुघ्नमभिनिष्क्रामति स्रौघ्नं कान्यकुब्जद्वारम् ॥

**गच्छति पथि दूते** ।६।३।२०३॥ द्वितीयान्ताद् गच्छत्यर्थे यथाविहितमणादिः प्रत्ययो भवति, योऽसौ गच्छति, स पन्था दूतो वा भवति। मथुरां गच्छति माथुरः पन्था दूतो वा ॥

**भजति** ।६।३।२०४॥ द्वितीयान्ताद् भजत्यर्थे यथाविहितमणादिः प्रत्ययो भवति। स्रुघ्नं भजति स्रौघ्नः, माथुरः, मैथिलः ॥

*तसि ।६।३।२११॥ तृतीयान्तात्तुल्यदिश्यर्थे तसिरि*त्ययं प्रत्ययो भवति यथाविहितमणादय एयणादयश्च प्रत्यया भवन्ति। सुदाम्नैकदिक् सुदामतः सौदामनी वा विद्युत्। तुल्या समाना साधारणा वा दिग् यस्य स तुल्यदिक्। एकदिगित्यर्थः। हिमवत्तो हैमवती वा गङ्गा ॥

**सेर्निवासादस्य** ।६।३।२१३॥ प्रथमान्तात्षष्ठ्यर्थे यथाविहितमणेयणादयः प्रत्यया भवन्ति प्रथमान्तं चेन्निवासो भवति। निवास इह देशः। स्रुघ्नो निवासोऽस्य

१–पदत्वे नाम्नो न इति नलोपः। २–अणीत्यन्त्यस्वरादिलोपनिषेधः, स्त्रियामणन्तत्वान्ङीः। ३–अपदत्वान्न तृतीयः, स्त्रियामणन्तत्वान्ङीः।

स्रौघ्नः, माथुरः, मैथिलः ॥

आभिजनात् ।६।३।२१४॥ अभिजनः पूर्वबान्धवाः, तेषामयमाभिजनः । प्रथमान्तादभिजनान्निवासादस्येति षष्ठ्यर्थे यथाविहितमणेयणादयः प्रत्यया भवन्ति । स्रुघ्नोऽस्याऽऽभिजनो निवासः स्रौघ्नः, माथुरः, मैथिलः । साऽस्य पौर्णमासीत्यारभ्य शेषाधिकारस्था अर्थविशेषाः प्रत्ययविशेषाश्चोक्ताः, साम्प्रतं सामान्ये शैषिकेऽर्थे प्रत्यया उच्यन्ते ॥

नद्यादेरेयण् ।६।३।२॥ नद्यादिभ्यो यथासम्भवं प्राग्जितीये शेषेऽर्थे एयण् प्रत्ययो भवति । नद्यां जातो भवो नद्या अयं वा नादेयः । एवं यथासम्भवमन्यस्मिन्नपि शेषार्थे नद्यादेरेयण् प्रत्ययो भवति । मह्यां भवो वने भवो वा माहेयः, वानेयः ॥

राष्ट्रादियः ।६।३।३॥ राष्ट्रशब्दात्प्राग्जितीये शेषेऽर्थे इयः प्रत्ययो भवति । राष्ट्रे क्रीतः कुशलो जातो भवो वा राष्ट्रियः ॥

दूरादेत्यः ।६।३।४॥ दूरशब्दाच्छेषेऽर्थे एत्यः प्रत्ययो भवति । दूरे भवो जातो वा दूरेत्यः ॥

उत्तरादाहञ् ।६।३।५॥ उत्तरशब्दाच्छेषेऽर्थे आहञ् प्रत्ययो भवति । उत्तरस्मिन् भवो जातो वौत्तराहः ।

औत्तराहा स्त्री। औत्तराहीति तूत्तराहीशब्दाद् भवेऽर्थेऽणि स्त्रियां ङीः ॥

**पारावारादीनः** ।६।३।६॥ पारावारशब्दाच्छेषेऽर्थे ईनः प्रत्ययो भवति। पारावारे भवः पारा[2]वारीणः ॥

**व्यस्तव्यत्यस्तात्** ।६।३।७॥ पारावारशब्दाद्व्यस्ताद्विपर्यस्ताच्च शेषेऽर्थे ईनः प्रत्ययो भवति । पारीणः, अवारीणः, अवारपारीणः ॥

**द्युप्रागवागुदक्प्रतीचो यः** ।६।३।८॥ दिव्शब्दात् प्राच् अवाच् उदच् प्रतीच् इत्येतेभ्यश्चाऽव्ययानव्ययेभ्यः शेषेऽर्थे यः प्रत्ययो भवति। दिवि भवं दिव्यम्[3]। प्राचि प्राग्वा भवं प्राच्यम्। एवमवाच्यम्, उदीच्यम्[4], प्रतीच्यम्[5]। कालपरात्त्वव्ययात्प्रागादेस्तनट्। अनव्ययात्त्विकण् बोध्यः ॥

**ग्रामादीनञ् च** ।६।३।९॥ ग्रामशब्दाच्छेषेऽर्थे ईनञ् चकाराद् यश्च प्रत्ययो भवति। ग्रामीणः, ग्राम्यः ॥

**दक्षिणापश्चात्पुरसस्त्यण्** ।६।३।१३॥ एभ्यः शेषेऽर्थे त्यण् प्रत्ययो भवति। अणोऽपवादः। दक्षिणा

---

१–स्त्रियामाप्। २–अवारः समुद्रस्तस्य पारः राजदन्तादित्वात्परनिपातः। पारावारः। रषृवर्णादिति णः। ३–अयीति निषेधादपदत्वाद् उः पदान्त इति न। ४–अपदत्वादुदच उदीच्। ५–अच्च प्राग्दीर्घश्च।

इति दक्षिणस्यामव्ययम् । तत्र भवो दाक्षिणात्यः । पश्चाद्भवः पाश्चात्यः[1] । पुरोभवः पौरस्त्यः[2] ॥

**क्वेहामात्रतसस्त्यच्** ।६।३।१६॥ क्व इह अमा इत्येतेभ्यस्त्रतसप्रत्ययान्तेभ्यश्च शेषेऽर्थे त्यच् प्रत्ययो भवति । क्वत्यः, इहत्यः, अमात्यः, तत्रत्यः, अत्रत्यः, यत्रत्यः, कुत्रत्यः, ततस्त्यः, यतस्त्यः, कुतस्त्यः ॥

**ऐषमोह्यस्श्वसो वा** ।६।३।१९॥ ऐषमस् ह्यस् श्वस इत्येतेभ्यः शेषेऽर्थे त्यच् प्रत्ययो वा भवति । ऐषमो भवमैषमस्त्यम् । ह्यस्त्यम् , श्वस्त्यम् । पक्षे तनट् ॥

**भवतोरिकणीयसौ** ।६।३।३०॥ भवतुशब्दाच्छेषेऽर्थे इकण् ईयस् इत्येतौ प्रत्ययौ भवतः । भवत इदं भावत्कम्[3], भावत्की, भवदीयः[4], भवदीया ॥

**परजनराज्ञोऽकीयः** ।६।३।३१॥ एभ्यः शेषेऽर्थे अकीयः प्रत्ययो भवति । परस्याऽयं परकीयः, जनकीयः, राज्ञ इदं राजकीयम्[5] ॥

**दोरीयः** ।६।३।३२॥ दुसंज्ञकाच्छेषेऽर्थे ईयः प्रत्ययो भवति । देवदत्तीयः । दुसंज्ञाविकल्पे त्वणेव । दैवदत्तः[6] ।

---

१–धुटस्तृतीयः, अघोषे प्रथमः । २–सस्य रुत्वे चटत इति सः । ३–ऋवर्णोवर्णेतीकारलुक् । ४–ईयसः सित्वान्नामसिदिति पदत्वे धुटस्तृतीयः । ५–नोऽपदस्येत्यन्त्यस्वरादिलोपः । ६–संज्ञादुर्वेति वा दुसंज्ञा ।

तदीयः, शालायां भवः शालीयः । पाणिनिना प्रोक्तं पाणिनीयम् ॥

उष्णादिभ्यः कालात् ।६।३।३४॥ उष्णादिपूर्वपदात् कालान्ताच्छेषेऽर्थे ईयः प्रत्ययो भवति । उष्णकाले भव उष्णकालीयः ॥

व्यादिभ्यो णिकेकणौ ।६।३।३४॥ वि इत्येवमादिभ्यः परो यः कालशब्दस्तदन्ताच्छेषेऽर्थे णिक इकण् इत्येतौ प्रत्ययौ भवतः । विकाले भवो वैकालिकः, वैकालिका । वैकालिकी, दशवैकालिकम् , तात्कालिकम् ॥

काश्यादेः ।६।३।३५॥ काश्यादिभ्यो दुसंज्ञकेभ्यः शेषेऽर्थे णिक इकण् इत्येतौ प्रत्ययौ भवतः । काशिकी वृत्तिः, करणे भवः कारणिकः । युवराजे भवो यौवराजिकः ॥

पर्वतात् ।६।३।६०॥ पर्वतशब्दाद्देशवाचिनः शेषेऽर्थे ईयः प्रत्ययो भवति । पर्वतस्यायं पर्वतीयो राजा, पर्वतीयः पुमान् ॥

अनरे वा ।६।३।६१॥ पर्वतशब्दाद्देशवाचिनो नरवर्जिते शेषेऽर्थे ईयः प्रत्ययो वा भवति । पर्वतीयानि पार्वतानि फलानि ॥

---

७–त्यदादिरिति दुसंज्ञा । ८–वृद्धिर्यस्येति दुसंज्ञा । ९–त्रियामिकणन्तत्वान्ङीः, पूर्वत्राबेवेकान्तत्वात् । १०–कायां जाता । वृद्धिर्यस्येति दुसंज्ञा ।

**गहादिभ्यः** ।६।३।६३।। गहादिभ्यो यथासम्भवं देशवाचिभ्यः शेषेऽर्थे ईयः प्रत्ययो भवति । गहीयः, अन्तस्थीयः । समीयम्, विषमीयम्, उत्तमीयः, उत्तरीयम्, अन्तरीयम्, स्वकीयम्, देवकीयम् ।।

**पृथिवीमध्यान्मध्यमश्चास्य** ।६।३।६४।। पृथिवीमध्यशब्दाद्देशवाचिनः शेषेऽर्थे ईयः प्रत्ययो भवति । पृथिवीमध्यशब्दस्य मध्यमादेशश्च भवति । पृथिवीमध्ये जातो भवो वा मध्यमीयः ।।

**वा युष्मदस्मदोऽञीनञौ युष्माकाऽस्माकौ चास्यैकत्वे तु तवकममकम्** ।६।३।६७।। युष्मद् अस्मद् इत्येताभ्यां शेषेऽर्थे अञ् ईनञ् इत्येतौ प्रत्ययौ वा भवतः, तत्सन्नियोगे च यथासंख्यं युष्मदस्मदोर्युष्माकास्माकौ, एकत्वविशिष्टे त्वर्थे वर्त्तमानयोस्तयोस्तवकममकावादेशौ भवतः । इह प्रत्यये नास्ति यथासंख्यम् । युष्माकमयं युवयोर्वा यौष्माकीणः[1] । यौष्माकः । अस्माकमावयोर्वा आस्माकः, आस्माकीनः । पक्षे दोरीयः । युष्मदीयः, अस्मदीयः । तवायं तावकः, ममायं मामकः, तावकीनः, मामकीनः । पक्षे त्वदीयः[2], मदीयः ।।

**अमोऽन्तावोधसः** ।६।३।७४।। अन्त अवस् अधस् इत्येतेभ्यः शेषेऽर्थे अमः प्रत्ययो भवति । अन्ते भवोऽन्तमः

१–रषृवर्णादिति णः । २–त्वमौ प्रत्ययेति त्वामादेशौ ।

अवो भवोऽवमः, अधो भवोऽधमः ॥

**पश्चादाद्यन्ताग्रादिमः** ।६।३।७५॥ पश्चात् आदि अन्त अग्र इत्येतेभ्यः शेषेऽर्थे इमः प्रत्ययो भवति । पश्चाद् भवः पश्चिमः[3] आदिमः, अन्तिमः, अग्रिमः । भवे दिगादित्वाद् य एवाद्यन्तशब्दाभ्याम् । आदौ भव आद्यः, अन्त्यः ॥

**मध्यान्मः** ।६।३।७६॥ मध्यमशब्दाच्छेषेऽर्थे मः प्रत्ययो भवति भवादन्यत्र[4] । मध्ये जातो मध्यमः ॥

**अध्यात्मादिभ्य इकण्** ।६।३।७८॥ अध्यात्मादिभ्यः शेषेऽर्थे इकण् प्रत्ययो भवति । अध्यात्मं[1] भवमाध्यात्मिकम् ॥ आधिदैविकम् । आधिभौतिकम् । अनुशतिकादित्वादुभयपदवृद्धिः । अकस्माद् हेतुशून्यः कालस्तत्र भवमाकस्मिकम्[2] । अमुष्मिन् परलोके भवमामुष्मिकम्[3] । आमुत्रिकम्, पारत्रिकम्, ऐहिकम्, शैषिकम् ॥

**समानपूर्वलोकोत्तरपदात्** ।६।३।७९॥ समानपूर्वपदेभ्यो लोकोत्तरपदेभ्यश्च शेषेऽर्थे इकण् प्रत्ययो भवति । समानग्रामे कृतो जातो भवो वा सामानग्रामिकः । सामान-

---

३–अव्ययत्वादन्त्यस्वरादिलोपः । ४–भवे दिनणेव ।

१–आत्मनीत्यध्यात्ममित्यव्ययीभावः । एवमधिदेवमित्याद्यपि । २–अव्ययत्वादन्त्यस्वरादिलोपः । ३–अनुशतिकादिषु अमुष्मिन्निति पाठसामर्थ्यात्सप्तम्या अलुप् । नोऽपदस्येत्यन्त्यस्वरादिलोपः ।

देशिकः। इह लोके कृतो भवो वा ऐहलौकिकः[४], पारलौकिकः ॥

**वर्षाकालेभ्यः ।६।३।८०॥** वर्षाशब्दात्कालविशेषवाचिभ्यश्च शेषेऽर्थे इकण् प्रत्ययो भवति ।

**अंशादृतोः ।७।४।१४॥** अंशवाचिनः शब्दात्परस्य ऋतुवाचिन उत्तरपदस्य स्वरेष्वादेः स्वरस्य स्थाने ञ्णितितद्धितेपरे वृद्धिः स्यात् । वर्षासु भवो वार्षिकः, पूर्ववार्षिकः, मासिकः, सांवत्सरिकः, अह्नि भवं जातं वा आह्निकम् । एवं दैवसिकमित्यादि ॥

**निशाप्रदोषात् ।६।३।८३॥** निशाप्रदोषशब्दाभ्यां कालवाचिभ्यां शेषेऽर्थे इकण् वा भवति । नैशिकं तमः । पक्षेऽण् नैशम् । प्रादोषिकः, प्रादोषः ॥

**चिरपरुत्परारेस्त्नः ।६।३।८५॥** चिर, परुत्, परारि इत्येतेभ्यः कालवाचिभ्यः शेषेऽर्थे त्नः प्रत्ययो भवति वा । चिरत्नम्, परुत्नम्, परारित्नम् । पक्षे तनट् ॥

**पुरो नः ।६।३।८६॥** पुराशब्दात्कालवाचिनोऽव्ययाच्छेषेऽर्थे नः प्रत्ययो भवति वा । पुरा भवं पुराणम् । पक्षे तनट् ॥

---

४-अनुशतिकादित्वादुभयपदवृद्धिः ।

**पूर्वाह्णापराह्णात्तनट्** ।६।३।८७।। पूर्वाह्ण अपराह्ण इत्येताभ्यां कालविशेषवाचिभ्यां शेषेऽर्थे तनट् वा भवति।

**कालात्तनतरतमकाले** ।३।२।२३।। अदन्ताद् व्यञ्जनान्ताच्च कालवाचिनः परस्याः सप्तम्यास्तनतरतमप्रत्ययेषु कालशब्दे चोत्तरपदे परे वा लुप् न भवति। पूर्वाह्णेभवं पूर्वाह्णेतनम्। अपराह्णेतनः, अपराह्णतनः। पक्षे इकण्। पौर्वाह्णिक इत्यादि ॥

**सायंचिरंप्राह्णेप्रगेऽव्ययात्**।६।३।८८।। सायं चिरं प्राह्णे प्रगे इत्येतेभ्योऽव्ययेभ्यश्च कालवाचिभ्यः शेषेऽर्थे तनट् प्रत्ययो नित्यं भवति। साये भवं सायन्तनम्[२]। मान्तत्वं निपातनात्। एवमग्रेऽपि। चिरे भवं चिरन्तनम्। प्राह्णे भवं प्रगे भवं प्राह्णेतनम्, प्रगेतनम्। अनयोरेदन्तत्वं निपातनात्। दिवातनम्, दोषातनम्, प्राक्तनम्[३] ॥

**भर्तुसन्ध्यादेरण्** ।६।३।८९।। नक्षत्रवाचिभ्य ऋतुवाचिभ्यः सन्ध्यादिभ्यश्च कालवाचिभ्यः शेषेऽर्थेऽण् प्रत्ययो भवति। इकणोऽपवादः। पुष्येण चन्द्रयुक्तेन युक्तः कालः पुष्यः। नक्षत्राणो लुप्। पुष्ये भवः पौषः[४]। तैषः। ग्रैष्मः। वासन्ती लता। सान्ध्यः[५]। आमावास्यः। चातुर्दशः। प्रातिपदः ॥

---

१–अह्नः पूर्वमिति समासः। २–निपातनान्मान्तत्वे तौ मुम इति स्वानुस्वारानुनासिकौ। ३–प्रागित्यव्ययम्। ४–भाण्त्वाद् तिष्यपुष्ययोरिति यलोपः। ५–सन्ध्यायां भवो जातो वा।

**हेमन्ताद्वा तलुक् च ।६।३।९१।।** हेमन्तशब्दादृतुविशेषवाचिनः शेषेऽर्थेऽण् वा भवति, तत्सन्नियोगे च तकारस्य लुग्वा भवति । हैमनम्[६], हैमन्तम्, हैमन्तिकम् ॥

**प्रावृष एण्यः ।६।३।९२।।** प्रावृष् इत्येतस्माद् ऋतुवाचिनः शेषेऽर्थे एण्यः प्रत्ययो भवति । प्रावृषि भवः प्रावृषेण्यः ॥ जाते तु–

**प्रावृष इकः ।६।३।९९।।** सप्तम्यन्तात् प्रावृष् शब्दाज्जातेऽर्थे इकः प्रत्ययो भवति । एण्यापवादः । प्रावृषि जातः प्रावृषिकः ॥ इति शेषाधिकारः ॥

अथ प्राग्जितीयाः ॥

**प्राग्जितादण् ।६।१।१३।।** प्राग्जितशब्दसंकीर्तनादित आरभ्य पादत्रयं यावत् येऽर्था अपत्यादयस्तेष्वपवादविषयं परित्यज्याण् प्रत्ययो वा भवति । उपगोरपत्यमौपगवः । मञ्जिष्ठया रक्तं वस्त्रं माञ्जिष्ठम् । भिक्षाणां समूहो भैक्षम् । अश्मनो विकार आश्मः । स्रुघ्ने भवः स्रौघ्न इत्यादि ।

**धनादेः पत्युः ।६।१।१४।।** धनादेर्गणात्परो यः पतिशब्दस्तदन्ताद् धनपतीत्येवमादेः प्राग्जितीयेऽर्थेऽण् प्रत्ययो वा भवति । धनपतेरपत्यं तत्र भवस्तत आगतो वा

---

६–तलोपे अणीत्यन्त्यस्वरादिलोपनिषेधः ।

१–आदिवृद्धिः, अस्वयम्भुव इत्यव् ।

धानपतः[२] । आश्वपतः । गाणपतम्, पाशुपतम् एवमन्येऽपि ॥

**अनिदम्यणपवादे च दित्यदित्यादित्ययमपत्युत्तरपदाञ्ञ्यः ।६।१।१५॥** दिति-अदिति-आदित्य-यमशब्देभ्यः पत्युत्तरपदाच्च प्रागुजितीये इदमर्थवर्जितेऽपत्यादावर्थे योऽणपवादः प्रत्ययस्तद्विषये च ञ्यः प्रत्ययो भवति । दितेरपत्यं दैत्यः[३], अदितेरपत्यमादित्यः ।

दितिरदितिरादित्यो वा देवताऽस्य दैत्यमादित्यमादित्यम्[४] । यमो देवताऽस्य याम्यम् । बृहस्पतेरपत्यं बार्हस्पत्यः[५] । प्राजापत्यम्, वानस्पत्यम् ॥

**बहिषष्टीकण् च ।६।१।१६॥** बहिस् शब्दात् प्रागुजितीयेऽर्थे टीकण् प्रत्ययो भवति ञ्यश्च । बहिर्जातो बाहीको, बाह्यः, बाह्या ॥

**कल्यग्नेरेयण् ।६।१।१७।** कलि अग्नि इत्येताभ्यां प्राग्जितीयेऽर्थे अनिदम्यणपवादे च एयण् प्रत्ययो भवति । कलिर्देवताऽस्य कालेयम्, आग्नेयम् । एवं भवे अणपवादे आगतादौ च बोध्यम् ॥

---

२-आदिवृद्धीकारलोपौ । ३-आदिवृद्धीकारलोपौ । ४-आदित्यो देवताऽस्येत्यादित्यं हविः । ञ्ये अवर्णेवर्णेत्यकारलोपे व्यञ्जनादित्यादिना वा यकारलुक् । ५-प्रायोऽव्ययस्येत्यन्त्यस्वरादिलोपः ।

**पृथिव्या ञाञ्** ।६।१।१८।। पृथिवीशब्दात् प्राग्जितीयेऽर्थेऽनिदम्यणपवादे च ञ अञ् इत्येतौ प्रत्ययौ भवतः । पृथिव्या अपत्यं पृथिव्यां भवो जातो वा पार्थिवः, पार्थिवा । अञि स्त्रियां ङीः । पार्थिवी ।।

**उत्सादेरञ्** ।६।१।१९।। उत्सादिभ्यः शब्देभ्यः प्राग्जितीयेऽर्थेऽनिदम्यणपवादे च अञ् प्रत्ययो भवति । उत्सस्यापत्यमौत्सः, उत्सस्येदमौत्सम् । औदपानम् । तारुणम्, धैनवम् । जानपदम्, भारतम्, ग्रैष्मः, सौवर्णम् ।।

**देवाद् यञ् च** ।६।१।२१।। देवशब्दात्प्राग्जितीयेऽर्थेऽनिदम्यणपवादे च यञ् चकारादञ् च प्रत्ययो भवति । देवस्येदं देवादागतं वा दैव्यम्, दैवम् ।।

**द्विगोरनपत्ये यस्वरादेर्लुबद्विः** ।६।१।२४।। अपत्यार्थादन्यस्मिन् प्राग्जितीयेऽर्थे उत्पन्नस्य द्विगोः परस्य यकारादेः स्वरादेश्च प्रत्ययस्य सकृल्लुप् भवति न तु द्विः ।

**ङ्यादेर्गौणस्याक्विपस्तद्धितलुक्यगोणीसूच्योः** ।२।४।९५।। ङ्यादेः प्रत्ययस्य गौणस्याक्विबन्तस्य तद्धितलुकि सति लुग् भवति गोणीसूचीसम्बन्धिनस्तु न भवति । ङीनिवृत्तौ तत्सन्नियोगशिष्टागमादिनिवृत्तिः । पञ्चेन्द्राण्यः देवताऽस्य पञ्चेन्द्रः । चतुरनुयोगान् चतुरनुयोगीं वाऽधीते

---

१–अस्वयम्भुव इत्यव् । २–द्विगुसमासस्तद्धितार्थे ।

चतुरनुयोगः । अद्विरिति किम्? पञ्चसु कपालेषु पञ्चकपाल्यां वा संस्कृतं पञ्चकपालं तस्येदं पाञ्चकपालम् । अत्र तस्येदमित्यणो लुङ् न ॥

**प्राग्वतः स्त्रीपुंसान्नञ्स्नञ् ।६।१।२५॥** प्राग्वतो येऽर्थास्तेष्वनिदम्यणपवादे च स्त्रीशब्दात् पुंस्शब्दाच्च यथासंख्यं नञ् स्नञ् प्रत्ययौ भवतः । स्त्रिया अपत्यं स्त्रैणः[3] । पुंसोऽपत्यं पौंस्नः । स्त्रीणां समूहः स्त्रैणम्, पौंस्नम्[4], एवमन्यत्राऽर्थेऽपि ॥

**त्वे वा ।६।१।२६॥** स्त्रीशब्दात् पुंस्शब्दाच्च त्वप्रत्ययविषये भावे यथासंख्यं नञ् स्नञ् प्रत्ययौ वा भवतः । स्त्रिया भावः स्त्रैणं स्त्रीत्वं स्त्रीता । पौंस्नं पुंस्त्वं[5] पुंस्ता ॥

**गो स्वरे यः ।६।१।२७॥** गोशब्दात्स्वरादितद्धितप्रसङ्गे यः प्रत्ययो भवति । गोरिदं गव्यम्[6] । गोरपत्यं गव्यः । अण्विषयेऽत्र यः ॥

॥ इति प्राग्जितीयप्रक्रिया ॥

अथेकणधिकारः ॥

**तेन जितजयद्दीव्यत्खनत्सु ।६।४।२॥** तृतीयान्ताद् जिते जयति दीव्यति खनति चार्थे इकण् प्रत्ययो

३-आदिर्वृद्धिः, रषृवर्णादिति णः । ४-संयोगस्येत्यादिसकारलुक् ।
५-संयोगस्येति सलोपे पुमोऽशिट्यघोष इति रादेशे, चटते इति सः ।
६-य्यक्ये इत्यव ।

भवति । अक्षै[1] र्जितमाक्षिकम् । जयदाद्यर्थेषु कालविवक्षा नास्ति। अक्षैर्जैषीज्जयति जेष्यति वा आक्षिकः । अक्षैर्दीव्यति आक्षिकः । अभ्र्या खनति आभ्रिकः । करण-तृतीयान्तादेव, नेह देवदत्तेन जितम्, धनेन जितम् ॥

**संस्कृते** ।६।४।४। तृतीयान्तात् संस्कृतेऽर्थे इकण् प्रत्ययो भवति । सत उत्कर्षाधानं संस्कारः । दध्ना संस्कृतं दाधिकम् । उपाध्यायेन संस्कृत औपाध्यायिकः शिष्यः । विद्यया संस्कृतो वैद्यिकः ॥

**संसृष्टे** ।६।४।५॥ तृतीयान्तात्संसृष्टेऽर्थे इकण् प्रत्ययो भवति । मिश्रणमात्रं संसर्ग इति संस्कृताद् भेदः । दध्ना संसृष्टं दाधिकम् , विषेण संसृष्टा वैषिक्यो भिक्षाः । अशुचिना संसृष्टमाशुचिकमन्नम् ॥

**लवणादः** ।६।४।६॥ लवणशब्दात्तृतीयान्तात् संसृष्टेऽर्थे अकारः प्रत्ययो भवति । लवणेन संसृष्टो लवणः सूपः ।

**व्यञ्जनेभ्य उपसिक्ते** ।६।४।८॥ व्यञ्जनवाचिनस्तृ-तीयान्तादुपसिक्तेऽर्थे इकण् प्रत्ययो भवति। सूपेनोप-सिक्तः[2] सौपिक ओदनः । एवं दाधिको घार्तिक इत्यादि ॥

**तरति** ।६।४।९॥ तृतीयान्तात्तरत्यर्थे इकण् प्रत्ययो

१—अवर्णेवर्णस्येत्यलोपः । २—यद्यप्युपसेकः संसर्ग एव, तथापि व्यञ्जनेभ्य एवोपसिक्ते एवेत्युभयत्र नियमार्थं सूत्रम् ।

भवति। उडुपेन तरति औडुपिकः। गोपुच्छेन तरति गौपुच्छिकः॥

नौ-द्विस्वरादिकः।६।४।१०॥ नौशब्दाद् द्विस्वराच्च तृतीयान्तात्तरत्यर्थे इकः प्रत्ययो भवति। नावा तरति नाविकः। घटेन तरति घटिकः। बाहुभ्यां तरति बाहुकः, बाहुका॥

चरति।६।४।११॥ तृतीयान्ताच्चरत्यर्थे इकण् प्रत्ययो भवति। चरतिरिह गत्यर्थो भक्षणार्थश्च। हस्तिना चरति हास्तिकः। दध्ना चरति दाधिकः।

पर्पादेरिकट्।६।४।१२॥ पर्पादिभ्यस्तृतीयान्तेभ्यश्चरत्यर्थे इकट् प्रत्ययो भवति। पर्पिकः। अश्विकी। अश्वत्थिकः, रथिकः, अर्घ्यिकः, व्यालिकः, व्यालिकः,।

पदिकः।६।४।१३॥ पादशब्दात्तृतीयान्ताच्चरत्यर्थे इकट् प्रत्ययो भवति, पादस्य पद्भावश्च निपात्यते। पादाभ्यां चरति पदिकः। पदिकी॥

वेतनादेर्जीवति।६।४।१५॥ वेतनादिभ्यस्तृतीयान्तेभ्यो जीवत्यर्थे इकण् प्रत्ययो भवति। वेतनेन जीवति वैतनिकः।

३—ऋवर्णोवर्णेतीकारलोपः। ४—नो पदस्येत्यनन्यस्वरादिलुक्। ५—स्त्रियां टित्वान्ङीः।

**नामिनस्तयोः षः ।२।३।८॥** नामिन उत्तरस्य रेफस्य *पाश-कल्प-क-काम्येषु* प्रत्ययेषु परेषु सत्सु षो भवति । धनुषा जीवति धानुष्कः[1] । वेशेन जीवति वैशिकः ।

**व्यस्ताच्च क्रयविक्रयादिकः ।६।४।१६॥** क्रय-विक्रयशब्दाद् व्यस्तात्समस्ताच्च तेन जीवत्यर्थे इकः प्रत्ययो भवति । क्रयविक्रयेण जीवति क्रयविक्रयिकः, क्रयिकः विक्रयिकः ॥

**भावादिमः ।६।४।२१॥** भाववाचिनस्तेन निवृत्त-मित्यर्थे इमः प्रत्ययो भवति । पाकेन निर्वृत्तं पाकिमम्, सेकिमम्, त्यागिमम्, सम्मूर्च्छिमम्[2] ॥

**रक्षदुञ्छतोः ।६।४।३०॥** द्वितीयान्ताद् रक्षत्युञ्छति चार्थे इकण् प्रत्ययो भवति । समाजं रक्षति सामाजिकः । बदराण्युञ्छति बादरिकः ॥

**पक्षिमत्स्यमृगार्थाद् घ्नति ।६।४।३१॥** द्वितीया-न्तेभ्यः पक्ष्यर्थेभ्यो मत्स्यार्थेभ्यो मृगार्थेभ्यश्च घ्नत्यर्थे इकण् प्रत्ययो भवति । पक्षिणो हन्ति पाक्षिकः, शाकु-निकः । मात्स्यिकः, मैनिकः, मार्गिकः, हारिणिकः, सौकरिकः ॥

---

१–नाम सिदिति पदत्वाद्रुत्वेऽनेन षः, अवर्णेवर्णेतीकारलोपः । २–सम्मू-र्च्छया निवृत्तमित्यर्थः ।

**परदारादिभ्यो गच्छति** ।६।४।३८।। परदारादिभ्यो द्वितीयान्तेभ्यो गच्छत्यर्थे इकण् प्रत्ययो भवति। परदारान् गच्छति पारदारिकः ।।

**समूहार्थात्समवेते** ।६।४।४६।। समूहवाचिभ्यो द्वितीयान्तेभ्यः समवेते तदेकदेशीभूतेऽर्थे इकण् प्रत्ययो भवति। समूहं समवैति सामूहिकः। सांसदिकः, सामाजिकः, गौष्ठिकः।

**पर्षदो ण्यः** ।६।४।४७।। पर्षच्छब्दाद् द्वितीयान्तात् समवेतेऽर्थे ण्यः प्रत्ययो भवति। पार्षद्यः, परिषच्छब्दादपि पारिषद्यः ।।

**सेनाया वा** ।६।४।४८।। सेनाशब्दाद् द्वितीयान्तात् समवेतेऽर्थे ण्यः प्रत्ययो वा भवति। सेनां समवैति सैन्यः। पक्षे समूहार्थादिकण्, सैनिकः ।।

**धर्माधर्माच्चरति** ।६।४।४९।। धर्म अधर्म इत्येताभ्यां द्वितीयान्ताभ्यां चरत्यर्थे इकण् प्रत्ययो भवति। चरतिरिह तात्पर्येणानुष्ठाने। धर्मं चरति धार्मिकः। आधर्मिकः ।।

**तदस्य पण्यम्**। प्रथमान्तादस्येति षष्ठ्यर्थे इकण् प्रत्ययो भवति, प्रथमान्तं चेत्पण्यं विक्रेयं भवति। अपूपाः पण्यमस्य आपूपिकः। मौदकिकः ।।

**शिल्पम्** ।६।४।५७।। प्रथमान्तादस्येत्यर्थे इकण् प्रत्ययो भवति, प्रथमान्तं चेत् शिल्पं भवति। शिल्पं कौशलं विज्ञानप्रकर्षः। शिल्पनिर्वर्त्यः क्रियाविशेष इह शिल्पशब्देन लक्षितो बोध्यः। नृत्तं शिल्पमस्य नार्तिकः, गैतिकः, वादनिकः। वीणा—वीणावादनं शिल्पमस्य वैणिकः। मार्दङ्गिकः। ईदृशस्थले वीणादयः शब्दा वादनार्थे सन्तः प्रत्ययमुत्पादयन्तीति बोध्यम् ॥

**शीलम्** ।६।४.५९।। प्रथमान्तादस्येत्यर्थे इकण् प्रत्ययो भवति प्रथमान्तं चेच्छीलं भवति । अपूपा अपूपभक्षणं शीलमस्येत्यापूपिकः। ताम्बूलिकः ॥

**अङ्स्थाच्छत्रादेरञ्** ।६।४।६०।। अङ्प्रत्ययान्तात्तिष्ठ-तेश्छत्रादिभ्यश्च तदस्य शीलमित्यस्मिन् विषये अञ् प्रत्ययो भवति। आस्था[1] शीलमस्य आस्थः। वैयवस्थः[2]। गुरोर्दोषावरणं छत्रम्, तच्छीलमस्य छात्रः, चुरा शीलमस्य चौरः, चौरी[3]। तापसः, कार्मः[4]। भैक्षः ॥

**प्रहरणम्** ।६।४।६२।। प्रथमान्तादस्येत्यर्थे इकण् प्रत्ययो भवति प्रथमान्तं चेत् प्रहरणं भवति। असिः प्रहरणमस्येत्यासिकः। धानुष्कः[5]। मौद्गरिकः ॥

---

१—उपसर्गादात इत्यङ् । आस्था शीलमस्य । २—य्वः पदान्तादित्यैः । व्यवस्था शीलमस्य । ३—स्त्रियामञन्तत्वान्ङीः । ४—नोऽपदस्येत्यन्त्य-स्वरादि लोपः । ५—नामिनस्तयोरिति षत्वम्, ऋवर्णोवर्णेतीकारलोपः ।

**शक्तियष्टेष्टीकण्** ।६।४।६४।। शक्ति यष्टि इत्येताभ्यां तदस्य प्रहरणमित्यस्मिन् विषये टीकण् प्रत्ययो भवति। शक्तिः प्रहरणमस्य शाक्तीकः, शाक्तीकी[६]। याष्टीकः ॥

**नास्तिकास्तिकदैष्टिकम्** ।६।४।६६।। एते शब्दास्तदस्येत्यस्मिन् विषये इकण् प्रत्ययान्ता निपात्यन्ते। तेनैते रूढा एव बोध्याः। नास्ति परलोकः पुण्यं पापमिति वा मतिरस्य नास्तिकः। अस्ति परलोकः पुण्यं पापमिति मतिरस्य आस्तिकः। अत्र नास्त्यस्ति शब्दावव्यये। दिष्टं दैवं तत्प्रमाणमिति मतिरस्य, दिष्टा प्रमाणानुपातिनी वा मतिरस्य दैष्टिकः ॥

**तत्र नियुक्ते** ।६।४।७४।। सप्तम्यन्तान्नियुक्तेऽर्थे इकण् प्रत्ययो भवति। नियुक्तोऽधिकृतो व्यापारित इत्यर्थः ॥

द्वारे नियुक्तो दौवारिकः द्वारादित्वादौः। आपणिकः ॥

**अगारान्तादिकः** ।६।४।७५।। अगारान्तात्तत्र नियुक्तेऽर्थे इकः प्रत्ययो भवति। पूजागारिकः, भाण्डागारिकः, कोष्ठागारिकः।

**निकटादिषु वसति** ।६।४।७७।। निकटादिभ्यः

---

६–स्त्रियां टित्वान्ङीः

सप्तम्यन्तेभ्यो वसत्यर्थे इकण् प्रत्ययो भवति। निकटे वसति नैकटिकः। वृक्षमूले वार्क्षमूलिकः॥

**सतीर्थ्यः** ।६।४।७८॥ समानतीर्थशब्दात्तत्र वसत्यर्थे यः प्रत्ययो निपात्यते समानशब्दस्य च सभावः। समानतीर्थे वसति सतीर्थ्यः। तीर्थमिह गुरुरुच्यते॥

**देवव्रतादीन् डिन्** ।६।४।८३॥ देवव्रतादिभ्यो द्वितीयान्तेभ्यश्चरत्यर्थे डिन् प्रत्ययो भवति। देवव्रतं चरति देवव्रती[1]। अवान्तरदीक्षां चरत्यवान्तरदीक्षी। महाव्रती॥

**तद्यात्येभ्यः** ।६।४।८७॥ क्रोशशत योजनशत योजन इत्येभ्यो द्वितीयान्तेभ्यो याति=गच्छत्यर्थे इकण् प्रत्ययो भवति। क्रोशशतं याति क्रौशशतिकः। यौजनशतिकः यौजनिकः।

**पथ इकट्** ।६।४।८८॥ पथिन् शब्दाद् द्वितीयान्ताद् यात्यर्थे इकट् प्रत्ययो भवति। पन्थानं याति पथिकः[2]। पथिकी॥

**नित्यं णः पन्थश्च** ।६।४।८९॥ पथिन्शब्दाद् द्वितीयान्तान्नित्यं यात्यर्थे णः प्रत्ययो भवति पथिन्

१—डित्वादन्त्यस्वरादिलोपः। २—नोपदस्येत्यन्त्यस्वरादिलोपः।

शब्दस्य च पन्थादेशः। पन्थानं नित्यं याति पान्थः। पान्था ॥

**निर्वृत्ते** ।६।४।१०५॥ कालवाचिनस्तृतीयान्तान्निर्वृत्तेऽर्थे इकण् प्रत्ययो भवति। अह्ना निर्वृत्तमाह्निकम्। मासिकम् ॥

**त्रिंशद्विंशतेर्डकोऽसंज्ञायामार्हदर्थे** ।६।४।१२९॥ त्रिंशद् विंशति इत्येताभ्यां आ–अर्हदर्थाद् योऽर्थो वक्ष्यते क्रीतादिस्तस्मिन् डकः प्रत्ययो भवति, कापवादः, न चेत्प्रत्ययान्तं कस्यचित् संज्ञा भवति। त्रिंशता क्रीतं त्रिंशकम् ॥

**विंशतेस्तेर्डिति** ।७।४।६७॥ विंशतिशब्दस्याऽपदसंज्ञकस्य यस्तिशब्दस्तस्य डिति तद्धिते परे लुग् भवति। विंशत्या क्रीतं विंशकम्। त्रिंशतमर्हति त्रिंशकः। विंशकः। एवमन्यत्रापि ॥

**संख्याडतेश्चाऽशत्तिष्टेः कः** ।६।४।१३०॥ शदन्तत्यन्त-ष्ट्यन्तवर्जितायाः संख्याया डतिप्रत्ययान्ताच्च त्रिंशद् विंशतिभ्यां च आर्हदर्थे कः प्रत्ययो भवति। द्वाभ्यां क्रीतम् द्विकम्, पञ्चकम्। कतिभिः क्रीतं

---

३–स्त्रियामदन्तत्वादाप्। ४ अनीनादित्यकारलुक्।

१–डित्त्वादन्त्यस्वरादिलोपः। २–पदान्तत्वान्नाम्नो न इति न लुक्। नामसिदिति पदसंज्ञा बोध्या।

कतिकम्, त्रिंशत्कम्, विंशतिकम्। अशत्तिष्टेरिति किम्? चत्वारिंशत्कम्, ऋवर्णोवर्णेतीकण इकारलोपः। साप्ततिकम्, षाष्टिकम्। क्रीते इकणेव॥

**शतात्केवलादतस्मिन्येकौ** ।६।४।१३१॥ केवलात् शतशब्दादार्हदर्थे य इक इत्येतौ प्रत्ययौ भवतः स चेदर्थो वस्तुतः प्रकृत्यर्थादभिन्नो न भवति। शतेन क्रीतं शत्यं, शतिकम्। केवलादिति किम्? द्विशतेन क्रीतं द्विशतकम्, अत्र क एव पूर्वेण। अतस्मिन्निति किम्? शतं मानमस्य शतकं स्तोत्रम्, अत्रापि क एव॥

**वातोरिकः** ।६।४।१३२॥ अत्वन्तायाः संख्याया आर्हदर्थे इकः प्रत्ययो वा भवति। यावतिकम्। यावत्कम्। पक्षे कः॥ विधानसामर्थ्यात् ऋवर्णोवर्णेतीकारलोपो न॥

**अनाम्न्यद्विः प्लुप्** ।६।४।१४१॥ द्विगोः समासादार्हदर्थे उत्पन्नस्य प्रत्ययस्य पिल्लुप् सकृद् भवति न तु द्विः, न चेत्प्रत्ययान्तं कस्यचिन्नाम भवति। द्वाभ्यां कंसाभ्यां द्विकंस्या वा क्रीतं द्विकंसम्, पित्त्वात्पुंवद्भावः। द्विशूर्पम्।

**मानसंवत्सरस्याशाणकुलिजस्यानाम्नि** ।७।४।१९॥

३—द्व्यधिकं शतं द्विशतं तेन। ४—यावता क्रीतम्। अपदत्वान्न तृतीयः।

संख्याया अधिकशब्दाच्च परस्य शाण कुलिजशब्दवर्जि-तस्य परिमाणवाचिनः संवत्सरशब्दस्य च ञ्णिति तद्धिते परे स्वरेष्वादेः स्वरस्य वृद्धिर्भवत्यसंज्ञायां विषये। अद्विरिति किम्? द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पम्। अञो लुप्। तेन क्रीतं द्विशौर्पिकम्। पित्त्वं पुंवद्भावार्थम्।

**मूल्यैः क्रीते** ।६।४।१०५।। मूल्यवाचिनस्तृतीयान्ताद् क्रीतेऽर्थे यथाविहितमिकणादयः प्रत्ययाः स्युः। प्रस्थेन क्रीतं प्रास्थिकम्, साप्ततिकम्। पाणिकम्।

**पृथिवीसर्वभूमेरीशज्ञातयोश्चाञ्** ।६।४।१५६।। पृथिवीसर्वभूमिशब्दाभ्यां षष्ठ्यन्ताभ्यामीश–ज्ञातयोस्तस्य हेतुः, संयोग, उत्पात इत्येतस्मिन् विषये चाऽञ् प्रत्ययो भवति। पृथिव्या ईशः स्वामी पार्थिवः। सर्वभूमेः सार्वभौमः[1]। एवं पृथिव्या ज्ञातो हेतुः संयोग उत्पातो वा पार्थिवः। एवं सार्वभौमः॥

**लोकसर्वलोकाज्ज्ञाते** ।६।४।१५७।। लोक-सर्वलोक शब्दाभ्यां षष्ठ्यन्ताभ्यां ज्ञातेऽर्थे यथाविहितमिकण् प्रत्ययो भवति। लोकस्य ज्ञातो लौकिकः। सार्वलौकिकः[2]॥

**मानम्** ।६।४।१६९।। प्रथमान्तात् षष्ठ्यर्थे यथा-

१–अनुशतिकादित्वादुभयपदवृद्धिः। सर्वभूमेरीशादिः। २–सर्वलोकस्य ज्ञातः। अनुशतिकादित्वादुभयपदवृद्धिः।

विहितं प्रत्ययो भवति प्रथमान्तं चेन्मानं भवति प्रस्थो मानमस्य प्रास्थिको राशिः। द्रोणो मानमस्य द्रौणिकः ॥

*विंशत्यादयः ।६।४।१७३।। विंशत्यादयः शब्दा* नाम्नि विषये तदस्य मानमित्यर्थे साधवो भवन्ति । द्वौ दशतौ मानमेषां संख्येयानामस्य वा संख्यानस्य विंशतिः। द्वेर्दशदर्थे विंभावः, शतिश्च प्रत्ययः। त्रयो दशतो मानमेषां त्रिंशत् । त्रेर्दशदर्थे त्रिंभावः, शच्च प्रत्ययः। एवं चत्वारिंशदादिकः प्रयोगोऽप्यूह्यः ॥

पञ्चद्दशद्वर्गे वा ।६।४।१७५।। पञ्चद्दशदित्येतौ शब्दौ तदस्य मानमित्येतस्मिन् विषये वर्गे वाच्ये डत्प्रत्ययान्तौ निपात्येते वा । पक्षे कः। पञ्च मानमस्य वर्गस्य पञ्चद्वर्गः, पञ्चको वर्गः । दशद्वर्गः, दशको वा ॥

**तमर्हति** ।६।४।१७७।। द्वितीयान्तादर्हदर्थे यथाविहितमिकणादयः प्रत्यया भवन्ति। श्वेतच्छत्रमर्हति श्वैतच्छत्रिकः। एवं वैषिक–वास्त्रिकादयः।

**दण्डादेर्यः** ।६।४।१७८।। दण्डादिभ्यो द्वितीयान्तेभ्योऽर्हत्यर्थे यः प्रत्ययो भवति। इकणोऽपवादः। दण्डमर्हति दण्ड्यः। वध्यः, इभ्यः ॥

**छेदादेर्नित्यम्** ।६।४।१८२॥ छेदादिभ्यो द्वितीयान्तेभ्यो नित्यमर्हत्यर्थे यथाविहितमिकणादयः प्रत्यया भवन्ति । छेदं नित्यमर्हति छैदिकः, भैदिकः ॥

**विरागाद्विरङ्गश्च** ।६।४।१८३॥ विरागशब्दाद् द्वितीयान्तान्नित्यमर्हत्यर्थे इकण् प्रत्ययस्तत्सन्नियोगे च विरागशब्दस्य विरङ्गादेशो भवति । विरागं नित्यमर्हति वैरङ्गिकः ॥

**शीर्षच्छेदाद्यो वा** ।६।४।१८४॥ शीर्षच्छेदाद् द्वितीयान्तान्नित्यमर्हत्यर्थे यः प्रत्ययो वा भवति । पक्षे इकण् । शीर्षच्छेदं नित्यमर्हति शीर्षच्छेद्यः शैर्षच्छेदिकश्चौरः । इत्यार्हदर्थाः प्रत्ययाः ।

अथ याधिकारः ॥

**वहति रथयुगप्रासङ्गात्** ७।१।२॥ द्वितीयान्तेभ्यो रथयुगप्रासङ्ग इत्येतेभ्यो वहत्यर्थे यः प्रत्ययो भवति । रथं वहति रथ्यः । द्वौ रथौ वहति द्विरथ्यः[1] । युगं वहति युग्यः, प्रासङ्गं वहति प्रासङ्ग्यः ॥

**धुरो येयण** ।७।१।३॥ धुर इत्येतस्माद् द्वितीयान्ताद्-वहत्यर्थे य एयण् इत्येतौ प्रत्ययौ भवतः । धुरं वहति धुर्यः, धौरेयः ॥

---

१-तद्धितार्थे समासः । अवर्णेवर्णेत्यलोपः । द्विगोरनपत्ये इति तु न, अप्राग्जितीयत्वात् ।

**वामाद्यादेरीनः** ।७।१।४।। वामादिपूर्वात् धुरन्ताद् द्वितीयान्ताद्वहत्यर्थे ईनः प्रत्ययो भवति । वामधुरां[2] वहति वामधुरीणः[3] । सर्वधुरीणः । केवलादपि, धुरीणः ।।

**हलसीरादिकण्** ।७।१।६।। हलसीर इत्येताभ्यां द्वितीयान्ताभ्यां वहत्यर्थे इकण् प्रत्ययो भवति । हलं वहति हालिकः, सैरिकः ।।

**शकटादण्** ।७।१।७।। शकटशब्दाद् द्वितीयान्ताद्वहत्यर्थेऽण् प्रत्ययो भवति । शकटं वहति शाकटो गौः ।।

**धनगणाल्लब्धरि** ।७।१।९।। द्वितीयान्ताद् धनशब्दाद् गणशब्दाच्च लब्धर्यर्थे यः प्रत्ययो भवति । धनं लब्धा धन्यः, गणं लब्धा गण्यः ।।

**हृद्यपद्यतुल्यमूल्यवश्यपथ्यवयस्यधेनुष्यागार्हपत्यजन्यधर्म्यम्** ।७।१।११।। हृद्यादयः शब्दा यथास्वमर्थविशेषेषु यप्रत्ययान्ता निपात्यन्ते ।।

**हृदयस्य हृल्लासलेखाण्ये** ।३।२।९४।। हृदयशब्दस्य लासलेखयोरुत्तरपदयोरणि ये च प्रत्यये परे हृदित्ययमादेशो भवति । हृदयस्य प्रियं हृद्यमौषधम् । हृद्यो देशः, हृदयस्य बन्धनं, हृद्यो वशीकरणमन्त्रः । पदमस्मिन्

२—वामा धूः समासान्ते सत्याप् । ३—रषृवर्णादिति णः ।
१—शीले तृन् ।

दृश्यं पद्यः कर्दमः। तुलया संमितं तुल्यं भाण्डम्। तुल्यं सदृशम्। मूलमेषामुत्पाट्यं मूल्या मुद्गाः। मूलेनानाम्यं मूल्यं वस्तुविक्रयात् प्राप्यं द्रव्यम्। मूलेन समो मूल्यः पटः। वशं गतो वश्यो विधेयः। पथोऽनपेतं पथ्यमोदनादि। वयसा तुल्यो वयस्यः सखा। धेनुरेव धेनुष्या। यः षोऽन्तश्च निपात्यते। आ ऋणप्रदानाद्दोहार्थमधमर्णेनोत्तमर्णाय दत्ता। गृहपतिना संयुक्तो गार्हपत्योऽग्निः। निपातनाद् वृद्धिः। जनीं वधूं वहन्ति जन्याः, जामातुर्वयस्याः। जनस्य ? जल्पो जन्यः। धर्मेण प्राप्यं धर्मादनपेतं च धर्म्यम्॥

**नौविषेण तार्यवध्ये** ।७।१।१२॥ नौ-विष इत्येताभ्यां तृतीयान्ताभ्यां यथासंख्यं तार्ये वध्ये चार्थे यः प्रत्ययो भवति। नावा तार्यं नाव्यमुदकम्। विषेण वध्यो विष्यः।

**न्यायार्थादनपेते** ।७।१।१३॥ न्याय-अर्थ इत्याभ्यां पञ्चम्यन्ताभ्यामनपेतेऽर्थे यः प्रत्ययो भवति। न्यायादनपेतं न्याय्यम्। अर्थादनपेतमर्थ्यम्। स्तुत्यं स्तुतिभिरर्थ्याभिः।

**तत्र साधौ** ।७।१।१५॥ सप्तम्यन्तात् साधावर्थे यः प्रत्ययो भवति। सामनि साधुः सामन्यः, वेमन्यः, कर्मण्यः सभ्यः, शरण्यः॥

२–नोऽपदस्येत्यन्त्यस्वरादि लोपः। ३–अपदत्वान्न रुः ४–य्यक्ये इत्यावादेशः। १–अनोऽट्ये इत्यन्त्यस्वरादिलोपनिषेधः।

**पथ्यतिथिवसतिस्वपतेरेयण्** ।७।१।१६॥ एभ्य-स्तत्र साधौ एयण् प्रत्ययो भवति । पथि साधु पाथेयम्[२] । आतिथेयम्, वासतेयम्, स्वापतेयं धनम् ॥

**भक्ताण्णः** ।७।१।१७॥ भक्तशब्दात्तत्र साधावर्थे णः प्रत्ययो भवति । भक्ते साधु भाक्तः शालिः, भाक्तास्तण्डुलाः ॥

**पर्षदो ण्यणौ** ।७।१।१८॥ पर्षच्छब्दात्तत्र साधौ ण्यणेत्येतौ प्रत्ययौ भवतः । पर्षदि साधुः पार्षद्यः, पार्षदः । परिषदोऽपीष्यते । पारिषद्यः, पारिषदः ॥

**सर्वजनाण्ण्येनञौ** ।७।१।१९॥ सर्वजनशब्दात्तत्र साधौ ण्य ईनञ् इत्येतौ प्रत्ययौ भवतः । सार्वजन्यः, सार्वजनीनः ॥

**प्रतिजनादेरीनञ्** ।७।१।२०॥ प्रतिजनादिभ्यस्तत्र साधावीनञ् प्रत्ययो भवति । प्रतिजने साधुः प्रातिजनीनः । वैश्वजनीनः, माहाजनीनः, ऐदंयुगीनः, सांयुगीनः ॥

**कथादेरिकण्** ।७।१।२१॥ कथादिभ्यस्तत्र साधावर्थे इकण् प्रत्ययो भवति । कथायां साधुः काथिकः । वैतण्डिकः । वृत्तौ साधु वार्त्तिकम् । सांग्रामिकम्, सांघातिकम् ॥

**पाद्यार्घ्ये** ।७।१।२३॥ पाद्य, अर्घ्य इत्येतौ तदर्थे य-

२—नोऽपदस्येत्यन्त्यस्वरादिलोपः ।

प्रत्ययान्तौ निपात्येते। पादार्थमुदकं पाद्यम्। निपातनाद्ये पदादेशो न। अर्घो मूल्यं पूजनं वा। तदर्थमर्घ्यं रत्नादि॥

**ण्योऽतिथेः** ।७।१।२४॥ अतिथिशब्दात्तदर्थे ण्यः प्रत्ययो भवति। अतिथ्यर्थमातिथ्यम्॥

**तस्मै हिते** ।७।१।३५॥ चतुर्थ्यन्तान्नाम्नो हितेऽर्थे यथाविहितमीयादयः प्रत्यया भवन्ति। हित उपकारकः। वत्सेभ्यो हितो वत्सीयो गोधुक्। सादेरपि, अवत्सीयः[3]। पित्रीयः[4]॥

**प्राण्यङ्गरथखलतिलयववृषब्रह्ममाषाद्यः** ।७।१।३७॥ प्राण्यङ्गवाचिभ्यो रथादिभ्यश्च चतुर्थ्यन्तेभ्यो हितेऽर्थे यः प्रत्ययो भवति। दन्तेभ्यो हितं दन्त्यम्। रथाय हिता रथ्या भूमिः। खलाय हितं खल्यम्। तिल्यो वायुः। यव्यस्तुषारः। वृष्यं क्षीरपाणम्। ब्रह्मण्यो देशः। माष्यो वातः। सादेरपि, राजदन्त्यम्॥

**भोगोत्तरपदात्मभ्यामीनः** ।७।१।४०॥ भोगोत्तरपदादात्मनशब्दाच्च तस्मै हितेऽर्थे ईनः प्रत्ययो भवति। मातृभोगाय हितो मातृभोगीणः।

**ईनेऽध्वात्मनोः** ।७।४।४८॥ अध्वन् आत्मन् इत्येत-

३–वत्साय न हित इत्यर्थः। ४–ऋतो र इति रः।

१–अनोऽट्ये इत्यन्त्यस्वरादिलोपनिषेधः। २–रषृवर्णादिति णः।

योरीने प्रत्यये परेऽन्त्यस्वरादेर्लुग् न भवति। आत्मने हित आत्मनीनः। सादेरपि। अनात्मनीनः॥

**पञ्चसर्वविश्वाज्जनात्कर्मधारये** ।७।१।४१॥ पञ्च-सर्वविश्व–इत्येतेभ्यः पराज्जनशब्दात्कर्मधारये वर्त्तमाना-त्तस्मै हितेऽर्थे ईनः प्रत्ययो भवति। ईयापवादः। पञ्चजनेभ्यः पञ्चजनाय वा हितः पञ्चजनीनः। सर्व-जनीनः, विश्वजनीनः॥

**महत् सर्वादिकण्** ।७।१।४२॥ महतः सर्वाच्च यो जन-शब्दस्तदन्तात्कर्मधारये वर्त्तमानात्तस्मै हिते इकण् प्रत्ययो भवति। महते जनाय हितो माहाजनिकः। सार्वजनिकः॥

**सर्वाण्णो वा** ।७।१।४३॥ सर्वशब्दात्तस्मै हिते णः प्रत्ययो वा भवति। सर्वस्मै हितः सार्वः। पक्षे ईयः, सर्वीयः। इतीयाधिकारः॥

**तस्यार्हे क्रियायां वत्** ।७।१।५१॥ षष्ठ्यन्ताद-र्हेऽर्थे वत् प्रत्ययो भवति, क्रिया चेदर्हे भवति। राज्ञोऽर्हे [३] राजवदवर्तत भरतः। राजत्वयोग्यमित्यर्थः। कुलीनवत्, साधुवत्। क्रियायामिति किम्? शतस्यार्हो देवदत्तः।

**स्यादेरिवे** ।७।१।५२॥ स्याद्यन्तादिवार्थे वत्प्रत्ययो भवति। इवार्थः सादृश्यं क्रियागतं बोध्यम्। अश्ववद् [४]

---

३–पदत्वान्नाम्नो न इति न लोपः। ४–अश्व इवेत्यर्थः। क्रियायां सादृश्यं न तु चैत्रे।

धावति चैत्रः । देवमिव देववत् पश्यति भूदेवम् । ब्राह्मणेनेव ब्राह्मणवदाचरितमनेन । साधवे इव साधुवद्दत्तमस्मै । गिरेरिव गिरिवत्पतितः प्रासादात् । गौरिव गवय इत्यादौ तु न क्रियागतं सादृश्यम् ।

तत्र ।७।१।५३।। सप्तम्यन्तादिवार्थे वत्प्रत्ययो भवति । मथुरायामिव मथुरावत्पाटलिपुत्रे प्रासादाः । अक्रियार्थ आरम्भः ।।

तस्य ।७।१।५४।। षष्ठ्यन्तादिवार्थे वत्प्रत्ययो भवति । चैत्रस्येव चैत्रवन्मैत्रस्य गावः । अक्रियार्थ आरम्भः । योगविभाग उत्तरार्थः ।

भावे त्वतल् ।७।१।५५।। षष्ठ्यन्ताद् भावे वाच्ये त्वतल् इत्येतौ प्रत्ययौ स्याताम् । भवतोऽस्मादभिधानप्रत्ययाविति व्युत्पत्त्या शब्दस्य प्रवृत्तिनिमित्तं द्रव्यसंसर्गी भेदको गुणो भावः । यदाहुः–यस्य गुणस्य हि भावाद् द्रव्ये शब्दप्रवृत्तिस्तदभिधाने त्वतलाविति ।

तत्र–"जातिगुणाज्जातिगुणे समासकृत्तद्धितात्तु सम्बन्धे । डित्थादेः स्वे रूपे त्वतलादीनां विधिर्भवति ॥१॥ तत्र जातिवाचकाज्जातौ यथा गोः शब्दस्य भावो गोत्वं गोता । अत्र गोशब्दजातिरेव भावः । गोरर्थस्य भावो गोत्वं गोता । अत्र गवार्थजातिर्भावः । एवमश्वत्वमश्वतेत्यादि । तलन्तं लित्वात् स्त्रियाम् ।

रूपस्य भावो रूपत्वं रूपता, शुक्लस्य भावः शुक्लत्वं शुक्लता। अत्र रूपादिगुणजातिर्भावः। कत्वं खत्वमित्यादौ भिन्नव्यक्तिवृत्तिर्जातिर्भावः। कवर्गत्वमित्यादौ कक्कारादिवर्गव्यक्तिवृत्तिर्जातिः संहतिः। गुणवचनेभ्यस्तु शुक्लस्य पटस्य भावः शुक्लत्वमित्यादौ गुण एव भावः। पट्वादयोऽपि गुणा एवेति पटुत्वमित्यादौ गुण एव भावः। राजपुरुषत्वमित्यादौ समासस्थले स्वस्वामिभावः सम्बन्ध एव भावः। पाचकत्वमित्यादौ कृदन्तस्थले क्रियाकारकभावो भावः। औपगवत्वमित्यादौ तद्धितस्थलेऽपि उपगुसम्बन्धो भावः। डित्थादिस्तु यदृच्छाशब्द इति डित्थत्वमित्यादौ शब्दस्वरूपमेव यः शब्दः सोऽर्थ इत्येवं शब्दार्थयोरभेदाध्यवसायेन भावः। एवमेकव्यक्तिस्थले देवदत्तत्वमित्यादौ सूर्यत्वमाकाशत्वमित्यादौ च शब्दस्वरूपमेव भावः॥ त्वान्तं नपुंसकम्।

नञ्तत्पुरुषादबुधादेः ।७।१।५७॥ तस्य भावे नञ्पूर्वात् तत्पुरुषाद् बुधाद्यन्तवर्जितात्त्वतलौ भवतः। ट्यणाद्यपवादः। न शुक्लोऽशुक्लस्तस्य भावोऽशुक्लत्वमशुक्लता। वर्णे ट्यण् न भवति। ट्यणन्तेन समासे त्वशौक्ल्यमित्यपि। एवमपतेर्भावः कर्म वाऽपतित्वमपतिता। ट्यणन्तेन समासे तु अनाधिपत्यम्। तत्पुरुषादिति किम्? न विद्यते पतिरस्यापतिर्ग्रामस्तस्य भावः कर्म वा आपत्यम्। अबुधादेरिति किम्? न बुधोऽबुधस्तस्य भाव आबुध्यम्, न चतुरोऽचतुर-

स्तस्य भावः कर्म वाऽऽचतुर्यम् । राजादित्वाट्ट्यण् ॥

**पृथ्वादेरिमन् वा ।७।१।५८॥** पृथ्व्रादिभ्यस्तस्य भावे इमन् प्रत्ययो वा भवति त्वतलौ च, वा वचनाद्यथाप्राप्तमणादिरपि ॥

**पृथुमृदुभृशकृशदृढपरिवृढस्य ऋतो रः ।७।४।३९॥** पृथ्व्रादीनामृकारस्य इमनि परे णीष्ठेयस्सुषु च परेषु र इत्ययमादेशो भवति । त्र्यन्त्येति अन्त्यस्वरादेर्लुक् । पृथोर्भावः प्रथिमा, पृथुत्वम्, पृथुता । य्वृवर्णादित्यणपि । पार्थवम् । एवं म्रदिमा मृदुत्वं मृदुता मार्दवमित्यादि ॥

**वर्णदृढादिभ्यष्ट्यण् च वा ।७।१।५९॥** वर्णविशेषवाचिभ्यो दृढादिभ्यश्च तस्य भावे ट्यण् इमन् च त्वतलौ च प्रत्यया भवन्ति । शौक्ल्यं[1] शुक्लिमा[2] शुक्लत्वं शुक्लता । दार्ढ्यं द्रढिमा[3] दृढत्वं दृढता, पारिवृढ्यम्, परिव्रढिमा ॥

**पतिराजान्तगुणाङ्गराजादिभ्यः कर्मणि च ।७।१।६०॥** पत्यन्तेभ्यो गुणाङ्गेभ्यो राजादिभ्यश्च तस्य भावे क्रियात्मककर्मणि च ट्यण् प्रत्ययो भवति त्वतलौ च । अधिपतेर्भावः कर्म वा आधिपत्यम्[4] । अधिपतित्वमधिपतिता । एवं बार्हस्पत्यं प्राजापत्यं सैनापत्यं नारपत्यमित्यादि । आधि-

---

१-अवर्णेवर्णस्येत्यलोपः । २-त्र्यन्त्येत्यलोपः । ३-पृथुमृदु इतिरादेशः । त्र्यन्त्येत्यलोपः । ४-अवर्णेवर्णस्येत्यलोप आदिवृद्धिः ।

राज्यम्, अधिराजत्वम्, अधिराजता। यौवराज्यम्। ये गुणद्वारा गुणिनि वर्तन्ते ते गुणाङ्गाः। मौढ्यं, मूढत्वं मूढता। जाड्यम्। मान्द्यम्। राज्ञो भावः कर्म वा राज्यम्[1], राजत्वं राजता। काव्यं कवित्वं कविता। चौर्यम्, वैफल्यम्, पौरोहित्यम्, बाल्यम्, सौहित्यम्, मान्द्यम्। अयं न गुणवचनः॥

**अर्हतस्तोन्त् च ।७।१।६१॥** अर्हत्शब्दात् षष्ठ्यन्ताद् भावे कर्मणि चार्थे ट्यण् प्रत्ययो भवति तत्सन्नियोगे च तकारस्य न्त् इत्यादेशो भवति त्वतलौ च। अर्हतो भावः कर्म वा आर्हन्त्यम्, अर्हत्त्वम्, अर्हत्ता। आर्हन्ती[2]॥

**सहायाद्वा ।७।१।६२॥** सहायशब्दात्तस्य भावे कर्मणि च ट्यण् प्रत्ययो वा भवति त्वतलौ च। वा वचनाद् योपान्त्यत्वादकञपि। साहाय्यम्, सहायत्वम्, सहायता, साहायकम्॥

**सखिवणिग्दूताद्यः ।७।१।६३॥** सखिवणिज्दूत-इत्येतेभ्यस्तस्य भावे कर्मणि च यः प्रत्ययो भवति त्वतलौ च। सख्युर्भावः कर्म वा सख्यं सखित्वं सखिता। वणिजो भावः कर्म वा वणिज्या[3], वणिज्यम्, वणिक्त्वम्[4], वणिक्ता।

१–अनोऽट्ये इति पर्युदासान्नोऽपदस्येत्यन्त्यस्वरादिलुक्। २–स्त्रियां टित्वान् ङीः। व्यञ्जनात्तद्धितस्येति यलोपः। ३–स्त्रियामाप्। ४–च ज इति गः, अघोषे प्रथम इति प्रथमः।

दूत्यं दूतत्वं दूतता। राजादित्वाद् दूयणपि, वाणिज्यम्, दौत्यम् ॥

**स्तेनान्नलुक् च** ।७।१।६४॥ स्तेनशब्दात्तस्य भावे कर्मणि च यः प्रत्ययो भवति तत्सन्नियोगे च न इत्येतस्य लुग् भवति त्वतलौ च। स्तेनस्य भावः कर्म च स्तेयं, स्तेनत्वं स्तेनता। राजादित्वात्स्तैन्यमित्यपि ॥

**कपिज्ञातेरेयण्** ।७।१।६५॥ कपि ज्ञाति इत्येताभ्यां तस्य भावे कर्मणि च एयण् प्रत्ययो भवति त्वतलौ च। कपेर्भावः कर्म च कापेयम्, कपित्वं, कपिता। ज्ञातेयम्, ज्ञातित्वम्, ज्ञातिता ॥

**प्राणिजातिवयोऽर्थादञ्** ।७।१।६६॥ प्राणिजातिवाचिनो वयोऽर्थाच्च तस्य भावे कर्मणि च अञ् प्रत्ययो भवति त्वतलौ च। अश्वस्य भावः कर्म वा आश्वम्, अश्वत्वम्, अश्वता। एवं गार्दभम्, माहिषम्, हास्तम्, द्वैपम् द्वीपिता, द्वीपित्वं। कुमारस्य भावः कर्म वा कौमारम्, कुमारत्वम्, कुमारता। कैशोरम्। शैशवम्, शावो बालस्तस्य भावः कर्म वा शावम्, वार्करम्। कालभम् ॥

**युवादेरण्** ।७।१।६७॥ युवादिभ्यः शब्देभ्यस्तस्य

५—अयिति पर्युदासादपदत्वाच्च ज इति गो न।

१—नोऽपदस्येत्यन्त्यस्वरादिलुक्। २—अस्वयम्भुव इत्यव्।

भावे कर्मणि च अण् प्रत्ययो भवति त्वतलौ च। यूनो भावः कर्म वा यौवनम्[3] ॥

युवत्या भावः कर्म वा यौवनम्। जातिश्चेति पुंवत्। युवतित्वं। समूहे यौवतमिति तु भिक्षादौ युवतीति स्त्रीलिङ्गपाठात्॥

**य्वृवर्णाल्लघ्वादेः** ।७।१।६९॥ लघुरादिर्यस्येवर्णोवर्णस्य तदन्तान्नाम्नस्तस्य भावे कर्मणि चाण् प्रत्ययो भवति त्वतलौ च। पृथोर्भावः कर्म वा पार्थवम्[4]। शौचम्, शुचित्वम्, शुचिता। मौनम्, मुनित्वं मुनिता। संमतेर्भावः कर्म वा सांमतम्। पाटवम्[5], लाघवम्, मार्दवम्, गौरवम्, पैत्रम्[6] ॥

**पुरुषहृदयादसमासे** ।७।१।७०॥ पुरुषहृदय इत्येताभ्यां तस्य भावे कर्मणि चाण् प्रत्ययो भवति त्वतलौ च न चेदनयोः समासो विषयभूतो भवति। पुरुषस्य भावः कर्म वा पौरुषं पुरुषत्वं पुरुषता। हार्दम्[7], हृदयत्वम्, हृदयता। समासे तु सहृदयत्वं परमपुरुषत्वम्।

**योपान्त्याद् गुरूपोत्तमादसुप्रख्यादकञ्** ।७।१।७२॥ उपोत्तमं[8] गुरुर्यस्य तस्माद् यकारोपान्त्यात् सुप्रख्यवर्जितात्तस्य भावे कर्मणि चाऽकञ् प्रत्ययो भवति त्वतलौ च। रामणीय-

---

३—अगीतमन्त्यस्वरादेर्लोपनिषेधः। ४—अस्वयम्भुव इत्यव्। ५—अस्वयम्भुवोऽव्। ६—इवर्णादेरिति रः। ७—हृदयस्येति हृद्। ८—त्र्यादीनामन्त्यमुत्तमम्, तत्समीपमुपोत्तमम्।

कम्, रमणीयत्वं रमणीयता। कामनीयकम्, पानीयकम्, औपाध्यायकम्, आचार्यकमित्यादि॥

**चौरादेः** ।७।१।७३॥ चौरादिभ्यस्तस्य भावे कर्मणि चाऽकञ् प्रत्ययो भवति त्वतलौ च। चौरिका, चौरकम्, चौरत्वम्, चौरता। बाहुलकं, वार्धकम्, आवश्यकम्॥

**प्रियस्थिरस्फिरोरुगुरुबहुलतृप्रदीर्घवृद्धवृन्दारकस्येमनि च प्रास्थास्फावरगरबंहत्रपद्राघवर्षवृन्दम्** ।७।४।३८॥ प्रियादीनां यथासम्भवमिमनि णीष्ठेयसुषु च यथासंख्यं प्रा इत्यादय आदेशा भवन्ति। वरादीनामकार उच्चारणार्थः। प्रियस्य भावः प्रेमा। प्रादाववर्णेवर्णस्येति न, विधानसामर्थ्यात्। स्थिरस्य भावः स्थेमा। उरोर्भावो वरिमा। गुरोर्भावो गरिमा। बहुलस्य बंहिमा। तृप्रस्य त्रपिमा, दीर्घस्य द्राघिमा, वृद्धस्य वर्षिमा। वृन्दारकस्य वृन्दिमा। स्फिरान्नेमन्नप्राप्तेः॥

**भूर्लुक् चेवर्णस्य** ।७।४।४१॥ बहुशब्दस्य ईयसाविमनि च परे भू इत्ययमादेशो भवति ईयसु इमन् इत्यनयोरिवर्णस्य लुक् च भवति। बहोर्भावो भूमा।

---

९-स्त्रियामपि अस्यायत्तदितीत्वम्। १०-अमनोज्ञादेश्चौरादेरकञन्तस्य स्त्रीनपुंसकते।

१-पृथ्वादित्वादिमन्, स्थेमेति। दृढादित्वात् बंहिमेत्यपि। दृढादेराकृतिगणत्वाद् वृन्दिमेत्यपि। प्रियादिः पृथ्वादिः। २-पृथ्वादित्वादिमन्।

भूऊ इत्यूकारप्रश्लेषादस्वयम्भुव इत्यव् न ॥

**स्थूल-दूर-युव-ह्रस्व-क्षिप्र-क्षुद्रस्यान्तस्थादेर्गुणश्च नामिनः** ।७।४।४२॥ स्थूलादीनां यथासंभवमिमनिणीष्ठेयसुषु च परेष्वन्तस्थादेरवयवस्य लुक् नामिनश्च गुणो भवति । ह्रस्वस्य भावो ह्रसिमा, क्षिप्रस्य क्षेपिमा, क्षुद्रस्य क्षोदिमा ॥

**शाकट शाकिनौ क्षेत्रे** ॥७।१।७८॥ धान्यादीनामुत्पत्त्याधारभूमिः क्षेत्रम् । षष्ठ्यन्तात् क्षेत्रेऽर्थे शाकट-शाकिन इत्येतौ प्रत्ययौ भवतः । इक्षूणां क्षेत्रमिक्षुशाकटम्, इक्षुशाकिनम् । एवं मूलकशाकटं शाकशाकटमित्यादि ॥

**धान्येभ्य ईनञ्** ।७।१।७९॥ धान्यवाचिभ्यः षष्ठ्यन्तेभ्यः क्षेत्रेऽर्थे ईनञ् प्रत्ययो भवति । मौद्गीनम्, नैवारीणम् ॥

**व्रीहिशालेरेयण्** ।७।१।८०॥ व्रीहिशालि इत्येताभ्यां तस्य क्षेत्रे एयण् प्रत्ययो भवति । ईनञपवादः । व्रीहेः क्षेत्रं व्रैहेयम्, शालेयम् ॥

**यवयवकषष्टिकाद्यः** ।७।१।८१॥ यव-यवक-षष्टिक इत्येतेभ्यस्तस्य क्षेत्रे यः प्रत्ययो भवति । ईनञोऽपवादः ।

---

३-पृथ्वादिः । ४-नामिनो गुणः । ५-नीवाराणां क्षेत्रम् । णत्वम् ।

यवानां क्षेत्रं यव्यम्, यवक्यम्, षष्टिक्यम् ॥

**सर्वादेः पथ्यङ्गकर्मपत्रपात्रशरावं व्याप्नोति** ।७।१।९४॥ सर्वशब्दपूर्वेभ्यः पथिन् अङ्ग कर्मन् पत्र पात्र शराव इत्येतदन्तेभ्यो द्वितीयान्तेभ्यो व्याप्नोतीत्यर्थे ईनः प्रत्ययो भवति। सर्वपथं व्याप्नोति सर्वपथीनो रथः। सर्वपथान् व्याप्नोति सर्वपथीनमुदकम्। एवं सर्वाङ्गीणस्तापः। सर्वकर्मीणः पुरुषः। सर्वपत्रीणः सारथिः। पत्रं वाहनम्। सर्वपात्रीण ओदनः। सर्वशरावीण ओदनः ॥

**सर्वान्नमत्ति** ।७।१।९८॥ सर्वान्नशब्दाद् द्वितीयान्तादत्तीत्यर्थे ईनः प्रत्ययो भवति। सर्वान्नमत्ति सर्वान्नीनो भिक्षुर्नियमरहितः ॥

**पारावारं व्यस्तव्यत्यस्तं च** ।७।१।१०१॥ पारावारशब्दात्समस्ताद् व्यस्ताद्व्यत्यस्ताच्च द्वितीयान्ताद् गामिन्यर्थे ईनः प्रत्ययो भवति। पारावारं गामी पारावारीणः। पारीणः, अवारीणः, अवारपारीणः ॥

**अध्वानं येनौ** ।७।१।१०३॥ अध्वन् शब्दाद् द्वितीयान्तादलङ्गामिन्यर्थे य ईन इत्येतौ प्रत्ययौ भवतः। अध्वानमलं गामी अध्वन्यः[2]। अध्वनीनः[3] ॥

६–षष्टिरात्रेण पच्यमाना व्रीहयः षष्टिकाः, अत एव निपातनात् सिद्धिः।
१–नोऽपदस्येत्यन्त्यस्वरादिलोपः। २–अनोऽट्ये ये इत्यन्त्यस्वरादिलोपनिषेधः। ३–इनेऽध्वात्मनोरित्यन्त्यस्वरादिलोपनिषेधः।

**अदिक्स्त्रियां वाऽञ्चः ।७।१।१०७॥** अञ्चत्यन्तान्नाम्न ईनः प्रत्ययो भवति स्वार्थे न चेत्स दिशि स्त्रियां वर्तते । प्राचीनम्[४] , प्राक् । प्रतीचीनम् , प्रत्यक् । उदीचीनम् , उदक् । अवाचीनम् , अवाक् । सम्यङ् , समीचीनः[५] । प्राचीना रीतिः । दिशि स्त्रियां तु प्राची दिक् ॥

**तस्य तुल्ये कः संज्ञाप्रतिकृत्योः ।७।१।१०८॥** षष्ठ्यन्तात्तुल्येऽर्थे कः प्रत्ययो भवति, संज्ञायां प्रतिकृतौ च विषये । अश्वस्य तुल्योऽश्वकः । संज्ञेयम् । एवमुष्ट्रक इत्यादि । अश्वस्य तुल्यमश्वकं रूपम् , आश्विका[६] प्रतिमा ॥

**शिलाया एयच्च ।७।१।११३॥** शिलाशब्दात् षष्ठ्यन्तात् तुल्येऽर्थे एयच् प्रत्ययो भवति चकारादेयञ् च । शिलायास्तुल्यं शिलेयं शैलेयं वा दधि ।

**शाखादेर्यः ।७।१।११४॥** शाखादिभ्यष्षष्ठ्यन्तेभ्यस्तुल्येऽर्थे यः प्रत्ययो भवति । शाखायास्तुल्यः शाख्यः, मुख्यः, जघन्यः, अग्र्यः ॥

**द्रोर्भव्ये ।७।१।११५॥** द्रुशब्दात् तस्य तुल्येऽर्थे भव्ये वाच्ये यः प्रत्ययो भवति । द्रुतुल्यो द्रव्य[७]मयं माणवकः, इष्टार्थपात्रमित्यर्थः । अभिप्रेतार्थपात्रं भव्यम् ॥

---

४–अच्च प्राग्दीर्घश्च । ५–सह सम इति समिः, अच्च प्राग्दीर्घश्च ।
६–स्त्रियामापि अस्यायत्तदितीकारः । ७–अस्वयम्भुव इत्यव् ।

**कुशाग्रादीयः** ।७।१।११६।। कुशाग्रशब्दात्तस्य तुल्येऽर्थे ईयः प्रत्ययो भवति । कुशाग्रस्य तुल्यं कुशाग्रीयं शस्त्रम् । तदाकारत्वात् । कुशाग्रीया बुद्धिस्तीक्ष्णत्वात् ।।

**काकतालीयादयः** ।७।१।११७।। काकतालीयादयः शब्दा ईयप्रत्ययान्ताः साधवो भवन्ति तस्य तुल्येऽर्थे । काकतालस्य तुल्यं काकतालीयम् । अर्धजरतीयम्[1] । घुणाक्षरीयमित्यादि ।।

**वेर्विस्तृते शालशङ्कटौ** ।७।१।१२३।। विशब्दात् विस्तृतेऽर्थे शालशङ्कट इत्येतौ प्रत्ययौ भवतः । विशालः विशङ्कटः, विस्तृत इत्यर्थः ।।

**कटः** ।७।१।१२४।। विशब्दाद् विस्तृतेऽर्थे कटः प्रत्ययो भवति । विकटः ।।

**संप्रोन्नेः संकीर्णप्रकाशाधिकसमीपे** ।७।१।१२५।। सम् प्र उद् नि इत्येतेभ्यो यथासंख्यं संकीर्णादिष्वर्थेषु कटः प्रत्ययो भवति । समः संकीर्णे सङ्कटः । प्रात्प्रकाशे प्रकटः, उदोऽधिके उत्कटः, नेः समीपे निकटः ।।

**तत्र घटते कर्मणष्ठः** ।७।१।१३७।। कर्मन्शब्दात् सप्तम्यन्ताद् घटते इत्यर्थे ठः प्रत्ययो भवति । कर्मणि घटते कर्मठः[2] ।।

---

१–अर्धश्चासौ जरन् । तत ईयः । अपदत्वाद् धुटस्तृतीय इति न ।
२–नाम्न इति नलोपः ।

**तदस्य संजातं तारकादिभ्य इतः ।७।१।१३८॥** प्रथमान्तेभ्यस्तारकादिभ्यः षष्ठ्यर्थे इतः प्रत्ययो भवति प्रथमान्तं संजातं चेद् भवति । तारकाः संजाता अस्य तारकितं नभः । पुष्पितः बुभुक्षितः, पिपासितः, रोगितः, सुखितः, दुःखितः पण्डा संजाता अस्य पण्डितः । उत्कण्ठितः, फलित इत्यादि ।

**प्रमाणान्मात्रट् ।७।१।१४०॥** प्रथमान्तात्प्रमाणवाचिनो नाम्नः षष्ठयर्थे मात्रट् प्रत्ययो भवति । जानुनी प्रमाणमस्य[३] जानुमात्रमुदकम् । रज्जुर्मात्री[४] भूमिः, तन्मात्री, तावन्मात्री ॥

**हस्तिपुरुषाद्वाऽण् ।७।१।१४१॥** प्रथमान्तात्प्रमाणवाचिनो हस्तिशब्दात्पुरुषशब्दाच्च षष्ठ्यर्थेऽण् प्रत्ययो भवति ॥

**संयोगादिनः ।७।४।५३॥** संयोगात्परो य इन् तदन्तस्याणि परेऽन्त्यस्वरादेर्लुग् न भवति । हस्ती प्रमाणमस्य हास्तिनमुदकम् , हास्तिनी परिखा । पौरुषमुदकम् , पौरुषी छाया । पक्षे मात्रडादि ॥

**वोर्ध्वे दघ्नट् द्वयसट् ।७।१।१४२॥** ऊर्ध्वं यत्प्रमाणं तद्वाचिनो नाम्नः प्रथमान्तात् षष्ठ्यर्थे दघ्नट् द्वयसट् इत्येतौ

३–आयाममानं प्रमाणम्, तदूर्ध्वमानं तिर्यग्मानं चेति द्विविधम्, ऊर्ध्वमाने जानुमात्रमित्यादि । तिर्यग्माने रज्जुमात्रीत्यादि । टिप्पण्डीः ।

४-रज्जुः प्रमाणमस्याः । टिप्पण्डीः ॥

प्रत्ययौ वा भवतः । पक्षे मात्रट् । जानुदघ्नं जानुद्वयसं जानुमात्रं जलम् । एवं तद्दघ्नं तावद्दघ्नमित्यादि ।

इदं किमोऽतुरिय्किय् चाऽस्य ।७।१।१४८॥ प्रथमान्तादिदं शब्दात् किंशब्दाच्च मानवृत्तेः षष्ठ्यर्थे मेयेऽतुः प्रत्ययो भवति तत्सन्नियोगे चेदं-किंशब्दयोरिय् किय् इत्येतावादेशौ भवतः । चतुर्विधं मानम्-"ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः । आयामस्तु प्रमाणं स्यात्, सङ्ख्या बाह्या तु सर्वतः ॥१॥" तत्र प्रमाणात्-इदं मानमस्य इयान् पटः । किं मानमस्य कियान् पटः । परिमाणाद्-इयद् धान्यं कियद् धान्यम् । उन्मानात्-इयत्सुवर्णम्, कियत्सुवर्णम् । संख्यायाः-इयन्तो गुणिनः, कियन्तो गुणिनः । इयती, कियती ॥

यत्तदेतदो डावादिः ।७।१।१४९॥ यत्तदेतदित्येतेभ्यः प्रथमान्तेभ्यो मानवृत्तिभ्योऽस्येति षष्ठ्यर्थे मेये अतुः प्रत्ययो भवति स च डावादिः । यत्तदेतद्वा प्रमाणमस्य यावान् तावान् एतावान् पटः । एवमुन्मानादिष्वपि । स्वविषये मानविशेषे मात्रडादिरपि । तन्मात्रमित्यादि । मानसामान्येऽतुः ॥

१-इदमित्यस्येयादेशः, अभ्वादेरत्वसः सौ इति दीर्घः, ऋदुदित इति नोऽन्तः, संयोगस्येति तलोपः । २-किमित्यस्य कियादेशः । ३-अधातूदृदित इति ङीः । ४-डित्त्वादन्त्यस्वरादिलोपः ।

**यत्तत्किमः संख्याया डतिर्वा** ।७।१।१५०॥ संख्यारूपं यन्मानं तद्वृत्तिभ्यो यत्तत्किमित्येतेभ्यः प्रथमान्तेभ्योऽस्येति षष्ठ्यर्थे संख्येये मेये डतिः प्रत्ययो वा भवति । पक्षेऽतुर्यथाविहितम् । या संख्यामानमेषां, यति[५] यावन्तः, तति, तावन्तः, कति कियन्तः । एतौ चातुडतिप्रत्ययौ स्वभावाद्बहुवचनविषयावेव । असंख्यायां तु कियानित्यादिरेव ॥

**अवयवात्तयट्** ।७।१।१५१॥ अवयवे वर्तमानात् संख्यावाचिनो नाम्नः प्रथमान्तादस्येति षष्ठ्यर्थे अवयविनि तयट् प्रत्ययो भवति । चत्वारोऽवयवा अस्याश्चतुष्टयी शब्दानां प्रवृत्तिः । पञ्चतयो यमः । सप्ततयी नयप्रवृत्तिः । दशतयो धर्मः, द्वादशतयः सिद्धान्तः ॥

**द्वित्रिभ्यामयट् वा** ।७।१।१५२॥ द्वि–त्रि इत्येताभ्यामवयववृत्तिभ्यां प्रथमान्ताभ्यामस्येति षष्ठ्यर्थे अवयविनि अयट् प्रत्ययो वा भवति । द्वावयवावस्य द्वयं द्वितयं तपः । त्रयं त्रितयं जगत् । त्रयः त्रितयो मोक्षमार्गः । द्वयी द्वितयी । द्वये पदार्था जीवा अजीवाश्च ॥

**अधिकं तत्संख्यमस्मिन् शतसहस्रे शतिशत्-**

५–डित्वादन्त्यस्वरादिलोपः, डतिष्ण इति जस्लुक् ।

१–निस्दुधिति षः तवर्गस्येति टः, टित्वान्ङीः । २–नाम्नो न इति न लोपः । ३–अवर्णेवर्णस्येतीकारलोपः । ४–त्रियां टित्वान्ङीः । ५–नेमार्धेति जस इः ।

**शान्ताया डः** ।७।१।१५४॥ प्रथमान्तात् शतिशदशन् इत्येवमन्तात्संख्याशब्दादस्मिन्निति सप्तम्यर्थे शते सहस्रे च डः प्रत्ययो भवति प्रथमान्तं चेदधिकं तत्सङ्ख्यं च भवति । सा शतसहस्रलक्षणा संख्या यस्य योजनादेस्तत्तत्संख्यं शतं सहस्रमिति यत्संख्यायते तदेव यद्यधिकमपि भवतीत्यर्थः । योजनानां विंशतिर्योजनानि वा विंशतिरधिकाऽस्मिन् योजनशते शते वा योजनेषु विंशं[६] योजनशतं विंशं शतं योजनानि । एवं विंशं योजनसहस्रं विंशं सहस्रं योजनानि वा । एकविंशं द्वाविंशं शतम् । त्रिंशं[७] शतं त्रिंशं सहस्रम् । एकादशं शतम् , एकादशं सहस्रम् ॥

**संख्यापूरणे डट्** ।७।१।१५५॥ संख्या पूर्यते येन तत् संख्यापूरणम् । संख्याशब्दात् षष्ठ्यन्तात् संख्यापूरणेऽभिधेये डट् प्रत्ययो भवति । एकादशानां पूरण एकादशो[८] रुद्रः । द्वादशमङ्गम् ॥

**विंशत्यादेर्वा तमट्** ।७।१।१५६॥ विंशत्यादेः संख्यायाः संख्यापूरणे तमट् प्रत्ययो वा भवति । पक्षे डट् । विंशतेः पूरणो विंशतितमः विंशो वा सर्गः । विंशतितमी-विंशी[९] स्त्री ॥

६–विंशतेस्तेर्डितीति तिशब्दलोपः । ७–डित्यन्त्यस्वरादिलोपः । स्त्रियां टित्वान्ङीः । ८–डित्यन्त्यस्वरादिलोपः । ९–डित्यन्त्यस्वरादिलोपः । स्त्रियां टित्वान्ङीः ।

**शतादिमासार्धमाससंवत्सरात्** ।७।१।१५७॥ शतादिभ्यः संख्याशब्देभ्यो मासार्धमाससंवत्सर इत्येभ्यश्च संख्यापूरणे तमट् प्रत्ययो भवति । शतस्य पूरणः शततमोऽध्यायः । सहस्रतमो द्विजः । मासस्य पूरणो मासतमो दिवसः । अर्धमासतमः, संवत्सरतमः । संख्यादेरपि । द्विशततमः । दशसहस्रतमः ॥

**षष्ट्यादेरसंख्यादेः** ।७।१।१५८॥ संख्यादिवर्जितेभ्यः षष्टिप्रभृतिभ्यः संख्याशब्देभ्यः संख्यापूरणे तमट् प्रत्ययो भवति । विकल्पापवादः । षष्टेः पूरणः षष्टितमः । सप्ततितमः । असंख्यादेरिति किम् ? एकषष्टितम एकषष्टः । विंशत्यादेरिति पूर्वेण विकल्प एव ।

**नो मट्** ।७।१।१५९॥ असंख्यादेः संख्याशब्दान्नकारान्तात् संख्यापूरणे मट् प्रत्ययो भवति । डटोऽपवादः । पञ्चानां पूरणः पञ्चमः । पञ्चमी । सप्तमः, अष्टमः, नवमः, दशमः । असंख्यादेरेव, एकादशः । षोडशः[२] । अत्र डडेव ॥

**पित्तिथट् बहुगणपूगसंघात्** ।७।१।१६०॥ बहुगणपूगसंघ इत्येतेभ्यः संख्यापूरणे तिथट् प्रत्ययो भवति, स च पित् ॥

---

१—नाम्नो न इति नलोपः, स्त्रियां टित्वान्ङीः । २—षोडशषोडन्नत्यादिनिपातनम् । डित्वादन्त्यस्वरादिलोपः ।

बहूनां पूरणो बहुतिथः, बह्वीनां पूरणी बहुतिथी[३] । एवं गणतिथः, पूगतिथः, संघतिथः । संख्यासम्भव एव विशेषणम्, अन्यत्र पूरणमात्रे प्रत्ययो बोध्यः ॥

**अतोरिथट्** ।७।१।१६१॥ अत्वन्तात् संख्याशब्दात् संख्यापूरणे इथट् प्रत्ययो भवति स च पित् । इयतां पूरणः इयतिथः[४] । यावतीनां पूरणी यावतिथी[५] । एवं तावतिथः, एतावतिथः ॥

**षट्कतिकतिपयात् थट्** ।७।१।१६२॥ एभ्यः संख्यापूरणे थट् प्रत्ययो भवति स च पित् । षण्णां पूरणः षष्ठः, षष्ठी[६] तिथिः । कतीनां पूरणः कतिथः । कतिपयानां स्त्रीणां पूरणी कतिपयथी[७] ॥

**चतुरः** ।७।१।१६३॥ चतुर् इत्येतस्मात् संख्यापूरणे थट् प्रत्ययो भवति स च पित् । चतुर्णां[१] पूरणश्चतुर्थः, चतसृणां पूरणी चतुर्थी तिथिः ॥

**येयौ च लुक् च** ।७।१।१६४॥ चतुर् इत्येतस्मात् संख्यापूरणे य ईय इत्येतौ प्रत्ययौ भवतः, तौ च पित्, च इत्येतस्य लुक् च भवति । चतुर्णां पूरणः चतुर्थः, तुरीयः, तुर्यः ।

---

३–पित्त्वात् पुंवद्भावः, स्त्रियां टित्त्वाङीः । ४–अपदत्वान्न तृतीयः ।
५–पित्त्वात् पुंवद्भावः । ६–षष्ठी वेत्यादिनिर्देशान्नामसिदिति न पदत्वम् तेन तृतीयो न । ७–पित्त्वात् पुंवद्भावः ।

१–चतुर्थीति निर्देशान्न पदत्वम्, तेन चटते इति न ।

**द्वेस्तीयः** ।७।१।१६५॥ द्विशब्दात्संख्यापूरणे तीयः प्रत्ययो भवति । द्वयोः पूरणो द्वितीयः, द्वितीया[1] ॥

**त्रेस्तृ च** ।७।१।१६६॥ त्रि इत्येतस्मात् संख्यापूरणे तीयः प्रत्ययो भवति स च पित्, तत्सन्नियोगे च त्रेस्तृ इत्ययमादेशो भवति । त्रयाणां पूरणस्तृतीयः, तिसृणां पूरणी तृतीया[2][3] तिथिः ॥

**पूर्वमनेन सादेश्चेन्** ।७।१।१६७॥ पूर्वमिति क्रियाविशेषणाद् द्वितीयान्तात् केवलात्सपूर्वाच्चानेनेति तृतीयार्थे कर्तरि इन् प्रत्ययो भवति । पूर्वमनेन कृतं पीतं भुक्तमित्यादि पूर्वी । विशेषावगमस्त्वर्थात्प्रकरणाच्छब्दान्तरसन्निधेर्वा । यथापूर्वी कटमिति, कृतमित्यवगम्यते, ओदनमिति भुक्तमिति पय इति पीतमित्यादि चावगम्यते । कृतं पूर्वमनेन कृतपूर्वी कटम्, भुक्तपूर्वी ओदनम्, पीतपूर्वी पयः । भूतपूर्वादिवत् कृतपूर्वादिसमासात् प्रत्ययः । क्तान्तं येनैव समानाधिकरणं तस्यैव कर्मतां वक्ति । न च वृत्तौ क्तान्तं कटादिना समानाधिकरणमिति कटादिगतं कर्मानुक्तमेवेति ततो द्वितीयैव ॥

**इष्टादेः** ।७।१।१६८॥ इष्टादिभ्यः प्रथमान्तेभ्योऽनेनेति तृतीयार्थे कर्तरि इन् प्रत्ययो भवति । इष्टमनेन इष्टी[4] यज्ञे, अधीती व्याकरणे ।

---

२–त्रियामा[१] । ३–पित्त्वात्पुंवद्भावः । ४–व्याप्ये क्तेन इति सप्तमी ।

**छन्दोऽधीते श्रोत्रश्च वा** ।७।१।१७३॥ छन्दस् शब्दाद् द्वितीयान्तादधीत इत्यस्मिन्नर्थे इयः प्रत्ययो वा भवति तत्सन्नियोगे च छन्दस् शब्दस्य श्रोत्रादेशः । पक्षेऽण् । छन्दोऽधीते श्रोत्रियः, छान्दसः ॥

**इन्द्रियम्** ।७।१।१७४॥ इन्द्रशब्दादियप्रत्ययो निपात्यते । इन्द्रस्यात्मनो लिङ्गमिन्द्रियम्, चक्षुरादिकम् । यथायोग्यमर्थान्तरमपि व्युत्पाद्यते ॥

**तेन वित्ते चञ्चु-चणौ** ।७।१।१७५॥ तृतीयान्ताद्वित्तेऽर्थे चञ्चुचण इत्येतौ प्रत्ययौ भवतः । वित्तो ज्ञातः प्रकाशो वा । विद्यया वित्तो विद्याचञ्चुः, विद्याचणः, केशचञ्चुः केशचणः । श्रौत्राहंन्तीचणैः ॥

## अथ मत्वर्थीयप्रक्रिया ॥

**तदस्यास्त्यस्मिन्निति मतुः** ।७।२।१॥ प्रथमान्तादस्येति षष्ठ्यर्थेऽस्मिन्निति सप्तम्यर्थे वा मतुः प्रत्ययो भवति प्रथमान्तं चेदस्तिसमानाधिकरणं भवति । गावोऽस्य सन्ति गोमान्, यवाः सन्त्यस्य यवमान् । ऊर्म्यादित्वाद्वत्वं न । अस्ति अस्यास्तीत्यस्तिमान्, स्वस्त्यस्यास्तीति स्वस्तिमान् । अस्ति स्वस्तिशब्दावव्ययौ धनारोग्यवचनौ । वृक्षाः सन्त्यस्मिन् वृक्षवान् गिरिः ॥

---

५—अकारलोपः । ६—अपदत्वाद्रुर्न ।

१—अभ्वादेरिति दीर्घः, ऋदुदित इति नोन्तः । २—मावर्णेति वत्वम् ।

**नोर्म्यादिभ्यः** ।२।१।९९॥ ऊर्म्यादिभ्यो नामभ्यः परस्य मतोर्मकारस्य वकारादेशो न भवति । ऊर्मिमान्, भूमिमान् ॥

**नावादेरिकः** ।७।२।३॥ नौ इत्येवमादिभ्यो मत्वर्थे इकः प्रत्ययो भवति मतुश्च । नौरस्यास्मिन्वाऽस्तीति नाविकः, नौमान्, कुमारिकः, कुमारीमान् ॥

**शिखादिभ्य इन्** ।७।२।४॥ शिखादिभ्यो मत्वर्थे इन् प्रत्ययो भवति मतुश्च । शिखी, शिखावान् । माली, मालावान् । बली, बलवान् । व्रती, व्रतवान् । उद्यमी, उद्यमवान् ॥ आकृतिगणोऽयम् ।

**व्रीह्यादिभ्यस्तौ** ।७।२।५॥ व्रीह्यादिभ्यो मत्वर्थे इक इन् इत्येतौ प्रत्ययौ भवतो मतुश्च । व्रीहिमान्, व्रीहिकः । व्रीही । मायिकः, मायी, मायावान् ॥ आकृतिगणोऽयम् ।

**अतोऽनेकस्वरात्** ।७।२।६॥ अकारान्तादनेकस्वरान्मत्वर्थे इक इन् इत्येतौ प्रत्ययौ भवतो मतुश्च । दण्डिकः, दण्डी, दण्डवान् । कृदन्तादनेकस्वरात्तु नेकेनौ । कृत्यवान्, कारकवान् । क्वचित्स्यादपि । कार्यिकः, कार्यी । गृहिकः,

---

३–अपदत्वात्तृतीयो न । ऊर्म्यादित्वाद्वत्वं न । ४–अपदत्वाद्रुर्न । ५–ओदौतोऽवाव् । ६–अवर्णेवर्णस्येतीकारलोपः ।

१–अकारलोपः । २–३–४–५–अवर्णान्तत्वान्मो वः, एवमन्यत्रापि बोध्यम् । ६–इकार लोपः । ७–अवर्णान्त्यत्वान्मो वः । एवमन्यत्रापि ।

गृही, भोगिकः, भोगी, विजयी, संयमी, स्थानिकः, स्थानी इत्यादि । जातिशब्देभ्यो नेकेनौ । व्याघ्रवान् । द्रव्यादिभ्योऽपि नेकेनौ । द्रव्यवान्, पुण्यवान् इत्यादि । धनादुत्तमर्णे । धनिकः धनी ॥

शृङ्गात् ।७।२।१२॥ शृङ्गशब्दान्मत्वर्थे आरकः प्रत्ययो भवति मतुश्च । शृङ्गमस्याऽस्तीति शृङ्गारकः, शृङ्गवान् । शिखादित्वात् शृङ्गी ॥

फलबर्हाच्चेनः ।७।२।१३॥ फलबर्ह इत्याभ्यां शृङ्गाच्च मत्वर्थे इनः प्रत्ययो भवति मतुश्च । फलिनः, फलवान्, बर्हिणः, बर्हवान्, शृङ्गिणः, शिखादित्वात् फली, बर्ही ॥

मलादीमसश्च ।७।२।१४॥ मलशब्दान्मत्वर्थे ईमस इनश्च प्रत्ययौ भवतो मतुश्च । मलीमसः, मलिनः, मलवान् ॥

बलवातदन्तललाटादूलः ।७।२।१९॥ एभ्यो मत्वर्थे ऊलः प्रत्ययो भवति मतुश्च । बलूलः, बलवान्, वातूलः, दन्तूलः, ललाटूलः ॥

ऊर्णाहंशुभमो युस् ।७।२।१७॥ ऊर्णा अहम् शुभम् इत्येतेभ्यो मत्वर्थे युस् प्रत्ययो भवति मतुश्च । ऊर्णायुः उरभ्रः । अहंयुरहंकारी, शुभंयुः कल्याणबुद्धिः । अहंशुभमिति विभक्तिप्रतिरूपकमव्ययम् ॥

१–सिति पदत्वादवर्णेवर्णस्येत्यालोपो न । २–तौ मुम इति स्वानुस्वारानुनासिकौ ।

**प्राण्यङ्गादातो लः** ।७।२।२०।। प्राण्यङ्गवाचिन आकारान्तान्मत्वर्थे लः प्रत्ययो भवति मतुश्च । चूडालः, चूडावान् । शिखालः, शिखावान् । जङ्घालः, जङ्घावान् ।।

**सिध्मादिक्षुद्रजन्तुरुग्भ्यः** ।७।२।२१।। सिध्मादेर्गणात् क्षुद्रजन्तुवाचिभ्यो रुग्वाचिभ्यश्च मत्वर्थे लः प्रत्ययो भवति मतुश्च । सिध्मान्यस्य सन्ति सिध्मलः, सिध्मवान्[३] । वध्मलः[४], अङ्गादित्वाद्वध्मनः, वध्मवान् । गडुलः, गडुमान् । यूकालः[५], यूकावान, मक्षिकालः, मक्षिकावान् । मूर्च्छालः, मूर्च्छावान् । पांशुलः, मांसलः, पत्रलः, स्नेहलः, शीतलः, श्यामलः, पिङ्गलः, पक्ष्मलः[६], पृथुलः, मृदुलः, मञ्जुलः, चटुलः, कण्डूल इत्यादि ।।

**प्रज्ञापर्णोदकफेनाल्लेलौ** ।७।२।२२।। एभ्यो मत्वर्थे ल इल इत्येतौ प्रत्ययौ भवतो मतुश्च । प्रज्ञालः, प्रज्ञिलः, प्रज्ञावान् । पर्णलः, पर्णिलः, उदकलः, उदकिलः । फेनलः, फेनिलः, फेनवान् ।।

**वाच आलाटौ** ।७।२।२४।। वाच् इत्येतस्मान्मत्वर्थे आल आट इत्येतौ प्रत्ययौ भवतः क्षेपे गम्यमाने । वाचालः[१], वाचाटः । मतुना क्षेपागतेर्न सः ।।

३—नाम्नो न इति नलोपः । ४—नलोपः । ५—"क्षुद्रजन्तुरनस्थिः स्यादथवा क्षुद्र एव यः । शतं वा प्रसृतौ येषां केचिदानकुलादपि ।।१।।"
६—नाम्नो न इति नलोपः । १—अपदत्वात्तृतीयादिकं न ।

**ग्मिन्** ।७।२।२५।। वाचो मत्वर्थे ग्मिन् प्रत्ययो भवति मतुश्च । वाग्ग्मी, वाग्वान् ।।

**मध्वादिभ्यो रः** ।७।२।२६।। मध्वादिभ्यो मत्वर्थे रः प्रत्ययो भवति । मधुरम् । मधुमान् । एवं खं महत्कण्ठ-विवरमस्यास्तीति खरो गर्दभः । मुखरो वाचालः ।।

**लोमपिच्छादेः शेलम्** ।७।२।२८।। लोमादिभ्यः पिच्छादिभ्यश्च मत्वर्थे यथासंख्यं श इल इत्येतौ प्रत्ययौ भवतो मतुश्च । लोमशः, लोमवान् । रोमशः । पिच्छिलः, पङ्किलः ।

**नोऽङ्गादेः** ।७।२।२९।। अङ्गादिभ्यो मत्वर्थे नः प्रत्ययो भवति मतुश्च । अङ्गान्यस्याः सन्तीत्यङ्गना कल्याणाङ्गी । अन्यत्राङ्गवती । पामानोऽस्य सन्तीति पामनः । एवं हेमनो वलिन इत्यादि ।।

**लक्ष्म्या अनः** ।७।२।३२।। लक्ष्मीशब्दान्मत्वर्थेऽनः प्रत्ययो भवति मतुश्च । लक्ष्मीरस्याऽस्ति लक्ष्मणः । लक्ष्मीवान् ।।

**प्रज्ञाश्रद्धार्चावृत्तेर्णः** ।७।२।३३।। प्रज्ञा-श्रद्धा-ऽर्चा-वृत्ति इत्येतेभ्यो मत्वर्थे णः प्रत्ययो भवति मतुश्च ।

---

२–धुटस्तृतीयत्वे च ज इति गः । ३–४–५–नाम्नो न इति नलोपः । ६–अवर्णेवर्णस्येतीकारलोपः, णत्वम् । ७–मावर्णान्तोपान्तेति मो वः ।

प्राज्ञः, प्रज्ञावान्, श्राद्धः श्रद्धावान्, आर्चः, अर्चावान्, वार्त्तः, वृत्तिमान्। प्राज्ञी, श्राद्धा इत्यादि।

**ज्योत्स्नादिभ्योऽण्** ।७।२।३४॥ ज्योत्स्नादिभ्यो मत्वर्थे अण् प्रत्ययो भवति मतुश्च। ज्यौत्स्नी रात्रिः, ज्योत्स्नावती। तामिस्री रात्रिः। तापसः, साहस्रः॥

**दन्तादुन्नतात्** ।७।२।४०॥ उन्नतत्वोपाधिकाद्दन्त-शब्दान्मत्वर्थे डुरः प्रत्ययो भवति मतुश्च। उन्नता दन्ता अस्य सन्ति दन्तुरः[10]। अन्यत्र दन्तवान्।

**कृपाहृदयादालुः** ।७।२।४२॥ आभ्यां मत्वर्थे आलुः प्रत्ययो वा भवति मतुश्च। कृपालुः, हृदयालुः, हृदयिकः[11], हृदयी, हृदयवान्॥

**मेधारथान्नवेरः** ।७।२।४१॥ आभ्यां मत्वर्थे इरः प्रत्ययो वा भवति। मेधिरः, मेधावान्। रथिरः, रथिकः, रथी, रथवान्॥

**अभ्रादिभ्यः** ।७।२।४६॥ अभ्रादिभ्यो मत्वर्थे अः प्रत्ययो भवति मतुश्च। अभ्राण्यस्मिन् सन्ति अभ्रं नभः। अर्शांस्यस्य सन्ति अर्शसः साधुः। उरशः उरस्वान्॥ आकृतिगणोऽयम्।

---

८—स्त्रियामणन्तत्वाभावादाबेव। ९—स्त्रियामणन्तत्वान्ङीः।
१०—डित्त्वादन्त्यस्वरादिलोपः। ११—अनेकस्वरादिकेनौ।
१—अतोऽनेकस्वरादितीकेनौ। २—नस्तमित्विपदत्वनिषेधाद्रुनं।

**अस्तपोमायामेधास्रजो विन्** ।७।२।४७॥ असन्तेभ्यः तपस् माया मेधा स्रज् इत्येतेभ्यश्च मत्वर्थे विन् प्रत्ययो भवति मतुश्च । यशस्वी, यशस्वान् । एवं तेजस्वी, वर्चस्वी । तपस्वी । अत्र ज्योत्स्नाद्यण्बाधः । मायावी, मायी[3], मायिकः । मेधावी, स्रग्वी[4], स्रग्वान् ॥

**आमयाद्दीर्घश्च** ।७।२।४८॥ आमयशब्दान्मत्वर्थे विन् प्रत्ययो दीर्घश्चामयशब्दस्य भवति मतुश्च । आमयावी, आमयवान् ॥

**स्वान्मिन्नीशे** ।७।२।४९॥ स्वशब्दान्मत्वर्थे ईशे-वाच्ये मिन् प्रत्ययो भवति दीर्घश्च स्वशब्दस्य । स्वम-स्यास्तीति स्वामी । अन्यत्र स्ववान् ॥

**गोः** ।७।२।५०॥ गोशब्दान्मत्वर्थे मिन् प्रत्ययो भवति । गावोऽस्य सन्ति गोमी, गोमान् ॥

**ऊर्जो विन्वलावश्चान्तः** ।७।२।५१॥ ऊर्जशब्दा-न्मत्वर्थे विन्वलौ प्रत्ययौ भवतस्तत्सन्नियोगे चाऽस्य अस् इत्यन्तो भवति । ऊर्जस्वी । ऊर्जस्वलः । मतुश्च ऊर्ग्वान् ।

**गुणादिभ्यो यः** ।७।२।५३॥ गुणादिभ्यो मत्वर्थे यः

३—व्रीह्यादिपाठादिनेठौ । ४—स्रक्त्वे ऋत्विग् इतिवत् गः ।
५—स ऽस्तः ऽस्तामिति गः ।

प्रत्ययो भवति मतुश्च। गुण्यः, शिखादित्वादिनपि, गुणी, गुणवान्। हिम्यः हिमवान्॥

सर्वादेरिन् ।७।२।५९॥ सर्वादेरकारान्तात् कर्मधारयान्मत्वर्थे इन् प्रत्ययो भवति। सर्वं धनं सर्वधनमस्यास्ति सर्वधनी, सर्वबीजी। सर्वकेशी नटः॥

सुखादेः ७।२।६३॥ सुखादेर्मत्वर्थे इन्नेव प्रत्ययो भवति। सुखी, दुःखी, प्रणयी॥ इति मत्वर्थप्रक्रिया

अथ प्रकाराद्यर्थाः॥

प्रकारे जातीयर् ।७।२।७५॥ प्रथमान्तादस्येति षष्ठ्यर्थे जातीयर् प्रत्ययो भवति, प्रथमान्तं चेत्प्रकारो भवति। प्रकारो विशेषः। पटुः प्रकारोऽस्य पटुजातीयः। यज्जातीयः, तज्जातीयः, नानाजातीयः, एवंजातीयः, यथाजातीयः। कथंजातीयः॥

रिति ।३।२।५८॥ परतः स्त्र्यनूङ् रितिप्रत्यये परे पुंवद् भवति। पट्वी[1] प्रकारोऽस्याः पटुजातीया। मृदुजातीया॥

भूतपूर्वे प्चरट् ।७।२।७८॥ भूतपूर्वेऽर्थे वर्त्तमानान्नाम्नः प्चरट् प्रत्ययो भवति स्वार्थे। भूतपूर्व आढ्य आढ्यचरः, भूतपूर्वाढ्याऽऽढ्यचरी। दर्शनीयचरः॥

---

१–स्त्रियां टित्वान्ङीः। पित्वात्क्यङ्मानीति पुंवत्त्वम्।

**व्याश्रये तसुः** ।७।२।८१॥ षष्ठ्यन्ताद् व्याश्रये गम्यमाने तसुः प्रत्ययो भवति । नानापक्षाश्रयो व्याश्रयः । देवा अर्जुनतोऽभवन् । अर्जुनस्य पक्षेऽभवन्नित्यर्थः । एवं यतः मत्तः ततः इत्यादि । यतोऽभवत् । यस्य पक्षे इत्यर्थः ॥

**आद्यादिभ्यः** ।७।२।८४॥ आद्यादिभ्यः सम्भवद्विभक्त्यन्तेभ्यस्तसुः प्रत्ययो भवति । आदौ आदेर्वा आदितः, मध्यतः, अन्ततः । दुष्टः शब्दः स्वरतो वर्णतो वा । स्वरेण वर्णेन चेत्यर्थः ॥

**पर्यभेः सर्वोभये** ।७।२।८३॥ परि अभि इत्येताभ्यां यथाक्रमं सर्वोभयार्थे वर्त्तमानाभ्यां तसुः प्रत्ययो भवति । परितः, सर्वत इत्यर्थः । अभितः, उभयत इत्यर्थः ॥

**अहीयरुहोऽपादाने** ।७।२।८८॥ अपादाने या पञ्चमी विहिता तदन्तात्तसुः प्रत्ययो वा भवति । तच्चेदपादानं हीयरुहोः सम्बन्धि न भवति । ग्रामाद् ग्रामतो वाऽऽगच्छति । चौराद् चौरतो वा बिभेति । अहीयरुह इति किम्? सार्थाद् हीयते, सार्थाद् हीनः, पर्वतादवरोहति अत्र तसुर्न भवति ॥

**किमद्व्यादिसर्वाद्यवैपुल्यबहोः पित्तस्** ।७।२।८९॥

२—कर्तुरपायेऽवधित्वविवक्षा, सार्थेन हीयत इत्यर्थः । सार्थात्स्वयमेव हीयते इति कर्मकर्त्तरि वा प्रयोगः ।

किंशब्दाद् द्व्यादिवर्जितेभ्यः सर्वादिभ्योऽवैपुल्यवाचिनो बहुशब्दाच्च पञ्चम्यन्तात् तस् प्रत्ययो भवति स च ञित् ।

**इतोऽतः कुतः ।७।२।९०॥** इतस् अतस् कुतस् इत्येते शब्दा निपात्यन्ते । तस् तसुर्वा लक्षणान्तरेण सिद्ध एवेति इदम इः, एतदः अः, किमः कुरित्यादेशमात्रमनेन विधीयते । कस्मात् कुतः, एतस्मादतः, अस्मादितः । एवं सर्वतः, यतः[१], ततः, बहुतः । द्व्यादिवर्जनात् त्वत् मदित्यादौ न । त्वत्तो मत्त इत्यादि त्वाद्यादित्वात् ॥

**क्वकुत्राऽत्रेह ।७।२।९३॥** क्व कुत्र अत्र इह इत्येते शब्दास्त्रबन्ता निपात्यन्ते । क्वेति । किमः क्वादेशस्त्र-पश्चाऽकारः कस्मिन् क्व । कुत्रेति किमः कुरादेशः । अत्रेत्येतदोऽकारादेशः । इहेतीदमस्त्रपश्च हादेशः । त्रप् सिद्ध एव सप्तम्यन्तात् ॥

**सप्तम्याः ।७।२।९४॥** सप्तम्यन्तात् किमद्व्यादि-सर्वाद्यवैपुल्यबहोस्त्रप् भवति । सर्वत्र, तत्र, बह्वीषु बहुत्र[२] ॥

**किंयत्तत्सर्वैकान्यात् काले दा ।७।२।९५॥** एभ्यः सप्तम्यन्तेभ्यः काले वाच्ये दा प्रत्ययो भवति । कस्मिन् काले कदा[३] । यदा[४] तदा, सर्वदा, एकदा, अन्यदा । देशे

३—आद्वेरः । १—४—आद्वेर इत्यः । ३—किमः क इति कादेशः ।
२—क्यङ्मानिपित्तद्धिते पुंवद्भावः ।

२८

तु क्वेत्याद्येव ॥

**सदाऽधुनेदानीं तदानीमेतर्हि** ।७।२।९६॥ एते शब्दाः काले वाच्ये निपात्यन्ते । सर्वस्मिन् काले सदा । सर्वशब्दस्य सादेशः । पूर्वेण सर्वदेत्यपि । अधुना । इदमोऽकारादेशो धुनाप्रत्ययश्च । इदानीम् । इदम इकारादेशो दानीं प्रत्ययश्च । तदानीम् । तदो दानीं प्रत्ययः । एतर्हि । इदम एतादेशो र्हि प्रत्ययश्च ॥

**सद्योऽद्यपरेद्यव्यह्नि** ।७।२।९७॥ सद्यस् अद्य परेद्यवि इत्येतेऽह्नि काले निपात्यन्ते । समानेऽह्नि काले सद्यः । समानस्य सभावो द्यस् प्रत्ययश्च । अद्य । इदमोऽकारादेशो द्य-प्रत्ययश्च । परस्मिन्नहनि परेद्यवि । परशब्दादेद्यविप्रत्ययः ॥

**पूर्वापराधरोत्तरान्यान्यतरेतरादेद्युस्** ।७।२।९८॥ एभ्यः[५]सप्तम्यन्तेभ्योऽह्नि काले वर्त्तमानेभ्य एद्युस् प्रत्ययो भवति । पूर्वस्मिन्नह्नि काले पूर्वेद्युः, अपरेद्युः, अधरेद्युः, उत्तरेद्युः, अन्येद्युः, अन्यतरेद्युः । इतरेद्युः ॥

**उभयाद् द्युश्च** ।७।२।९९॥ उभयशब्दादह्नि काले द्युस् चकारादेद्युस् च प्रत्ययो भवति । उभयद्युः, उभयेद्युः ॥

**ऐषमः परुत् परारि वर्षे** ।७।२।१००॥ ऐषमस् परुत् परारि इत्येते संवत्सरे काले निपात्यन्ते । अस्मिन् वर्षे

५–आद्रेर इत्यः

ऐषमः। परस्मिन् पूर्वस्मिन् वा वर्षे परुत्, उत्प्रत्ययः प्रकृतेः परादेशश्च। परारि। पूर्वतरशब्दात्परतरशब्दाद्वा आरि-प्रत्ययः प्रकृतेः परादेशश्च। पूर्वतरे परतरे वा वर्षे इत्यर्थः।

**अनद्यतने र्हिः ।७।२।१०१॥** सप्तम्यन्तादनद्यतने काले वर्त्तमानाद् यथासम्भवं किमद्व्यादिसर्वाद्यवैपुल्यबहोः र्हिः प्रत्ययो भवति। कस्मिन्नद्यतने काले कर्हि[1]। यर्हि, तर्हि, अन्यर्हि, एतर्हि, बहुर्हि।

**प्रकारे था ।७।२।१०२॥** प्रकारे वर्त्तमानात् किमद्व्यादिसर्वाद्यवैपुल्यबहोः थाप्रत्ययो भवति। सर्वेण प्रकारेण सर्वथा। प्रकारो भेदो विशेषः। यथा[2], तथा, उभयथा, अन्यथा, अपरथा, इतरथा॥

**कथमित्थम् ।७।२।१०३॥** एतौ प्रकारे निपात्येते। केन प्रकारेण कथम्। अनेनैतेन वा प्रकारेणेत्थम्। थम् प्रत्ययः प्रकृतेरिदादेशः॥

**सङ्ख्याया धा ।७।२।१०४॥** संख्यावाचिनो नाम्नः प्रकारे वर्त्तमानाद् धाप्रत्ययो भवति। एकेन प्रकारेण एकधा, द्विधा, त्रिधा, चतुर्धा, पञ्चधा, शतधा, इत्यादि।

**डत्यतु संख्यावत् ।१।१।३९॥** डतिप्रत्ययान्तमतु-

१–४–किमः क इति कादेशः। २–३–आद्वेर इत्यत्वम्।

प्रत्ययान्तं च नाम संख्यावद् भवति । संख्या कार्यं भजत इत्यर्थः ॥

**बहुगणं भेदे ।१।१।४०॥** एतौ शब्दौ भेदे वर्त्तमानौ संख्यावद् भवतः । भेदो नानात्वम् । बहुधा, कतिधा, तावद्धा ॥

**विचाले च ।७।२।१०५॥** विचाले गम्यमाने संख्यावाचिनो नाम्नो धाप्रत्ययो वा भवति । विचालो नाम द्रव्यस्य पूर्वसंख्यायाः संख्यान्तरापत्तिः । एको राशिर्द्वौ क्रियते द्विधा क्रियते । द्विधा भवति । द्विधा करोति । एवं त्रिधेत्याद्यपि ॥

**वैकाद् ध्यमञ् ।७।२।१०६॥** एकशब्दात्संख्यावाचिनः प्रकारे वर्त्तमानाद्विचाले च गम्यमाने ध्यमञ् प्रत्ययो भवति वा । एकेन प्रकारेण ऐकध्यम् एकधा वा भुङ्क्ते । अनेकमेकं करोति ऐकध्यं करोति, एकधा करोति ॥

**द्वित्रेर्धमञेधौ वा ।७।२।१०७॥** द्वि त्रि आभ्यां संख्यावाचिभ्यां प्रकारे वर्त्तमानाभ्यां विचाले च गम्यमाने धमञ् एधा इत्येतौ प्रत्ययौ वा भवतः । द्वाभ्यां प्रकाराभ्यां द्वैधं द्वेधा भुङ्क्ते । एकं राशिं द्वौ करोति द्वैधं द्विधा वा करोति[5] ॥

**तद्वति धण् ।७।२।१०८॥** द्वित्रिभ्यां संख्यावाचिभ्यां

---

५–एवं त्रैधं त्रेधा ॥

प्रकारवति विचालवति चाभिधेये धमुञ् प्रत्ययो भवति । द्वौ प्रकारौ विभागौ वा एषां द्वैधानि । त्रैधानि । द्वैधीभावः, त्रैधीभावः ॥

**वारे कृत्वस्** ।७।२।१०९॥ वारे वर्त्तमानात्संख्या-शब्दात् वारवति धात्वर्थे कृत्वस् प्रत्ययो भवति । वारो धात्वर्थस्याऽयौगपद्येन वृत्तिस्तत्कालो वा । पञ्चवारा अस्य पञ्चकृत्वो भुङ्क्ते । शतकृत्वोऽधीते । एवं बहुकृत्वः, तावत्कृत्वः[२] ॥

**द्वित्रि चतुरः सुच्** ।७।२।११०॥ द्वि त्रि चतुर् इत्येतेभ्यः संख्याशब्देभ्यो वारे वर्त्तमानेभ्यस्तद्वति सुच् प्रत्ययो भवति । द्वौ वारावस्य द्विः भुङ्क्ते । त्रिरधीते । चतुः पृच्छति ॥

**एकात्सकृच्चास्य** ।७।२।१११॥ एकशब्दाद्वारे वर्त्त-मानात् तद्वति वाच्ये सुच् प्रत्ययः सकृदिति चादेशोऽस्य भवति । एकवारमिति सकृद् भुङ्क्ते ॥

**ऊर्ध्वाद् रिरिष्टातावुपश्चास्य** ।७।२।११४॥ ऊर्ध्व-शब्दाद् दिग्देशकालेषु वर्त्तमानात् प्रथमापञ्चमीसप्तम्यन्तात् रि-रिष्टात् इत्येतौ प्रत्ययौ भवत उपादेशश्चाऽस्य । ऊर्ध्वा दिग् देशः कालो वा रमणीयः उपरि रमणीयमुपरिष्टाद्वा

१–नाम्नो न इति नलोपः । २–धुटस्तृतीयोऽघोषे प्रथमः ।
३–रात्स इति सलोपः । ४–अव्ययस्य विशेषणं नपुंसकम् ।

रमणीयम् । एवमुपर्यागत उपरिष्टाद्वाऽऽगतः । उपरि उपरिष्टाद्वा वसति ॥

**पूर्वाऽवराधरेभ्योऽसस्तातौ पुरवधश्चैषाम्** ।७।२।११५॥ पूर्व अवर अधर इत्येतेभ्यः प्रत्येकं दिग्देशकालवृत्तिभ्यः प्रथमापञ्चमीसप्तम्यन्तेभ्योऽस् अस्तात् इत्येतौ प्रत्ययौ भवत एषां च यथासंख्यं पुर्, अव्, अध् इत्येते आदेशा भवन्ति । पूर्वा दिग् देशः कालो वा रमणीयः पुरः पुरस्ताद्वा रमणीयम् । पुरः पुरस्ताद्वाऽऽगतः, पुरः पुरस्ताद्वा वसति । अवोऽवस्ताद्वा रमणीयमित्यादि । अधोऽधस्ताद्वा रमणीयमित्यादि ॥

**परावरात्स्तात्** ।७।२।११६॥ पर अवर इत्येताभ्यां दिग्देशकालेषु वर्त्तमानाभ्यां प्रथमा पञ्चमी सप्तम्यन्ताभ्यां स्वार्थे स्तात्प्रत्ययो भवति ।

**सर्वादयोऽस्यादौ** ।३।२।६१॥ सर्वादिर्गणः परतः स्त्री पुंवद् भवति, स्यादिश्चेत्ततः परो न भवति । परा दिग् देशः कालो वा रमणीयः परस्ताद् रमणीयम् । परस्तादागतः, परस्ताद् वसति । एवमवरस्मात् ॥

**दक्षिणोत्तराच्चातस्** ।७।१।११७॥ दक्षिण उत्तर इत्येताभ्यां चकारात्परावराभ्यां च दिग्देशकालेषु वर्त्त-

१—समुदायस्याव्ययत्वेऽवयवलिङ्गं निवर्त्तत इति बोध्यम् । दिग्वृत्तेः परेति प्रथमान्तात्स्ताति पुंवद्भावः । एवमग्रेऽप्यन्यत्रोत्तरादिशब्देऽपि द्रष्टव्यम् ।

मानाभ्यां प्रथमापञ्चमीसप्तम्यन्ताभ्यां स्वार्थेऽतस् प्रत्ययो भवति। दक्षिणा दिग्देशो वा रमणीयो दक्षिणतो रमणीयम्। आगतो वसति वा। एवमुत्तरतः परतः अवरतः॥

अधरापराच्चात् ।७।२।११८॥ अधरापराभ्यां दिग्देशकालवृत्तिभ्यां प्रथमापञ्चमीसप्तम्यन्ताभ्यामात्प्रत्ययो भवति, चकाराद् दक्षिणोत्तराभ्यां च। अधराद्दक्षिणादुत्तराद्वा रमणीयमागतो वासो वा॥

पश्चोऽपरस्य दिक्पूर्वस्य चाति ।७।२।१२४॥ अपरशब्दस्य केवलस्य दिक्पूर्वस्य च आति प्रत्यये परे पश्चादेशो भवति। पश्चाद्रमणीयमागतो वासो वा। दक्षिणा च साऽपरा च दक्षिणापरा। दक्षिणपश्चाद्रमणीयमागतो वसति वा॥

वा दक्षिणात्प्रथमासप्तम्या आः ।७।२।११९॥ दक्षिणशब्दाद् दिग्देशवृत्तेः प्रथमान्तात् सप्तम्यन्ताच्च आः प्रत्ययो वा भवति। पक्षेऽतसातौ। दक्षिणा रमणीयं वसति वा। दक्षिणतो रमणीयं वसति वा। दक्षिणाद् रमणीयं वसति वा॥

आही दूरे ।७।२।१२०॥ दिक् शब्दा अवधिसापेक्षाः। तत्रावधेर्दूरे दिशि देशे वा वर्त्तमानात् प्रथमासप्तम्यन्ताद् दक्षिणशब्दाद् आ, आहि इत्येतौ प्रत्ययौ भवतः।

ग्रामाद् दूरा दक्षिणा दिग् रमणीया दक्षिणा दक्षिणाहि वा रमणीयम् । देशे–दक्षिणा दक्षिणाहि वा वसति ॥

वोत्तरात् ।७।२।१२१॥ उत्तरशब्दात्प्रथमासप्तम्यन्ताद् दिग्देशवृत्तेरा, आहि इत्येतौ प्रत्ययौ वा भवतः । ग्रामादुत्तरा उत्तराहि वा रमणीयम् । देशे, ग्रामादुत्तरोत्तराहि वा वसति ॥पक्षेऽतसातौ ॥

अदूरे एनः ।७।२।१२२॥ दिक्शब्दाद् दिग्देशकालवृत्तेः प्रथमासप्तम्यन्तादवधेरदूरे वर्त्तमानादेनः प्रत्ययो भवति । अस्मात्पूर्वा याऽदूरा दिक्, कालो वा रमणीयः, पूर्वेणास्य रमणीयम् । देशे - पूर्वेणास्य वसति । एवं दक्षिणेनोत्तरेणेत्यादि ॥

दिक्शब्दाद्दिग्देशकालेषु प्रथमापञ्चमीसप्तम्याः ।७।२।११३॥ दिशि प्रसिद्धाद् दिक्शब्दाद् दिशि देशे काले च वर्त्तमानात् प्रथमापञ्चमीसप्तम्यन्तात् स्वार्थे धा प्रत्ययो भवति ॥

लुबञ्चेः ।७।२।१२३॥ अञ्चत्यन्ताद् दिक्शब्दाद् दिग्देशकालेषु वर्त्तमानात् प्रथमापञ्चमीसप्तम्यन्ताद् यः प्रत्ययो विहितो धा एनो वा तस्य लुप् भवति ॥

प्राची दिक् रमणीया प्राग् रमणीयम् । प्रागागतः,

१–इत्यादेरिति लुकि च ज इति कः ततस्तृतीयः ।

प्राग्वसति ॥

**वोत्तरपदेऽर्धे** ।७।२।१२५॥ अपरशब्दस्य केवलस्य दिक्पूर्वपदस्य च अर्धशब्दे उत्तरपदे पश्चादेशो वा भवति । अपरमर्धं पश्चार्धमपरार्धम् । दक्षिणापरस्या अर्धो दक्षिणपश्चार्धः । उत्तरपश्चार्धः । उत्तरपदस्य समास एव भावादसमासे न । अपरा अर्धे शोभते ॥

**कृभ्वस्तिभ्यां कर्मकर्तृभ्यां प्रागतत्त्वे च्विः** ।७।२।१२६॥ करोति कर्मणो भ्वस्तिकर्तुश्च प्रागतत्त्वे, (अभूततद्भावे) गम्यमाने कृभ्वस्तिभ्यां च योगे च्विः प्रत्ययो भवति ॥

**ईश्च्वावर्णस्यानव्ययस्य** ।४।३।१११॥ अव्ययवर्जितस्याऽवर्णस्य च्वौ परे ईकारोऽन्तादेशो भवति । शुक्लीकरोति पटम् । अशुक्लं शुक्लं करोतीत्यर्थः । शुक्लीक्रियते, शुक्लीकरणमित्याद्यप्यूह्यम् । शुक्लीभवति । अशुक्लः शुक्लो भवतीत्यर्थः । माली करोति । माली भवति । शुक्ली स्यात् । माली स्यात् ॥ शुचीकरोति । पटूकरोति ॥ दीर्घश्च्वीति दीर्घः ।

**अरुर्मनश्चक्षुश्चेतोरहोरजसां लुक् च्वौ** ।७।२।१२७॥ एतेषामन्त्यस्य च्वौ परे लुग् भवति । अनररुः करोति अरूकरोति । उन्मनीकरोति । चक्षूकरोति । विचेतीकरोति ।

---

२–अन्त्यलोपे दीर्घश्च्वीति दीर्घः ।

रहीकरोति रजीकरोति। एवं भ्वस्तियोगे स्वयमूह्यम् ॥

**इसुसोर्बहुलम्** ।७।२।१२८॥ इस् उस् इत्येवमन्तस्य च्वौ परे बहुलमन्तस्य लुग् भवति। सर्पीकरोति नवनीतम्। असर्पिः सर्पिः करोतीत्यर्थः। धनूकरोति वंशम् ॥

**व्यञ्जनस्यान्तस्य ईः** ।७।२।१२९॥ व्यञ्जनान्तस्य च्वौ परे बहुलमीकारोऽन्तो भवति। दृषदीभवति शिला। समिधीभवति काष्ठम् सर्पिर्भवति, धनुर्भवति, दृषद् भवति, इत्यादयोऽपि बाहुलकात् ॥

**व्याप्तौ स्सात्** ।७।२।१३०॥ कृभ्वस्तिभ्यां योगे कृगः कर्मणो भ्वस्तिकर्तुश्च प्रागतत्त्वे विषये सकारादिः सात्प्रत्ययो भवति, प्रागतत्त्वस्य चेत्सर्वात्मना द्रव्येणाभिसम्बन्धो गम्यते। सर्वं काष्ठं प्रागनग्निमग्निं करोति अग्निसात्करोति काष्ठम्। द्विसकारपाठः षत्वनिवृत्त्यर्थः। एवं भवत्यस्तियोगेऽप्यूह्यम् ॥

**जातेः सम्पदा च** ।७।२।१३१॥ कृभ्वस्तिभिः सम्पदा च योगे करोति कर्मणो भ्वस्तिकर्तुः संपदिकर्तुश्च प्रागतत्त्वेन सामान्यस्य व्याप्तौ गम्यमानायां स्सात्प्रत्ययो भवति। अस्यां सेनायां सर्वं शस्त्रमग्निसात्करोति दैवम् ॥

**तत्राधीने** ।७।२।१३२॥ सप्तम्यन्तादधीनेऽर्थे कृभ्व-

१–अन्त्यलोपे दीर्घः।

स्तिसंपद्भिर्योगे स्सात्प्रत्ययो भवति। राजन्यधीनं करोति राजसात्करोति। एवमन्यदप्यूह्यम् ॥

**देये त्रा च** ।७।२।१३२॥ सप्तम्यन्तात् देयेऽधीनेऽर्थे कृभ्वस्तिसंपद्भिर्योगे त्राप्रत्ययो भवति। यद्देयत्वेन प्राक् कल्पितं तद्देव चेदधीनं क्रियते भवति वेति यावत्। देवेऽधीनं देयं करोति देवत्रा करोति द्रव्यम्। देवाय दातव्यमिति यत् स्थापितं तदिदानीं ददातीत्यर्थः ॥

**सप्तमीद्वितीयाद् देवादिभ्यः** ।७।२।१३४॥ सप्तम्यन्तेभ्यो द्वितीयान्तेभ्यश्च देवादिभ्यस्त्रा प्रत्ययो भवति स्वार्थे। देवेषु वसति भवति स्याद्वा देवत्रा वसतीत्यादि। देवान् गच्छति करोति वा देवत्रा गच्छतीत्यादि। एवं मनुष्यत्रा, गुरुत्रा मर्त्यत्रा पुरुषत्रा बहुत्रा वसतीत्यादि ॥

**समयाद्यापनायाम्** ।७।२।१३७॥ समयशब्दात्कालहरणे गम्यमाने कृगा योगे डाच् प्रत्ययो भवति। समयाकरोति कुविन्दः। अद्य श्वस्ते पटं दास्यामीति कालक्षेपं करोतीत्यर्थः ॥

**प्रियसुखादानुकूल्ये** ।७।२।१४०॥ प्रिय सुख इत्येताभ्यां कृगा योगे आनुकूल्ये गम्यमाने डाच् प्रत्ययो भवति

२—नाम्नो न इति नलोपः।

प्रियाकरोति गुरुम्, सुखाकरोति । गुरोरानुकूल्यं करोति, तमाराधयतीत्यर्थः ।

दुःखात्प्रातिकूल्ये ।७।२।१४१॥ दुःखशब्दात्प्रातिकूल्ये गम्यमाने कृगा योगे डाच् प्रत्ययो भवति । दुःखाकरोति शत्रुम् । शत्रोः प्रातिकूल्यं करोति । प्रतिकूलाचरणेन तं पीडयतीत्यर्थः ॥

शूलात्पाके ।७।२।१४२॥ शूलशब्दात् पाके गम्यमाने कृगा योगे डाच् प्रत्ययो भवति । शूलाकरोति मांसम् । शूले पचतीत्यर्थः ॥

सत्यादशपथे ।७।२।१४३॥ सत्यशब्दात् शपथादन्यत्र वर्तमानात् कृगा योगे डाच् प्रत्ययो भवति । सत्याकरोति वणिग् भाण्डम् । कार्षापणादिदानेन मयावश्यमेवैतत्क्रेतव्यमिति क्रेतारं प्रत्याययतीत्यर्थः ।

मद्रभद्राद्वपने ।७।२।१४४॥ मद्र भद्र शब्दाभ्यां मुण्डने गम्यमाने कृगा योगे डाच् प्रत्ययो भवति । मद्रं वपनं करोति मद्राकरोति भद्राकरोति नापितः । शिशोर्माङ्गल्यं केशच्छेदनं करोतीत्यर्थः । मद्र-भद्र शब्दौ माङ्गल्यवचनौ ॥

बह्वल्पार्थात्कारकादिष्टानिष्टे प्शस् ।७।२।१५०॥ बह्वर्थादल्पार्थाच्च कारकाभिधायिनो नाम्नः प्शस् प्रत्ययो वा भवति । यथा संख्यमिष्टेऽनिष्टे च विषये । इष्टे ग्रामे बहुशो

ददति । बहवो ददतीत्यर्थः । एवं बहु धनं ददाति बहुशो ददाति । विवाहे बहुभिर्भुक्तं बहुशो भुक्तम् । बहुभ्योऽतिथिभ्यो ददाति, बहुशोऽतिथिभ्यो ददाति । बहुभ्यो ग्रामेभ्य आगच्छति, बहुशो ग्रामेभ्य आगच्छति । बहुषु ग्रामेषु वसति, बहुशो वा । एवं भूरिशः प्रभूतशो गणश इत्यादि । अनिष्टे– अल्पोऽल्पशो वाऽऽगच्छति । अल्पमल्पशो वा ददाति, अल्पैरल्पशो वा भुक्तम् । अल्पायाल्पशो वाऽतिथये ददाति । अल्पादल्पशो वा ग्रामादागच्छति । अल्पेऽल्पशो वा ग्रामे वसति एवं स्तोकशः, कतिपयश इत्यादि ॥

**संख्यैकार्थाद्वीप्सायां शस्** ।७।२।१५१॥ संख्यावाचिन एकत्वविशिष्टार्थवाचिनश्च कारकाभिधायिनो नाम्नो वीप्सायां द्योत्यायां शस् प्रत्ययो वा भवति ॥

**वीप्सायां** ।७।४।८०॥ वीप्सायां यद्वर्तते शब्दरूपं तद् द्विरुच्यते । पृथक् संख्यायुक्तानां बहूनां सजातीयानामर्थानां साकल्येन प्रत्येकं क्रियया गुणेन द्रव्येण जात्या वा युगपत्प्रयोक्तुर्व्याप्तुमिच्छा वीप्सा । सा च स्याद्यन्तेष्वेव भवतीति तेषामेव द्विर्वचनम् ॥

**प्लुप् चादावेकस्य स्यादेः** ।७।४।८१॥ एकशब्दस्य वीप्सायां द्विरुक्तस्यादौ वर्तते य एकशब्दस्तत्सम्बन्धिनः स्यादेः प्लुप् भवति । एकैकशो वा ददाति । एवं द्वौ

द्वौ द्विशः, त्रिशः, तावच्छः, कतिशः, गणशः। एकैकेनैकशो वा दीयते। एवं कारकान्तरेऽप्युदाहार्यम्। माषं माषं माषशो वा दत्ते। कणं कणं कणशो वा संचिनोति। क्षणशः कणशश्चैव विद्यामर्थं च चिन्तयेत्। धण्वर्जास्तस्त्राद्याः शसन्ता अव्ययसंज्ञका इति तेभ्यो जातस्य स्यादेर्लुक् सर्वत्र ॥

**तीयाट्टीकण् न विद्या चेत्** ।७।२।१५३॥ तीयप्रत्ययान्तात् स्वार्थे टीकण् प्रत्ययो वा भवति न चेत्तीयान्तस्य विद्या विषयो भवति। द्वितीयं द्वैतीयीकं पुष्पम्। तृतीयं तार्तीयिकम्। विद्यायां तु न। द्वितीया तृतीया वा विद्या ॥

**वर्णाव्ययात् स्वरूपे कारः** ।७।२।१५६॥ वर्णेभ्योऽव्ययेभ्यश्च स्वरूपार्थवृत्तिभ्यः स्वार्थे कारः प्रत्ययो भवति। अकार इकार उकारः ककार इत्यादि। ककारादिष्वकार उच्चारणार्थो बोध्यः। ओङ्कारः, नमस्कारः, चकारः, एवकारः, हुंकारः, पूत्कारः, सीत्कारः, सूत्कार इत्यादिः ॥

**रादेफः** ।७।२।१५७॥ रशब्दादेफः प्रत्ययो वा भवति। रेफः, रकारः।

**नवादीनतनत्नं च नू चास्य** ।७।२।१६०॥ नवशब्दात्स्वार्थे ईन तन त्न चकाराद् यश्च प्रत्यया वा भवन्ति तत्स-

१–तौ मुम इति स्वानुस्वारानुनासिकौ। २–नमस्पुरस इति सः।

न्नियोगे च नवशब्दस्य नू इत्ययमादेशो भवति। नवमेव नवीनम्[3], नूतनं, नूत्नं, नव्यम् ॥

**प्रात्पुराणे नश्च** ।७।२।१६१॥ प्रशब्दात्पुराणेऽर्थे वर्त्तमानात् स्वार्थे नः प्रत्ययो भवति चकारादीनतनत्नाश्च। प्रगतं कालेनेति प्रशब्देन पुराणमुच्यते। प्रणम्, प्रीणं प्रतनं प्रत्नम् ॥

**देवात्तल्** ।७।२।१६४॥ देवशब्दात्स्वार्थे तल् प्रत्ययो वा भवति। देव एव देवता। लित्त्वात् स्त्रीत्वम् ॥

**भेषजादिभ्यष्ट्यण्** ।७।२।१६४॥ भेषजादिभ्यः स्वार्थे ट्यण् प्रत्ययो वा भवति। भेषजमेव भैषज्यम्। अनन्त एव आनन्त्यम्। इति ह एव ऐतिह्यम्। चत्वार एव वर्णाश्चातुर्वर्ण्यम्। त्रिलोकी एव त्रैलोक्यम् ॥

**प्रज्ञादिभ्योऽण्** ।७।२।१६५॥ प्रज्ञादिभ्यो नामभ्यः स्वार्थेऽण् प्रत्ययो भवति वा। प्रज्ञ एव प्राज्ञः, वणिगेव वाणिजः। मन एव मानसम्, मरुदेव मारुतः, चोर एव चौरः, देवतैव दैवतम्, बन्धुरेव बान्धवः, चण्डाल एव चाण्डालः ॥ आकृतिगणोऽयम्।

**वाच इकण्** ।७।२।१६८॥ सन्दिष्टेऽर्थे वर्त्तमानाद्

---

३–अस्वयम्भुवोऽविरिव। एवं नव्यमित्यत्रापि बोध्यम्। ४–अपदत्वा- च्चजः कगमिति न। १–अपदत्वान्न गः।

वाच् शब्दात् स्वार्थे इकण् प्रत्ययो भवति । सन्दिष्टा वाक् एव वाचिकम् ॥

विनयादिभ्यः ।७।२।१६९॥ विनयादिभ्यः स्वार्थे इकण् प्रत्ययो वा भवति । विनय एव वैनयिकम्, समय एव सामयिकम्, समाय एव सामायिकम् । एवम् औपचारिकं व्यावहारिकम्, साम्प्रदायिकं, सामूहिकं, वैशेषिकमित्यादि ॥

उपायाद्ध्रस्वश्च ।७।२।१७०॥ उपायशब्दात्स्वार्थे इकण् प्रत्ययो वा भवति तत्संनियोगे च ह्रस्वः । उपाय एव औपयिकम् ॥

मृदस्तिकः ।७।२।१७०॥ मृद्शब्दात्स्वार्थे तिकः प्रत्ययो वा भवति । मृदेव मृत्तिका ॥

सस्नौ प्रशस्ते ।७।२।१७२॥ मृद् इत्येतस्मात् प्रशस्तेऽर्थे वर्तमानात् स स्न इत्येतौ वा भवतः । अपवादः प्रशस्ता मृत् मृत्सा मृत्स्ना । रूपप्पीच्छन्ति, मृद्रूपा ॥

॥ इति तस्वादिस्वार्थिकप्रत्ययप्रक्रिया ॥

प्रकृते मयट् ।७।३।१॥ प्रकृतेऽर्थे वर्त्तमानान्नाम्नः स्वार्थे मयट् प्रत्ययो भवति । प्राचुर्येण प्राधान्येन वा कृतं प्रकृतम् । अन्नं प्रकृतमन्नमयम् । घृतमयम्, दधिमयम् । यवमयः प्रकृता यवाग्मयी । अनिवर्तकत्वेऽपि स्वार्थिकाः प्रकृति-

२–अघोषे प्रथम इति प्रथमः, स्त्रियामाप् ।

लिङ्गवचनानीति यवागूमयमित्यपि । एवमन्यत्राऽपि यथादर्शनं बोध्यम् ।

**अस्मिन्** ।७।३।२॥ प्रकृतेऽर्थे वर्त्तमानान्नाम्नोऽस्मिन्निति सप्तम्यर्थे मयट् प्रत्ययो भवति । प्रकृतमन्नमस्मिन्निति अन्नमयं भोजनम् । एवमपूपमयम् । वटकमयी यात्रा ।

**निन्द्ये पाशप्** ।७।३।४॥ निन्द्येऽर्थे वर्त्तमानान्नाम्नः स्वार्थे पाशप् प्रत्ययो भवति । कुत्सितः साधुः साधुपाशः । पित्त्वात् पुंवद्भावः । साधुपाशा । वैयाकरणपाशः । छान्दसपाशः ॥

**प्रकृष्टे तमप्** ।७।३।५॥ प्रकर्षवत्यर्थे वर्त्तमानान्नाम्नस्तमप् प्रत्ययो भवति । प्रकर्षोऽतिशयः । स च गुणक्रिययोरेव न जाति-द्रव्ययोः । सर्वे इमे शुक्लाः अयमेषां प्रकृष्टः शुक्लः शुक्लतमः । साधकतमः, महत्तमः । शुक्लतमा शाटी ॥

**द्वयोर्विभज्ये च तरप्** ।७।३।६॥ द्वयोस्तद्गुणयोरर्थयोर्मध्ये यः प्रकृष्टस्तस्मिन् विभक्तव्ये च प्रकृष्टेऽर्थे वर्त्तमानान्नाम्नस्तरप् प्रत्ययो भवति । तमपोऽपवादः । द्वाविमौ पटू अयमनयोः प्रकृष्टः पटुः पटुतरः । एवं सुकुमारतरः, पाचकतरः । गोतरो यः शकटं वहति सीरं च । गोतरा या समांसमीना स्त्रीवत्सा च । दन्तौष्ठस्य दन्ताः स्निग्धतराः, पाणिपादस्य पाणी सुकुमारतरौ । सांकाश्यकेभ्यो माथुरा

१–पित्त्वात्पुंवत् ।

आढ्यतराः सुकुमारतरा अभिरूपतराः। सांकाश्यकेभ्यो माथुरेभ्यश्च पाटलिपुत्रका अभिरूपतरा आढ्यतराः सुकुमारतराः। शुक्लतरा शाटी ॥

क्वचित् स्वार्थे ।७।३।७॥ क्वचित् स्वार्थेऽपि तरप् प्रत्ययो भवति। अभिन्नमेवाऽभिन्नतरकम्। उपपन्नतरकम् ॥

किन्त्याद्येऽव्ययादसत्त्वे तयोरन्तस्याम् ।७।३।८॥ किंशब्दात्त्याद्यन्तादेकारान्तादव्ययेभ्यश्च परयोस्तमप्तरपोरन्तस्यामित्ययमादेशो भवति न चेत्तौ सत्त्वे प्रकृष्टे वर्त्तेते। इदं तदिति परामर्शयोग्यं द्रव्यं सत्त्वम्। इदमनयोरिदमेषां वाऽतिशयेन किं पचति किन्तरां किन्तमां पचति वा। सर्वे इमे पचन्ति, अयमेषां प्रकृष्टं पचति पचतितमां देवदत्तः। द्वाविमौ पचतः, अयमनयोरतिशयेन पचति पचतितराम्। पूर्वाह्णेतरां पूर्वाह्णेतमां वा भुङ्क्ते। एवमपराह्णेतरामित्यादि। नितराम्, सुतराम्। उच्चैस्तराम्। सत्त्वे तु किन्तरं दारु ॥

गुणाङ्गाद् वेष्ठेयसू ।७।३।९॥ गुणाङ्गात्तमतरयोर्विषये यथासंख्यम् इष्ठ ईयसु इत्येतौ प्रत्ययौ भवतो वा। पक्षे तमप्तरपौ। तमवर्थे इष्ठः, अयमेषातिशयेन पटुः

---

२–पित्वात् पुंवत्। ३–अज्ञातादौ कप्। ४–तौ मुम इति स्वानुस्वारानुनासिकौ। ५–एतदन्तत्वं निपातनात्। ६–नि सु इत्यव्ययाभ्यां स्वार्थे तरप्। ७–रुत्वे चटते इति सः।

१–यः शब्दो गुणमुक्त्वा गुणिनमाह, स गुणाङ्गो गुणवचनः।

पटिष्ठः[2], पटुतमः। लघिष्ठः, गरिष्ठः[3], म्रदिष्ठः। तरबर्थे ईयसुः, अयमनयोरतिशयेन पटुः पटीयान्, पटुतरः। पटीयसी, पटिष्ठा ॥

**अल्पयूनोः कन्वा ।७।४।३३॥** अल्प युवन् इत्येतयो र्णि इष्ठ ईयसु इत्येतेषु परेषु कन् इत्ययमादेशो भवति वा। एषामयमनयोर्वातिशयेनाल्पो युवा वाऽल्पिष्ठः, अनयोरल्पीयान् कनिष्ठः कनीयान्। यविष्ठः[4], यवीयान् ॥

**प्रशस्यस्य श्रः ।७।४।३४॥** प्रशस्यशब्दस्य णीष्ठेयसुषु परेषु श्र इत्ययमादेशो भवति। श्रेष्ठः, श्रेयान् ॥

**वृद्धस्य च ज्यः ।७।४।३५॥** वृद्धशब्दस्य प्रशस्यशब्दस्य च णीष्ठेयसुषु परेषु ज्य इत्ययमादेशो भवति। ज्येष्ठः ॥

**ज्यायान् ।७।४।३६॥** ज्यादेशात् परस्य ईयसोरीकारस्य आकारादेशो निपात्यते अयमनयोरतिशयेन प्रशस्यो वृद्धो वा ज्यायान्। ज्यायसी ॥

**बाढान्तिकयोः साधनेदौ ।७।४।३७॥** अनयोर्णीष्ठेयसुषु परेषु यथासंख्यं साधनेद इत्येतावादेशौ भवतः।

---

२–अन्त्यस्वरादेरित्युलोपः। ३–प्रियस्थिरेति गरादेशः। पृथु मृदु [illegible] दिना रः। ४–अन्त्यस्वरादेरित्यन्त्यस्वरादिलोपः। ऋदुदिति नो[illegible], न्स्महतोरिति दीर्घः। ५–अधातूदिति ङीः। ६–स्थूलदूरेत्यन्तस्थादिलोपो गुणश्च। ७–नैकेति लोपनिषेधे, अवर्णस्येति एत्।

साधिष्ठः, साधीयान्। नेदिष्ठः, नेदीयान्। प्रियस्थिरेत्यादिना प्राद्यादेशे प्रेष्ठः, प्रेयान्, स्थेष्ठः, स्थेयान्। स्थूलदूरेत्यादिनाऽन्तस्थादिलोपे नामिनो गुणे च स्थविष्ठः, स्थवीयान्, दविष्ठः दवीयान् ॥

**बहोर्णीष्ठे भूय् ।७।४।४०॥** बहुशब्दस्य णीष्ठयोः परयोर्भूय् इत्ययमादेशो भवति। भूयिष्ठः, भूयान्। अवादेशस्तु न, भू ऊ इत्यूकारप्रश्लेषात् ॥

**विन्मतोर्णीष्ठेयसौ लुप् ।७।४।३२॥** विन्मतु इत्येतयोः प्रत्यययोः णीष्ठेयस्सु प्रत्ययेषु परेषु लुब् भवति। अयमेषामनयोरतिशयेन स्रग्वी स्रजिष्ठः, स्रजीयान्। अयमेषामनयोर्वाऽतिशयेन त्वग्वान् त्वचिष्ठः, त्वचीयान् ॥

**नैकस्वरस्य ।७।४।४४॥** एकस्वरस्य शब्दरूपस्य योऽन्त्यस्वरादिरवयवस्तस्येमनि णीष्ठेयस्सु च परेषु लुग् न भवति।

**त्यादेश्च प्रशस्ते रूपप् ।७।३।१०॥** त्याद्यन्तान्नाम्नश्च प्रशस्तेऽर्थे वर्त्तमानाद् रूपप् प्रत्ययो भवति। प्रशस्तं पचति पचतिरूपम्। पण्डितरूपः। दर्शनीयरूपा। वैयाकरणरूपः ॥

---

८–अवर्णेवर्णस्य। ९–नवैकेति निषेधे एत्। १०–भूर्लुक् चेवर्णस्य।
१–अपदत्वान्न गः। २–क्यङ्मानीति पुंवत्।

**ऋदुदित्तरतमरूपकल्पब्रुवचेलङ्गोत्रमतहते वा ह्रस्वश्च ।३।२।६३॥** ऋदिदुदिच्च परतः स्त्रीलिङ्गशब्द-स्तरादिषु प्रत्ययेषु ब्रुवादिषु च स्त्र्येकार्थेषूत्तरपदेषु ह्रस्वा-न्तः पुंवच्च वा भवति । पचन्तितरा, पचत्तरा, पचन्तीतरा[3] । पचन्तितमा, पचत्तमा, पचन्तीतमा । श्रेयसितरा[4], श्रेयस्तरा, श्रेयसीतरा । श्रेयसितमा, श्रेयस्तमा, श्रेयसीतमा । पच-न्तिरूपा, पचद्रूपा, पचन्तीरूपा । श्रेयसिरूपा, श्रेयोरूपा श्रेयसीरूपा ॥

**अतमबादेरीषदसमाप्ते कल्पप्देश्यप्देशीयर् ।७।३।११॥** ईषदसमाप्तेऽर्थे वर्त्तमानात्त्याद्यन्तान्नाम्नश्च तमबाद्यन्तवर्जितात् कल्पप् देश्यप् देशीयर् इत्येते प्रत्यया भवन्ति । सम्पूर्णता-पदार्थानां समाप्तिः,[5] सा किञ्चिदूना ईषदसमाप्तिस्तद्विशिष्ट ईषदसमाप्तः । ईषदसमाप्तं पचति पचतिकल्पम् । पचतिदेश्यम्, पचतिदेशीयम् । ईषद-समाप्ता पट्वी पटुकल्पा । पचन्तीकल्पा, पचन्तिकल्पा[6], पचत्कल्पा । पटुदेश्या, पटुदेशीया, पटुकल्पा ॥

**नाम्नः प्राग् बहुर्वा ।७।३।१२॥** ईषदसमाप्तेऽर्थे वर्त्तमानान्नाम्नो बहुप्रत्ययो वा भवति स च नाम्नः

---

३–पच्धातोः शतृः, तत ऋदित्त्वात्तरादिषु पुंवद् ह्रस्वश्च वा । अधातूदिति ङीः । ४–अधातूदिति ङीः । उदित्त्वात् । ५–क्यङ् मानीति पुंवत् । ६–ऋदुदिति पुंवद् ह्रस्वश्च वा ।

पुरस्तादेव न परस्तात्। ईषदसमाप्तः पटुर्बहुपटुः बहुभुक्तम्, बहुमुखश्चन्द्रः। पक्षे कल्पबादिः॥

**यावादिभ्यः कः।७।३।१५॥** यावादिभ्यः स्वार्थे कः प्रत्ययो भवति। याव एव यावकः, मणिकः। भिक्षुकः॥

**त्यादिसर्वादेः स्वरेष्वन्त्यात्पूर्वोऽक्।७।३।२९॥** त्याद्यन्तस्य सर्वादीनां च स्वरेषु मध्ये योऽन्त्यस्वरस्तस्मात्पूर्वोऽक् प्रत्ययो भवति कुत्सितादिषु। कुत्सितमल्पमज्ञातं वा पचति पचतकि। सर्वके, विश्वके, सर्वकस्मै॥

**युष्मदस्मदोऽसोभादिस्यादेः।७।३।३०॥** युष्मदस्मदित्येतयोः सकाराद्योकारादिभकारादिवर्जितस्याद्यन्तयोः स्वरेष्वन्त्यात् पूर्वोऽक् प्रत्ययो भवति। त्वया मयेति त्वयका, मयका। त्वयकि, मयकि। युष्माककम्, अस्माककम्। असोभादि—स्यादेरिति किम्? युष्मकासु, आवकयोः, युवकाभ्याम्, अस्मकाभिः।

**अव्ययस्य को द् च।७।३।३१॥** कुत्सिताद्यर्थेषु द्योत्येषु अव्ययस्य स्वरेष्वन्त्यात् स्वरात् पूर्वमक् प्रत्ययो भवति तत्सन्नियोगे यत्ककारान्तमव्ययं तस्य दकारोऽन्तादेशो भवति। कुत्सिताद्युच्चैरुच्चकैः। नीचकैः। धकिद्[1]। हिरकुद्, पृथकद्॥

---

१-इकारात्पूर्वमक्, अन्त्यस्य कस्य दः।

तूष्णीकाम् ।७।३।३२।। तूष्णीमो मकारात्पूर्वं का इत्यागमो निपात्यते । कुत्सितादि तूष्णीं तूष्णीकाम् तिष्ठति ।

कुत्सिताल्पाज्ञाते ।७।३।३३।। कुत्सिताल्पाज्ञातोपाधिकेऽर्थे वर्त्तमानात् त्यादेर्नाम्नश्च यथायोगं कबादयः प्रत्यया भवन्ति । कुत्सितम्-निन्दितम्, अल्पं-महत्प्रतियोगि । अज्ञातं-प्रकृत्युपात्तधर्मव्यतिरेकेण केनचित्स्वत्वादिना धर्मेणाऽनिश्चितम् । कुत्सितोऽल्पोऽज्ञातो वाऽश्वः अश्वकः । घृतकम् । पचतकि, सर्वके, उच्चकैः, तूष्णीकाम् ।।

अनुकम्पातद्युक्तनीत्योः ।७।३।३४।। अनुकम्पायां-तद्युक्तनीतौ च गम्यमानायां यथायोगं कबादयः प्रत्यया भवन्ति । पुत्रकः, बालकः । शनकैः । एहकि इत्यादि ।।

ह्रस्वे ।७।३।४६।। ह्रस्वेऽर्थे वर्त्तमानाच्छब्दरूपात् यथायोगं कबादयः प्रत्यया भवन्ति । ह्रस्वः पटः पटकः, शाटकः । ह्रस्वं-दीर्घप्रतियोगी ।।

वैकाद् द्वयोर्निर्धार्ये डतरः ।७।३।५२।। एकशब्दाद् द्वयोर्मध्ये निर्धार्येऽर्थे वर्त्तमानाद् डतरः प्रत्ययो वा भवति । एक एवैकतरो भवतोः कठः, पटुर्गन्ता देवदत्तो, वेत्यादि । पक्षे एककः, अत्राक् । एक इत्यपि ।।

यत्तत्किमन्यात् ।७।३।५३।। यत् तत् किम् अन्य

इत्येतेभ्यो द्वयोरेकस्मिन् निर्धार्येऽर्थे वर्त्तमानेभ्यो डतरः प्रत्ययो भवति। यतरो भवतोः कठः ततर आगच्छतु। कतरो भवतोः कठः। अन्यतरो भवतोः कठः। महाविभाषया, यो भवतोः कठ इत्याद्यपि।

**बहूनां प्रश्ने डतमश्च वा** ।७।३।५४॥ यत्तत्किमन्येभ्यो बहूनां मध्ये निर्धार्येऽर्थे वर्त्तमानेभ्यः प्रश्नविषये डतमः प्रत्ययो वा भवति चकाराद् डतरश्च। यतमो यतरो वा भवतां कठः?। कतमो देवदत्तः? कतरो देवदत्तः? अन्यतमोऽन्यतरो वा भवतां कठः? वावचनादकपि। यको भवतां कठः सक आगच्छतु?। को[2] भवतां कठः? महाविभाषया डतमादर्न भवत्यपि। यो भवतां कठः स आगच्छतु।

**वैकात्** ।७।३।५५॥ एकशब्दाद् बहूनामेकस्मिन् निर्धार्येऽर्थे वर्त्तमानाद् डतमः प्रत्ययो वा भवति। एकतमो भवतां कठः। पक्षेऽगपि। एककः। महाविभाषया—एको भवतां कठः॥

**प्रायोऽतोर्द्वयसट् मात्रट्** ।७।२।१५५॥ अतुप्रत्ययान्तात्स्वार्थे द्वयसट् मात्रट् इत्येतौ प्रत्ययौ भवतः प्रायः। यावदेव यावन्मात्रम्[3], तावद् द्वयसम्, तावन्मात्रम्। कियद् द्वयसम्, कियन्मात्रम्॥ **इति तद्धितप्रक्रिया॥**

---

१—डित्वादन्त्यस्वरादिलोपः। २—किमः क इति साकोऽपि कादेशः।
३—प्रत्यये चेति पञ्चमः, धुट इति तृतीयः॥

## ॥ अथ स्त्रीप्रत्ययप्रकरणम् ॥

**अजादेः ।२।४।१६॥** अजादिभ्यः स्त्रियां वर्त्तमानेभ्य आप् प्रत्ययो भवति । अजा[1], एडका, बाला, वत्सा, ज्येष्ठा, त्रिफला, शूद्रा ॥ सर्वा, या, सा, गङ्गा, खट्वेति आदिति आप् ।

**अस्यायत्तत्क्षिपकादीनाम् ।२।४।१११॥** यत्तद्-क्षिपकादिवर्जस्य नाम्नो योऽकारस्तस्याऽनित्प्रत्ययावयवे ककार आप्परे परत इकारो भवति । कारिका, पाचिका ॥ यजादिवर्जनाद् यका[2], सका[3] क्षिपका ॥

**इच्चाऽपुंसोऽनितक्याप्परे ।२।४।१०७॥** आबेव परो यस्मान्न विभक्तिः स आप्परः अपुंलिङ्गार्थाच्छब्दा-द्विहितस्यापः स्थाने इकारो ह्रस्वश्च वा भवतः, अनकारा-नुबन्धस्य प्रत्ययस्यावयवभूते ककारे आप्परे परतः । अल्पा खट्वा खट्विका, खट्वका, खट्वाका । आबेव परो यस्मान्न विभक्तिरिति नियमादिह न-प्रियखट्वाकमतिक्रान्ताऽति-प्रियखट्वका । अत्र हि द्वितीयायाः पर आप् ॥

**स्त्रियां नृतो स्वस्रादेर्ङीः ।२।४।१॥** स्त्रियां वर्त्तमानाद् नकारान्ताद् ऋकारान्ताच्च नाम्नः स्वस्रादिवर्जिताद् ङीः

---

१-आपि समानदीर्घः, दीर्घङ्याबिति सिलोपः । २-सर्वादित्वादकि सौ त्यदाद्यत्वेऽकारलुकि आप्, यदादिवर्जनान्नेत्त्वम् । ३-तः सौ सः ।

प्रत्ययो भवति । राज्ञी, दण्डिनी, कर्त्री, गन्त्री ॥
स्वसातिस्रश्चतस्रश्च ननान्दादुहिता तथा । यातामातेति सप्तैते स्वस्रादय उदाहृताः ॥१॥

**अधातूदृदितः** ।२।४।२॥ धातुवर्जितो य उदित् ऋदिच्च प्रत्ययोऽप्रत्ययो वा तदन्तान्नाम्नः स्त्रियां वर्त्तमानात् ङीः प्रत्ययो भवति भवन्ती, पचन्ती, भवती ॥

**अञ्चः** ।२।४।३॥ अञ्चन्तान्नाम्नः स्त्रियां ङीर्भवति । प्राची, उदीची ॥

**मनः** ।२।४।१४॥ मन्नन्तान्नाम्नः स्त्रियां ङी न भवति । सीमा ॥

**णस्वराघोषाद् वनोरश्च** ।२।४।४॥ वन इति वन् क्वनिप्ङ्वनिपां सामान्येन ग्रहणम् । णकारान्तात् स्वरान्तादघोषान्ताच्च यो विहितो वन् प्रत्ययस्तदन्तात् स्त्रियां ङीर्भवति वनोऽन्तस्य च तत्सन्नियोगे रो भवति । सहकृत्वरी शर्वरी ।

**गौरादिभ्यो मुख्यान्ङीः** ।२।४।१९॥ गौरादेर्गणान्मुख्यात् स्त्रियां ङीः प्रत्ययो भवति ।

---

४–अनोऽस्येत्यकारलुकि तवर्गस्येति ञः । ५–श्यशव इत्यन्तादेशः । ६–भवतुशब्दः सर्वादिरुदित् । ७–अञ्च प्रागुदीर्घश्च । ८–उदच उदीच् । १–सहराजेति क्वनिप् । २–शधातोर्वन् ।

**अस्य ङ्यां लुक्** ।२।४।८६।। ङीप्रत्यये परे पूर्वस्याऽकारस्य लुग् भवति । गौरी, नदी, पुत्री, दासी ।।

**मत्स्यस्य यः** ।२।४।८७।। मत्स्यशब्दसम्बन्धिनो यकारस्य ङ्यां लुग् भवति । मत्सी ।

**अणञेयेकण्नञ्स्नञ्टिताम्** ।२।४।२०।। अण्-अञ्-एय-इकण्-नञ्-स्नञ्-टितो दघ्नडादयः । एषां प्रत्ययानां योऽकारस्तदन्तान्नाम्नः स्त्रियां ङी भवति । औपगवी[4], कुम्भकारी[5], औत्सी[6], सौपर्णेयी[7], प्रास्थिकी[8], स्त्रैणी[9], पौस्नी,[10] पञ्चतयी[11], जानुदघ्नी[12], कुरुचरी[13] ।।

**वयस्यनन्त्ये** ।२।४।२१।। अनन्त्ये अचरमे वयसि वर्त्तमानादकारान्तान्नाम्नः स्त्रियां ङी भवति । प्राणिनां कालकृतावस्था वयः । कुमारी, किशोरी, तरुणी । चरमे तु– वृद्धा । बालेत्यादिस्त्वजादित्वात् ।

**नवा शोणादेः** ।२।४।३१।। शोणादेर्गणात् स्त्रियां ङी भवति । शोणी, शोणा । कल्याणी, कल्याणा । वृत्रघ्नी[14], वृत्रहा[15] ।

---

३–गौरादिः । ४–अपत्येऽण् । ५–कर्मणोऽण् । ६–अपत्येऽञ् । ७–अपत्ये एयण् । ८–क्रीते इकण् । ९–अपत्यादौ नञ् । १०–अपत्यादौ स्नञ् । ११–अवयवे तयट । १२–प्रमाणे दघ्नट् । १३–चरेष्टः । १४–अनोऽस्येत्यलुकि हनो हनो घ्नः । १५–सौ इन् हन्निति दीर्घः ।

द्विगोः समाहारात् ।२।४।२२।। समाहारद्विगुसंज्ञकान्नाम्नोऽकारान्तात् स्त्रियां ङीर्भवति । पञ्चपूली । त्रिफलेति त्वजादित्वात् ।।

इतोऽक्त्यर्थात् ।२।४।३२।। इकारान्तान्नाम्नः स्त्रियां ङीर्वा भवति । न चेत्तत् क्त्यर्थप्रत्ययान्तं स्यात् । भूमी भूमिः, धूली, धूलिः रात्रिः, रात्री ।।

पद्धतेः ।२।४।३२।। पद्धतिशब्दात् स्त्रियां ङीर्वा भवति । पद्धती, पद्धतिः ।।

शक्तेः शस्त्रे ।२।४।३४।। शक्तिशब्दाच्छस्त्रे स्त्रियां ङीर्वा भवति । शक्ती, शक्तिः ।

स्वरादुतो गुणादखरोः ।२।४।३५।। स्वरात्परो य उकार एकवर्णव्यवहितस्तदन्ताद् गुणवचनात् खरुवर्जितान्नाम्नः स्त्रियां ङीर्वा भवति । पट्वी, पटुः । मृद्वी, मृदुः । लघ्वी लघुः । विभ्वी, विभुः । एकवर्णव्यवहित इति किम् ? पाण्डुर्भूमिः । उत इति किम् ? श्वेता पटी । गुणादिति किम् ? आखुः स्त्री । चिकीर्षुः स्त्री । अखरोरिति किम् ? खरुरियम् । "सत्त्वे निविशतेऽपैति, पृथग्जातिषु दृश्यते । आधेयश्चाऽक्रियाजश्च, सोऽसत्त्वप्रकृतिर्गुणः ॥१॥"

---

१६–पञ्चानां पूलानां समाहारः । १७–समानदीर्घः ।

१–खरुः पतिम्वरा कन्या ।

इति परिभाषितो गुण इह ग्राह्यः। सत्त्वे द्रव्ये, निविशते= तदेवाश्रयति यः, स गुण इति सम्बन्धः, एवमग्रेऽपि अपैति=द्रव्यादपगच्छति यः। यथाऽऽम्राम्नीलता पीततायां जातायाम्। पृथग्जातिषु=भिन्नजातीयेषु दृश्यते=उपलभ्यते यः, यथा घटपटादिषु नीलतादिः। एतैर्विशेषणैर्जातिर्न गुण इति फलति। आधेयः=उत्पाद्यश्च यः यथा कुसुमादि-योगाद् वस्त्रादौ गन्धः। अक्रियाजः=नित्यो यः, यथा गगनादौ महत्त्वादिः। एवं च गुण उत्पाद्योऽनुत्पाद्यश्च। क्रिया तु न तथेति सा न गुणः। असत्त्वप्रकृतिः=द्रव्यस्वभाव-रहितः। तेन द्रव्यं न गुण इति बोध्यम्॥

**श्येतैतहरितभरतरोहिताद्वर्णात्तो न श्च।२।४।३६॥** श्येत-एत-हरित-भरत-रोहित-एभ्यो वर्णवाचिभ्यः स्त्रियां ङीर्वा भवति। तत्संनियोगे तकारस्य नकारश्च भवति। श्येनी, श्येतेत्यादि॥

**क्नः पलितासितात्।२।४।३७॥** पलितासिताभ्यां स्त्रियां ङीर्वा भवति तत्संनियोगे तकारस्य क्नादेशश्च। पलिक्नी, पलिता, असिक्नी असिता॥

**असहनञ्विद्यमानपूर्वपदात्स्वाङ्गादक्रोडादिभ्यः।२।४।३८॥** सहनञ्विद्यमानवर्जितं पूर्वपदं यत्स्वाङ्गं तदन्तात् क्रोडादिगण-वर्जितान्नाम्नोऽकारान्तात् स्त्रियां ङीर्वा भवति। पीनस्तनी, पीनस्तना। अतिक्रान्ता केशानतिकेशी,

अतिकेशा। निष्क्रान्ता केशेभ्यो निष्केशी, निष्केशा यूका। स्वडी, स्वडा वृश्चिका। असहनञ्विद्यमानपूर्वपदादिति किम्? सहकेशा, अकेशा, विद्यमानकेशा। स्वाङ्गादिति किम्? बहुयवा। अक्रोडादिभ्य इति किम्? कल्याणी क्रोडा अस्याः कल्याणक्रोडा। भव्यभाला, सुभगा॥ "अविकारोऽद्रवं मूर्त्तं, प्राणिस्थं स्वाङ्गमुच्यते। च्युतं च प्राणिनस्तत्तन्निभं च प्रतिमादिषु ॥१॥ अविकार इति किम्? बहुशोफा। अद्रवमिति किम्? बहुकफा। मूर्त्तमिति किम्? बहुज्ञाना। प्राणिस्थमिति किम्? दीर्घमुखा शाला। च्युतं च प्राणिनस्तदिति किमर्थम्? अप्राणिस्थादपि पूर्वोक्ताद् यथा स्यात् बहुकेशी बहुकेशा रथ्या। तन्निभं च प्रतिमादिष्विति किमर्थम्? प्राणिस्थसदृशादपि पूर्वोक्ताद् यथास्यात् पृथुमुखी पृथुमुखा प्रतिमा॥

नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाङ्गगात्रकण्ठात् ।२।४।३९॥ असहनञ्विद्यमानपूर्वपदेभ्यो नासिकादिभ्यः स्वाङ्गेभ्यो स्त्रियां ङीर्वा भवति। तुङ्गनासिकी, तुङ्गनासिका। कृशोदरी, कृशोदरा बिम्बोष्ठी, बिम्बोष्ठा। सहादिपूर्वपदात्तु-सहनासिका, अनासिका, विद्यमाननासिका। पूर्वेण सिद्धे नियमार्थमिदम्, तेनाऽन्येभ्यो बहुस्वरेभ्यः संयोगोपान्ते-

१–अडो वृश्चिकावयवविशेषः। २–अश्वानामुरः क्रोडा। ३–ओत्वोष्ठयोरित्यनेन।

भ्यश्च स्वाङ्गेभ्यो ङीर्न भवति। पृथुजघना, सुललाटा, कल्याणगुल्फा, सुपार्श्वा ॥

नखमुखादनाम्नि ।२।४।४०॥ असहनञ्विद्यमानपूर्वपदाभ्यां स्वाङ्गाभ्यां नखमुखशब्दाभ्यां स्त्रियां ङीर्वा भवत्यसंज्ञायाम्। शूर्पनखी, शूर्पनखा। चन्द्रमुखी चन्द्रमुखा। संज्ञायां तु शूर्पणखा[४]। गौरमुखा ॥

पुच्छाद् ।२।४।४१॥ असहनञ्विद्यमानपूर्वपदात् स्वाङ्गात् पुच्छात् स्त्रियां ङीर्वा भवति। दीर्घपुच्छी, दीर्घपुच्छा ॥

कबरमणिविषशरादेः ।२।४।४२॥ कबरादिपूर्वात् पुच्छात् स्त्रियां नित्यं ङी भवति कबरं कर्बुरं कुटिलं वा पुच्छमस्याः कबरपुच्छी। मणि विषं शरं पुच्छेऽस्या मणिपुच्छी विषपुच्छी शरपुच्छी ॥

क्रीतात्करणादेः ।२।४।४४॥ करणमादिरवयवो यस्य तस्मात्क्रीतान्तान्नाम्नोऽकारान्तात् स्त्रियां ङीर्भवति। अश्वेन क्रीयते स्म अश्वक्रीती। वस्त्रक्रीती[१]। क्तान्तेन विभक्त्युत्पत्तेः प्रागेव समासस्ततो ङीः ॥

क्तादल्पे ।२।४।४५॥ क्तप्रत्ययान्तान्नाम्नः करणा-

४—पूर्वपदस्थादिति संज्ञायां णः।

१—गतिकारकङस्युक्तानां कृद्भिः समासः प्राक् स्याद्युत्पत्तेरिति परिभाषा ॥

देरल्पेऽर्थे स्त्रियां ङीर्भवति । अभ्रविलिप्ती सूपविलिप्ती स्थाली ॥

सपत्न्यादौ ।२।४।५०॥ सपत्न्यादौ यः पतिशब्दस्तस्मात् स्त्रियां ङीर्भवति नकारश्चान्तादेशः । समानः पतिरस्याः सपत्नी । निपातनात् समानस्य सः । एवमेकपत्नी, पुत्रपत्नी, त्यादि ॥

पत्युर्नः ।२।४।४८ । पत्यन्ताद् बहुव्रीहेः स्त्रियां ङी वा भवति तत्सन्नियोगेऽन्तस्य नकारादेशश्च । दृढः पतिरस्या दृढपत्नी, दृढपतिः । एवं वृद्धपत्नी वृद्धपतिरित्यादि ॥

सादेः ।२।४।४९॥ सपूर्वात्पतिशब्दात् स्त्रियां ङीर्वा भवति अस्य च नकारोऽन्तादेशः । ग्रामस्य पतिः ग्रामपत्नी ग्रामपतिः अधिष्ठात्री पतिरधिपत्नी अधिपतिः । अबहुव्रीह्यर्थं वचनम् ॥

ऊढायाम् ।२।४।५१॥ पत्युः केवलादूढायां स्त्रियां ङी भवति नकारश्चान्तादेशः । पत्नी, यजमानस्य पत्नी । पतिरनूढा ॥

पाणिगृहीतीति ।२।४।५२॥ पाणिगृहीतीतिप्रकाराः शब्दाः ऊढायां स्त्रियां ङ्यन्ता निपात्यन्ते । पाणिः गृहीतोऽस्याः पाणौ वा गृहीता पाणिगृहीती पाण्यात्ती, करगृहीती । अनूढा तु पाणिगृहीता ॥

**पतिवत्न्यन्तर्वत्न्यौ भार्यागर्भिण्योः** ।२।४।५३॥ भार्याऽविधवा । तस्यामभिधेयायां पतिमच्छब्दान्ङीरस्य च पतिवत्नादेशस्तथा गर्भिण्यां स्त्रियामभिधेयायामन्तर्वच्छब्दान्ङीरस्य चाऽन्तर्वत्नादेशो निपात्यते ॥ पतिवत्नी अन्तर्वत्नी ।

**जातेरयान्तनित्यस्त्रीशूद्रात्** ।२।४।५४॥ जातिवाचिनोऽकारान्तान्नाम्नः स्त्रियां ङीर्भवति न चेत्तद्यान्तं नित्यस्त्रीजातिवाचि शूद्रशब्दो वा भवति ॥ "आकृतिग्रहणा जातिर्लिङ्गानां च न सर्वभाक् । सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह ॥१॥ आकृतिः संस्थानं तद्व्यङ्ग्या जातिः कुक्कुटी शूकरीत्यादि । तटी, पात्री, घटी । अत्रिलिङ्गा एकस्यां व्यक्तौ पुत्रादौ कथनाद् व्यक्त्यन्तरे पित्रादौ कथनं विनैव सुग्रहा जातिः- ब्राह्मणी वृषली । गोत्रप्रत्ययान्तं नाम जातिः नाडायनीत्यादि । वेदशाखावाचकं नाम जातिः कठीत्यादि । जातेरिति किम् ? मुण्डा, शुक्ला । अयान्तेति किम् ? इभ्या, क्षत्रिया । हयी, मत्सीत्यादयस्तु गौरादित्वात् । नित्यस्त्रीजातिवर्जनं किम् ? मक्षिका, यूका, खट्वा शूद्रवर्जनात् शूद्रा । अकारान्तादेव, नेह आखुः ॥

**धवाद् योगादपालकान्तात्** ।२।४।५९॥ धवो भर्त्ता, तद्वाचिनोऽकारान्ताद् योगात्सम्बन्धात् स्त्रियां वर्त्तमानात् पालकान्तशब्दवर्जितान्नाम्नो ङीर्भवति । प्रष्ठस्य भार्या

प्रष्ठी, गणकी । धवमावकानां प्रष्ठादीनां दाम्पत्यसम्बन्धेन स्त्रियां वर्त्तमानता । पालकान्तवर्जनात् गोपालिका । ज्येष्ठस्य भार्या ज्येष्ठेत्यादि स्त्रजादिपाठात् ॥

मनो रौ च वा ।२।४।६१॥ मनोर्धवनाम्नस्तद्योगात् स्त्रियां वर्त्तमानाद् ङीर्वा भवति, तत्संनियोगे औकार ऐकारश्चान्तादेशो भवति । मनोर्भार्या मनावी, मनायी, मनुः ॥

वरुणेन्द्ररुद्रभवशर्वमृडादान् चान्तः ।२।४।६२॥ एभ्यो धवनामभ्यस्तद्योगे स्त्रियां वर्त्तमानेभ्यो ङीर्भवति तत्सन्नियोगे च आनन्त आगमो भवति । वरुणस्य भार्या वरुणानी, इन्द्राणीत्यादि ॥

मातुलाचार्योपाध्यायाद्वा ।२।४।६३॥ एभ्यो धवनामभ्यस्तद्योगात् स्त्रियां वर्त्तमानेभ्यो ङीर्भवति तत्सन्नियोगे चानन्तो वा भवति। मातुलस्य भार्या मातुलानी, मातुली।

क्षुभ्नादीनाम् ।२।३॥ क्षुभ्ना इत्येवमादीनां नकारस्य णो न भवति। आचार्यानी । आचार्यी, ङीविकल्पे आचार्या । अत्र मते मातुलेत्यपि। उपाध्यायानी, उपाध्यायी, उपाध्याया ।

सूर्या[illegible]ं वा ।२।४।६४॥ सूर्यशब्दाद् धवनाम्न-

१—मोपा[illegible] मार्येत्यर्थे [illegible]पि [illegible] इष्यते । २—वरुण-शब्दाद् ङीप्रत्यये आनागमे समानदीर्घः ।

स्तद्योगाद् देवतायां स्त्रियां वर्त्तमानाद् ङीर्वा भवति तत्सन्नि-योगे आन् चान्तः । सूर्यस्य भार्या देवता सूर्याणी । सूर्या ॥

**सूर्यागस्त्ययोरीये च ।२।४।८९॥** अनयोर्यकारस्य ङी प्रत्यये ईय प्रत्यये च लुग् भवति । सूर्यस्य भार्या मानुषी सूरी ॥

**आर्यक्षत्रियाद्वा ।२।४।६६॥** आभ्यां स्त्रियां ङीर्वा भवति तत्सन्नियोगे आन् चान्तः । आर्याणी, आर्या, क्षत्रि-याणी, क्षत्रिया ॥

**यवयवनारण्यहिमाद्दोषलिप्युरुमहत्त्वे ।२।४।६५॥** यवादिभ्यो नामभ्यः क्रमाद् दोषादौ गम्यमाने स्त्रियां ङी भवति तत्सन्नियोगे आन् चान्तः । दुष्टो यवो यवानी, यवनानां लिपिर्यवनानी । उर्वरण्यमरण्यानी । महद्धिमं हिमानी ॥

**यञो डायन् च वा ।२।४।६७॥** यञ्प्रत्ययान्तात् स्त्रियां ङीर्भवति तत्सन्नियोगे डायन् चान्तो वा भवति ।

**व्यञ्जनात्तद्धितस्य ।२।४।८८॥** व्यञ्जनात्परस्य तद्धितस्य यकारस्य ङ्यां लुग् भवति । गार्गी, गार्ग्यायणी ॥

**उतोऽप्राणिनश्चायुरज्ज्वादिभ्य ऊङ् ।२।४।७३॥** उका-

१—गर्गशब्दापत्ये यञि ङी डायन् च । ङित्वादन्त्यस्वरादिलोपः । णत्वम् । डायन् विकल्पे ङ्यामकारस्य लुक्,

रान्तान्मनुष्यजातिवाचिनोऽप्राणिजातिवाचिनश्च नाम्नः स्त्रिया-मूङ्प्रत्ययो भवति युशब्दान्तं रज्ज्वादींश्च वर्जयित्वा । कुरूः[2], इक्ष्वाकूः । अलाबूः, कर्कन्धूः । उत इति किम्? विट् । अप्राणि-नश्चेति किम्? आखुः । जातेरित्येव, पटुः । अयुरज्जवादिभ्य इति किम्? अध्वर्युः स्त्री । चरणत्वाज्जातिः । रज्जुः हनुः ॥

**उपमान सहित संहित सहशफवामलक्ष्मणाद्यूरोः** ।२।४।७५॥ उपमानादिपूर्वपदादूरुशब्दात् स्त्रियामूङ् प्रत्ययो भवति । करभ इव ऊरू यस्याः करभोरूः । सहितौ ऊरू यस्याः सहितोरूः । शफौ खुरौ ताविव संश्लिष्टत्वादुपचारात् शफोरूः । उपमानादेरिति किम्? पीनोरूः ॥

**नारी सखी पङ्गूः श्वश्रूः** । २।४।७६॥ एते शब्दाः स्त्रियां ङ्यन्ता ऊङन्ताश्च निपात्यन्ते । नृनरयोर्ङ्यां नारा-देशः, नारी । सखिशब्दान्ङीः, सखी । पङ्गुशब्दादजातावूङ्, पङ्गूः । श्वशुरशब्दादूङ्, उकाराकारलोपश्च श्वश्रूः ॥

**यूनस्तिः** ।२।४।७७॥ युवन् शब्दात् स्त्रियां तिः प्रत्ययो भवति । युवतिः[3] । युवतीति तु यौतेः शत्रन्तात् स्त्रिया-मधातूदृदित इति ङीप्रत्ययः । यौतेरौणादिककिदतिप्रत्य-यान्तात्तु इतोऽक्त्यर्थादिति ङीः ॥

## इति स्त्रीप्रत्ययप्रकरणम्

२-समानदीर्घः । ३-नाम सिदिदिर्पदसंज्ञायां नाम्नो न इति नलोपः ।

## ॥ अथ समासप्रकरणम् ॥

**समर्थः पदविधिः** ।७।४।१२२॥ पदसम्बन्धी विधिः पदविधिः, तेन पदात् पदे पदस्य पदयोः पदानां वा यो विधिः स सर्वः पदविधिः । स यदा समर्थपद-सम्बन्धी भवति तदा समर्थो भवति । सर्वः पदविधिः समर्थो भवति । समर्थानां पदानामेव पदसम्बन्धी विधिर्भवतीत्यर्थः । पदविधिश्च समास-नामधातु-कृत्-तद्धितो-पपदविभक्ति-युष्मदस्मदादेश-प्लुतरूपो भवति । यत्र न सामर्थ्यं तत्र न समासादिः पदविधिः । सामर्थ्यं व्यपेक्षा एकार्थीभावश्च । वाक्ये पदानां परस्पराकाङ्-क्षालक्षणा व्यपेक्षा, वृत्तौ समासादौ एकार्थीभावः, यत्र समुदायार्थो मुख्योऽवयवार्थ उपसर्जनीभूतो निवृत्तो वा भवति । एवं च पृथगर्थानां पदानामेकार्थबोधकत्वमेकार्थी-भावः । स च समासकृत्तद्धितनामधातुषु । वाक्ये उपपद-विभक्त्यादौ च व्यपेक्षैवेति ॥

**नाम नाम्नैकार्थ्ये समासो बहुलम्** ।३।१।१८॥ नाम नाम्ना सहैकार्थ्ये एकार्थीभावे सति समाससंज्ञं स्याद् बहुलम् । अधिकार-सूत्रमिदम् । तेन सर्वः समासो नाम्नो नाम्नैकार्थ्ये सति भवति । विधिसूत्रं चेदम् । तेन यत्रै-कार्थता दृश्यते, तत्र बहुव्रीह्यादिसंज्ञाया अप्राप्तावनेन समासो बोध्यः । समासफलं चैकपद्यम् ॥

ऐकार्थ्ये ।३।२।८। ऐकार्थ्यमेकपद्यम् । तन्निमित्तस्य स्यादेर्लुप् भवति । ऐकार्थ्यमलौकिकविग्रहवाक्ये भवति । वृत्तिश्चतुर्धा–समासः कृत् तद्धितो नामधातुश्च । वृत्तिसमानार्थं वाक्यं विग्रहः, स द्विविधः-लौकिकोऽलौकिकश्च । प्रयोगार्हो लौकिकः, यथा–राज्ञः पुरुष इत्यादिः । प्रयोगानर्होऽलौकिकः, यथा–राजन् ङस् पुरुष सि इत्यादिः । तत्रालौकिकविग्रहवाक्ये एकार्थतायां सत्यां समाससंज्ञा, ततः समासशास्त्रे प्रथमानिर्दिष्टस्य पूर्वप्रयोगः, ततः समासान्तः प्रत्ययः, ततोऽनेन स्यादिलुबिति बोध्यम् । अनेन लुब्विधानाऽन्यथानुपपत्त्या समासशास्त्रे 'नाम नाम्ने' त्युक्तावपि विभक्त्यन्तानामेव समासो विज्ञायते । यस्मिन् स्यादौ सत्येकार्थता स स्यादिरैकार्थ्यनिमित्तम् । समासाज्जायमानस्तु स्यादिर्नैकार्थतानिमित्तमिति राजपुरुषादिनाम्नो जातस्य स्यादेर्न लुप् । अनाम्नोऽप्यनाम्नाऽपि समासः क्वचिद् बहुलवचनाद् बोध्यः । समासः षोढा – बहुव्रीहिरव्ययीभावस्तत्पुरुषः कर्मधारयो द्विगुर्द्वन्द्वश्च । तत्र प्रायेणाऽन्यपदार्थप्रधानो बहुव्रीहिः । प्रायेण पूर्वपदार्थप्रधानोऽव्ययीभावः । प्रायेणोत्तरपदार्थप्रधानस्तत्पुरुषः कर्मधारयो द्विगुश्च, प्रायेणोभयपदार्थप्रधानो द्वन्द्वः । नाम नाम्नेतिविहितः समासोऽप्युत्तरपदार्थप्रधान एव । बहुव्रीह्यादिलक्षणाऽभावेऽयं समास इति

न बहुव्रीह्यादिसंज्ञाऽस्य । तेनायं केवलसमास इति नाम-समास इति समास इत्येव वोच्यते । समासः पुनर्द्वि-विधो नित्योऽनित्यश्च । अविग्रहोऽस्वपदविग्रहो वा नित्य-समासः, स्वपदविग्रहस्त्वनित्यः ॥

**प्रथमोक्तं प्राक्** ।३।१।१४८॥ अत्र समासप्रकरणे समासविधायकसूत्रे यत्प्रथमान्तेन पदेनोक्तं तत्पूर्वं निपतति । विस्पष्टं पटुः-[1]विस्पष्टपटुः । पूर्वं भूतो [2]भूतपूर्वः । कृतः पूर्वमनेनेति कृतपूर्वी[3] कटम् ॥

## इति नामसमासप्रकरणम्[4] ॥

## अथ बहुव्रीहि समास प्रकरणम् ॥

**सुज्वार्थे संख्या सङ्ख्येये संख्यया बहुव्रीहिः** ॥३।१।१९॥ सुज्वार्थे वर्त्तमानं संख्यावाचि नाम [1]संख्येये

१-विस्पष्टं पटुरिति लौकिकविग्रहः, अत्रैव समाससंज्ञा, विस्पष्ट अमिति विभक्त्यन्तनाम्नः पटु सि इति विभक्त्यन्त नाम्ना । अत्र समाससूत्रे नामेति प्रथमोक्तम्, नामत्वं चोभयत्र, तथापि शिष्टप्रयोगमनुसृत्य विस्पष्ट अमित्येव प्रथमान्तनामपदेन गृह्यते इति प्रथमोक्ततया तस्यैव पूर्वनिपातः, तत ऐकार्थ्ये इति स्यादिलुप् । समासस्याधातुविभक्तिवाक्यत्वेन नामसंज्ञा, ततः स्यादिः । एवमग्रेऽपि । २-अत्र भूतशब्दस्य पूर्व-निपातः । ३-कृत सि पूर्व अमित्यलौकिक विग्रहे अनेनेति तद्धितार्थे समासः, कृतशब्दस्य पूर्वनिपातः, स्यादिलुक्, तत इन् प्रत्ययः । ४-'नाम नाम्ने' ति सूत्रेण विहितत्वादयं समासो नामसमास इत्युच्यते ।

१-संख्यावत्यर्थे ।

वर्तमानेन संख्यावाचिना नाम्ना सहैकार्थ्ये समाससंज्ञं बहुव्रीहिसंज्ञं च भवति । सुचोऽर्थौ वारः, वार्थौ विकल्पः संशयो वा ॥

**प्रमाणीसंख्याड्डः ।७।३।१२८॥** प्रमाणीशब्दान्तात्संख्यावाचिशब्दान्ताच्च बहुव्रीहेर्डः समासान्तः प्रत्ययो भवति । द्विर्दश द्विदशाः । द्विर्विंशतिर्द्वित्रिंशाः[3] । वारार्थे समास इत्युक्तार्थत्वादुक्तार्थानामप्रयोग' इति सुचो न प्रयोगः ॥

**संख्या समासे ।३।१।१६३॥** समासमात्रे सङ्ख्यावाचिनाम अनुपूर्वं पूर्वं निपतति । अल्पसंख्यायाः पूर्वप्रयोगार्थं सूत्रम् । द्वौ वा त्रयो वा द्वित्राः[4], पञ्च वा षड् वा पञ्चषाः ॥

**एकार्थं चाऽनेकं च ।३।१।२२॥** एकार्थं समानाधिकरणम् । एकमनेकं चैकार्थं नाम अव्ययं च नाम्ना द्वितीयाद्यन्तस्याऽन्यस्य पदस्यार्थे समस्यते स च समासो बहुव्रीहिसंज्ञको भवति । स्याद्यन्तानां समास इति प्राग् वर्णितम् । 'अव्ययस्ये'ति लुग्विधानादव्ययेभ्योऽपि स्यादिर्ज्ञाप्यते इति स्याद्यन्तता तेषां बोध्या । बहुव्रीहेरन्यपदार्थस्य प्रधानत्वात्तल्लिङ्गसंख्याविभक्तयः ।

२–द्वि औ दशन् जसित्यलौकिकविग्रहः । समासे डः प्रत्ययः समासान्तः, द्विशब्दस्य प्रथमोक्तत्वात्प्राक्प्रयोगः । स्यादिलुक्, डित्यन्त्यस्वरादिलोपः, बहुवचने जस् । ३–विंशतेरिति तिशब्दलोपः । ४–डित्त्वाद् इकारलोपः । ५–डित्यन्त्यस्वरादिलोपः ।

**क्ताः** ।३।१।१५१।। क्तप्रत्ययान्तं बहुव्रीहौ पूर्वं निपतति । आरूढा वानरा यं स आरूढवानरो वृक्षः । कृतः कटोऽनेन कृतकटः, उपहृतो बलिरस्यै इत्युपहृतबलिर्यक्षी । भीतः शत्रुर्यस्मात् स भीतशत्रुर्नृपः ।

**गोश्चान्ते ह्रस्वोऽनंशिसमासेयोबहुव्रीहौ** ।२।४।९६।। गौणस्याऽक्विपो गोशब्दस्य ङ्याद्यन्तस्य च नाम्नोऽन्ते वर्त्तमानस्य ह्रस्वो भवति न चेदसावंशिसमासान्त ईयस्वन्त-बहुव्रीह्यन्तो वा भवति ।

**परतः स्त्री पुंवत् स्त्र्येकार्थेऽनूङ्** ।३।२।४९।। परतः =विशेष्यवशाद् यः शब्दः स्त्रीलिङ्गः स स्त्रियां वर्त्तमाने समानाधिकरणे उत्तरपदे परे पुंवद् भवति, न चेदूङन्तो भवति ।।

**विशेषणसर्वादिसंख्यं बहुव्रीहौ** ।३।१।१५०।। विशेषणवाचि सर्वादि संख्यावाचि च नाम बहुव्रीहौ पूर्वं निपतति । चित्रा गावो यस्य स चित्रगुः[1] ।।

**शेषाद्वा** ।७।३।१७५।। यस्माद् बहुव्रीहेः समासान्तः प्रत्यय आदेशो वा न विहितः स शेष इह, तस्माच्छेषात्कच् प्रत्ययः समासान्तो वा भवति । वीराः पुरुषाः सन्त्य-स्मिन् स वीरपुरुषको ग्रामः । कटे कृतमनेन स कृतंकटः[2] ।

१–चित्रा जस् गो जस् इत्यलौकिकविग्रहः । विशेषणस्य प्राक्प्रयोगः पुंवद्भावो ह्रस्वश्च [illegible] । २–क्तान्तस्य पूर्वनिपातः ।

सप्तम्यन्तस्य 'न सप्तमी' त्यादिना प्राक्प्रयोगनिषेधाद् व्यधिकरण बहुव्रीहिर्ज्ञाप्यते। आरूढा बहवो वानरा यं स आरूढबहुवानरो वृक्षः। परत्वात् क्तान्तस्य पूर्वनिपातः।

**नाप्प्रियादौ** ।३।२।५३॥ पूरण्यप्प्रत्ययान्ते स्त्र्येकार्थे उत्तरपदे प्रियादौ च परे परतः स्त्री पुंवन्न भवति। पञ्च कुमार्यः प्रिया अस्य पञ्चकुमारीप्रियः[3]। अव्ययम्—उच्चैर्मुखमस्य उच्चैर्मुखः, अन्तरङ्गान्यस्य अन्तरङ्गः[4]।

**तुमश्च मनःकामे** ।३।२।१४०॥ तुम् प्रत्ययान्तस्य सम् शब्दस्य च प्रत्येकं मनसि कामे चोत्तरपदे लुगन्तादेशो भवति। कर्तुं कामोऽस्य कर्तुकामः। गन्तुं मनोऽस्य गन्तुमनाः[5]। अस्ति क्षीरमस्या अस्तिक्षीरा[6] गौः।

**उष्ट्रमुखादयः** ।३।१।२३॥ उष्ट्रमुखादयो बहुलं बहुव्रीहिसमासा निपात्यन्ते। उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः। वृषस्कन्ध इव स्कन्धोऽस्य वृषस्कन्धः। हंसगमनमिव गमनमस्या हंसगमना। चन्द्रसदृशं मुखं यस्याः सा चन्द्रमुखी[1]। बिम्बसदृशावोष्ठौ यस्याः सा बिम्बोष्ठी[2]। पितृ-

३—जसःस्थानिवत्त्वात्पदसंज्ञायां नाम्नो न इति नलोपः। ४—अव्ययस्य स्याद्यन्तत्वं प्रागुक्तमेव। अत्र 'अतोऽती' ति न, रोरभावात्। ५—तुमश्चेति तुमो मकारस्य लुक्, अभ्वादेरिति दीर्घः। ६—अस्तीति विभक्त्यन्ताभमव्ययम्। १—सदृशशब्दलोपः। नखमुखादिति ङीः। २—वौष्ठौतावित्यलुक्। नासिकोदरौष्ठेति ङीः।

सदृशं स्थानमस्य पितृस्थानः। मातरीव स्थानीयमस्यां सा मातृस्थानीया। समासेनोक्तार्थत्वादिव शब्दाप्रयोगः।

**अमूर्धमस्तकात् स्वाङ्गादकामे ।३।२।२२॥** मूर्धमस्तकशब्दवर्जितात् स्वाङ्गवाचिनोऽदन्ताद्व्यञ्जनान्ताच्च शब्दात् परस्याः सप्तम्याः कामशब्दादन्यस्मिन्नुत्तरपदे परे लुप् न भवति। कण्ठे स्थितः कालोऽस्य कण्ठेकालः। अकाम इति किम्? मुखे कामोऽस्य मुखकामः। बहुलाधिकारात् करे कमलं करकमलमित्यादि। केशसंघातश्चूडाऽस्य केशचूडः केशसंघातचूडः। प्रपतितानि पर्णान्यस्य प्रपर्णः प्रपतिपर्णः। अविद्यमानः पुत्रोऽस्य अपुत्रः, अविद्यमानपुत्रः। एषु बहुव्रीहिषु संघातादेर्मध्यमपदस्य लोपः। आकृतिगणोऽयम् ॥

**सहस्तेन ।३।१।२४॥** सह इत्येतन्नाम तुल्ययोगे विद्यमानार्थे च वर्त्तमानं तृतीयान्तेन नाम्नाऽन्यपदार्थे समस्यते, स बहुव्रीहिः।

**सहस्य सोऽन्यार्थे ।३।२।१४३॥** अन्यपदार्थे, बहुव्रीहौ समासे उत्तरपदे परे सहशब्दस्य स इत्ययमादेशो भवति वा। तुल्ययोगे–सह पुत्रेण यः स सपुत्रः[३] पिता आगतः। आगमनमुभयोस्तुल्यम्। विद्यमानार्थे=सह कर्मणा वर्त्तते यः

---

३–पुत्र टा सहेत्यत्र समासः, प्रथमोक्तत्वात्सहस्य प्राक्प्रयोगे सादेशः।

स सकर्मकः[४]। सह विद्यया वर्त्तते यः स सविद्यः ॥

**नाऽऽशिष्यगोवत्सहले** ।३।२।१४८॥ आशिषि गम्यमानायां गवादिवर्जित उत्तरपदे परे सहशब्दस्य सादेशो न भवति। भद्रं सहसङ्घायाऽऽचार्याय। स्वस्ति गुरवे सहशिष्याय। अत्र न भवति–स्वस्ति भवते सगवे सहगवे सवत्साय सहवत्साय सहलाय सहहलाय ॥

**दिशो रूढ्याऽन्तराले** ।३।१।२५॥ रूढ्या दिशः सम्बन्धि नाम रूढ्यैव दिशः सम्बन्धिना नाम्नाऽन्तरालेऽन्यपदार्थे वाच्ये समस्यते, स समासो बहुव्रीहिसंज्ञो भवति ॥

दक्षिणस्याश्च पूर्वस्याश्च दिशोर्यदन्तरालं सा दक्षिणपूर्वा[५]। प्रतिषेधविषयेऽपि–सर्वा प्रियाऽस्य सर्वप्रियः[१]। प्रियादित्वात्प्रतिषेधः प्राप्तः। पूर्वाशब्दस्य प्रथमोक्तत्वं पूर्वदक्षिणा दिक्[२]। सर्वा शुक्ला यस्य सर्वशुक्लः[३]। द्वे कृष्णे यस्य द्विकृष्णः[४]। यत्राऽन्यपदार्थस्यैकदेशो विशेषणतया ज्ञायते स तद्गुणसंविज्ञानो बहुव्रीहिरन्योऽतद्गुणसंविज्ञानः।

---

४–शेषादिति कचि नामसिदिति पदसंज्ञायां नाम्नो न इति न लोपः।
५–गोश्चान्ते इति ह्रस्वः। १–गोश्चान्ते इति ह्रस्वः। चतुर्थ्येकवचनम्।
२–सर्वादय इतिपुंवत् गोश्चान्ते इति ह्रस्वः। ततः स्त्रियामाप्। उभयोः सर्वादित्वाद् यथेष्टं पूर्वनिपातः। ३–गोश्चान्त इति ह्रस्वः।
४–संख्यायाः पूर्वप्रयोगः।

लम्बौ कर्णौ यस्य स लम्बकर्णः ॥

जातिकालसुखादेर्नवा ।३।१।१५२॥ जातिवाचिभ्यः कालवाचिभ्यः सुखादिभ्यश्च शब्दरूपेभ्यो बहुव्रीहौ क्तान्तं पूर्वं वा निपतति । पाणिः गृहीतोऽस्याः पाणिगृहीती[६], गृहीतपाणिः । कृतः कटोऽनेन कृतकटः कटकृतः । कटव्यक्तिविवक्षायां तु 'क्ता' इत्यनेन कृतकट इत्येव । मासो यातोऽस्या मासयाता[७], यातमासा । गतं वर्षमस्य गतवर्षः, वर्षगतः । सुखं यातमस्या यातसुखा, सुखयाता, दुःखहीना, हीनदुःखा ॥

आहिताग्न्यादिषु ।३।१।१५३॥ आहिताग्न्यादिषु बहुव्रीहिसमासेषु क्तान्तं पूर्वं वा निपतति । आहितोऽग्निर्येन स आहिताग्निः, अग्न्याहितः । दन्तजातः जातदन्तः । गतार्थः, अर्थगतः । आकृतिगणोऽयम् ॥

प्रहरणात् ।३।१।१५४॥ प्रहरणवाचिनः शब्दात् क्तान्तं बहुव्रीहौ पूर्वं वा निपतति । उद्यतोऽसिरनेन उद्यतासिः, अस्युद्यतः ॥

धनुषो धन्वन् ।७।३।१५८॥ धनुःशब्दस्य बहुव्रीहौ धन्वन् इत्ययमादेशः समासान्तो वा भवति । आकृष्टं धनुरनेन आकृष्टधन्वा[१], धनुराकृष्टः[३] । शार्ङ्गं धनुरस्य शार्ङ्गधन्वा ॥

---

५–विशेषणस्य प्राक्प्रयोगः । ६–पाणिगृहीतीति ङीः । ७–स्त्रियामाप् ।
१–समासात्सौ नि दीर्घः । सिलोपनलोपौ । २–सेः स्थानिवद्भावात्पदत्वे रुः । ३–विशेषणस्य पूर्वनिपातः । शृङ्गस्य विकारः शार्ङ्गम् ॥

**न सप्तमीन्द्वादिभ्यः** ।३।१।१५५॥ इन्द्वादेः प्रहरणवाचिनश्च शब्दात् पूर्वं सप्तम्यन्तं न निपतति बहुव्रीहौ । इन्दुर्मौलौ यस्य स ईन्दुमौलिः । चक्रपाणिः, वज्रहस्तः ।

**नाभेर्नाम्नि** ।७।३।१३४॥ नाभिशब्दान्ताद् बहुव्रीहेरप् समासान्तो भवति संज्ञायाम् । पद्मं नाभावस्य पद्मनाभः । ऊर्णनाभः ।

**गड्वादिभ्यः** ।३।१।१५६॥ गड्वादिभ्यः शब्देभ्यः सप्तम्यन्तं वा पूर्वं निपतति बहुव्रीहौ । कण्ठे स्थितो गडुरस्य कण्ठेगडुः, गडुकण्ठः । उष्ट्रमुखादित्वात्समासः । कण्ठे गडुरस्येति व्यधिकरणबहुव्रीहिर्वा । व्यवस्थितविभाषेयम् । तेन वहेगडुरित्येव ।

**प्रियः** ।३।१।१५७॥ प्रियशब्दो बहुव्रीहौ समासे पूर्वं वा निपतति । प्रियं विश्वं यस्य स प्रियविश्वः, विश्वप्रियः ॥

**स्वाङ्गान् ङीर्जातिश्चामानिनि** ।३।२।५६॥ स्वाङ्गाद् यो विहितो ङीस्तदन्तो, जातिवाची च यः शब्दः परतः स्त्री स पुंवन्न भवति मानिन् शब्दश्चेत्परो न भवति । दीर्घकेशी भार्या यस्य स दीर्घकेशीभार्यः । कठीभार्यः, शूद्राभार्यः ।

---

४—इन्दु लि मौलि [illegible] व्यधिकरण बहुव्रीहिः अत्र [illegible] एव [illegible] । [illegible] । ५—[illegible] समा[illegible] [illegible]वर्णस्येतीकारलोपः । ६—अमूर्धमस्तकादिति सप्तम्यलुक् । ७—स्वाङ्गान्ङीः । ८—चरणवाचकत्वाज्जातौ ङीः । गोश्चान्त इति ह्रस्वः । ९—जातावप्यजादित्वादाप् ।

मानिनि तु–आत्मानं दीर्घकेशीं मन्यते सा दीर्घकेशमानिनी। नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्[10] ॥

**पूरणीभ्यस्तत्प्राधान्येऽप्** ।७।३।१३०॥ पूरणप्रत्ययान्तो यः स्त्रीलिङ्गशब्दस्तदन्ताद् बहुव्रीहेरप्समासान्तो भवति पूरण्याः प्राधान्ये। अत्र समासेनाभिधीयमानोऽर्थः प्रधानम्। कल्याणी पञ्चमी[1] यासां ताः कल्याणीपञ्चमा रात्रयः। अत्र रात्रयः समासार्थः, तासु पञ्चम्यपि रात्रित्वेनानुप्रविष्टेति पूरणीप्राधान्यम् ॥

**तद्धिताककोपान्त्यपूरण्याख्याः** ।३।२।५४॥ तद्धितप्रत्ययस्याऽकप्रत्ययस्य च यः कः स उपान्त्यो यासां ताश्च पूरणीप्रत्ययान्ताश्च संज्ञारूपाश्च परतः स्त्रियः पुंवन्न भवन्ति। मद्रिकाभार्या[2] यस्य मद्रिकाभार्यः, कारिकाभार्यः[3], द्वितीया[4] भार्या यस्य स द्वितीयाभार्यः, दत्ता[5] भार्या यस्य स दत्ताभार्यः ॥

**नञ्सुव्युपत्रेश्चतुरः** ।७।३।१३१॥ नञ् सु वि उप त्रि इत्येतेभ्यः परो यश्चतुर्शब्दस्तदन्ताद् बहुव्रीहेरप्प्रत्ययः

१०–मन्याण्णिन्, स्त्रियां नान्तत्वान्ङीः। क्यङ्मानीति पुंवत्।

१–पूरणार्थे मटि स्त्रियां टित्वान्ङीः। २–अपि अवर्णेकर्णस्येतीकारस्लोपः। स्त्रियामाप्। नाऽप्प्रियादाविति पुंवत्वनिषेधः ३–भवेऽर्थे ह्रदिमद्रादिति कः, स्त्रियामाप्, अस्याय[illegible]दितीत्वम्। ४–तृणातीणकः। स्त्रियामाप्, इत्वम्। ५–पूरणे तीयः, स्त्रियामाप्। ६–संज्ञैषा।

समासान्तो भवति ॥

**नञत्** ।३।२।१२५॥ नञ् शब्द उत्तरपदे परे अकारो भवति । न=अविद्यमानानि चत्वारि यस्य सोऽचतुरः । सु-शोभनानि, वि=विगतानि, चत्वारि यस्य स सुचतुरो विच-तुरः । उप=समीपे चत्वारो येषां ते उपचतुराः । त्रयो वा चत्वारो वा त्रिचतुराः ।

**नञ् सु दुर्भ्यः सक्तिसक्थिहलेर्वा** ।७।३।१३६॥ नञ् सु दुर् इत्येतेभ्यः परे ये सक्ति सक्थिहलिशब्दास्त-दन्ताद् बहुव्रीहेरप् समासान्तो भवति वा । सञ्जनं सक्तिः । न=अविद्यमाना सक्तिरस्य असक्तः[११], असक्तिः, सु=शोभना सक्तिरस्य सुसक्तः[१२], सुसक्तिः । दुर्=दुर्गता कष्टा वा सक्तिरस्य दुःसक्तो दुःसक्तिः । एवमसक्थोऽहल इत्यादि ॥

**सक्थ्यक्ष्णः स्वाङ्गे** ।७।३।१२६॥ स्वाङ्गवाची यः सक्थिशब्दोऽक्षिशब्दश्च तदन्ताद् बहुव्रीहेः टः समासान्तो भवति । दीर्घे सक्थि यस्य दीर्घसक्थः । विशाले अक्षिणी यस्याः सा विशालाक्षी । पङ्कजसदृशे अक्षिणी यस्याः पङ्कजाक्षी ।

---

७-उष्ट्रमुखादिसमासः । ८-एकार्थमिति समासः । ९-उष्ट्रमुखादि-समासः । १०-सुज्वार्थ इति समासः । ११-उष्ट्रमुखादि समासः । अव-र्णेतीकारलोपः । समासान्तस्तद्धिताधिकारः । १२-एकार्थमिति समासः ।

१-अवर्णेतीकारलोपः । २-अवर्णेतीकार लोपः, टित्वान्ङीः, अस्य ङ्या मित्यलोपः ।

**प्रजाया अस् ।७।३।१३७।।** नञ्सुदुर्भ्यः परो यः प्रजाशब्दस्तदन्ताद् *बहुव्रीहेरस् समासान्तो भवति । न=अविद्यमाना* प्रजा अस्य अप्रजाः[३], अप्रजसौ, । सुप्रजाः, दुष्प्रजाः[४] ।।

**मन्दाल्पाच्च मेधायाः ।७।३।१३८।।** मन्द अल्प इत्येताभ्यां नञादिभ्यश्च परो यो मेधाशब्दस्तदन्ताद् बहुव्रीहेरस् समासान्तो भवति । मन्दा मेधाऽस्य मन्दमेधाः[५], अल्पमेधाः । एवममेधा इत्यादि ।।

**द्विपदाद् धर्मादन् ।७।३।१४१।।** धर्मशब्दान्ताद् द्विपदाद् बहुव्रीहेरन् समासान्तो भवति । साधूनां धर्मः साधुधर्मः, साधुधर्म इव धर्मोऽस्य साधुधर्मा[६] । स धर्मोऽस्य तद्धर्मा । तद्धर्मक[७] इत्यादौ तु मतान्तरेण विकल्पः । द्विपदादिति किम् ? परमः स्वो धर्मोऽस्य परमस्वधर्मकः[८] ।।

**सुपूत्युत्सुरभेर्गन्धादिद् गुणे ।७।३।१४४।।** सु पूति उत् सुरभि इत्येतेभ्यः परो यो गन्धशब्दो गुणे वर्तते तदन्ताद् बहुव्रीहेरित् समासान्तो भवति । शोभनो गन्धो गुणोऽस्य सुगन्धि चन्दनम् । स्वादिभ्य इति किम् ? तीव्रो गन्धोऽस्य, तीव्रगन्धं हिङ्गु । गुण इति किम् ?

---

३–गोश्चान्त इति ह्रस्वः, अवर्णेवर्णेत्यकारलोपः । सौ अभ्वादेरिति दीर्घः । ४–निर्दुरिति षः । ५–परतः स्त्रीति पुंवत् । ६–उष्ट्रमुखादिसमासः । अवर्णेवर्णेत्यलोपः; सौ निदीर्घः । ७–शेषाद्वेति कप् । ८–अवर्णेवर्णेत्यलोपः ।

शोभना गन्धा गन्धद्रव्याण्यस्य सुगन्ध आपणिकः। इदिति तकारउच्चारणार्थः ॥

**वाऽऽगन्तौ** ।७।३।१४५॥ स्वादिभ्यः पर आगन्तौ गुणे यो गन्धशब्दस्तदन्ताद् बहुव्रीहेरित् समासान्तो वा भवति। पूतिः गन्धोऽस्य पूतिगन्धि पूतिगन्धं वा जलम् ॥

**वाऽल्पे** ।७।३।१४६॥ अल्पेऽर्थे यो गन्धशब्दस्तदन्ताद् बहुव्रीहेरित्समासान्तो वा भवति। सूपस्य गन्धोमात्राऽस्मिन् सूपगन्धि सूपगन्धं वा भोजनम्। उष्ट्रमुखादित्वाद् बहुव्रीहिर्व्यधिकरणबहुव्रीहिर्वा ॥

**वोपमानात्** ।७।३।१४७॥ उपमानात्परो यो गन्धशब्दस्तदन्ताद् बहुव्रीहेरित् समासान्तो वा भवति। उत्पलस्येव गन्धोऽस्य उत्पलगन्धि उत्पलगन्धं वा मुखम् ॥

**पात्पादस्याऽहस्त्यादेः** ।७।३।१४८॥ हस्त्यादिवर्जितादुपमानात्परस्य पादशब्दस्य बहुव्रीहौ पादित्ययमादेशः समासान्तो भवति। व्याघ्रस्येव पादावस्य व्याघ्रपात्। अहस्त्यादेरिति किम्? हस्तिन इव पादावस्य हस्तिपादः। अजपादः ॥

**सुसंख्यात्** ।७।३।१५०॥ सुपूर्वस्य संख्यापूर्वस्य च पादशब्दस्य बहुव्रीहौ पादित्ययमादेशः समासान्तो

१–उष्ट्रमुखादिः। २–पदत्वे नाम्नो न इति नलोपः।

भवति । शोभनौ पादावस्य सुपात् । द्वौ पादावस्य द्विपात् ।

**यस्वरे पादः पदणिक्यघुटि** ।२।१।१०२।। पादन्तस्य नाम्नो णिक्यघुड्वर्जिते यकारादौ स्वरादौ च प्रत्यये परे पदित्ययमादेशो भवति । स्त्रियां सुपदी सुपात्[3] । एवमन्यत्र ।।

**वयसि दन्तस्य दतृ** ।७।३।१५१।। सुपूर्वस्य संख्यापूर्वस्य च बहुव्रीहौ वयसि गम्यमाने दन्तशब्दस्य दतृ इत्ययमादेशः समासान्तो भवति । ऋकार इत् ङ्याद्यर्थः । सुजाता दन्ता अस्य सुदन्[4] बालः, सुदती[5] कुमारी । एवं द्विदन्, द्विदती ।।

**जायाया जानिः** ।७।३।१६४।। जायाशब्दस्य बहुव्रीहौ जानिरित्ययमादेशः समासान्तो भवति । युवतिर्जाया यस्य युवजानिः[1] । भूर्जाया यस्य भूजानिः ।।

**स्त्रियामूधसो न्** ।७।३।१६९।। ऊधस् शब्दस्य बहुव्रीहौ स्त्रियां नकारादेशः समासान्तो भवति । 'षष्ठ्या अन्तस्य' । कुण्डमिव ऊधोऽस्याः कुण्डोध्नी[2] । घटोध्नी ।।

**समानस्य धर्मादिषु** ।३।२।१४९।। समानशब्दस्य

३-वा पाद इति वा ङीः । ४-ऋदुदित इति नोन्तः । सिलोपः, संयोगान्तलोपः । ५-अधातूदृदित इति ङीः । १-पुंवत् । नामसिदिति पदत्वान्नाम्नो न इति नकारलुक् । २-अन्त्यस्य नकारादेशः । स्त्रियां नृत इति ङीः । अनोऽस्येत्यलुक् ।

धर्मादिषूत्तरपदेषु सादेशो भवति। समानो धर्मोऽस्य सधर्मा। स एव साधर्मिकः॥

इनः कच् ।७।३।१७०॥ इन्नन्ताद् बहुव्रीहेः स्त्रियां वर्त्तमानात् कच् प्रत्ययः समासान्तो भवति। बहवो दण्डिनोऽस्यां बहुदण्डिका नगरी। अस्त्रियां शेषाद्वेति कच्। बहुदण्डी, बहुदण्डिको ग्रामः॥

ऋन्नित्यदितः ।७।३।१७१॥ ऋकारान्ताद् नित्यं दित्=दैप्रभृतिरादेशो यस्मात्तदन्ताच्च बहुव्रीहेः कच् समासान्तो भवति। बहवः कर्त्तारो यस्य स बहुकर्तृको-जिनजन्मोत्सवः॥

ङ्यादीदूतः के ।२।४।१०४॥ ङीप्रत्ययस्य आकारे-कारोकाराणां च के प्रत्यये ह्रस्वो भवति। इति प्राप्ते—

न कचि ।२।४।१०४॥ ङ्यादीदूतः कचि प्रत्यये परे ह्रस्वो न भवति। बह्व्यः कुमार्यो यस्मिन् बहुकुमारीको ग्रामः। एवं बहुनदीको बहुवधूक इत्यादि॥

दध्युरःसर्पिर्मधूपानच्छालेः ।७।३।१७२॥ दधि उरस् सर्पिस् मधु उपानह् शालि इत्येतदन्ताद् बहुव्रीहेः कच् समासान्तो भवति। प्रियदधिकः॥

---

३–अन्, अवर्णेवर्णस्येत्यलुक्। सौ नि दीर्घः। ४–कचि नामसिदिति पदत्वे नाम्नो न इति न लुक्, स्त्रियामाप्। ५–परतः स्त्रीति पुंवत्।

**प्रत्यये** ।२।३।६।। अनव्ययस्य यो रेफस्तस्य प्रत्ययविषयेषु कखपफेषु सो भवति । व्यूढम् उरोऽस्य व्यूढोरस्कः[1] । पाशकल्पक काम्येष्वेवेच्छन्ति ।।

**नामिनस्तयोः षः** ।२।३।८।। पाशकल्पककाम्येषु प्रत्ययेषु परेषु नामिन उत्तरस्य रेफस्य षकार आदेशो भवति । प्रियसर्पिष्कः[2], प्रियमधुकः, प्रिया उपानद् यस्य प्रियोपानत्कः[3] । प्रियशालिकः ।।

**पुमनडुन्नौपयोलक्ष्म्या एकत्वे** ।७।३।१७३।। एकत्वविषये पुम्स् अनडुह् नौ पयस् लक्ष्मी इत्येते शब्दाश्चेत्तदन्ताद् बहुव्रीहेः कच् समासान्तो भवति । प्रियः पुमानस्य प्रियपुंस्कः[4] । प्रियोऽनड्वानस्य प्रियानडुत्कः । प्रिया नौरस्य प्रियनौकः, प्रियपयस्कः[5], प्रियलक्ष्मीकः ।।

**नञोऽर्थात्** ।७।३।१७४।। नञः परो योऽर्थशब्दस्तदन्ताद् बहुव्रीहेः कच् समासान्तो भवति ।।

**अन् स्वरे** ।३।२।१२९।। नञः स्वरादावुत्तरपदे परेऽन् इत्ययमादेशो भवति । न=अविद्यमानोऽर्थोऽस्या-

---

१–क्तान्तस्य पूर्वप्रयोगः, नामसिदिति पदत्वाद् रुः । २–प्रियः, नामेतिपदत्वाद्रुः । ३–परत इति पुंवत् । प्रियः । नामेति पदत्वान्नहाहोरिति धः, प्रथमः । ४–प्रियः । नामेति पदत्वात् पदस्येति सलोपः । पुमोऽशिटीति रः । पुंस इति सः । ५–प्रियः । पदत्वाद् रुः । प्रत्यय इति सः ।

नर्थकं वचः। नञोऽन्यत्र वा कच्। अपकृष्टोऽर्थोऽस्याऽपार्थम्, अपार्थकं वचः॥

**न नाम्नि**: ।७।३।१७६॥ संज्ञायां विषये कच् समासान्तो न भवति। विश्वानि यशांसि यस्य विश्वयशाः। एवं नामा पुरुषः। पद्मस्येव श्रीर्यस्याः सा पद्मश्रीः, एवंनाम्नी स्त्री॥

**ईयसोः** ।७।३।१७७॥ ईयस्वन्तात् समासात् कच् समासान्तो न भवति। बहूनि श्रेयांसि यस्य बहुश्रेयान्। नामग्रहणे लिङ्गविशिष्टस्यापि। बह्व्यः श्रेयस्योऽस्य बहुश्रेयसी। ईयो बहुव्रीहाविति पर्युदासान्न ह्रस्वः॥

**सहात्तुल्ययोगे** ।७।१।१७८॥ तुल्ययोगे यः सहशब्दस्तदादेर्बहुव्रीहेः कच् समासान्तो न भवति। सपुत्र आगतः। विद्यमाने तु भवत्येव—सह विद्यमानं कर्मास्य सकर्मकः॥

**भ्रातुः स्तुतौ** ।७।३।१७९॥ भ्रात्रन्ताद् बहुव्रीहेः कच् न भवति प्रशंसायां गम्यायाम्। सुभ्राता॥

---

६—अन् इति सूत्रे निर्देशाद् ह्रस्वादिति न द्वित्वम्। ७—सर्वादिः प्राक्प्रयोगः। अम्बादेरिति दीर्घः। ८—उष्ट्रमुखादिः। ९—ऋदुदित इति नोऽन्तः, न्स्महतोः। १०—संख्यायाः प्राक्प्रयोगः, पर्युदासाद् गोश्चान्त इति न प्रवर्तते। इति बहुव्रीहिसमासः।

सुभ्र्वादिभ्यः ।७।३।१८२॥ सुभ्र्वादिभ्यः कच् न भवति। शोभने भ्रुवावस्याः सुभ्रूः । जातिवचनादूङ् । आकृतिगणोऽयम् ॥ इति बहुव्रीहिसमासप्रकरणम् ॥

## ॥ अथाऽव्ययीभावसमासप्रकरणम् ॥

तत्रादाय मिथस्तेन प्रहृत्येति सरूपेण युद्धेऽव्ययीभावः ।३।१।२६॥ सप्तम्यन्तं नाम मिथ आदायेति क्रियाव्यतिहारे, तृतीयान्तं नाम मिथः प्रहृत्येति क्रियाव्यतिहारे समानरूपेण नाम्ना युद्धविषयेऽन्यपदार्थे समस्यते स च समासोऽव्ययीभावसंज्ञको भवति ॥

इच् युद्धे ।७।३।७४॥ युद्धे यः समासो विहितस्तस्मादिच् समासान्तो भवति ॥

इच्यस्वरे दीर्घ आच्च ।३।२।७२॥ इच् प्रत्ययान्ते अस्वरादावुत्तरपदे परे पूर्वपदस्य दीर्घ आकारश्चाऽन्तादेशो भवति। दीर्घत्वात्त्वयोरकारान्तादन्यत्र विशेषः । दीर्घसाहचर्यादात्वमपि स्वरान्तानामेव। "स्वरस्य ह्रस्वदीर्घप्लुताः"॥

अनतो लुप् ।३।२।६॥ अकारान्तं वर्जयित्वाऽन्यस्याव्ययीभावस्य सम्बन्धिनः स्यादेर्लुब् भवति। केशेषु च केशेषु च मिथो गृहीत्वा यद् युद्धं तत् केशाकेशि, बाहौ च बाहौ च गृहीत्वा कृतं युद्धं बाहूबाहवि । बाहाबाहवि ।

१—अवर्णेवर्णस्येत्यलोपः, स्यादेर्लुप् । केश सुप् केश सुबित्यलौकिकविग्रहे समासे समासान्ते चैकार्थ्ये इति स्यादिलुक् । २—अस्वयम्भुव इत्यव्।

दण्डैश्च दण्डैश्च मिथः प्रहृत्य कृतं युद्धं दण्डादण्डि, यष्टायष्टि, यष्टीयष्टि ॥

**पारे मध्येऽग्रेऽन्तः षष्ठ्या वा ।३।१।३०॥** पारप्रभृतीनि नामानि षष्ठ्यन्तेन नाम्ना सह पूर्वपदार्थे समस्यन्ते, स च समासोऽव्ययीभावसंज्ञको भवति तत्सन्नियोगे च परादीनां त्रयाणामेकारान्तता निपात्यते । पारं गङ्गायाः पारेगङ्गम्³, पारं जलस्य पारेजलम्, मध्यं गङ्गाया मध्येगङ्गम्, मध्येसमुद्रम् ॥

**निष्प्राग्रेऽन्तः खदिर–कार्श्याऽऽम्र-शरेक्षु–प्लक्ष-पीयूक्षाभ्यो वनस्य ।२।३।६६॥** निस् प्र अग्रे अन्तर् खदिर कार्श्य आम्र शर इक्षु प्लक्ष पीयूक्षा इत्येतेभ्यः परस्य वनशब्दनकारस्य णकारादेशो भवति । अग्रं वनस्य अग्रेवणम्, अग्रेसेनम् ॥

**गिरिनदीपौर्णमास्याग्रहायण्यपञ्चमवर्ग्याद्वा ।७।३।९०॥** गिरि नदी पौर्णमासी आग्रहायणी इत्येतच्छब्दात्, पञ्चमरहिता ये वर्ग्यास्तदन्ताच्चाऽव्ययीभावात्समासादत्समासान्तो वा भवति ॥

---

३–" द्वन्द्वैकत्वाऽव्ययीभावावि "ति क्लीबतानुशासनात्क्लीबे इति ह्रस्वः । अमव्ययीभावेति स्यादेरम् । प्रथमोक्तं प्राक् । गङ्गा ङस् पारे सीत्यलौकिकविग्रहः ।

**अमव्ययीभावस्यातोऽपञ्चम्याः** ।३।२।२।। अव्ययीभावसमासस्य अकारस्य सम्बन्धिनः स्यादेरमादेशो भवति पञ्चमीं वर्जयित्वा । अन्तर्गिरेः अन्तर्गिरम्, अन्तर्गिरि । पञ्चम्यां तु अन्तर्गिरात्, पारेगङ्गात् । वावचनात्पक्षे षष्ठीतत्पुरुषः । गङ्गायाः पारं गङ्गापारम् । षष्ठीसमासविकल्पे वाक्यम् । अव्ययस्येति स्यादिलुग्विधानादव्ययस्य स्याद्यन्तता ज्ञाप्यते इति ध्येयम् ।

**वा तृतीयायाः** ।३।२।३।। अकारान्तस्याव्ययीभावस्य सम्बन्धिन्यास्तृतीयायाः स्थानेऽमादेशो वा भवति । पारेगङ्गम् पारेगङ्गेन ।।

**सप्तम्या वा** ।३।२।४।। अकारान्तस्याऽव्ययीभावस्य सम्बन्धिन्याः सप्तम्या अमादेशो वा भवति । अन्तर्गिरम् । अन्तर्गिरे ।।

**यावदियत्त्वे** ।३।१।३१।। इयत्त्वमवधारणम् । इयत्त्वे गम्यमाने यावदिति नाम नाम्ना समस्यते पूर्वपदार्थे अव्ययीभावश्च समासो भवति । यावन्त्यमत्राणि यावदमत्रमतिथीन् भोजय । अमत्रपरिमाणेनातिथिपरिमाणमवधार्यतेऽत्र ।।

---

१–अन्तर् गिरि ङसित्यलौकिकविग्रहः । अवर्णेवर्णेतीकारलोपः । २–यावद् जस् अमत्र जस् इत्यलौकिकविग्रहः, यावदित्यव्ययमपि । अमत्रतुल्यपरिमाणान्नाधिकानित्यवधारणमत्र गम्यते ।

**पर्यपाङ्बहिरच् पञ्चम्या ।३।१।३२॥** पर्य्यादीनि नामानि प्रतिपद्विहितपञ्चम्यन्तेन नाम्ना सहैकार्थ्ये पूर्वपदार्थेऽभिधेये समस्यन्ते, स च समासोऽव्ययीभावसंज्ञो भवति । इह अच् इति धाप्रत्ययलोपे एनप्रत्ययलोपे चाऽव्ययं गृह्यते साहचर्यात् । परि[१] शत्रुञ्जयात् परिशत्रुञ्जयम् । एवमपशत्रुञ्जयम् । आ[२] शत्रुञ्जयम्, बहिर्ग्रामम्[३], प्राग्ग्रामम्[४] । अपगतः शाखायाः=अपशाख इत्यादौ त्वपाये पञ्चमी, न प्रतिपद्विहितेति नाऽव्ययीभावः ॥

**लक्षणेनाऽभिप्रत्याभिमुख्ये ।३।१।३३॥** लक्षणं चिह्नम् चिह्नवाचिना नाम्ना आभिमुख्ये वर्त्तमाने अभि प्रति इत्येते ऐकार्थ्ये सति पूर्वपदार्थेऽभिधेये समस्येते, स समासोऽव्ययीभावसंज्ञको भवति । अभि अग्निमभ्यग्नि[६] शलभाः पतन्ति । अग्निमभिलक्ष्याभिमुखं पतन्तीत्यर्थः । एवं प्रत्यग्नि ॥

**दैर्घ्येऽनुः ।३।१।३४॥** अनु इत्येतन्नाम दैर्घ्यविषये लक्षणवाचिना नाम्ना ऐकार्थ्ये सति पूर्वपदार्थेऽभिधेये समस्यते, स समासोऽव्ययीभावसंज्ञः । अनु गङ्गां दीर्घा,

---

१–पर्यपाभ्यामिति पञ्चमी । वृष्टो मेघ इति सर्वत्रोह्यम् । २–आङ्याव-धाविति पञ्चमी । ३–४–प्रभृत्यन्यार्थेति पञ्चमी । ५–प्रादिसमासः । गोश्चान्त इति ह्रस्वः ६–लक्षणेत्यादिना द्वितीया । प्रथमोक्तं प्राक्, अनतो लुप् । ७–अत्र भागिनि च प्रतिपर्य्यनु० इति द्वितीया ।

अनुगङ्गं वाराणसी । गङ्गादैर्घ्यसदृशदैर्घ्योपलक्षितेत्यर्थः । अत्र गङ्गा दीर्घताचिह्नम् , वाराणसीदैर्घ्यं लक्ष्यम् ।

**समीपे** ।३।१।३५।। अनु इत्येतन्नाम समीपेऽर्थे वर्तमाने समीपिवाचिना नाम्ना ऐकार्थ्ये सति पूर्व-पदार्थेऽभिधेये समस्यते, स समासोऽव्ययीभावः । अनु समीपं वनस्य अनुवनशनिर्गता । अन्वित्यस्य लक्षणे वृत्तिर्वनं लक्षणमिति वन अम् अन्वित्यलौकिकविग्रहः ।

**नित्यं प्रतिनाऽल्पे** ।३।१।३७।। अल्पेऽर्थे वर्त्तमा-नेन प्रतिना नाम्ना नाम नित्यं समस्यते स समासोऽ-व्ययीभावः । अविग्रहो नित्यसमासोऽस्वपदविग्रहो वा । शाकस्यालपत्वं शाकप्रति, सूपस्य मात्रा सूपप्रति, घृतस्य लेशो घृतप्रति भोजने । नित्यसमास इत्यतः सूपस्य प्रतीत्येवमादि वाक्यं न प्रयुज्यते ।।

**विभक्ति-समीप-समृद्धि-वृद्ध्यर्थाभावात्ययास-म्प्रतिपश्चात्क्रमख्यातियुगपत्सदृक्सम्पत्साकल्यान्तेऽ-व्ययम्** ।३।१।३९।। विभक्तिर्विभक्त्यर्थः कारकम् । विभक्त्-यर्थादिष्वर्थेषु वर्तमानमव्ययं नाम नाम्ना सहैकार्थ्ये सति पूर्वपदार्थेऽभिधेये नित्यं समस्यते स समासोऽव्ययीभावः ।

८—अव्ययीभावस्य क्लीबत्वाद् ह्रस्वः । अमव्ययीभावेति सेरम् ।
१—प्रथमोक्तं प्राक् । अनतो लुप् ।

स्त्रीषु इति अधिस्त्रि[२] निधेहि। कुम्भस्य समीपे उपकुम्भम्[३]। ऋद्धेराधिक्यं समृद्धिः। जैनानां समृद्धिः सुजैनम्[४], भिक्षाणां समृद्धिः सुभिक्षम्[५]। विगता ऋद्धिर्व्यृद्धिः, ऋद्ध्यभावः। यवनानामृद्ध्यभावो दुर्यवनम्। भिक्षाणामृद्ध्यभावो दुर्भिक्षम्। अर्थस्य वर्तिपदार्थस्याभावोऽर्थाभावः। मक्षिकाणामभावो निर्मक्षिकम्, अमक्षिकम्[६], उन्मशकम्, निवातम्। अत्ययोऽतीतत्वम्। वर्षाणामतीतत्वमतिवर्षम्। एवमतिशीतम्, निहिमम्, अतृणम्[७]। असम्प्रतीति वर्तमानकाले उपयोगादिप्रतिषेधः। कम्बलस्योपभोगं प्रति नाऽयं काल इत्यतिकम्बलं कालः। रथस्य पश्चाद् अनुरथं[१] याति। क्रम आनुपूर्वी। ज्येष्ठस्य क्रमेण अनुज्येष्ठं प्रविशन्तु मुनयः। ख्यातिः शब्दप्रथा। भद्रबाहोः ख्यातिरितिभद्रबाहु। भद्रबाहुशब्दो लोके प्रकाशत इत्यर्थः। एवमहोभद्रबाहु। युगपदेककालार्थः॥

**अकालेऽव्ययीभावे** ।३।२।१४६॥ सहशब्दस्याऽकालवाचिन्युत्तरपदेऽव्ययीभावसमासे सादेशो भवति। चक्रेण

---

२–स्त्री सुप् अधि इत्यलौकिकविग्रहः, क्लीब–ह्रस्वः, अनतो लुप् अधिकरणे अधिः। ३–कुम्भ ङस् उपेत्यलौकिकविग्रहः। सेरमव्ययीभावस्येत्यम्। अव्ययं सर्वत्र प्रथमोक्तं प्राक्। उपोऽत्र समीपे। ४–जैन आम् सु इत्यलौकिकविग्रहः। अत्र सु इत्यव्ययं समृद्ध्यर्थे। ५–भिक्षा आम् दुर्। क्लीबत्वाद् ह्रस्वः। ६–नञत्। क्लीबे ह्रस्वः। ७–तृण आम् नञ्। नञत्। अमव्ययेत्यम् सर्वत्र बोध्यम्।

१–रथ अम् अनु। लक्षणे द्वितीया।

सहैककालं सचक्रं[2] धेहि । अत्र युगपत्सहार्थः । व्रतस्य सदृशं सव्रतम् । अत्र सदृशमित्यर्थे सहशब्दः । संपत् सिद्धिः ।

नपुंसकाद् वा ।७।३।८७।। अन्नन्तं यन्नपुंसकं तदन्ता-दव्ययीभावादत् समासान्तो वा भवति । ब्रह्म सम्पन्नं सब्रह्मं सब्रह्म[3] साधूनाम् । साकल्यमशेषता । तृणमप्यपरित्यज्य सतृ-णमभ्यवहरति, न किञ्चिदपि त्यजति । सकलमभ्यवहरतीति यावत् । अन्तः समाप्तिः । पिण्डैषणया सह सपिण्डैषणमधीते । पिण्डेषणापर्यन्तमित्यर्थः ॥

योग्यता वीप्सार्थानतिवृत्तिसादृश्ये ।३।१।४०।। योग्यतादिष्वर्थेष्वव्ययं नाम नाम्नैकार्थ्ये पूर्वपदार्थे नित्यं समस्यते, सोऽव्ययीभावः । रूपस्य योग्यमनुरूपं[4] चेष्टते । अर्थमर्थमिति प्रत्यर्थम्[5], अर्थमर्थं प्रतीत्यर्थः । वीप्सायां द्वितीयाविधानसामर्थ्याद्वाक्यमपि । अनतिवृत्तिः पदार्था-नतिक्रमः । शक्तेरनतिक्रमेण यथाशक्ति[6] पठ । शीलस्य सादृश्यं सशीलमनयोः[7] । अत्र सादृश्यार्थस्य प्राधान्यम्, सदृ-शार्थप्राधान्यं सव्रतादाविति भेदः । सादृश्ये यथाशब्दो न समस्यते । यथा चैत्रस्तथा मैत्रः ॥

---

२–चक्र टा सह । ३–सहस्य सादेशः, ब्रह्म टा सह । नस्तद्धिते । अद् विकल्पे नलोपः । ४–रूप अम् अनु । ५–अर्थ अम् प्रति । भागिनि चेति द्वितीया । ६–शक्ति ङस् यथा । ७–शील ङस् सह । सादेशः ।

**प्रतिपरोऽनोरव्ययीभावात्** । ७।३।८७।। प्रति परस् अनु इत्येतत्पूर्वो योऽक्षिशब्दस्तदन्तादव्ययीभावादत् समासान्तो भवति। अक्षिणी प्रति प्रत्यक्षम्[1] । परशब्दसमानार्थः परस् शब्दोऽव्ययम् । अक्ष्णोः परम्—अतीतं परोक्षम्[2] । अत्ययेऽव्ययीभावः । अक्ष्णः समीपमन्वक्षम्[3] । प्रत्यक्षोऽर्थः परोक्षः काल इत्यादिप्रयोगास्त्वभ्रादेराकृतिगणत्वादप्रत्ययेन समाधेयाः ॥

**अनः** ।७।३।८८।। अन्नन्तादव्ययीभावादत्समासान्तो भवति । राज्ञः समीपमुपराजम्[4] । आत्मनीत्यध्यात्मम्[5] । आत्मानमात्मानं प्रति प्रत्यात्मम्[6] ॥

**शरदादेः** ।७।३।९२।। शरदाद्यन्तादव्ययीभावादत् समासान्तो भवति । शरदः समीपमुपशरदम् । मनो मनः प्रति प्रतिमनसम् । दिशः क्रमेणानुदिशम् ॥

**जराया जरस् च** ।७।३।९३।। जराशब्दान्तादव्ययीभावादत्समासान्तो भवति । तत्सन्नियोगे च जराशब्दस्य जरसादेशः । जरायाः समीपमुपजरसम् ।

---

१—अक्षिणी औ प्रति । भागिनि चेति द्वितीया । अवर्णेतीकारलोपः । २—अक्षि ओस् परस् । सेः स्थानिवद्भावेन स्याद्यन्ततया पदसंज्ञा, सः, अतोऽतीत्युः, अवर्णस्येरस्रोः, एदोत इति लुक् । अत्यवर्णेतीकारलोपः । ३—अक्षि औ अनु, लक्षणे द्वितीया । ४—राजन् ङस् उप । असत्वारादर्थकयोगे षष्ठी । नोऽपदस्येत्यनो लोपः । ५—आत्मन् ङि अधि । नस्तद्धिते । ६—आत्मन् अम् प्रति ।

**सरजसोपशुनानुगवम्** ।७।३।९४।। सरजस उपशुन अनुगव इत्येतेऽव्ययीभावा अदन्ता निपात्यन्ते । रजोऽप्यपरित्यज्य सरजसम्[७] । शुनः समीपे उपशुनं[८] तिष्ठति । गामनु अनुगवम् । गोदैर्घ्यसदृशदैर्घ्योपलक्षितमित्यर्थः । दैर्घ्येऽनुरित्यव्ययीभावः ।।

॥ इत्यव्ययीभावसमासप्रकरणम् ॥

॥ अथ तत्पुरुषसमासप्रकरणम् ॥

**गतिक्वन्यस्तत्पुरुषः** ।३।१।४२।। कु इत्यव्ययं कुत्सादौ । गतिसंज्ञकाः कुश्च नाम नाम्ना सह नित्यं समस्यते स च बहुव्रीह्यादिलक्षणरहितस्तत्पुरुषसंज्ञको भवति । उरीकृत्य[१], प्रणम्य[२], प्रकृत्य । कुत्सितो ब्राह्मणः कुब्राह्मणः[३], कुसाधुः, कुमतिः । बहुव्रीहौ तु कुत्सिता मतिर्यस्य स कुमतिकः । बहुव्रीहौ वा कच् ॥

**दुर्निन्दाकृच्छ्रे** ।३।१।४३।। दुरित्यव्ययं नाम निन्दायां कृच्छ्रे चाऽर्थे वर्त्तमानं नाम्ना नित्यं समस्यते,, सोऽ-

७—रजस् टा सह । साकल्येऽव्ययीभावः । अकाल इति सादेशः ।
८—श्वन् ङस् उप, सस्वरस्य वस्य निपातनादुः ।

१—उरीकृत्वा । उर्यादीति गतिसंज्ञा, समासे क्त्वो यप्, तोऽन्तो ह्रस्वस्येत्यनेन । क्त्वातुमेत्यव्ययत्वात्स्यादेर्लुक् । २—प्रनम् त्वा । उर्यादीति गतिसंज्ञा । समासे क्त्वो यप् । उपसर्गान्तर इति णः । ३—कु ब्राह्मणसीत्यलौकिकविग्रहः ।

न्यस्तत्पुरुषसंज्ञको भवति। निन्दितः पुरुषो दुष्पुरुषः[४], कृच्छ्रेण कृतं दुष्कृतम्[५]।

**सुः पूजायाम्** ।३।१।४४॥ सु इत्यव्ययं पूजायां वर्त्तमानं नाम्ना नित्यं समस्यते सोऽन्यस्तत्पुरुषः। पूजितः प्रशस्तः शोभनो साधुः सुसाधुः[६], सुमतिः, सुफलम् ॥

**अतिरतिक्रमे च** ।३।१।४५॥ अतीत्यव्ययमतिक्रमे पूजायां च वर्त्तमानं नाम्ना नित्यं समस्यते, सोऽन्यस्तत्पुरुषः। अतिक्रम्य स्तुत्वा सिक्त्वा वाऽतिस्तुत्य[७]ाऽतिसिच्य। अतिक्रमे उपसर्गत्वाभावान्न षः। अतिशयितः पुरुषोऽतिपुरुषः। अतिक्रमे बाहुलकात् क्वचिन्न, अति श्रुत्वा। क्वचिद्विकल्पः, अति सिक्त्वा॥

**आङल्पे** ।३।१।४६॥ आङित्यव्ययमल्पेऽर्थे वर्त्तमानं नाम्ना नित्यं समस्यते सोऽन्यस्तत्पुरुषः। ईषत्कडार आकडारः। क्रियायोगे आङो गतित्वादीषद् बद्धमाबद्धमित्यादौ गतिसमास एव बोध्यः॥

**प्रात्यवपरिनिरादयो गतक्रान्तक्रुष्टग्लानक्रान्ताद्यर्थाः प्रथमाद्यन्तैः** ।३।१।४७॥ गत्याद्यर्थेषु वर्तमानाः प्रादयः प्रथमान्तेन, क्रान्ताद्यर्थेषु अत्यादयो द्वितीयान्तेन,

---

४–दुर् पुरुष सि। निर्दुरिति षः। ५–दुर् कृत सि। निर्दुरिति षः। ६–सु साधु सि। ७–यप्, तोऽन्तः।

क्रुष्टाद्यर्थेष्ववादयस्तृतीयान्तेन, ग्लानाद्यर्थेषु पर्यादयश्चतुर्थ्यन्तेन, क्रान्ताद्यर्थेषु निरादयः पञ्चम्यन्तेन नाम्ना सह समस्यन्ते, सोऽन्यस्तत्पुरुषः। प्रगतः प्रकृष्टो वाऽऽचार्यः प्राचार्यः[1]। प्रवृद्धो गुरुः प्रगुरुः। संगतोऽर्थः समर्थः, विरुद्धः पक्षो विपक्ष इत्यादि। अतिक्रान्तः खट्वामतिखट्वः[2], अभिप्रपन्नो मुखमभिमुख इत्यादि। अवक्रुष्टः कोकिलयाऽवकोकिलो[4] वसन्तः। अनुगतमर्थेनाऽन्वर्थं नाम, वियुक्तमर्थेन व्यर्थं वचः। संगतमर्थेन समर्थं पदम् इत्यादि। परिग्लानोऽध्ययनाय पर्यध्ययनः[5], उद्युक्तः संग्रामायोत्संग्राम[6] इत्यादि। निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः[7]। अपगतः शाखायाः अपशाखः। उत्क्रान्तः सूत्रादुत्सूत्रो न्यायः, अपगतं विगतं वाऽर्थादपार्थं व्यर्थं वा वचः। बहुलाधिकारात् षष्ठ्यन्तेनाऽपि सप्तम्यन्तेनाऽपि च क्वचिद् ॥

**व्याप्तौ** ।३।१।६१॥ व्याप्तौ या द्वितीया तदन्तं कालवाचि नाम व्यापकवाचिना नाम्ना समस्यते, स

१–प्र आचार्य सि। २–गौणात्समयेति द्वितीया। अति खट्वा अम्। गोश्चान्त इति ह्रस्वः। ३–लक्षणे द्वितीया। ४–गौणे कर्तरि तृतीया। अव कोकिलाटा। गोश्चान्त इति ह्रस्वः। ५–सम्प्रदाने चतुर्थी। ६–सम्प्रदाने चतुर्थी तादर्थ्ये वा। ७–निर् कौशाम्बी ङसि। अपादाने पञ्चमी। गोश्चान्त इति ह्रस्वः, निर्दुरिति षः।

तत्पुरुषः । मुहूर्तं सुखं मुहूर्तसुखम् ॥

श्रितादिभिः ।३।१।६२॥ द्वितीयान्तं नाम श्रितादिभिर्नामभिः समस्यते, स तत्पुरुषः । धर्मं श्रितो धर्मश्रितः । श्रित अतीत पतित गत अत्यस्त प्राप्त आपन्न गमिन् गामिन् आगामिन् इति श्रितादयः । आकृतिगणोऽयम्, तेन सुखमिच्छुः सुखेच्छुरित्यादि सिद्धम् ।

प्राप्तापन्नौ तयाच्च ।३।१।६३॥ प्राप्तापन्नौ प्रथमान्तौ द्वितीयान्तेन नाम्ना समस्यते स तत्पुरुषः, तत्सन्नियोगे च स्त्रियां प्राप्तापन्नयोराकारस्य अकारो भवति । प्राप्त आपन्नो वा जीविकां प्राप्तजीविकः, आपन्नजीविकः । प्राप्ता जीविकां प्राप्तजीविका, आपन्नजीविका । श्रितादित्वाच्च जीविकां प्राप्तो जीविकाप्राप्त इत्येवमादिप्रयोगोऽपि ।

तृतीया तत्कृतैः ।३।१।६५॥ तृतीयान्तं नाम तृतीयान्तार्थकृतैर्गुणवचनैर्नामभिः समस्यते स तत्पुरुषः । शङ्कुलया कृतः खण्डः शङ्कुलाखण्डश्चैत्रेण । अक्ष्णा काण इत्यादौ कृतत्वविवक्षायां समासोऽन्यथा नेति बोध्यम् ।

---

८–कालाध्वनोरिति द्वितीया । ९–कर्मणि द्वितीया, प्रथमोक्तं प्राक् ।
१०–सुख [illegible] इच्छति । कर्मणि द्वितीया ।
१–गोश्चान्त इति ह्रस्वः । २–करणे तृतीया । ३–यद्भेदैरिति तृतीया ।

ऊनार्थपूर्वाद्यैः ।३।१।६७।। तृतीयान्तं नाम ऊनार्थैः पूर्वादिभिश्च नामभिः समस्यते, स तत्पुरुषः । माषेणोनं माषोनं, कार्षापणम् । मासेन पूर्वो मासपूर्वः । पूर्व अवर सदृश सम कलह निपुण मिश्र श्लक्ष्ण इति पूर्वादयः । आकृतिगणोऽयम् । तेन धान्येनार्थो धान्यार्थः, एकेन द्रव्यवत्त्वमेकद्रव्यवत्त्वमित्यादि सिद्धम् ।

कारकं कृता ।३।१।६८।। कर्तृकरणरूपं तृतीयान्तं कृदन्तेन नाम्ना समस्यते, स तत्पुरुषः । आत्मना कृतम् आत्मकृतं, परकृतम् । कृत्सगतिकारकस्याऽपि । नखैर्निर्भिन्नो नखनिर्भिन्नः, चैत्रेण नखनिर्भिन्नश्चैत्रनखनिर्भिन्नः । बहुलाधिकारात् क्तवतुना क्त्वया तव्यानीयाभ्यां चानेन समासो न भवति । दात्रेण लूनवानित्यादि ॥

चतुर्थी प्रकृत्या ।३।१।७०।। चतुर्थ्यन्तं विकृतिवाचि नाम परिणामिकारणवाचिना नाम्ना समस्यते स तत्पुरुषः । यूपाय दारु यूपदारु । प्रकृत्येति किम् ? रन्धनाय स्थाली ॥

---

४–यद्भेदैरिति तृतीया । कृत्वेत्याद्यध्याहारेण वा । ५–हेतौ भवत्याद्यध्याहारेण करणे वा तृतीया । एवमन्यत्राऽप्यूह्यम् । ६–नामसिदिति पदत्वे नाम्नो न इति नलोपः ७–करणे तृतीया । नख भिद् निर्भिन्न इति स्याद्युत्पत्तेः प्राक् समास इति वचनात् । ८–करणे तृतीया । दात्र टा लूनवत् सि ।

१–तादर्थ्ये चतुर्थी । २–तादर्थ्ये चतुर्थी ।

**हितादिभिः ।३।१।७१॥** चतुर्थ्यन्तं नाम हितादिभिः समस्यते, स तत्पुरुषः । गोभ्यो[3] हितं गोहितम् । हित सुख रक्षित बलि इति हितादयः । आकृतिगणोऽयम् । तेन अश्वार्थं घासोऽश्वघासः, आत्मनेपदं[5] परस्मैपदम्, देवदेयम्[4]इत्यादि सिद्धम् । तव्यान्तेन तु न, द्विजाय दातव्यम् ॥

**तदर्थार्थेन ।३।१।७२॥** चतुर्थ्यन्तं नाम चतुर्थ्यर्थेन[6] अर्थशब्देन समस्यते, स तत्पुरुषः । उदकाया[7]ऽयमुदकार्थो घटः । आतुरायेत्यातुरार्थो यवागूः । ङेऽर्थो वाच्यवदि'ति वाच्यलिङ्गता ॥

**पञ्चमी भयाद्यैः ।३।१।७३॥** पञ्चम्यन्तं नाम भयाद्यैर्नामभिः सह समस्यते, स तत्पुरुषः । वृकाद्[8] भयम् वृकभयम् । भय भीत भीति भी भीरु भीलुक निर्गत जुगुप्सु अपेत अपोढ मुक्त पतित अपत्रस्त इति भयादयः । आकृतिगणोऽयम् । तेन स्थानाद्[9] भ्रष्टः स्थानभ्रष्टः, स्वर्गाच्च्युतः स्वर्गच्युतः, गृहाद्[10]आनीतो गृहानीत इत्यादि । बहुलाधिकारात् क्वचिन्न—वृक्षात्पतितो भोजनादपत्रस्त इत्यादि ।

**परःशतादिः ।३।१।७५॥** परःशतादिः पञ्चमीतत्पुरुषः

---

३—हितेति चतुर्थी ।४—तादर्थ्ये चतुर्थी । ५—परात्मभ्यामित्यलुप् । तादर्थ्ये चतुर्थी । ६—सम्प्रदाने चतुर्थी । ७—तादर्थ्ये चतुर्थी । ८—अपादाने पञ्चमी । ९—अपादाने पञ्चमी । १०—अपादाने पञ्चमी । ११—अपादाने पञ्चमी ।

साधुर्भवति। शतात्परे परःशताः, सहस्रात्परे परःसहस्राः, लक्षात् लक्षाया वा परे परोलक्षाः। परशब्दस्य पूर्वनिपातः सकारागमश्च निपातनात्। यद्वा परशब्दसमानार्थः परस् शब्दः, शतात् परः। एवमग्रेऽपि॥

**षष्ठ्ययत्नाच्छेषे।३।१।७६॥** शेषे या षष्ठी तदन्तं नाम नाम्ना समस्यते, स तत्पुरुषः। न चेत्स शेषो यत्नाद् भवति। राज्ञः पुरुषो राजपुरुषः। सापेक्षमसमर्थम्। ऋद्धस्य राज्ञः पुरुषः, अत्रासामर्थ्यान्न भवति। सापेक्षत्वेऽपि गमकत्वाद् भवति। देवदत्तस्य गुरुकुलम्। अयत्नादिति किम्? मातुः स्मृतम्। शासनस्य भद्रं भूयादित्यादौ त्वनभिधानान्न समासः।

**कृति।३।१।७७॥** कृत्प्रत्ययनिमित्ता या षष्ठी तदन्तं नाम नाम्ना कृदन्तेन समस्यते, स तत्पुरुषः। गणधरस्योक्तिर्गणधरोक्तिः। कर्तरीति षष्ठी। तत्त्वानामनुचिन्तनं तत्त्वानुचिन्तनम्॥

**न कर्तरि।३।१।८२॥** कर्तृविहितषष्ठ्यन्तं नाम अक-

१२–नामसिदिति पदत्वे रुत्वे शषस इति पक्षे विसर्गः। दिक् शब्दयोगे पञ्चमी।

१–नामसिदिति पदत्वे नाम्नो न इति नलोपः। २- अत्र राज्ञो विशेषणांशे आकाङ्क्षा। ३–इष्टार्थबोधात्। ४–५–शेषे षष्ठी। ६–शेषषष्ठ्यर्थे व्याप्यस्य स्मृत्यर्थयोगे वा कर्मसंज्ञेति यत्नः। ७–शेषे षष्ठी। सा च सिद्धैवेति न यत्नजा। ८–इष्टार्थाबोधात्। ९–कर्मणि षष्ठी कृद्योगे।

प्रत्ययान्तेन नाम्ना न समस्यते । भवतः शायिका[१०] । शेषे षष्ठ्यां सम्बन्धमात्रविवक्षायां तु स्यादेवेति बोध्यम् ।

**कर्मजा तृचा च ।३।१।८३॥** कर्मणि विहिता या षष्ठी तदन्तं नाम कर्तृविहिताऽकप्रत्ययान्तेन तृजन्तेन च नाम्ना न समस्यते । ओदनस्य[११] भोजकः । भुवो भर्ता ।

**तृतीयायाम् ।३।१।८४॥** कर्तरि तृतीयायां सत्यां कर्मजा षष्ठी न समस्यते । आश्चर्यो गवां दोहोऽगोपालकेन[१२] । कर्त्तरि षष्ठ्यां सत्यां भवति—साध्विदं शब्दानुशासनमाचार्यस्य । गोदोहो गोपालकेनेत्यादौ तु शेषषष्ठ्या समासो बोध्यः ॥

**याजकादिभिः ।३।१।७८॥** षष्ठ्यन्तं नाम याजक इत्येवमादिभिर्नामभिः समस्यते, स तत्पुरुषः । ब्राह्मणानां[१३] याजको ब्राह्मणयाजकः । एवं गुरुपूजकः । आकृतिगणोऽयम् । तेन तुल्यार्थैरपि-गुरुसमः[१], पितृतुल्य इत्यादि । तथा—तीर्थकर्ता[२], भूभर्तेत्यादि ।

**सर्वपश्चादादयः ।३।१।१८०॥** सर्वपश्चादित्यादयः षष्ठीतत्पुरुषाः साधवः स्युः । सर्वेषां पश्चात्सर्वपश्चात्पदं

१०—कर्तरि षष्ठी कृद्योगे । ११—कर्मणि षष्ठी कृद्योगे । १२-द्विहेतोरिति षष्ठी विकल्पे कर्तरि तृतीया । १३—कर्मणि षष्ठी कृद्योगे ।

१—तुल्यार्थैरिति षष्ठी । २—कर्मणि षष्ठी ।

वर्तते । तस्योपरि[3] तदुपरि पदं निधत्ते । अव्ययेन प्रतिषेधस्यापवादः । आकृतिगणोऽयम् ।

**तृप्तार्थपूरणाऽव्ययातृश्शत्रानशा ।३।१।८५॥** तृप्तार्थैः पूरणप्रत्ययान्तैरव्ययैरतृशन्तैः शत्रन्तैरानशन्तैश्च नामभिः षष्ठ्यन्तं नाम न समस्यते । अपां तृप्तः, फलानां सुहितः, तीर्थकृतां षोडशः, चक्रिणां द्वितीयः । ग्रामस्य पुरस्तात्, चैत्रस्य कृत्वा । रामस्य द्विषन् । चैत्रस्य पचन् । चैत्रस्य पचमानः । सर्वत्र शेषे षष्ठी ।

**ज्ञानेच्छार्चार्थाधारक्तेन ।३।१।८६॥** ज्ञानार्थादिच्छार्थादर्चार्थाच्च वर्तमाने यः क्तः, यश्चाधारे क्तो विहितस्तदन्तेन नाम्ना षष्ठ्यन्तं नाम न समस्यते । राज्ञां ज्ञातः[4], राज्ञामिष्टः, राज्ञामर्चितः, इदं चैत्रस्याऽऽसितम्[6] । राजपूजित इत्यादौ तु बाहुलकात्समासः, भूते क्तान्तेन तृतीयासमासो वा ॥

**अस्वस्थगुणैः ।३।१।८७॥** अस्वस्थगुणवाचिभिर्नामभिः षष्ठ्यन्तं नाम न समस्यने । यो गुणशब्दो गुणे एव वर्तते न द्रव्ये स स्वस्थः, तत्प्रतिषेधादस्वस्थ इति बोध्यम् । पटस्य[7] शुक्लः । द्विजस्य शुक्लाः । अत्र

३–शेषे षष्ठी । अव्ययेन समासनिषेधापवादः । ४–वर्तमाने क्तः, कर्मणि षष्ठी । ५–कर्तरि षष्ठी । ६–आधारे क्तः । ७–शेषे षष्ठी ।

प्रकरणादिनाऽर्थाद्वा वर्णादि ज्ञायते, तदा योऽर्थः शुक्लः स पटस्य, ये इमे शुक्लाः ते द्विजस्येत्येवमर्थलाभात्सामर्थ्यं बोध्यम्। एवं काकस्य कृष्ण इत्यादावप्यूह्यम्। काकस्य कार्ष्ण्यम्, गुडस्य माधुर्यम्। गुणशब्देन चेह रूपरसगन्धस्पर्शा ग्राह्याः। तेन यत्नस्य गौरवं यत्नगौरवम्, अङ्गसौष्ठवम्, पटहशब्दः, गोशतम् शब्दाधिक्यमित्यादौ समासो भवति। अस्वस्थगुणैरिति किम्? घटवर्णः। कन्यारूपम्। ईदृशप्रयोगेषु वर्णादयः शब्दा वर्णाद्यर्थ एव वर्तन्ते इति स्वस्था इति समासो भवति, कुसुमसौरभ्यमित्यादौ च भवतीति बोध्यम्।

**सप्तमी शौण्डाद्यैः** ।३।१।८८॥ सप्तम्यन्तं नाम शौण्डादिभिर्नामभिः समस्यते, स तत्पुरुषः। पाने प्रसक्तः शौण्डः पानशौण्डः। प्रसक्तिक्रियाद्वारा सामर्थ्यम्। आकृतिगणोऽयम्।

**सिंहाद्यैः पूजायाम्** ।३।१।८९॥ सप्तम्यन्तं नाम सिंहाद्यैर्नामभिः सह समस्यते पूजायां गम्यमानायाम्, स तत्पुरुषः। रणे व्याघ्र इव रणव्याघ्रः। भुवि देव इव भूदेवः। कलौ युधिष्ठिर इव कलियुधिष्ठिरः। उपमयैषु पूजा गम्यते॥

**काकाद्यैः क्षेपे** ।३।१।९०॥ सप्तम्यन्तं नाम काकाद्यै-

१—विषयसप्तमी। २—विषयसप्तमी। रण ङि व्याघ्र सीति विग्रहः। ३—औपश्लेषिक सप्तमी। ४—विषयसप्तमी।

र्नामभिः सह समस्यते, क्षेपे गम्ये, स तत्पुरुषः। तीर्थे काकं इव तीर्थकाकः। अनवस्थित एवमुच्यते। उपमया चात्र क्षेपो गम्यते। सिंहादिः काकादिश्चाकृतिगणः।

**पात्रे समितादयः ।३।१।९१॥** पात्रेसमितादयः सप्तमीतत्पुरुषा निपात्यन्ते क्षेपे गम्यमाने। पात्रे[६] एव समिताः पात्रेसमिताः, भोजनसमये एव संगता न तु कार्ये इत्यर्थः। एवं गेहे एव शूर इति गेहेशूरः। एवमादिष्ववधारणेन क्षेपो गम्यते। कूपे मण्डूक इव कूपमण्डूकः। अल्पदर्शी एवमुच्यते। अत्रोपमया क्षेपो गम्यते। एषु निपातनात्सप्तम्या अलुप्। आकृतिगणोऽयम्। वाक्येन क्षेपानवगमान्नित्यसमासा एते॥

**ङस्युक्तं कृता ।३।१।४९॥** कृत्प्रत्ययविधायके सूत्रे पञ्चम्यन्तेन नाम्नोक्तं नाम कृदन्तेन नाम्ना नित्यं समस्यते, स तत्पुरुषः। इह च गतिकारकङस्युक्तानां विभक्त्यन्तानामेव कृदन्तैर्विभक्त्युत्पत्तेः प्रागेव समास इष्यते। कुम्भं करोतीति कुम्भकारः, कृद्योगे षष्ठीत्यतः कुम्भ ङस् कार इत्यलौकिकविग्रहः। एवमन्यत्राप्यूह्यम्॥

**तृतीयोक्तं वा ।३।१।५०॥** 'दंशेस्तृतीयया' इत्यारभ्य यत्तृतीयोक्तं नाम तत्कृता नाम्ना वा समस्यते स तत्पुरुषः।

५–विषयसप्तमी। ६–विषयसप्तमी। ७–विषयसप्तमी। ८–औपश्लेषिकसप्तमी। ९–कर्मण्यण्।

मूलकेनोपदंशं मूलकोपदंशं भुङ्क्ते । पार्श्वयोः पार्श्वाभ्यां वोपपीडं पार्श्वोपपीडं शेते ॥

नञ् ।३।१।५१॥ नञित्येतन्नाम नाम्ना समस्यते सोऽन्यस्तत्पुरुषः । पर्युदासे प्रसज्ये च नञ् । उत्तरपदार्थेन सम्बन्धे पर्युदासः, क्रियया सह सम्बन्धे प्रसज्यः । नञ्तत्पुरुषसमासार्थश्चतुर्धा—तत्सदृशस्तद्विरुद्धस्तदन्यस्तदभावश्च । न ब्राह्मणोऽब्राह्मणः, अत्र ब्राह्मणसदृशः क्षत्रियादिःप्रतीयते । अधर्मः, अत्र धर्मविरुद्धः पाप्मा प्रतीयते । अनिति स्वरूपनिर्देशान्नलोपो द्वित्वं च न भवतीति बोध्यम् । अनग्निः, अत्राग्नेरन्यः प्रतीयते । अवचनम्, अत्र वचनाभावः प्रतीयते । उत्तरपदार्थप्राधान्यान्नञ्तत्पुरुषस्य तल्लिङ्गसंख्यता, पूर्वपदार्थादिप्राधान्ये अमक्षिकमित्यादौ तु अव्ययीभावादिरिति विवेकः । प्रसज्यप्रतिषेधे त्वसामर्थ्यान्न समासः । क्वचित्तु असूर्यंपश्या इत्यादौ गमकत्वाद्बाहुलकात्समास इति बोध्यम् । अत्र श्लोकौ-

२-दशेरिति णम् । मूलक टा उपदंश सीति विग्रहः । प्रधानभुजिक्रियाकरणत्वात्तृतीया । ३-शयनक्रियायां करणत्वविवक्षया सप्तमी । ४-न सि ब्राह्मण सि । नञत्त्यः । ५-न सि मक्षिका आम् । अर्थाभावेऽव्ययीभावः । नञत् । क्लीबत्वाद् ह्रस्वः, अमव्ययीभावादित्यम् । ६-क्रियासापेक्षत्वात्, सापेक्षमसमर्थमिति वचनादिति बोध्यम् । ७-न सूर्यं पश्यन्तीत्यर्थे खशन्तः ।

"द्वौ नञौ प्रकृतौ लोके, पर्युदासप्रसज्यकौ ।
पर्युदासः सदृग्ग्राही, प्रसज्यस्तु निषेधकृत् ॥१॥
पर्युदासः स विज्ञेयो, यत्रोत्तरपदेन नञ् ।
प्रसज्यप्रतिषेधोऽसौ, क्रियया सह यत्र नञ्" ॥२॥इति॥

**त्यादौ क्षेपे** ।३।२।१२६॥ त्याद्यन्ते पदे परतः क्षेपे गम्यमाने नञ् अकारो भवति । अपचसि त्वं जाल्म ॥

**कोः कत्तत्पुरुषे** ।३।२।१३०॥ तत्पुरुषे समासे स्वरादावुत्तरपदे कुशब्दस्य कदित्ययमादेशो भवति । कुत्सितोऽश्वः कदश्वः ।

**पूर्वापराधरोत्तरमभिन्नेनांशिना** ।३।१।२२॥ पूर्वादयः शब्दा अंशवाचिनोंऽशिवाचिना सह समस्यन्ते, न चेत् सोंऽशी भिन्नः प्रतीयते, स समासस्तत्पुरुषः । पूर्वं कायस्य पूर्वकायः । अंश एकदेशस्तद्वानंशी । इह न भवति—पूर्वो नाभेः । पूर्वादेः पूर्वप्रयोगार्थं वचनम् ।

**सायाह्नादयः** ।३।१।५३॥ सायाह्नादयः शब्दा अंशिना तत्पुरुषेण साधवो भवन्ति ॥

**सर्वांशसंख्याव्ययात्** ।७।३।१२८॥ सर्वशब्दादंशवाचिभ्यः संख्यावाचिभ्योऽव्ययेभ्यश्च परो योऽहन्शब्दस्त-

---

१–कु सि अश्व सि । गतिक्वेति समासः । स्थानिवत्त्वात् पदत्वे तृतीयः । २–पूर्व सि काय ङस् । शेषे षष्ठी ।

दन्तात्तत्पुरुषादट् समासान्तो भवति, तस्य चाहन्शब्दस्य नित्यमह्नादेशो भवति।

**संख्यासायवेरह्नस्याहन् ङौ वा ।१।४।५०॥** संख्यावाचिभ्यः सायशब्दाच्च विशब्दाच्च परस्याऽह्नशब्दस्य ङौ परेऽहन्नित्ययमादेशो वा भवति। सायमह्नः सायाह्नः। सायाह्नि, सायाहनि, सायाह्ने।

**अतोऽह्नस्य ।२।३।७३॥** रेफादिमतोऽकारान्तात्पूर्वपदात् परस्याऽह्नशब्दसम्बन्धिनो नस्य णः स्यात्। पूर्वोऽह्नः पूर्वाह्णः। मध्यं दिनस्य मध्यन्दिनम्। पूर्वं रात्रेः पूर्वरात्रः। मध्यं रात्रेर्मध्यरात्रः। रात्राह्नाहान्तं पुंसि ज्ञेयम्।

**समेंऽशेऽर्धं नवा ।३।१।५४॥** अर्धमित्येत्समेंऽशे वर्त्तमानमभिन्नेनांशिना वा समस्यते, स तत्पुरुषः। अर्धं पिप्पल्या अर्धपिप्पली। द्वन्द्वतत्पुरुषयोः परपदलिङ्गम्। पक्षे पिप्पल्यर्धम्, पक्षे वाक्यमपि। असमेंऽशे तु ग्रामस्यार्धो ग्रामार्धः॥

**जरत्यादिभिः ।३।१।५५॥** अर्धशब्दो जरत्यादिभिरभिन्नैरंशिभिः सह वा समस्यते, स तत्पुरुषः। अर्धो जरत्या अर्धजरती। असमांशार्थं वचनम्। पक्षे–जरत्यर्ध इत्याद्यपि।

---

३–साय सि अहन् ङस्। अवर्णेवर्णस्य। ४–पूर्वापरेति समासः। ५–सायाह्नादिः। पूर्वपदस्य मान्तत्वं निपातनात्। तौ मुम इति स्वानुनासिकः। ६–पूर्वापरेति समासः। संख्यातैकेत्यत्, अवर्णेवर्णस्य।

**वैकव्यञ्जने पूर्ये ।३।२।१०४॥** उदकशब्दस्य पूरणीयवाचिन्यसंयुक्तव्यञ्जनादावुत्तरपदे उद इत्ययमादेशो वा भवति । उदकस्य कुम्भ उदकुम्भ उदककुम्भः । उदकेन पूरणीयः कुम्भ इत्यर्थः । एकव्यञ्जन इति किम् ? उदकस्यामत्रमुदकामत्रम्, उदकस्य स्थालमुदकस्थालम् । पूर्ये इति किम् ? उदकस्य पर्वत उदकपर्वतः ।

**नाम्न्युत्तरपदस्य च ।३।२।१०७॥** उदकशब्दस्य पूर्वपदस्योत्तरपदस्य च संज्ञाविषये उदादेशो भवति । उदकस्य पानमुदपानं निपानम् । उदकानि धीयन्तेऽस्मिन् उदधिः समुद्रः । लवणमुदकं यस्य लवणोदः । संज्ञेयं समुद्रविशेषस्य । एवं क्षीरोदाच्छोदादयः ॥

## ॥ अथ कर्मधारयसमासः ॥

**विशेषणं विशेष्येणैकार्थं कर्मधारयश्च ।३।१।९६॥** विशेषणवाचि नामैकार्थं विशेष्यवाचिना नाम्ना सह समस्यते, स समासस्तत्पुरुषसंज्ञः कर्मधारयसंज्ञश्च भवति । नीलं च तदुत्पलं च नीलोत्पलम् । कृष्णाश्च ते तिलाश्च कृष्णतिलाः । विशिष्यतेऽनेकप्रकारं वस्तु प्रकारान्तरेभ्यो व्यवच्छिद्यते व्यावर्त्यतेऽनेनेति विशेषणं व्यावर्त्तको धर्मः,

---

१–अधिकरणेऽनट् । कर्मणि शेषे वा षष्ठी । २–उदक आम् घि इति विग्रहः । कर्मणि षष्ठी । संज्ञायामधिकरणे किः । ३–बहुव्रीहिः ।
४–नील सि उत्पल सि ।

व्यवच्छेद्यं विशेष्यम्। नीलादिकं ह्युत्पलादिकं रक्तादिप्रकारेभ्यो व्यावर्त्तयतीति नीलादिकं विशेषणमुत्पलादिकं विशेष्यमिति बोध्यम्। भिन्नप्रवृत्तिनिमित्तयोः शब्दयोरेकस्मिन्नर्थे वृत्तिरैकार्थ्यम्, तद्वदेकार्थमिति बोध्यम्। नीलादिशब्दो ह्यत्र नीलादिधर्मविशिष्टमर्थं बोधयति। उत्पलादिशब्दश्च उत्पलसामान्यमाहेति नीलविशिष्टोऽर्थ उत्पलमिति सामान्यविशेषयोः कथञ्चिदभेद इति नीलादिशब्दस्योत्पलादिशब्देनैकार्थता बोध्या। प्रथमोक्तत्वाद्विशेषणस्य प्राङ्निपातः॥

**पुंवत् कर्मधारये** ।३।२।५७॥ परतः स्त्र्यनूङ् कर्मधारये समासे स्त्र्येकार्थे उत्तरपदे परे पुंवद् भवति। कल्याणी चासौ प्रिया च कल्याणप्रिया। नाऽऽप्प्रियादावित्यादिप्रतिषेधबाधनार्थ आरम्भः॥

**पूर्वकालैकसर्वजरत्पुराणनवकेवलम्** ।३।१।९७॥ पूर्वकालवाचि नामैकादीनि चैकार्थानि परेण नाम्ना सह समस्यन्ते, स तत्पुरुषः कर्मधारयश्च। पूर्वः कालो यस्य सोऽर्थः पूर्वकालः, तद्वाचि नामेह पूर्वकालपदेन ग्राह्यम्। पूर्वं स्नातः पश्चादनुलिप्तः स्नातानुलिप्तः। पूर्वं छिन्नः पश्चात्प्ररूढश्छिन्नप्ररूढो वृक्षः। एकशब्दः संख्यान्यासहायाऽद्वितीयवाची। एका शाटी एकशाटी। एके ऋषय एकर्षयः।

१–स्नात सि अनुलिप्त सि।

एकोऽसहायश्चौर एकचौरः । एकोऽद्वितीयो धनुर्धर एकधनुर्धरः । सर्वे शैलाः सर्वशैलाः । जरन् स च वल्लिनश्च जरद्वल्लिनः ।पुराणो मुनिः पुराणमुनिः । नवमुदकं नवोदकम् । केवलमसहायं ज्ञानं केवलज्ञानम् । पूर्वप्रयोगार्थं वचनम् ॥

**निन्द्यं कुत्सनैरपापाद्यैः** ।३।१।१००॥ निन्द्यवाचि नाम पापादिवर्जितैर्निन्दाहेतुभिः समस्यते, स तत्पुरुषः कर्मधारयश्च । द्विजश्चासौ जाल्मश्च द्विजजाल्मः । मुनिश्चासौ धूर्तश्च मुनिधूर्तः । अपापाद्यैरिति किम् ? पापश्चासौ तापसश्च पापतापसः । हतश्चासौ विधिश्च हतविधिः । प्राक्प्रयोगार्थं सूत्रम् ॥

**उपमानं सामान्यैः** ।३।१।१०१॥ उपमानवाचि नामोपमानोपमेयसाधारणधर्मवाचिना नाम्ना समस्यते, स तत्पुरुषः कर्मधारयश्च । शस्त्रीव शस्त्री, शस्त्री चासौ श्यामा च शस्त्रीश्यामा । शस्त्रीव श्यामेत्यर्थः । शस्त्रीति स्त्रीलिङ्गसंज्ञेति परतः स्त्रीत्वाभावान्न पुंवत् । घन इव श्यामो घनश्यामः । विशेषणं विशेष्येणेत्येव समासे सिद्धे 'उपमानं सामान्यैरेवेति नियमार्थं सूत्रम् । तेनाग्निर्माणवक इत्यादौ विशेषणसमासोऽपि न ॥

**उपमेयं व्याघ्राद्यैः साम्यानुक्तौ** ।३।१।१०२॥ उपमेयवाचि नाम उपमान वाचिभिर्व्याघ्राद्यैर्नामभिः सह

---

१–अत्र श्यामादयः शब्दास्तद्वति । श्यामत्वाद्युपमानोपमेययोः साधारणो धर्म इति बोध्यम् ।

समस्यते, न चेदुपमानोपमेयसाधारणधर्मवाची शब्दः प्रयुज्यते, स तत्पुरुषः कर्मधारयश्च । व्याघ्र इव व्याघ्रः, पुरुषश्चासौ व्याघ्रश्च पुरुषव्याघ्रः । एवं पुरुषसिंहः, मुनिपुंगवः, राजकुञ्जरः इत्यादि । व्याघ्रादिराकृतिगणः । तेन वाग्वज्रम्, मुखपद्ममुखेन्दुकुचकुम्भादयः । साम्यानुक्ताविति किम्? पुरुषो व्याघ्र इव शूर इत्यादौ न भवति । अत्राह-पुरुषस्य शूरसापेक्षत्वादेवात्र व्याघ्रेण न समास इति । अत्रोच्यते-एवं तर्हि अयमेव प्रतिषेधो ज्ञापयति 'प्रधानस्य सापेक्षत्वेऽपि समास' इति । तेन 'राजपुरुषो दर्शनीय' इत्यादौ समासः सिध्यति । उपमानं सामान्यैरेवेति नियमबाधनार्थमुपमेयस्य पूर्वप्रयोगार्थं च सूत्रमिति बोध्यम् ॥

**पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीरम्** ।३।१।१०३॥ पूर्वादीनि नामानि परेण नाम्ना सह समस्यन्ते, स तत्पुरुषः कर्मधारयश्च । पूर्वश्चासौ पुरुषश्च पूर्वपुरुषः वीरपुरुष इत्यादि । पूर्वप्रयोगनियमार्थं सूत्रम् । एकवी॰ इत्यादौ बाहुलकात् पूर्वकालैकेति समासो बोध्यः ॥

**सन्महत्परमोत्तमोत्कृष्टं पूजायाम्** ।३।१।१०७। सत्-महत्-परम-उत्तम-उत्कृष्ट-इत्येतानि नामानि पूजाय

---

२-शूरत्वमत्रोभयसाधारणो धर्मः । ३-सापेक्षमसमर्थवदित्यसामर्थ्यादिति भावः । ४-अन्यथा सापेक्षत्वादसामर्थ्यात्समासो न स्यात् ।

गम्यायां पूज्यमानवाचिभिर्नामभिः समस्यते, स तत्पुरुषः कर्मधारयश्च । संश्चासौ पुरुषश्च सत्पुरुषः ।

जातीयैकार्थेऽच्वेः ।३।२।७०।। महतोऽच्व्यन्तस्य जातीय प्रत्यये एकार्थे चोत्तरपदे डा अन्तादेशो भवति । महापुरुषः, परमपुरुषः, उत्तमपुरुषः, उत्कृष्टपुरुषः । पूर्वप्रयोगार्थं वचनम् । तेन सच्छुक्ल इत्यादौ खञ्जकुण्टादिवदनियमो न । महोदधिरित्यादौ महदादिशब्दस्य वैपुल्यादिवाचित्वेऽपि बाहुलकात्समासो बोध्यः । महावीरः, परममहानित्यादौ यथापरं पूर्वनिपातः ।

वृन्दारकनागकुञ्जरैः ।३।१।१०८।। पूजायां गम्यमानायां वृन्दारक–नाग–कुञ्जरैर्नामभिरेकार्थं नाम समस्यते, स तत्पुरुषः कर्मधारयश्च । वृन्दारक इव वृन्दारकः, मुनिश्चासौ वृन्दारकश्च मुनिवृन्दारकः, गोनागः, राजकुञ्जरः । इहोपमानात्पूजा गम्यते ।।

**किं क्षेपे** ।३।१।११०।। निन्दायां गम्यायां किमित्येतन्नाम निन्द्यवाचिना नाम्ना समस्यते, स तत्पुरुषः कर्मधारयश्च । कुत्सितो नरः किंनरः, किन्नरः, अश्वमुखत्वात् । कुत्सितो वैयाकरणः किंवैयाकरणः, शब्देष्वव्युत्पन्नत्वात् । कुत्सितः शुकः किंशुकः, किञ्चिन्नीलत्वात् । एवमन्यत्राऽप्यूह्यम् ।।

१–महत् सि पुरुष सि । डित्यन्त्यस्वरादिलोपः । २–परत्वादस्याऽत्र पूर्वापरेति समासो न । ३–तौ मुमो । ४–तौ मुमो । ५–शिड्हेऽनुस्वारः ।

**दिगधिकं संज्ञातद्धितोत्तरपदे ।३।१।७८॥** दिग्वाचि अधिकमित्येतच्चैकार्थं नाम परेण नाम्ना सह समस्यते। संज्ञायां तद्धिते च प्रत्यये विषयभूते उत्तरपदे च परतः, स च तत्पुरुषः कर्मधारयश्च। दक्षिणाश्च ताः कोशलाश्च दक्षिणकोशलाः। जनपदसंज्ञेयम्। वाक्येन संज्ञाऽनवगमात्संज्ञायां नित्यसमासः। विग्रहवाक्यं तु विभागप्रदर्शनपरं न समानार्थकमिति बोध्यम्। दक्षिणस्यां शालायां भवो दाक्षिणशालः। अत्र भवार्थे तद्धितप्रत्ययविषये प्रागेव समासः, पश्चात्तद्धितप्रत्ययः। अधिकया षष्ठ्या क्रीतः अधिकषाष्टिकः। दक्षिणो गौर्धनं यस्येति त्रिपदे बहुव्रीहौ त्रयाणामेकार्थीभावे उत्तरपदे परे दक्षिण सि गो भि धन सीत्यलौकिके विग्रहे दक्षिण सि गो सि इत्यंशस्यानेन तत्पुरुषसंज्ञा। तेन तत्र गोस्तत्पुरुषादित्यट्। दक्षिणगवधनः। एवमन्यत्राप्यूह्यम्॥

**संख्यासमाहारे च द्विगुश्चाऽनाम्न्ययम्।३।१।९९॥** संख्यावाचि नाम परेण नाम्ना सह समस्यते, संज्ञातद्धितयो र्विषये उत्तरपदे परे समाहारे च वाच्ये, स समासस्तत्पुरुषः कर्मधारयश्च। अयमेव चासंज्ञायां द्विगुसंज्ञश्च। सप्त च ते ऋष-

६-सर्वादय इति पुंवत्। ७-दक्षिणा ङि शाला ङी। समासे स्यादि लुक्। सर्वादय इति पुंवत्। गोश्चान्ते इति शालाशब्दस्य ह्रस्वः दिक्पूर्वपदादनाम्न इति णः, आदिस्वरवृद्धिः, अवर्णेवर्णेत्यलोपः। ८-अधिका टा षष्टि टा। क्रीते इकण्। मानसंवत्सरस्येत्यादिना वृद्धिः।

१-अट्यवादेशः।

यश्च सप्तर्षयः[2] । समुदाये प्रवृत्ताः शब्दा अवयवेऽपि वर्तन्ते । तेन एकः सप्तर्षिरुदित इत्याद्यप्यदुष्टम् । द्वयोर्मात्रोरपत्यं द्वैमातुरः । पञ्च गावो धनमस्य पञ्चगवधनः । तत्पुरुषसंज्ञाऽपीत्यट् समासान्तः । पञ्चानां पूलानां समाहारः पञ्चपूली । अकारान्तोत्तरपदो द्विगुः, पात्राद्यन्तवर्जितः स्त्रियामिष्टः । पञ्चानां पात्राणां समाहारः पञ्चपात्रम् । अजादित्वात् । त्रिफला ॥

**मयूरव्यंसकेत्यादयः ।३।१।११६॥** मयूरव्यसंकादयस्तत्पुरुषसमासा निपात्यन्ते । व्यंसकश्चासौ मयूरश्च मयूरव्यंसकः । विशेष्यस्य प्राक्प्रयोगो निपातनात् । एवमन्यत्राऽप्यलाक्षणिकं सर्वं निपातनाद् बोध्यम् । शाकप्रियः, शाकभोजी, शाकप्रधानो पार्थिवः शाकपार्थिवः । अत्रोत्तरपदस्य प्रियादेर्लोपः । एवमन्यत्र ॥

**एकादशषोडशषोडन् षोढा षड्ढा ।३।२।९१॥** एकादयः शब्दा दशादिषूत्तरपदादिषु कृतदीर्घत्वादयो निपात्यन्ते । एकेनाधिका एकाधिकाश्च ते दश च एकादश ।

---

२—स्यादेः स्थानिवद्भावेन पदत्वे नाम्नो न इति नलोपोऽवर्णस्येत्यर् ।

३—संख्यासंभद्रादित्यण् मातुरादेशश्च । आदिस्वरवृद्धिः । ४—नाम सिदिति पदत्वान्नलोपः । गोरित्यट्यवादेशः । ५—द्विगोः समाहाराद्दिति ङी । अस्येत्यलुक् । ६—धूर्तः । अंसरहितो वा । ७—मयूरव्यंसकादित्वात्समासः । अधिकादिशब्दलोपः । ष्ठ्बहुत्वा दन्त । उत्तरशब्दलोपः षषोऽन्त्यस्योत्वमुत्तरपदादेर्डकारः । षड् दन्ता अस्य षोडन् । दन्तशब्दस्य दत्रादेशादि निपातनात् । ऋदुदित इति नोन्तः ।

षोडश। एवं द्वादशादयः। दध्युपसिक्तो दधिसंस्कृतो दधिमिश्रो वौदनो दध्योदनः। सर्वेषां श्वेततरः सर्वश्वेतः, सर्वेषां महत्तरः सर्वमहान्। एवमविहितलक्षणस्तत्पुरुषो मयूरव्यंसकादिषु।

जातमहद्वृद्धादुक्ष्णः कर्मधारयात् ।७।३।९५॥ जात-महद्-वृद्ध-इत्येतेभ्यः परो य उक्षन् शब्दस्तदन्तात्कर्मधारयात् अत् समासान्तो भवति। जातश्चासावुक्षा च जातोक्षः। एवं महोक्षः, वृद्धोक्षः।

द्विगोरनह्नोऽट् ।७।३।९९॥ अन्नन्तादहन्शब्दान्ताच्च द्विगोः समाहारे वाच्ये अट् समासान्तो भवति। शतानां राज्ञां समाहारः शतराजम्, शतराजी। अन्नन्तान्त आबन्तान्तश्च द्विगुर्वा क्लीबे। पञ्चानामजानां समाहारः पञ्चाजी, पञ्चाजम्। पात्राद्यन्तद्विगुस्तु नित्यं क्लीबे पञ्चपात्रम्, चतुर्युगम् त्रिभुवनम् त्रिसन्ध्यमिति नित्यं क्लीबे। अकारान्तोत्तरपदो द्विगुरन्यः स्त्रियाम्। पञ्चानामजानां समाहारः पञ्चाजी। पञ्चब्राह्मणीत्यादि। प्रकृतमनुस्रियते। द्वयोरह्नोः समाहारो द्व्यहः। रात्राह्नाहान्तस्तत्पुरुषः पुंसि’

गोस्तत्पुरुषात् ।७।३।१०५॥ गोशब्दान्तात्तत्पुरुषादट्

८-तरलोपः।

१-अति नोऽपदस्य तद्धिते। २-जातीयैकार्थ इत्यात्वम्। ३-नोऽपदस्य। स्त्रियां द्विगोरिति ङी। ४-पञ्चन् आम् अजा आम्। ५-गोश्चान्त इति ह्रस्वः। ६-अत्राऽजशब्दः पुंसि, द्विगोरिति ङीः। ७-नोऽपदस्य।

समासान्तो भवति, न तु तद्धितलुकि । राज्ञो गौः राजगवः राजगवी[8], पुमांश्चासौ गौश्च पुंगवः[9], गामतिक्रान्तोऽतिगवः[10], पञ्चानां गवां समाहारः पञ्चगवम्[11] । पञ्च गावो धनं यस्य पञ्चगवधनः[12] ।

**राजन् सखेः ।७।३।१०६॥** राजन् सखि इत्येतदन्तात्तत्पुरुषादट् समासान्तो भवति । देवानां राजा देवराजः । महांश्चासौ राजा च महाराजः[13] । राज्ञः सखा राजसखः[14], महाँश्चासौ सखा च महासखः[1], अतिक्रान्तः सखायमतिसखः पञ्चानां सखीनां समाहारः पञ्चसखम्[2], पञ्च सखायः प्रिया यस्य पञ्चसखप्रियः[3] । राजन्निति नान्तनिर्देशादनकारान्तान्न भवति । महती चासौ राज्ञी च महाराज्ञी[4] ॥

**अह्नः ।७।३।११६॥** अहन्शब्दान्तात्तत्पुरुषादट् समासान्तो भवति । परमाहः[5] । जन्माहः[6], पुण्याहम्[7] ॥

---

८–अट्यवादेशे टित्वात् स्त्रियां ङीः ९–नाम सिदिति पदत्वात् पदस्येति संयोगान्तलोपः, तो मुम इत्यनुस्वारः । १०–गोश्चान्त इति ह्रस्वः, अट्यस्त्रयम्भुव इत्यव् । ११–उत्तरपदस्यादन्तत्वाभावान्न स्त्रीत्वम् । १२–उत्तरपदे परे तत्पुरुष इत्यट् । १३–जातीयैकार्थे इत्याः, नोऽपदस्य । १४–अट्यवर्णेवर्णस्येतीकारलोपः ।

१–जातीयैकार्थे इत्याः । २–समाहारे द्विगो द्वन्द्वस्य च क्लीबता । ३–उत्तरपदे परे तत्पुरुष इत्यट् । ४–पुंवत्कर्मधारये । जातीयैकार्थे इत्याः । ५–सन्महदिति समासः, अटि नोऽपदस्य । ६–जन्मनोऽहः, स्थानिवद्भावेन पदत्वान्नलोपः । ७–पुण्यमहः, विशेषणसमासः ।

**संख्यातादह्नश्च वा ।७।३।११७॥** संख्यातशब्दात्परो योऽहन् शब्दस्तदन्तात्तत्पुरुषादट् समासान्तो भवति तस्याऽहन् शब्दस्य चाह्नादेशो वा भवति। संख्यातं च तदहश्च संख्याताह्नः, संख्याताहः। सर्वमहः सर्वाह्णः, अह्नः पूर्वः पूर्वाह्णः। द्वयोरह्नोर्भवः द्व्यह्नः पटः। द्वे अहनी प्रिये यस्य स द्व्यह्नप्रियः। अहोऽतिक्रान्तोऽत्यह्नः। स्त्रियां टित्वान्ङीः, अत्यह्नी कथा॥

**संख्यातैकपुण्यवर्षादीर्घाच्च रात्रेरत् ।७।३।११९॥** संख्यात एक पुण्य वर्षा दीर्घ इत्येतेभ्यः सर्वांशादिभ्यश्च यो रात्रिशब्दस्तदन्तात्तत्पुरुषादत् समासान्तो भवति। संख्याता रात्रिः संख्यातरात्रः, एका रात्रि रेकरात्रः, पुण्या रात्रिः पुण्यरात्रः, वर्षाणां रात्रि वर्षारात्रः, दीर्घा रात्रि र्दीर्घरात्रः, सर्वा रात्रिः सर्वरात्रः, रात्रेः पूर्वः पूर्वरात्रः, द्वयो रात्र्योः समाहारो द्विरात्रः, रात्रिमतिक्रान्तोऽतिरात्रः। स्त्रियामाप्॥

---

८–अवर्णेवर्णस्य, समानदीर्घः। ९–पूर्वकालेति समासः सर्वांशेत्यट् अह्नादेशश्च। अतोऽह्नस्य ति णः। १०–पूर्वापरेति समासः। ११–तद्धितार्थे समासः, भवे तद्धितस्य कालेकणो द्विगोरनपत्य इति लुक्, सर्वांशेति अह्नादेशः। १२–उत्तरपदे तत्पुरुषसमास इत्यट्यह्नादेशेऽवर्णेवर्णस्येत्यलोपः। १३–पुंवत्, अवर्णेवर्णस्येत्यलोपः। १४–अंशिसमासः पूर्वापरेत्यनेन। १५–प्रादिसमासः, ज्यातौ द्वितीया।

**निसश्च श्रेयसः ।७।३।१२२॥** निस् शब्दात् श्वस् शब्दाच्च परो यः श्रेयस्शब्दस्तदन्तात्तत्पुरुषादत् समासान्तो भवति। निश्चितं श्रेयो निःश्रेयसम्, शोभनं श्रेयः श्वःश्रेयसम् ॥

**नञव्ययात्संख्याया डः ।७।३।१२३॥** नञोऽव्ययाच्च परो यः संख्याशब्दस्तदन्तात्तत्पुरुषाद् डः समासान्तो भवति। न दश अदशाः[2], न्यूना दश इत्यर्थः। एवमनवादयः। त्रिंशतो निर्गतानि निस्त्रिंशानि वर्षाणि ॥

**न किमः क्षेपे ।७।३।७०॥** निन्दायां यः किंशब्दस्तत्पूर्वपदात् समासात्प्राप्तः समासान्तो न भवति। कुत्सितो राजा किंराजा[3], यो न रक्षति। एवं किंसखा योऽभिद्रुह्यति, किंगौर्यो[4] न वहति, कुत्सिते अक्षिणी यस्य [5]किमक्षि द्विज इत्यादि ॥

**नञ् तत्पुरुषात् ।७।३।७१॥** नञ्तत्पुरुषात्समासान्तो न भवति। अराजा[6], असखा।

**पूजा स्वतेः प्राक्टात् ।७।३।७२॥** पूजार्थकस्वतिपूर्वपदात्समासात्समासान्तो न भवति, बहुव्रीहेर्यः टसमा-

---

१—मयूरव्यंसकादित्वात्समासः। २—डित्यन्तस्वरादिलोपः। ३—राजन् सखेरित्यस्य निषेधः, तौ मुम इत्यनुस्वारः, किं क्षेप इति समासः। ४—गोस्तत्पुरुषादित्यस्य निषेधः। ५—सक्थ्यक्ष्णोरित्यस्य निषेधः। ६—राजन्सखेः, नञत्।

सान्तो विहितस्ततः प्राक्। शोभनो राजा सुराजा, अतिशयितः सखा अतिसखा। पूजाग्रहणं किम्? अतिक्रान्तो राजानमतिराँज इत्यादि। प्राक्टादिति किम्? शोभने अक्षिणी यस्य स्वक्षः॥

॥ इति तत्पुरुषसमास प्रक्रिया ॥

## ॥ अथ द्वन्द्व समास प्रक्रिया ॥

**चार्थे द्वन्द्वः सहोक्तौ** ।३।१।११७॥ सहोक्तिविषये चार्थे वर्तमानं नाम नाम्ना सह समस्यते, स समासो द्वन्द्वसंज्ञो भवति। चार्थाश्चत्वारः समुच्चयोऽन्वाचय इतरेतरयोगः समाहारश्चेति। तत्र द्विप्रभृतीनां क्रियाकारकद्रव्यगुणानां समकक्षाणामविवक्षितक्रमयौगपद्यानामेकत्राऽऽत्मरूपभेदेनाऽन्वयः समुच्चयः। यथा–चैत्रः पचति पठति च। पचनपठनक्रिययोः क्रियात्वेन साम्येऽपि आत्मरूपभेदेन चैत्रेऽन्वेति पचनरूपेण पठनरूपेण च, न तु क्रियारूपेणैकरूपेण, ततश्चैत्रः करोतीत्यर्थोऽनभिधानात्। गौणमुख्यभावेनाऽविवक्षणाच्च समकक्षता, क्रमयौगपद्यं च न विवक्षितम्। एवमन्यत्राऽप्यूह्यम्। समुच्चयस्थल एवाऽन्यतरस्याऽनुषङ्गिकत्वादिना गौणत्वेऽन्वाचयः। यथा–बटो भिक्षामट गां चानय। अत्र गवानयनस्यानुषङ्गिकत्वाद्

७–प्रादिसमासः, राजन्सखेरित्यट्, नोऽपदस्य। ८–सक्थ्यक्ष्ण इति टः, अवर्णेवर्णस्य। सु सि अक्षि औ।

गौणत्वमिति समकक्षता नास्ति, क्रमश्चाऽप्यस्ति। अतोऽत्राऽन्वाचयश्चार्थः। यत्र द्रव्याणामेव परस्परापेक्षाणां समूहो विवक्षितावयवसंख्याकः स इतरेतरयोगः। यथा चैत्रश्च मैत्रश्च घटं कुर्वाते। चैत्रमैत्रौ घटं कुर्वाते। अत्र समूहस्यैव घटकरणतात्पर्यमिति द्वयोः सहकारो गम्यते इति परस्परापेक्षा। अवयवसंख्याविवक्षणाच्च द्विवचनम्। धवखदिरौ छिन्धीत्यादावपि समूहच्छेदन एव तात्पर्यं क्रमाविवक्षणादिति समूहघटकत्वेन परस्परापेक्षा, अवयवसंख्याविवक्षणाच्च द्विवचनम्। एवमन्यत्राऽप्यूह्यम्। स एव समूहप्रधानोऽविवक्षितावयवसंख्यः समाहारः। यथा–धवखदिरपलाशं तिष्ठति। समूहस्यैकत्वादेकवचनम्। इतरेतरयोगे तु धवश्च खदिरश्च पलाशश्च तिष्ठन्ति। समासे चकारो न प्रयुज्यते, तदर्थस्य समासेनाभिधानात्, उक्तार्थानामप्रयोग इति न्यायात्। अत्रेदं बोध्यम्–समुच्चयाऽन्वाचययोः समासो न भवति, सहोक्त्यभावात्। अन्यत्र भवति तत्सत्त्वात्। सहोक्तिश्च वर्तिपदैः प्रत्येकं पदार्थानां युगपदभिधानम्। धवखदिरावित्यत्र धवोऽपि

१–चैत्र सि मैत्र सि। अत्र समासे स्यादिलुक्। अवयवद्वित्वाद् द्विवचनम्। पूर्वप्रयोगस्तु समस्वरत्वाद् यथेष्टम्। २–धवश्च खदिरश्च पलाशश्चैषां समाहार इति लौकिकविग्रहः। समाहारद्वन्द्वस्यैकत्वं क्लीबत्वं च। पूर्वप्रयोगश्चात्र यथाऽल्पस्वरम्। चैत्रश्च मैत्रश्चाऽनयोरितरेतरयोगश्चैत्रमैत्रौ मैत्रचैत्रौ वा।

द्व्यर्थः खदिरोऽपि द्व्यर्थः। धवश्च खदिरश्चेति वाक्ये चकार एनमेवार्थमाह। एवं समाहारेऽपि बोध्यम्। समुच्चयान्वाचयस्थले तु समूहान्वयाविवक्षणान्न सहोक्तिरिति बोध्यम्। एकश्च विंशतिश्चैकविंशतिरित्यादिसंख्याद्वन्द्वे इतरेतरयोगे समाहारे वा समूहैकत्वसंख्यैव विवक्ष्यते। शब्दशक्तिस्वाभाव्यादित्येकवचनम्, आशताद् द्वन्द्व इति लिङ्गानुशासनाच्च स्त्रीलिङ्गता बोध्या। लघ्वक्षरेत्यादि सूत्रे एकग्रहणाद् बहूनामपि द्वन्द्वः। चैत्रश्च मैत्रश्च दत्तश्च चैत्रमैत्रदत्ता गच्छन्ति। वक्रश्च कुटिलश्च वक्रौ, देवश्च देवश्च देवौ, एवंविधेषु समानार्थरूपादिस्थलेषु द्वन्द्वस्याऽपवाद एकशेष एव न द्वन्द्वः। यद्यपि द्वन्द्वे कृतेऽप्येकशेषः संभवति, तथापि 'सत्यपि सम्भवे बाधनं भवती'ति वचनाद् द्वन्द्वो बाध्यत एव। अन्यथा वाक् च वाक् च वाचावित्यादौ परत्वात् समासान्तप्रत्यये वैरूप्यादेकशेषो न स्यादिति ध्येयम्। इतरेतरयोगद्वन्द्वतत्पुरुषयोः परपदलिङ्गमित्युत्सर्ग इत्यनुसन्धेयम्।

**विरोधिनामद्रव्याणां नवा द्वन्द्वः स्वैः।३।१।१३०॥** विरोध्यर्थवाचिनां द्रव्यमप्रतिपादयतां शब्दानां द्वन्द्वो एकार्थो वा भवति स चेद् द्वन्द्वः सजातीयैरारभ्यते। द्रव्यमिह गुणाद्याश्रयः। सुखं च दुःखं च सुखदुःखम्,

१—लघ्वक्षरत्वात्पूर्वनिपातः।

सुखदुःखे। शीतोष्णं[2] शीतोष्णे इत्यादि। सहानवस्थानमिह विरोधः, विरोधिनामिति किम्? कामक्रोधौ, रूपरसगन्धस्पर्शा इत्यादि। अद्रव्याणामिति किम्? शीतोष्णे उदके स्तः। स्वैरिति किम्? बुद्धिसुखदुःखानि। समाहारविवक्षायामेकत्वस्येतरेतरयोगविवक्षायामनेकत्वस्य च सिद्धत्वाद्विकल्पे सिद्धे सर्वमिदं विकल्पानुक्रमणं नियमार्थम्, सिद्धे सत्यारम्भो नियमार्थ इति वचनात्। ततश्च विरोधिनामेव अद्रव्याणामेव स्वैरेवेति नियमो बोध्यः, तेन प्रत्युदाहरणे सर्वत्रेतरेतरयोग एव॥

**पशुव्यञ्जनानाम्** ।३।१।१३२॥ पशूनां व्यञ्जनानां च स्वैर्द्वन्द्व एकार्थो वा भवति। गौश्च महिषश्च गोमहिषम्, गोमहिषौ। द्वन्द्वैकत्वे क्लीबता बोध्या। दधिघृतम्, दधिघृते। स्वैरेव तेनेह न-गोनरौ। एव मन्यत्र॥

**तरुतृणधान्यमृगपक्षिणां बहुत्वे** ।३।१।१३३॥ एतेषां बहुत्वे वर्तमानानां स्वैर्द्वन्द्व एकार्थो वा भवति।

---

२-स्वरादित्वादुष्णशब्दस्य पूर्वनिपातप्राप्तावपि धर्मार्थादित्वाच्छीतशब्दस्याऽपि पूर्वनिपातः। एवं चोष्णशीते इत्यपि।

१-२-धर्मार्थादित्वात्पूर्वप्रयोगः, क्रोधकामावित्याद्यपि। ३-बुद्धे विषयः सुखादीति न सजातीयता। अनेकस्य प्राक्प्रयोगे प्राप्ते यथेष्टम्। ४-अल्पस्वरस्य प्राक्प्रयोगः। ५-इदन्तस्य प्राक्प्रयोगः। ६-अल्पस्वरस्य प्राक्प्रयोगः।

प्लक्षाश्च न्यग्रोधाश्च प्लक्षन्यग्रोधम्, प्लक्षन्यग्रोधाः। कुशकाशम्, कुशकाशाः। तिलमाषम्, तिलमाषाः। रुरुपृषतम्, रुरुपृषताः। हंसचक्रवाकम्, हंसचक्रवाकाः। एकस्याऽपि पदस्य बहुत्वे एतत्। प्लक्षश्च न्यग्रोधाश्च प्लक्षन्यग्रोधम्, प्लक्षन्यग्रोधाः। बहुत्वे इति किम्? प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ अत्रेतरेतरयोग एव। एवमन्यत्र। स्वैरित्येव प्लक्षयवाः॥

**सेनाङ्गक्षुद्रजन्तूनाम्** ।३।१।१३४॥ सेनाङ्गानां क्षुद्रजन्तूनां च बहुत्वे वर्त्तमानानां स्वैर्द्वन्द्व एकार्थो नित्यं भवति। अश्वाश्च रथाश्चाऽश्वरथम्। रथिकाश्वारोहम्। क्षुद्रजन्तवोऽल्पकायाः प्राणिन आनकुलमिह, यूकालिक्षम्। बहुत्वे एव-अश्वश्च रथश्च अश्वरथौ। स्वैरेव हस्तिमशकाः।

**प्राणितूर्याङ्गानाम्** ।३।१।१३७॥ प्राण्यङ्गानां तूर्याङ्गानां च स्वैर्द्वन्द्व एकार्थो भवति। दन्ताश्च ओष्ठौ च एषां समाहारो दन्तौष्ठम्। पाणी च पादौ च एषां समाहारः पाणिपादम्। शङ्खश्च पटहश्चाऽनयोः समाहारः

७-१०-११-अल्पस्वरस्य प्राक्प्रयोगः। ८-९-लघ्वक्षरस्य प्राङ् निपातः। १२-धर्मार्थादिः। यवप्लक्षा इत्यपि।

१-लघ्वक्षरस्य प्राङ् निपातः। २-समाहारस्य मुख्यत्वात् क्लीबत्वाद् ह्रस्वत्वम्। समस्वरत्वाद् लिक्षायूकमित्यपि। ३-जसः स्थानिवद्भावेन व्यञ्जनादौ वा पदत्वान्नाम्नो न इति नलोपः। अल्पस्वरस्य प्राक्प्रयोगः। ४-इदन्तस्य प्राक्प्रयोगः।

शङ्ख[५]पटहम् । मार्दङ्गिक[६]पाण[७]विकम् । स्वैरेव-पाणिश्च पणवश्च पाणिपणवौ ॥

**नित्यवैरस्य** ।३।१।१४१॥ नित्यमनिमित्तं जातिनिबद्धं वैरं येषां तद्वाचिनां शब्दानां स्वैर्द्वन्द्व एकार्थो भवति । अहिश्च नकुलश्चानयोः समाहारोऽहिनकुलम् । क्षुद्रजन्तुत्वेऽपि परत्वादनेनैवैकार्थतेतीहोपन्यासः । पशुविकल्पः, पक्षिविकल्पश्च परत्वादनेन बाध्यते । अश्व[८]महिषम्, काको[९]लूकम् । यत्र न निर्निमित्तं वैरं तत्र समाहार इतरेतरयोगो वा यथेष्टम् । देवा[१०]सुरम् । देवासुरा इत्यादिः ॥

**गवाश्वादिः** ।३।१।१४४॥ गवाश्वादिर्द्वन्द्व एकार्थो भवति । गौश्चाऽश्वश्चानयोः समाहारो गवा[११]श्वम् । पुत्र[१]पौत्रम्, मूत्र[२]पुरीषम्, मांसशोणित[३]म्, दासीदास[४]मित्यादि । आकृतिगणोऽयम् ॥

***न दधिपय आदिः*** ।३।१।१४५॥ दधि पयःप्रभृतिर्द्वन्द्व एकार्थो न भवति । दधि च पयश्चाऽनयो-

५-७-अल्पस्वरस्य प्राक्प्रयोगः । ६-समस्वरत्वाद्यथेष्टं प्राक्प्रयोगः । ८-स्वरादित्वादल्पस्वरत्वान्महिषापेक्षयाऽर्च्यत्वाच्च प्राक्प्रयोगः । ९-राजदन्तादिः । १०-अर्च्यत्वात्प्राक्प्रयोगः । ११-राजदन्तादिः, स्वरे वेत्यवादेशः, समानदीर्घः ।

१-लघ्वक्षरत्वादर्च्यत्वाच्च । २-अल्पस्वरः । ३-अल्पस्वरः । ४-स्त्रिया मातृतयाऽर्च्यत्वात् ।

रितरेतरयोगो दधिपयसी । शुक्लं च कृष्णं चाऽनयो-रितरेतरयोगः शुक्लकृष्णे । दीक्षातपसीत्यादि ॥

सङ्ख्याने ।३।१।१४८॥ इयत्तापरिच्छेदः संख्यानम् । वर्तिपदार्थानां संख्याने गम्यमाने द्वन्द्व एकार्थो न भवति । दश गोमहिषाः । पशुविकल्पो निषिध्यते । एवञ्चेद्दशस्थले इतरेतरयोग एव । यथा—इयन्तो गवाश्वा इत्यादि ॥

राजदन्तादिषु ।३।१।१४९॥ राजदन्त इत्यादिषु समासेष्वप्राप्तपूर्वनिपातं प्राङ्निपतति । दन्तानां राजा राजदन्तः । अत्र व्याकरणे निर्धारणषष्ठ्याः समासो न निषिध्यते इति षष्ठीसमासे प्रथमोक्तत्वात् दन्तशब्दस्यैव पूर्वनिपातः प्राप्तः । ऋणेऽधमोऽधमर्णः, एवमुत्तमर्णः । अत्र ऋणस्य प्राप्तः । उलूखलं च मुशलं चोलूखलमुशले । अत्राल्पस्वरत्वान्मुशलस्य प्राप्तः । गवाश्वम् । अत्र स्वरादेः प्राप्तः । पुत्रपती, जायापती, दम्पती, जम्पती । स्त्रस्टपती । गणे निपातनाद् जायाया दम्भावो जम्भावश्च । अत्र-दन्तस्य पूर्वप्रयोगः प्राप्तः । आकृतिगणोऽयम् । क्वचिद्वि-कल्पोऽपि—पुरुषाणामुत्तम उत्तमपुरुषः, पुरुषोत्तमः । मध्य-गृहम्, गृहमध्यम् । बिम्बमिव—बिम्बम्, तच्च सोऽधरश्चा-

५—इदन्तस्य प्राक्प्रयोगः । ६—यथेष्टं प्राक्प्रयोगः । कृष्णशुक्ले इत्यपि । ७—अल्पस्वरत्वात् । १—निर्धारणषष्ठ्यन्तेन षष्ठीसमासः । २—षष्ठी समासः । ३—उपमेयमिति समासः ।

धराबिम्बम्, बिम्बाधरः ओष्ठबिम्बम् बिम्बोष्ठे[4] इत्यादि।

**धर्मार्थादिषु द्वन्द्वे ।१।३।१५९॥** धर्मार्थादौ द्वन्द्वे समासे प्राप्तपूर्वनिपातं वा पूर्वं[5] निपतति। धर्मार्थौ, अर्थधर्मौ। कामार्थौ, अर्थकामौ। शब्दार्थौ अर्थशब्दौ। आद्यन्तौ, अन्तादी। गुणवृद्धी, वृद्धिगुणौ। दीर्घलघू, [6]लघुदीर्घौ। तपःश्रुते श्रुततपसी[7] इत्यादि। आकृतिगणोऽयम्। वसन्तग्रीष्मौ, ग्रीष्मवसन्तौ[8] इत्यादि।

**लघ्वक्षरासखीदुत्स्वराद्यदल्पस्वरार्च्यमेकम् ।३।१।१६०॥** लघ्वक्षरं सखिवर्जितेकारोकारान्तं स्वराद्यकारान्तमल्पस्वरम्—अर्च्यवाचि च शब्दरूपं द्वन्द्वे समासे पूर्वं निपतति, यत्र चानेकसम्भवस्तत्रैकमेव। क्रमश उदाहरणानि—तिल[9]माषम्, पतिसुतौ, स्वादुतिक्तौ। सखिवर्जनादनियमः सखिसुतौ, सुत[10]सखायौ। स्पर्धे परमेव—[11]व्रीहियवौ। इदुतोः स्पर्धे यथेष्टम्—पतिवसू वसुपती। [12]अश्वशस्त्रम्। स्पर्धे परमेव—उष्ट्र[13]खरम्। प्लक्ष[14]न्यग्रोधौ। वा[15]गर्थौ॥ श्र[16]द्धामेधे दीक्षात[17]पसी।

४—औष्ठौतावित्यलुक्। ५—परत्वात्स्वराद्यदन्तस्य नित्यं प्राप्तिः। ६—लघ्वक्षरस्य प्राप्तिः। ७—अर्च्यस्य प्राप्तिः। ८—अल्पस्वरस्य प्राप्तिः। ९—धान्यविकल्पः लघ्वक्षरस्य प्राक्प्रयोगः। १०—सख्युरित इत्यैत् आयादेशः ११—इतरेतरयोगः सूत्रनिर्देशक्रमेण परत्वमिह बोध्यम्। १२—स्वराद्यदन्तस्य प्राक्प्रयोगः। १३—लघ्वक्षरात्स्वराद्यदन्तः परः। १४–१५—अल्पस्वरः प्राक्। १६–१७—अर्च्यस्य प्राक्प्रयोगः।

**मासवर्णभ्रात्रनुपूर्वम्** ।३।१।१६१॥ मासवाचि वर्णवाचि भ्रातृवाचि च शब्दरूपं द्वन्द्वे समासे अनुपूर्वं पूर्वं निपतति। फाल्गुनचैत्रौ, चैत्रवैशाखौ–फाल्गुनचैत्रवैशाखाः। ब्राह्मणक्षत्रियौ, ब्राह्मणक्षत्रियविट्शूद्राः। बलदेववासुदेवौ, युधिष्ठिरभीमार्जुनाः।

**भर्क्षं तुल्यस्वरम्** ।३।१।१६२॥ तुल्यसंख्यस्वरं नक्षत्रवाचि ऋतुवाचि च शब्दरूपं द्वन्द्वसमासे अनुपूर्वं पूर्वं निपतति। कृत्तिकारोहिण्यः, अश्विनीभरणीकृत्तिकाः। हेमन्तशिशिरौ, हेमन्तशिशिरवसन्ताः–तुल्यस्वरमिति किं? ग्रीष्मवसन्तौ।

**स्त्रियाः पुंसो द्वन्द्वाच्च** ।७।३।९६॥ स्त्रीशब्दात् परो यः पुंस् शब्दस्तदन्ताद् द्वन्द्वात्कर्मधारयाच्च अत्समासान्तो भवति। स्त्री च पुमांश्चाऽनयोः समाहारः स्त्रीपुंसम्। इतरेतरयोगे–स्त्रीपुंसौ स्त्रीपुंसाः। स्त्री चासौ पुमांश्च स्त्रीपुंसः शिखण्डी।

**ऋक्सामर्ग्यजुषधेन्वनडुहवाङ्मनसाहोरात्ररात्रिंदिवनक्तंदिवाहर्दिवोर्वष्ठीवपदष्ठीवाक्षिभ्रुवदारगवम्** ।७।३।९७॥ ऋक्सामादयो द्वन्द्वा अत्प्रत्ययान्ता निपात्यन्ते। ऋक् च साम–च ऋक्सामे। ऋक् च यजुश्च, ऋग्यजु-

१–अल्पस्वरम्। २–अर्च्यत्वात्प्राक्। ३–अल्पस्वरप्राक्। नस्तद्धित इत्यन्त्यस्वरादिलोपः। पदत्वाच्चजः कगम् धुटस्तृतीयोऽघोषे प्रथमः। ४–चज इति कः, धुट इति तृतीयः।

*षम् । धेन्वनडुहौ[5] । वाक् च मनश्च, वाङ्मनसम्[6] । अहश्च रात्रिश्च* अहोरात्रः[7] । रात्रिश्च दिवा च रात्रिन्दिवम्[8] । नक्तं च दिवा च नक्तन्दिवम् । अहश्च दिवा च अहर्दिवम्[9] । ऊरू च अष्ठीवन्तौ च उर्वष्ठीवम्[10] । निपातनादन्त्यस्वरादिलोपः । पादौ च अष्ठीवन्तौ च *पदष्ठीवम्[11] । अत्र पद्भावोऽपि । अक्षिणी च भ्रुवौ* चाक्षिभ्रुवम्[12] । दाराश्च गावश्च दारगवम् ।

**चवर्गदषहः समाहारे ।७।३।९८॥** चवर्गदकारषकारहकारान्तात् समाहारद्वन्द्वाद् अत्समासान्तो भवति । वाक् च त्वक् च वाक्त्वचम्[1] । वाक् च समुच्च वाक्समुच्छम्[2] । श्रीस्रजम्[3] । सम्पद्विपदम्[4] । वाक् च त्विट् च वाक्त्विषम्[5] । छत्रं चोपानहौ च छत्रोपानहम्[6] । इतरेतरयोगे तु वाक्त्वचौ

५–उदन्तं प्राक्, समाहारे तु हान्तत्वेनैव सिद्धम्। ६–अल्पस्वरम् प्राक्। पदत्वाच्चज इति कः, धुटस्तृतीयः तृतीयस्येति पञ्चमः, इतरेतरयोगद्वन्द्वे परपदलिङ्गता समाहारे क्लीबता वा। ७–स्वरादि प्राक्, पदत्वेऽरीति प्रतिषेधादहइति रुः, घोषवतीत्युः, ओत्वम्, रात्रान्तत्वात्पुंस्त्वम्। ८–इदन्तं प्राक्, पूर्वपदस्य मोऽन्तो निपातनात्, तौ मुम इत्यनुनासिकः, क्लिबत्वाद् ह्रस्वः। ९–रो लुपीति रः। १०–उदन्तं प्राक्, प्राण्यङ्गम्। ११–प्राण्यङ्गम्, अल्पस्वरं प्राक्। १२–प्राण्यङ्गम्, इदन्तं प्राक्, भ्रुश्नोरित्युव्।

१–अर्च्यम्, समाहारैकत्वम्, एवमग्रेऽपि । चज इति कः धुटस्तृतीयोऽघोषे प्रथमः। २–अर्च्यम्, उच्छधातुस्तुदादिः, सम्पूर्वादस्मात् क्विप्। छकारस्य पदस्येति लोपः, समुच्। ३–अर्च्यम्। ४–अर्च्यम्। ५–अर्च्यम्। ६–अर्च्यम्।

वाक्त्वच इत्येवमादयः ॥

## ॥ इति द्वन्द्वसमासप्रक्रिया ॥

## ॥ अथ एकशेषप्रक्रिया ॥

**समानामर्थेनैकः शेषः ।३।१।११८॥** समानार्थानां शब्दानां सहोक्तौ गम्यायाम् एकः शिष्यते । अर्थादन्ये निवर्त्तन्ते । समानार्थो शब्दाः—सरूपा विरूपाश्च । तत्र यथेष्टमेकः शिष्यते । बहुवचनमतन्त्रम् । तेन द्वयोरप्येकः शिष्यते इति बोध्यम् । "यः शिष्यते स लुप्यमानार्थाभिधायीति" न्यायाद् द्विवचनादिकं बोध्यम् । वक्रश्च कुटिलश्च वक्रौ, कुटिलौ वा स्तः । साधुश्च मुनिश्च व्रती च साधवो मुनयो व्रतिनो वा वन्दनीयाः, सहोक्त्यभावे तु—साधुश्च मुनिश्च व्रती चाऽऽगच्छति नमति गच्छति इत्येव, नैकशेषः ।

**स्यादावसंख्येयः ।३।१।११९॥** सर्वस्मिन् स्यादौ विभक्तौ तुल्यरूपाणां सहोक्तौ गम्यायामेकः शिष्यतेऽसंख्येयः । संख्येयवाचिशब्दरूपं वर्जयित्वेत्यर्थः । विरूपस्थले प्रकृतिवैरूप्यादेव न तुल्यरूपतेति सरूपार्थं सूत्रम् । अक्षश्च शकटाक्षः, अक्षश्च देवनाक्षः, अक्षश्च बिभीतकाक्षः—अक्षाः सन्ति ।

---

७—"प्रत्यर्थं शब्दा अभिनिविशन्त" इति न्यायानुरोधात्सरूपविरूपादिनानाशब्दानां समानार्थादीनां सह प्रयोगापत्तिवारणाय एकशेषारम्भ इति बोध्यम् ।

मुनिं च मुनिं च मुनिं च मुनीन् वन्दस्व। जिनं च महावीरं जिनं च पार्श्वं, जिनौ नमति। नारी च नारी च नार्यौं गच्छतः। स्यादाविति किम्? माता च जननी, माता च धान्यस्य परिच्छेत्ता, मातृमातारौ। अत्र औकारे मातरौ माताराविति रूपे इति न सर्वस्मिन् स्यादौ सरूपता। असंख्येय इति किम्? एकश्चैकश्च, द्वौ च द्वौ च, त्रयश्च त्रयश्च "आ दशभ्यः संख्या संख्येये"। संख्यानवाचिनस्तु भवत्येव–विंशतिश्च विंशतिश्च, विंशती द्वे गवाम्॥

त्यदादिः ।३।१।१२०॥ त्यदादिनाऽन्येन च सहोक्तौ त्यदादिरेवैकः शिष्यते। स च चैत्रश्च तौ। अयं च मुनिश्च इमौ। स्पर्धे परमिति त्यदादीनां मिथः सहोक्तौ यद् यत्पाठे परं तत्तदेवैकं शिष्यते। स च यश्च यौ। स च त्वं च युवाम्। त्वं च भवांश्च भवन्तौ। भवांश्च अहं च आवाम्। त्वं च भवांश्च अहं च वयम्। बहुलाधिकारात् क्वचित्पूर्वमपि–स च यश्च तौ। त्वं च भवांश्च युवाम्। एतेन सर्वादिगणे क्वचिद् अस्मच्छब्दात्परं भवतुशब्दपाठोऽपपाठः। स्त्रीपुंनपुंसकानां सहवचने स्यात्परमिति लिङ्गानुशासनात्–सा च चैत्रश्च तौ, सा च कुण्डे च तानि, स च इयं च अदश्च अमूनि॥

भ्रातृपुत्राः स्वसृदुहितृभिः ।३।१।१२१॥ स्वस्रर्थेन सहोक्तौ भ्रात्रर्थः शब्दो दुहित्रर्थेन सहोक्तौ पुत्रार्थ एकः

८–अभ्यर्हितत्वात्प्राक् प्रयोगः

शिष्यते । भ्राता च स्वसा च भ्रातरौ, पुत्रश्च दुहिता च पुत्रौ । एवं सोदर्यसुतादिपर्यायस्थलेऽपि बोध्यम् ।

**श्वशुरः श्वश्रूभ्यां वा** ।३।१।१२३।। जातौ धवयोगे च श्वश्रूशब्देन सहोक्तौ श्वशुरशब्द एको वा शिष्यते । श्वशुरश्च श्वश्रूश्च श्वशुरौ, श्वश्रूश्वशुरौ ।

**पुरुषः स्त्रिया** ।३।१।१२६।। पुरुषप्राणिवाचिशब्दः स्त्रीवाचिना शब्देन सहोक्तौ शिष्यते, स्त्रीपुरुषमात्रभेदश्चेद् भवति । पटुश्च पट्वी च पटू, कुक्कुटश्च कुक्कुटी च कुक्कुटौ । ब्राह्मणश्च ब्राह्मणी च ब्राह्मणौ ।

**ग्राम्याशिशुद्विशफसङ्घे स्त्री प्रायः** ।३।१।१२७।। ग्राम्या अशिशवो ये द्विखुराः पशवस्तेषां संघे स्त्रीपुरुषाणां सहोक्तौ प्रायः स्त्रीवाची एकः शिष्यते, स्त्रीपुरुषमात्रभेदश्चेद् भवति । गावश्चेमे गावश्चेमा इमा गावः । अन्यत्र पुरुषशेष एव । अश्वाश्चेमा इमेऽश्वा इत्यपि । प्रायो ग्रहणात्–उष्ट्रयश्च उष्ट्राश्चोष्ट्रा इत्यादि । गावश्च बलीवर्दाश्च गोबलीवर्दम् । अत्र प्रकृतिभेदोऽपीति न भवति ।

**क्लीबमन्येनैकं च वा** ।३।१।१२८।। क्लीबं नामाऽक्लीबेन सहोक्तावेकं शिष्यते क्लीबाक्लीबमात्रभेदश्चेद् भवति, शिष्यमाणं चैकार्थं वा भवति । शुक्लं च शुक्लश्च

१–अर्च्यत्वात्प्राक् प्रयोगः २–अर्च्यं प्राक् ।

शुक्लं शुक्ले वा । शुक्लं च शुक्लश्च शुक्ला च शुक्लं शुक्लानि वा । अन्येनेति किम् ? शुक्लं च शुक्लं च शुक्ले,[1] शुक्लं च शुक्लं च शुक्लं च शुक्लानि । हिमं च हिमानी च हिमहिमान्यौ[2] । अत्रार्थभेदोऽपीति न भवति ।

**पिता मात्रा वा ।३।१।१२२॥** मातृशब्देन सहोक्तौ पितृशब्द एकः शिष्यते वा । पिता च माता च पितरौ ।

**मातरपितरं वा ।३।२।४७॥** मातृपितृशब्दयोः पूर्वोत्तरपदयोर्द्वन्द्वे मातरपितरेति ऋकारस्य अर इति वा निपात्यते । मातर–पितरौ[3] ।

**आ द्वन्द्वे ।३।२।३९॥** विद्यायोनिसम्बन्धनिमित्ते सति प्रवर्तमानानामृकारान्तानां शब्दानां द्वन्द्वे सत्युत्तरपदे परे पूर्वपदस्याऽऽकारोऽन्तादेशो भवति । मातापितरौ । ननान्दा-[4] यातरौ, होतापोतारौ[5] ।

**पुत्रे ।३।२।४०॥** पुत्रशब्दे उत्तरपदे परे द्वन्द्वे विद्या-योनिसम्बन्धे–निमित्ते सति प्रवर्त्तमानानामृकारान्तानामा-कारोऽन्तादेशो भवति । मातापुत्रौ[6], पितापुत्रौ[7] ।

**॥ इत्येकशेषप्रक्रिया ॥**

---

१–स्यादावसंख्येय इत्येकशेषः । २–अल्पस्वरं प्राक् । ३–अर्च्यं प्राक् ।
४–धर्मार्थादिः, याताननान्दरौ । ५–६–७ अर्च्यं प्राक् ।

## ॥ अथाऽलुप्समासप्रक्रिया ॥

**न नाम्येकस्वरात् खित्युत्तरपदेऽमः ।३।२।९॥** नाम्यन्तादेकस्वरात्पूर्वपदात्परस्याऽमः खित्प्रत्ययान्ते उत्तरपदे परे लुप् न भवति । स्त्रियं स्त्रीं वाऽऽत्मानं मन्यते, स्त्रींमन्यः, स्त्रियंमन्यः ।

**असत्वे ङसेः ।३।२।१०॥** असत्त्वे विहितस्य ङसेरुत्तरपदे लुप् न भवति । स्तोकान्मुक्तः । दूरादागतः ॥

**ओजोऽञ्जःसहोऽम्भस्तमस्तपसष्टः ।३।२।१२॥** एभ्यः परस्याः टाविभक्तेरुत्तरपदे परे लुप् न भवति । ओजसाकृतमित्यादि । समासफलमैकपद्यम्, ततश्च नामधातुतद्धितादिप्रत्ययादि ।

**परात्मभ्यां ङे: ।३।२।१७॥** परात्मशब्दाभ्यां परस्या ङे विभक्तेरुत्तरपदे परे लुप् न भवति संज्ञायाम् । परस्मैपदं परस्मैभाषा, आत्मनेपदम्, आत्मनेभाषा ।

**तत्पुरुषे कृति ।३।२।२०॥** अद्व्यञ्जनात्परस्याः

---

८-९-वाऽमृशसोतोय्, पक्षे समानादिति लुक् । तौ मुम इत्यनुस्वारो मकारो वा । कर्तुः खश्, दिवादेः श्यः, ङस्युक्तसमासः, लुगस्य ।

१-क्तेनाऽसत्त्व इति समासः, स्तोकाल्पेति पञ्चमी, तृतीयस्य-पञ्चमे, दूरादित्यसत्त्वारादिति ङसिः । २-करणे तृतीया, कारकं कृतेति समासः । ३-तादर्थ्ये चतुर्थी, हितादित्वात्समासः ।

सप्तम्याः कृदन्ते उत्तरपदे परे तत्पुरुषे लुप् न भवति, बहुलम् । स्तम्बे [४]रमते स्तम्बेरमः । पात्रे[५]समितः । बाहुलकात् क्वचिदन्यतोऽपि–गोषु[६]चरः । क्वचिन्निषेधो न–मद्रे[७]चरः । क्वचिद्विकल्पः, खे[८]चरः खचरः । वनेचरः वनचरः पङ्के[९]रुहम् , पङ्करुहम् ।

**मध्यान्ताद् गुरौ** ।३।२।२१॥ मध्यान्तशब्दाभ्यां परस्याः सप्तम्या गुरुशब्दे उत्तरपदे परे लुप् न भवति । मध्येगु[१०]रुः, अन्तेगुरुः । मतान्तरेण मध्यगुरुरन्तगुरुरित्यपि ॥

**वर्षक्षरवराप्सरःशरोरोमनसो जे** ।३।२।२६॥ वर्ष, क्षर, वर, अप् , सरस् , शर, उरस् , मनस् इत्येतेभ्यः परस्याः सप्तम्या जे उत्तरपदे परे वा लुप् भवति । अप्सु जातवदप्सुजे[११]म् । अब्जम् । सरसि जातवत्सरसिजं, सरोजे[१२]म् । उरसिजम् उरोजम् । मनसिजम् मनोजम् ।

**षष्ठयाः क्षेपे** ।३।२।३०॥ क्षेपे गम्ये उत्तरपदे

---

४–विषयसप्तमी, शोकापनुदेत्यादिना कप्रत्ययान्तो निपातः, ङस्युक्तसमासः । ५–पात्रे समितादयः इति समासः । ६–७–८ चरेष्ट इति टः, ङस्युक्तसमासः । ९–औपश्लेषिकसप्तमी, नाम्युपान्त्येति कः, ङस्युक्त समासः । १०–औपश्लेषिक सप्तमी । शौण्डादित्वात्समासः । ११–सप्तम्या इति डेऽन्त्यस्वरादिलोपे ङस्युक्तसमासः, लुपि तु धुटस्तृतीयः । १२–नामेति पदत्वे, सोरुः, घोषवतीत्युः, अवर्णस्येत्योकारः ।

परे षष्ठ्या लुप् न भवति। चौरस्य कुलम्। तत्त्वकथने तु चौरकुलम्।

**पुत्रे वा** ।३।२।३१॥ क्षेपे गम्ये पुत्रशब्दे उत्तरपदे परे षष्ठ्या लुप् वा न भवति। दास्याः पुत्रः, दासीपुत्रः। तत्त्वाख्याने तु दासीपुत्र इत्येव। एवमन्यत्रापि।

**पश्यद्वाग्दिशोहरयुक्तिदण्डे** ।३।२।३२॥ पश्यद् वाग्, दिक्शब्देभ्यः परस्याः षष्ठ्या यथासंख्यं हरयुक्तिदण्डेषूत्तरपदेषु लुब् न भवति। पश्यतो हरः। अनादरे षष्ठी। जनं पश्यन्तमनादृत्य हर्तेत्यर्थः। वाचोयुक्तिः, दिशोदण्डः। सम्बन्धषष्ठ्यौ।

**देवानां प्रियः** ।३।२।३४॥ अत्र षष्ठ्या लुबभावो निपात्यते।

**स्वसृपत्योर्वा** ।३।२।३८॥ विद्यायोनिसम्बन्धे निमित्ते सति प्रवर्त्तमानानामृकारान्तानां सम्बन्धिन्याः षष्ठ्याः स्वसृपत्योरुत्तरपदयो र्योनिसम्बन्धनिमित्तयोः परयोर्लुब् वा न भवति।

**मातृपितुः स्वसुः** ।२।३।१८॥ मातृपितृभ्यां परस्य स्वसृशब्दसम्बन्धिनः सकारस्य समासे षो भवति।

---

१–हरतेः पचाद्यच्।

**अलुपि वा ।२।३।१९॥** मातृपितृभ्यां परस्य स्वसृशब्द-सम्बन्धिनः सकारस्याऽलुपि समासे षो वा भवति। मातुः-ष्वसा, मातुःस्वसा, मातृष्वसा, एवं पितुःष्वसेत्यादिः ।

**निर्दुः सुवेः समसूतेः ।२।३।५६॥** निर्दुःसुविभ्यः परस्य समसूतिसम्बन्धिनः सकारस्य षो भवति । समा-न्निष्क्रान्तो निःषमः । दुःस्थिताः समाः यस्मिन् स दुःषमः कालः । एवं सुषम इत्यादि ।

**ऋतां विद्यायोनिसम्बन्धे ।३।२।३७॥** ऋकारान्तानां शब्दानां विद्याकृते योनिकृते च सम्बन्धे निमित्ते सति वर्तमानानां सम्बन्धिन्याः षष्ठ्या विद्यायोनिसम्बन्धे एव निमित्ते सति वर्त्तमाने उत्तरपदे लुप् न भवति ।

**भ्रातुष्पुत्रकस्कादयः ।२।३।१४॥** भ्रातुष्पुत्रादयः कस्कादयश्च कखपफेषु परेषु रेफस्य स्थाने यथासंख्यं कृतषत्वसत्वाः साधवो भवन्ति। भ्रातुष्पुत्रः, परमं च तद् यजुश्च परमयजुः, तस्य पात्रं परमयजुष्पात्रम् । कैस्कः कौतस्कुत इत्यादि । नामिनः परस्य रेफस्य षत्वमन्यत्र सत्वमिति विवेकः ।

॥ इत्यलुप् समासः ॥

२—ऋतामिति षष्ठ्या अलुप्, ऋतो डुरो रेफस्य षः। ३—षष्ठी तत्पुरुषः, सकारस्य रुः । ४—वीप्सायां द्वित्वे कस्कस् इत्यत्र रुत्वे सः। ५—वीप्सायां द्वित्वे कुतस् कुतस् इत्यत्र शैषिको भवेऽर्थेऽण्, प्रायोऽव्ययस्येत्यन्त्यस्वरादिलोप आदिवृद्धिः सो रुः ।

## ॥ अथ समासाश्रयप्रक्रिया ॥

**एत्यकः** ।२।३।२६॥ ककारवर्जितान्नाम्यन्तःस्थाकवर्गात्परस्य सकारस्य एकारे परे समासे षो भवति, संज्ञायाम् । हरिषेणः[1], श्रीषेणः ।

**प्रष्ठोऽग्रगे** ।२।३।३२॥ प्रात्परस्य स्थस्सकारस्य षो निपात्यतेऽग्रगामिनि वाच्ये । प्रेष्ठः[2], अग्रगामीत्यर्थः ।

**ह्रस्वान्नाम्नस्ति** ।२।३।३८॥ नाम्नो विहिते तकारादौ प्रत्यये परे ह्रस्वान्नामिन उत्तरस्य सकारस्य षो भवति । तल्, त्व, तस्, तय, तरप्, तमपस्तादय इहेष्टाः । चतुष्टयम्[3], सर्पिष्टमम्[4] ।

**गिरिनद्यादीनाम्** ।२।३।६८॥ गिरिनदीत्यादीनां नकारस्य वा णो भवति । गिरिणदी, गिरिनदी । माषोणम्[6], माषोनम् ।

**वाह्याद्वाहनस्य** ।२।३।७२॥ वाह्यमिक्ष्वादि, तद्वाचिनो रेफादिमतः, पूर्वपदात्परस्य वाहनशब्दसम्बन्धिनो नकारस्य णो भवति । इक्षुवाहणम् । वहेः करणेऽनट्,

---

१–हरेः सेनेव सेना यस्येत्युष्ट्रमुखादिसमासः । गोश्चान्त इति ह्रस्वः । रषृवर्णादिति णः । २–प्रात्तिष्ठतेः कः, अनेन षत्वे, तवर्गस्येति ठः । ३–अवयवे तयः, चटते इति सः, षत्वे, तवर्गस्येति टः । ४–प्रकर्षे तमप् । ५–षष्ठीतत्पुरुषः । ६–ऊनार्थेति तृतीयासमासः ।

प्रज्ञादित्वादण्। वाह्येति किम्? सुरवाहनम्। अत्र सम्बन्धमात्रमिष्टं न वाह्यवाहकभाव इति न भवति। नरवाहनः[7]। अत्र नर एव वाहनमिति वाह्यात्परत्वाभावान्न भवति।

ग्रामाग्रान्नियः ।२।३।७१।। ग्रामाग्राभ्यां परस्य नियो नकारस्य णो भवति, ग्रामणीः[8], अग्रणीः।

वोत्तरपदान्तनस्यादेरयुवपक्वाह्नः ।२।३।७५।। पूर्वपदस्थाद्रषृवर्णात्परस्योत्तरपदान्तभूतस्य नागमस्य स्यादेश्च नकारस्य, णो वा भवति, न चेत्स नकारो युवन् पक्वाहन् शब्दसम्बन्धी भवति। माषवापिणौ[9], माषवापिनौ। माषवापाणि[10], माषवापानि कुलानि। प्रहिण्वन्[11], प्रहिन्वन्। धर्माङ्गेण[12], धर्माङ्गेन। युवादिपर्युदासात्—रम्ययुना[13], प्रपक्वानि, दीर्घाह्नी[14] शरदित्यादौ न भवति। प्रहाणः[1] प्रहीणः[2] प्रयाणमित्यादि[3]। णत्वप्रकरणेऽलचटतवर्गशसान्तर इति सर्वत्रानुसन्धेयम्।

---

७—नरो वाहनं यस्येति बहुव्रीहिः। ८—ग्रामं नयतीति क्विपि, ङस्युक्तसमासः। ग्राम ङस् नी इत्यलौकिकविग्रहः। ९—माषान् वपत इति शीले णिन्, ङस्युक्तसमासः। १०—माषान् वपन्तीति कर्मण इत्यण् ङस्युक्तसमासः। ११—प्राद् हिधातोः, शतरि श्नुप्रत्यये उदित इति नोन्ते गतिसमासः। १२—धर्मस्याङ्गं तेन। १३—रम्यश्चासौ युवा च तेन। १४—दीर्घाण्यहानि यस्यां सा। नान्तत्वान्ङी. अनोऽस्य।

१—प्राद् गतौ हाधातोः क्तः, ओदित्वान्नः, स्वरादिति णः। २—प्राद् जहातेः क्तः, ओदित्वान्नः, ई व्यञ्जन इति ईः। ३—प्राद् यातेरनट्।

**षात्पदे । २।३।९२॥** पदे परतो यः षकारस्तस्मान्निमित्तात्परस्य नकारस्य णो न भवति । निष्पानम्[4] । एवमन्यत्र ।

**क्षुभ्नादीनाम् । २।३।९६॥** क्षुभ्ना इत्येवमादीनां नकारस्य णो न भवति । क्षुभ्नाति[5], आचार्यानी[6] । सर्वनाम[7], ग्रामनटः, हरिनन्दी[8], गिरिगहनमित्यादि[9] । आकृतिगणोऽयम् ।

**ऋफिडादीनां डश्चलः ।२।३।१०४॥** ऋफिड इत्यादीनामृरो लृलौ डकारस्य च लो वा भवति । लृफिडः, लृफिलः, ऋफिडः । लोम, रोम । तलुनः तरुणः, । मूलम् , मूरम् । रेखा । लेखा अर्थभेदेऽपि इला भूमिः, इराऽमृतम् । कलभो बालहस्ती, करभ उष्ट्रः । वालः केशः, वारः क्रियाभ्यावृत्तिरित्यादि ।

**त्वे । २।४।१००॥** ङ्याबन्तस्य त्वे प्रत्यये परे बहुलं ह्रस्वो भवति । रोहिण्या भावो रोहिणित्वम्[10] , रोहिणीत्वम् , अजत्वम्[11] , अजात्वम् । कुमारिका[12] । सोमपकः[13] । लक्ष्मिका[14],

---

४—पातेरनट्, निर्दुरिति षः, स्वरादिति णः प्राप्तः । ५—क्षुभ् धातुः क्र्यादिः । ६—स्त्रियां ङीरानन्तश्च । ७-षष्ठी समासः, पूर्वपदस्थादिति णः प्राप्तः । ८—हरिं नन्दयतीत्येवं शीलः—तन्नामा कश्चित् । ९—षष्ठीसमासः, पूर्वपदस्थादिति णः प्राप्तः । १०—श्येतैतेति ङीस्तो नश्च, णत्वम् । ११—स्त्रियामजादित्वादाब्दीर्घः । १२—वयस्यनन्त्ये इतिङीः, अल्पादौ कः, ङ्यादिदुत इति ह्रस्वः । १३-सोमं पिबतीति क्विप् । अज्ञातादौ कः । १४—अल्पादौ कः ।

वधुका । बहुकुमारीकः[15], बहुलक्ष्मीकः[16] ।

**नवाऽऽपः** । २।४।१०६॥ आपः कचि परे ह्रस्वो वा भवति । प्रियखट्वकः[17], प्रियखट्वाकः । बहुमालकः[18] । बहुमालाकः ॥

**नाम्नि** । ३।२।७५॥ अष्टन् शब्दस्योत्तरपदे परे संज्ञायां दीर्घोऽन्तादेशो भवति । अष्टौ पदान्यत्र—अष्टापदः कैलासः । अष्टापदं सुवर्णम्, अष्टावक्रो[19] मुनिः ।

**ऋषौ विश्वस्य मित्रे** ।३।२।७९॥ विश्वशब्दस्य मित्रशब्दे उत्तरपदे परे संज्ञायामृषौ वाच्ये दीर्घोऽन्तादेशो भवति । विश्वस्य मित्रं विश्वामित्रो नामर्षिः । अन्यत्र विश्वमित्रमित्येव ।

**वसुराटोः** ।३।२।८१॥ विश्वशब्दस्य वसौ राटि चोत्तरपदे दीर्घोऽन्तादेशो भवति । विश्वं वस्वस्य विश्वावसुः । विश्वस्मिन् राजते विश्वाराट्[1] । राट् इति निर्देशादिह न—विश्वराजौ, विश्वराजः :—विश्वाराड्भ्याम्, विश्वाराड्त्सु, विश्वाराट्सु । नितरां वर्त्तन्तेऽस्यामित्यधिकरणे क्विप्, नीवृज्जन-

---

१५—बह्व्यः कुमार्यो यस्य, ऋन्नित्यदित इति कच् । ङ्यादिति प्राप्तो ह्रस्वो न कचीति निषिध्यते । १६—बह्व्यो लक्ष्म्यो यस्य, कच् । १७—प्रिया खट्वा यस्य, शेषादिति कच् । १८—बह्व्यो माला यस्य, कच् । १९—अष्टावप्यङ्गानि वक्राणि यस्य सः ।

१—क्विपि ङस्युक्तसमासः । यजसृजेति षः, धुट इति तृतीयः, विरामे इति प्रथमः । २—गतिकारकस्येति दीर्घः । एवमग्रेऽपि ।

पदः। प्रवर्षतीति प्रावृट्। मर्म विध्यतीति मर्मावित्[3]। अभिरोचते इत्यभीरुक्[4]। जलं सहते जलासट्[5]। परितनोतीति परीतत्[6]।

**द्वित्र्यष्टानां द्वात्रयोऽष्टाः प्राक् शतादनशीतिबहुव्रीहौ ।३।२।९२।।** द्वि, त्रि, अष्टन् इत्येतेषां यथासंख्यं द्वा, त्रयस्, अष्टा, इत्येते आदेशाः प्राक् शतात्संख्यायामुत्तरपदे परतो भवन्ति। अशीतिं बहुव्रीहिसमासविषयं चोत्तरपदं वर्जयित्वा। द्व्यधिका दश, द्वौ च दश चेति वा द्वादश[7]। एवं द्वाविंशतिरित्यादि। त्रयोदश[8]। त्रयोविंशतिरित्यादि। अष्टादश। अष्टाविंशतिरित्यादि। प्राक्शतादिति किम्? द्विशतम्[9], द्विसहस्रमित्यादि। अनशीति बहुव्रीहाविति किम्? द्व्यशीतिः[10], द्वौ वा त्रयो वा द्वित्राः[11]।

**चत्वारिंशदादौ वा ।३।२।९३।।** द्वित्र्यष्टानां प्राक् शताच्चत्वारिंशदादौ संख्यायामुत्तरपदे यथासंख्यं द्वा त्रयस् अष्टा इत्येते आदेशा वा भवन्त्यनशीति बहुव्रीहौ। द्वा-

---

३—मर्म विध्यतीति क्विप्। ङस्युक्तसमासः, नाम्न इति न लोपः, ज्याव्यध इति य्वृत्। ४—चज इति कः, तृतीयः, वा प्रथमः। ५—हो धुडिति ढः, तृतीयः, वा प्रथमः। ६—क्विपि यमिरमीति नलोपः, ह्रस्वस्येति तोऽन्तः, तृतीयः, वा प्रथमः। ७—मयूरव्यंसकादिर्द्वन्द्वसमासो वा। डतिष्ण इति जसो लुकि न लोपः। ८—पदत्वाद्रुः घोषवतीत्युः, अवर्णस्येत्योकारः। ९—द्व्यधिकं शतमिति मयूरव्यंसकादिः, द्वाभ्यां कृतमधिकमिति तृतीयेति समासः। १०—द्व्यधिकाऽशीति द्वौ चाऽशीतिश्चेति द्वन्द्वो वा। ११—सुज्वार्थे इति समासः प्रमाणीति डः, अन्त्यस्वरादिलोपः, जस्।

चत्वारिंशत् , द्विचत्वारिंशत् । त्रयश्चत्वारिंशत्[12] , त्रिचत्वारिंशत् । अष्टाचत्वारिंशत् , अष्टचत्वारिंशत्[13] ।

ते लुग्वा ।३।२।१०८।। नामविषये पूर्वोत्तरपदे लुग् वा भवतः । देवदत्तः[1], देवः, दत्तः । सत्यभामा[2], सत्या, भामा ।

नखादयः ।३।२।१२८।। नखादयः शब्दा अकृताकारा-द्यादेशा निपात्यन्ते । न खमस्यास्तीति[3] नखः । नकुलमस्य नकुलः । न पुमान्[4] न स्त्रीति नपुंसकम् । पृषोदरादित्वादेकस्य न शब्दस्य लोपः, निपातनादकाराभावः, स्त्रीपुंसयोः पुंसका-देशश्च । न क्षीयते न क्षरति वा नक्षत्रम्[5] । क्षीधातोः क्षर् धातो-र्वौणादिके त्रटि क्षादेशोऽकाराभावश्च निपातनात् । न अकं दुःखमस्मिन्निति नाकः । न विद्यन्ते ग्नाः श्रियश्छन्दांसि वा यस्य [6]नग्नः । नास्ति परलोकादिरिति मतिरस्य नास्तिकः[7] इत्यादि ।

पुरुषे वा ।३।२।१३५।। कुशब्दस्य पुरुषशब्दे उत्तरपदे काऽऽदेशो वा भवति । कुत्सितः पुरुषः कापुरुषः[8], कुपुरुषः ।

---

१२—सोरुरिति रुत्वे, चटते इति शः । १३—नाम्न इति नलोपः ।
१—देवेन दत्त इति कारकमिति तृतीया समासः । देव एनं देयादित्याशिषि-कर्त्तरि क्ते तु देवश्चासौ दत्तश्चेति कर्मधारयः । २—कर्मधारये पुंवत् बहुव्रीहि र्वा । ३—बहुव्रीहिः कजभावो निपातनादेव । एवमिहान्यप्रयो-गेऽपि बोध्यम् । ४—न स्त्रीपुंसाविति विग्रहः । ५—न क्षरमिति विग्रहः । ६—गोश्चान्त इत्यापो ह्रस्वः । ७—न अस्त्यस्येति विग्रहः । अस्ति शब्दः सत्त्वेऽव्ययम् , कच् । ८—गतिक्वन्य इति समासः, एवमग्रेऽपि ।

कुत्सिताः पुरुषा अस्मिन् कापुरुषः[९] कुपुरुषो ग्रामः।

अल्पे।३।२।१३६॥ईषदर्थे वर्तमानस्य कुशब्दस्य उत्तरपदे परे काऽऽदेशो भवति। ईषन्मधुरं कामधुरम्[१०]। ईषदच्छं काच्छम्।

**काकवौ वोष्णे** ।३।२।१३७॥ कुशब्दस्योष्णशब्दे उत्तरपदे का कव इत्येतावादेशौ वा भवतः। ईषत्कुत्सितं वोष्णं कोष्णं, कवोष्णम्। पक्षे तत्पुरुषे कदादेशः, कदुष्णम्।

**पृषोदरादयः** ।३।३।१५५॥ पृषोदर इत्येवं प्रकाराः शब्दा विहितलोपागम-वर्ण-विकाराः शिष्टैः प्रयुज्यमानाः साधवो भवन्ति। पृषदुदरमुदरे वास्य पृषोदरः[११], पृषत उदरं पृषोदरम्[१२], । अत्र तकारलोपः। जीवनस्य जलस्य मूतः पटबन्धो जीमूतः[१३]। अत्र वनस्य लोपः। वारिणो वाहको बलाहकः[१४]। अत्र पूर्वपदस्य ब उत्तरपदादेश्च ल आदेशः। आध्यायते इत्याढ्यः। ध्यस्य ढ्यादेशः। बाहुलकात्कर्मणि डः। मह्यां रौति मयूरः। पचादित्वादचि अन्तलोपः, महीशब्दस्य मयूभावः। ङस्युक्त समासः। मह्यां शेते महिषः, डप्रत्ययः। पूर्वपदस्य ह्रस्वत्वं शस्य च षत्वम्। पिशितमश्नाति पिशाचः, अण्, ङस्युक्तसमासः, पिशितस्य पिशादेशः, अश्नातेः शस्य चादे-

९–पाक्षिकः कजपि। १०–गतिक्वन्य इति समासः। स्वरादौ परत्वादयमेव न कत्। ११–बहुव्रीहिसमासः। १२–१३–षष्ठी-तत्पुरुषः। १४–याजकादित्वात्समासः।

शः । शवानां शयनं[1] श्मशानम्। पूर्वपदस्य श्मादेश उत्तरपदस्य च शानादेशः । शकस्यान्धुः[2] शकन्धुः। कर्कस्यान्धुः[3] कर्कन्धुः। अटतीत्यच् अटा, कुलानामटा कुलटा[4]। एषु पूर्वपदान्तस्योत्तर पदादे र्वा लोपः। हिनस्तीति सिंहः, उदित्याग्नोऽन्तः, सकार–हकारयो र्विपर्ययः। मयूरमहिषादीनामुणादौ व्युत्पादितानामपीह व्युत्पादनमनेकधा शब्दव्युत्पत्तिज्ञापनार्थम्। आकृतिगणोऽयम्। तेन अश्व इव स्थाम बलमस्याऽश्वत्थामेत्यादयः शिष्टैः प्रयुक्ताः पृषोदरादयः। वर्णागमो वर्णविपर्ययश्च, द्वौ चापरौ वर्णविकारनाशौ। धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥१॥ वतंसः[5], अवतंसः। वक्रयः[6] अवक्रयः। पिहितम्[7] अपिहितम्। पृषोदरादिप्रपञ्च एषः। तेन शिष्टप्रयोगोऽनुसरणीयः।

॥ इति समासाश्रयप्रक्रिया ॥

॥ अथ समासान्तप्रक्रिया ॥

**ऋक्पूःपथ्यपोऽत्** ।७।३।७६॥ ऋच्, पुर्, पथिन्, अप् *इत्येतदन्तात्समासाद् अत्=अकारः समासान्तो भवति।* ऋचोऽर्धमर्धर्चः[1]। अर्धर्चादयः पुंसि क्लीबे च। सप्तर्चं[2] सूक्तम्।

१–अधिकरणेऽनट्। २–३–४–षष्ठीतत्पुरुषः। ५–वा वाप्य इति वादेशे अवात्तनेरौणादिकः सः। ६–अवात्क्रीणाते र्भावे अल्। ७–अपेर्धा धातोः क्तः, धाग इति हिः।

१–समेंऽश इति समासः। २–सप्त ऋचोऽस्मिन्। नलोपारादेशौ।

एवमन्यत्र। श्रियाः पूः श्रीपुरम्। संज्ञात्वात्क्लीबता। तिसृणां पुरां समाहारः त्रिपुरम्[3]। जलस्य जलमेव वा पन्थाः जलपथः[4]। एवं स्थलपथः। पथि पथि इति प्रतिपथम्[5]। द्विर्गता आपोऽस्मिन्निति द्वीपम्[6]।

**धुरोऽनक्षस्य** ।७।३।७७।। धुर् शब्दान्तात्समासादत्समासान्तो भवति सा चेदक्षसम्बन्धिनी न भवति। राज्यस्य राज्यमेव वा धू राज्यधुरा। रणधुरा। अक्षे तु अक्षधूः[1]।

**संख्यापाण्डूदककृष्णाद् भूमेः** ।७।३।७८।। संख्यावाचिभ्यः पाण्डु, उदक, कृष्ण इत्येतेभ्यश्च नामभ्यः परो यो भूमिशब्दस्तदन्तात्समासादत् समासान्तो भवति। द्वयोर्भूम्योः समाहारो द्विभूमम्[2]। द्वे भूमी अस्य द्विभूमः प्रासादः। कृष्णा भूमिः–कृष्णभूमम्। भूमोऽसंख्यात एकार्थ इति क्लीबता। उदग्भूमम्।

**समवान्धात्तमसः** ।७।३।८०।। सम्, अव, अन्ध इत्येतेभ्यः परो यस्तमस्शब्दस्तदन्तात्समासादत्समासान्तो भवति। संततं तमः[3] सन्ततं तमसा[4]। संततं तमोऽस्मि-[5]

३–समाहार द्विगुः। ४–अति नोऽपदस्येत्यन्त्यस्वरादिलोपः। ५–वीप्सायामव्ययीभावः। ६–पृषोदरादित्वाद्वारार्थे समास अपोऽकारस्येकारश्च।

१–पदान्ते इति दीर्घः। २–अवर्णेवर्णस्येतीकारलोपः। ३–कर्मधारयः, सम् सि तमस् सि। ४–तृतीयान्तेन प्रादितत्पुरुषः। ५–बहुव्रीहिः।

ॆन्निति वा सन्तमसम् । अन्धयतीत्यन्धम् , अन्धं तमः अन्धं तमोऽस्मिन्निति वा अन्धतमसम् । अन्धं च तमश्चे-त्यन्धतमसम् । अन्धतमसे वा ।

**प्रत्यन्ववात्सामलोम्नः** ।७।३।८२।। प्रति अनु अव इत्येतेभ्यः परौ यौ सामन् लोमन् शब्दौ तदन्ता-त्समासादत्समासान्तो भवति । प्रतिगतं साम प्रति-सामम् । प्रतिगतं सामास्य प्रतिसामः । एवं प्रतिलोमं प्रतिलोम इत्यादि । वीप्सादावव्ययीभावे तु परत्वाद्-नपुंसकाद्वेति विकल्पो बोध्यः ।

**अक्ष्णोरप्राण्यङ्गे** ।७।३।८५।। अक्षिशब्दान्तात् समा-सादत्समासान्तो भवति न चेत्सोऽक्षिशब्दः प्राण्यङ्गे वर्तते । गवामक्षीव । गवाक्षः, रुद्राक्षम् ।

**संकटाभ्याम्** ।७।३।८६।। सं-कट इत्येतत्पूर्वादक्षि-शब्दान्तात्समासादत्समासान्तो भवति । संगतमक्ष्णा, समीपमक्ष्णो वा समक्षम् । कटस्याऽक्षि कटाक्षः । प्राण्यङ्गार्थ आरम्भः ।

॥ इति समासान्तप्रक्रिया ॥

६-तौ मुम इति स्वानुनासिकः । ७-समाहार द्वन्द्वः, स्वराद्यन्तः प्राक् । ८-इतरेतरयोगः द्वन्द्वः, परपदलिङ्गम् । ९-प्रथमान्तेन द्वितीयान्तेन वा प्रादितत्पुरुषः । नोपदस्येत्यनो लुक् । १० अवर्णेवर्णस्येतीकारलोपः, गोर्नाम्नीत्यवादेशः, समानदीर्घः । ११-तृतीयान्तेन प्रादितत्पुरुषः, सम् सि अक्षि टा । १२-सामीप्येऽव्ययीभावः ॥

## ॥ अथ द्वित्व-प्लुत-प्रक्रिया ॥

**असकृत्सम्भ्रमे** ।७।४।७२॥ भयादिभिश्चित्तव्याक्षेपात्प्रयोक्तुस्त्वरणं संभ्रमः, तस्मिन् द्योत्ये यत्प्रवर्त्तते पदं वाक्यं वा तदनेकवारं प्रयुज्यते। अहिरहिः, बुध्यस्व बुध्यस्व। अहिरहिरहिः, बुध्यस्व बुध्यस्व बुध्यस्व। हस्त्यागच्छति, हस्त्यागच्छति, लघु पलायध्वम् लघु पलायध्वम्। भृशार्थादौ द्वित्वं यथा। भोजं भोजं व्रजति, भुक्त्वा भुक्त्वा व्रजति। पचति पचति। क्रियाविशेषणस्यापि, वारं वारं पचति। मुहुर्मुहुः पश्यति, शनैः शनैर्गच्छति, मन्दं मन्दं तुदतीत्यादि।

**नानाऽवधारणे** ।७।४।७४॥ नानाभूतानां भेदेनेयत्तापरिच्छेदो नानावधारणम्। तस्मिन् यच्छब्दरूपं वर्त्तते, तद् द्विरुच्यते। अस्मात् कार्षापणादिह भवद्भ्यां माषं माषं देहि। प्रत्येकं माषमात्रं देहि नाधिकमित्यर्थः।

**आधिक्यानुपूर्व्ये** ।७।४।७५॥ आधिक्यं प्रकर्षः, आनुपूर्व्यं क्रमानुल्लङ्घनम्। एतयो र्यच्छब्दरूपं वर्तते तद् द्विरुच्यते। नमोनमः। अधिकं नम इत्यर्थः। मूले मूले स्थूलाः, अग्रे अग्रे सूक्ष्माः। मूलाद्यानुपूर्व्येण स्थौल्यादिरित्यर्थः।

**पूर्वप्रथमावन्यतोऽतिशये** ।७।४।७७॥ पूर्वशब्दः प्रथमशब्दश्च तदर्थस्याऽन्येभ्यः प्रकर्षे द्योत्ये द्विरुच्यते। पूर्वं पूर्वं पुष्यन्ति, प्रथमं प्रथमं पच्यन्ते। अन्येभ्यः पूर्वतरं पुष्यन्ति, प्रथमतरं पच्यन्त इत्यर्थः।

**सामीप्येऽधोऽध्युपरि** ।७।४।७९॥ अधस् अधि उपरि इत्येतानि शब्दरूपाणि सामीप्ये विवक्षिते द्विरुच्यन्ते। सामीप्यं देशकृता-कालकृता वा प्रत्यासत्तिः। अधोऽधोऽध्युध्युपर्युपरि वा ग्रामम्[1]।

**द्वन्द्वं वा** ।७।४।८२॥ वीप्सायां द्विरुक्तस्य द्विशब्दस्यादौ स्यादेः प्लुप् इकारस्याऽम्भावः, उत्तरत्रेकारस्याऽत्वं स्यादेश्चाऽम्भावो वा निपात्यते। द्वन्द्वं[2] तिष्ठतः, द्वौ द्वौ तिष्ठतः। द्वन्द्वं द्वयो द्वयो र्वा स्थितम्। एवं रहस्यादावपि द्वन्द्वशब्दो निपात्यते। द्वन्द्वं मन्त्रयन्ते, रहस्यमित्यर्थः। भेदे-द्वन्द्वं व्युत्क्रान्ताः। द्वैराश्येन भिन्ना इत्यर्थः। अत्र व्युत्क्रान्तिर्भेदः। समासे कलहे पुलिङ्गो, युद्धयुग्मदुःखेषु क्लीबं द्वन्द्वशब्दोऽन्य एवेति बोध्यम्।

**सम्मत्यसूयाकोपकुत्सनेष्वाद्यामन्त्र्यमादौ स्वरेष्वन्त्यश्च प्लुतः** ।७।४।८९॥ कार्येष्वाभिमत्यं पूजनं

१-द्वित्वेऽध इति द्वितीया। २-तौ मुम इति स्वानुनासिकः।

वा सम्मतिः, परगुणासहनमसूया । सम्मत्याद्यर्थेषु वर्तमानस्य वाक्यस्याऽऽदिभूतमामन्त्र्यार्थं पदं द्विरुच्यते, तत्र द्विर्वचने पूर्वोक्तौ स्वराणामन्त्यः स्वरः प्लुतो वा भवति । सम्मतौ– माणवक ३ माणवक, माणवक माणवक ! शोभनः खल्वसि । एवमसूयायाम्–रिक्तं ते आभिरूप्यमित्यादि, कोपे इदानीं ज्ञास्यसि जाल्मेत्यादि च वाक्यं योजनीयम् । कुत्सने–यष्टिके३ यष्टिके, यष्टिके यष्टिके ! रिक्ता ते शक्तिः ।

**भर्त्सने पर्यायेण** ।७।४।९०।। भर्त्सने वर्तमानस्य वाक्यस्याऽऽमन्त्र्यं पदं द्विरुच्यते, तत्र पर्यायेण पूर्वस्यामुत्तरस्यां वोक्तौ स्वरेष्वन्त्यः स्वरः प्लुतो वा भवति । भर्त्सनं कोपेन दण्डाविष्करणम् । चौर ३ चौर, चौर-चौर ३ चौर चौर ! घातयिष्यामि त्वाम् ।

**प्रश्ने च प्रतिपदम्** ।७।४।९८।। प्रश्ने प्रश्नाख्याने च वर्तमानस्य वाक्यस्य सम्बन्धिनः पदस्य स्वरेष्वन्त्यस्वरः प्लुतो वा भवति । अगमः३ पूर्वा३न् ग्रामा३न् देवदत्त ३ ? । अगमः पूर्वान् ग्रामान् देवदत्त ! । प्रश्नाख्याने– अगम३म् पूर्वा३न् ग्रामा३न् देवदत्त ३ । अगमं पूर्वान् ग्रामान् देवदत्त ! ।

**दूरादामन्त्र्यस्य गुरुर्वैकोऽनन्त्योऽपि लनृत्** ।७।४।९१।। वाक्यस्य यः स्वरेष्वन्त्यो दूरादामन्त्र्यस्य

पदस्य सम्बन्धी गुरुर्वाऽनन्त्योऽपि ऋकारवर्जितः स्वरः लृकारश्चैको दूरादामन्त्र्यस्यैव सम्बन्धी स प्लुतो वा भवति। आगच्छ चै३त्र। आगच्छ चैत्र!। आगच्छ क्लृप्त-शिख ३, आगच्छ क्लृप्तशिख! आगच्छ क्लृ३प्त शिख!। आगच्छ३ इन्द्रभूते!, आगच्छ इन्द्रभू३ते!, आगच्छ इन्द्रभूते! एकग्रहणादनेकस्य यौगपद्येन न भवति। आगच्छ नृ३षभ! आगच्छ नृषभ!। ऋतो निषेधे लृतो न निषेध इति लृग्रहणं व्यर्थं सञ्ज्ञापयति। ऋवर्णग्रहणे लृवर्णस्याऽपि ग्रहणम्। तेनाऽचीक्लृपदित्यादौ ऋद्वर्ण-स्येति लृवर्णस्य लृत्सिध्यतीति बोध्यम्।

**हेहैष्वेषामेव** ।७।४।१००॥ दूरादामन्त्र्यस्य सम्ब-न्धिनौ यौ हे है शब्दौ तयो र्वाक्ये यत्रतत्रस्थयो-रेवान्त्यः स्वरः प्लुतो वा भवति। हे ३ देवदत्त! आगच्छ। एवं मध्येऽन्तेऽपि। एवं हैशब्देऽपि बोध्यम्।

॥ इति द्वित्वप्लुतप्रक्रिया ॥

## ॥ अथ परिभाषाप्रक्रिया ॥

**पञ्चम्या निर्दिष्टे परस्य** ।७।४।१०४॥ पञ्चम्या निर्दिष्टे यत्कार्यमुच्यते तत्परस्य अव्यवहितस्य स्थाने भवति। एदोतः पदान्तेऽस्य लुगित्यत्र एदोत इति दिक्शब्दाध्या-हारेण तद्योगे पञ्चमी। ततश्च पूर्वपरयोरुभयोरेव प्राप्तौ

अनेन परिभाषासूत्रेण परस्यैवेति नियम्यते । तेन हरेऽवेत्यादौ पञ्चमीनिर्दिष्टादेकाराद्व्यवहितस्य परस्य अवेत्याद्याकारस्य स्थाने लुग् भवतीति बोध्यम् । एवमन्यत्राऽप्युह्यम् ।

**सप्तम्या पूर्वस्य** ।७।४।१०५।। सप्तम्या निर्दिष्टे यत्कार्यमुच्यते तत्पूर्वस्याऽनन्तरस्य स्थाने भवति । 'इवर्णादेरस्वे स्वरे' इत्यत्र स्वरे इति सप्तम्या निर्देशः, ततो दध्यत्रेत्यादौ अकाराद्व्यवहितपूर्वस्यैवेकारस्य यादेशः, मुन्युपासनेत्यादौ परस्य स्वरस्य समिदत्रेत्यादौ व्यवधाने च न व्यादेशौ ।

**षष्ठ्याऽन्त्यस्य** ।७।४।१०६।। षष्ठ्या निर्दिष्टे यत्कार्यमुच्यते तत्षष्ठीनिर्दिष्टस्य योऽन्त्यो वर्णस्तस्यैव स्थाने भवति न समस्तस्य । यथा—'वाऽष्टन आः स्यादौ' इत्यत्राष्टन इति षष्ठ्यानिर्देश इति तदन्तस्य नकारस्य स्थाने आत्वं भवति । अष्टाभिः, अष्टासु ।

**अनेकवर्णः सर्वस्य** ।७।४।१०७।। अनेकवर्ण आदेशः षष्ठीनिर्दिष्टस्य सर्वस्यैव स्थाने भवति । यथा—अनेकवर्णौ तिसृचतस्रादेशौ—"त्रिचतुरः" इति षष्ठीनिर्दिष्टयोः सर्वयोरेव त्रिचतुरोः स्थाने भवतः ।। तिस्रः, चतस्रः ।। 'निर्दिश्यमानस्यादेशा' इति 'ऋतां क्ङितीर्' इतीरादेशः किरतीत्यादौ निर्दिश्यमानस्य ऋकारस्यैव स्थाने भवति न ऋकारान्तस्य । षष्ठीप्रकृत्या यस्य प्रथममुपस्थितिः स निर्दिश्यमान इति बोध्यम् ।।

प्रत्ययः ।७।४।१०८॥ प्रत्ययस्य स्थाने विधीयमान आदेशः सर्वस्य स्थाने भवति । सर्वे । अत्र सर्वस्य जसः स्थाने "जस इरि"ति इकारादेशः ॥

स्थानीवाऽवर्णविधौ ।७।४।१०९॥ आदेशः स्थानिवद् भवति स्थान्याश्रयाणि कार्याणि प्रतिपद्यते, न चेत्तानि कार्याणि स्थानिवर्णाश्रयाणि भवन्ति । स्थानिवदित्युक्त्या स्थानिधर्म आदेशे उपचर्यते, तेन स्थानिबुद्ध्या विधिप्रवृत्तिरिति बोध्यम् । यथा 'अस्ति ब्रुवोरि'ति भूवचादेशौ अस्-ब्रूगतधातुत्वारोपाद् धातू इति ततस्तृच्-भविता । वक्ता । 'किमः क' इति कादेशः किंशब्दगतसर्वादित्वारोपात्सर्वादिरिति ततः सर्वादिकार्यम् । के, कस्मै इत्यादि । वृक्षायेत्यत्र ङेर्यादेशस्य ङेगतस्यादित्वधर्मवत्त्वाद् यादिस्यादौ 'अत आ' इत्यात्वं प्रवर्तते । राजेत्यत्र सेरादेशो लुक् सिगतस्यादित्वधर्मवानिति घुटि दीर्घः स्याद्यन्ततया पदत्वाच्च नलोपः सिध्यति । त्याद्याद्यादेशस्त्यादिवदिति पचेयुरित्यादौ त्याद्यन्ततया पदत्वाद्रुत्वादि । कृदादेशः कृद्वदिति प्रकृत्येत्यादौ यप् क्त्वागतकृत्त्वात्कृदिति पिति कृति तोऽन्तः । अव्ययादेशोऽव्ययवदिति प्रकृत्येत्यादौ क्त्वाप्रत्ययस्य क्त्वातुममित्यव्ययत्वात्तदादेशो यबप्य-

१-स्ताद्यशित इतीटि नामिन इति गुणे अवादेशः । से ऋदुशनस् इति डा । २-चज इति कः ।

व्ययमिति अव्ययस्येति स्यादिलुब्भवति । पदादेशः पदवदिति युष्मानित्यादेशस्य वसः पदत्वाद् रुत्वादि । अवर्णविधावित्यत्र वर्णाश्रयो विधिः वर्णविधिः स प्रतिषिध्यते । स मयूरव्यंसकादिसमासः । ततश्च वर्णात्परस्य, वर्णे परतः, वर्णस्य स्थाने, वर्णेन अप्रधानवर्णाश्रयो वा विधिः वर्णविधिरिति सर्वत्र अवर्णविधाविति स्थानिवत्त्वं प्रतिषिध्यते । तेन-द्यौरित्यादावौत्त्वादौ कृते स्थानिवद्भावेन व्यञ्जनात्परत्वात् से लोपः प्राप्तो वर्णाश्रयत्वात् स्थानिवत्त्वनिषेधान्न भवति । एवमन्यत्रापि बोध्यम् । स्ताद्यशित इत्यादौ अशितः प्राधान्यात्स्तोरप्राधान्यमित्यप्रधानवर्णाश्रयतयेटि कर्त्तव्ये क्त्वागतत्वादित्वस्य स्थानिवत्त्वं न भवति तेन प्रदीव्य प्रपठ्येत्यादौ नेट् । एवमन्यत्रापि ।

**स्वरस्य परे प्राग्विधौ** ।७।४।११०।। स्वरस्यादेशः परनिमित्तको व्यवहितेऽव्यवहिते वा स्थानिस्वरात्पूर्वस्य विधौ कर्त्तव्ये स्थानिवद् भवति । कथयतीत्यादौ[1], अशिन्निमित्तकस्यात इत्यकारलोपस्य स्थानिवद्भावादकारात्पूर्वस्य उपान्त्याऽकारस्य ञ्णितीति वृद्धिर्न भवति । एवमन्यत्र । वर्णविध्यर्थं सूत्रम् ।

**न सन्धिङीयक्विद्विदीर्घासद्विधावस्क्लुकि**

---

१-कथ इत्यदन्ताद् धातोर्णौ अत इत्यकारलोपे त्यादौ शवि गुणेऽयादेशः ।

।७।४।१११॥ सन्धिविधौ, ङीविधौ, यविधौ, क्विविधौ, द्वयोर्द्वित्वस्य विधौ, दीर्घविधौ, संयोगस्यादाविति स्क-लुग्वर्जितेऽसद्विधौ च स्वरस्यादेशः स्थानिवन्न भवति । अपयन्तीत्यादाविणो ह्विणोरिति यत्वं परनिमित्तकः स्वरस्यादेशः पूर्वविधौ एत्वे सन्धिविधौ कर्त्तव्ये स्थानिवन्न भवति । निमित्तापेक्षयाऽपि पूर्वविधिरिष्यते । तेन नयनमित्यादावनटि नामिन इति गुणस्य स्थानिवद्भावप्रतिषेधादयाद्यादेशाः सन्धिविधयः सिध्यन्ति । बिम्ब्याः फलं बिम्बमित्यादौ हेमादित्वादञि "फले" इति लुपि ङ्यादेगौणस्येति ङीलुकि तस्य स्थानिभावप्रतिषेधाद् अस्य ङ्यामि' ति ङ्यामकारस्य लुग्विधिर्न भवति ।

य्वोः प्वय्व्यञ्जने लुक् ।४।४।१२२॥ प्वागमे परतः यकाररहितव्यञ्जनादौ प्रत्यये च परे यकारवकारयो र्लुग् भवति । कण्डूतिरित्यादौ "य्वोः प्वयि" ति यलोपविधौ क्तावत इत्यकारलोपो न स्थानिवदिति स भवति । यविधिरिति यलोपरूपो विधिः । दीव्यते णिगि क्विपि णिलोप ऊटि क्विब्विधौ कर्त्तव्ये च स्थानिवदिति स भवतीति दयूरिति सिध्यति । दद्ध्यत्रेत्यत्र द्वित्वविधौ यादेशस्य

२–अपोपसर्गादिण् धातोरन्ति प्रत्यये ह्विणोरिति यादेशः ।

३–कण्ड्वादियगन्तात्कण्डूय धातोः स्त्रियां क्तावत इत्यलोपे यलोपः ।

१–णेरनिटीति णिलोपः, अनुनासिके चेत्यूट् । अयादेशे स्यादिकार्ये दयूरिति । २–इवर्णादेरिति यः, अदीर्घादिति द्वित्वम्, तृतीय इति तृतीयः । स्थानिवत्त्वे हि एकव्यञ्जनपरत्वाभावात् द्वित्वं न स्यात् ।

स्थानिवत्त्वनिषेधात्स भवति । [३]शंशामं शंशाममित्यत्र शाम्यतेर्यङन्ताण्णिगि ख्णमि अलोपो यलोपश्च घटादेरिति दीर्घविधौ कर्त्तव्ये न स्थानिवदिति स भवति ।

लुप्यय्वृल्लेनत् ।७।४।११२।। परस्य प्रत्ययस्य लुपि सत्यां लुब्भूतपरनिमित्तकं पूर्वकार्यं न भवति य्वृल्लत्वमेनच्च वर्जयित्वा । [४]तद् । अत्र से लुपः स्थानिवत्त्वप्रतिषेधात् त्यदाद्यत्वादि न भवति । राजेत्यादौ तु से लुक् न तु लुबिति स्थानिवद् भावेन दीर्घत्वादि भवत्येव । पय इत्यादौ स्थानिवद्भावेन पदत्वाद्रुत्वादि भवत्येव । रुत्वादिकं हि पदकार्यमिति समुदायकार्यं न परनिमित्तकं पूर्वकार्यमिति भवत्येव । [५]वेविद्धीत्यादौ यङ्लुपः स्थानिवद्भावेन ङिति य्वृत्, ततो द्वित्वादि । [६]निजागलीतीत्यादौ यङ्लुपः स्थानिवत्त्वेन लविधानम् । [७]एनत्पश्येत्यादौ अमो लुपः स्थानिवत्त्वेन एनदादेशो भवत्येव पर्युदासबलादिति बोध्यम् ।

---

३–शमेर्यङि द्वित्वादि, मुरत इति म्वागमः, तौ मुम इत्यनुस्वारः । णिगि अत इत्यलोपः, योऽशितीति यकारलोपः घटादेरिति ख्णम्परे णौ वा दीर्घः । ४–अनतोलुप् । ५–व्यधेर्यङ्लुपि स्थानिवद्भावेन ङिति य्वृत्, ततो द्वित्वे पूर्वस्य गुणे हे धिः, तृतीय इति तृतीयः । ६–न्युपसर्गाद् गॄ धातोर्यङ्लुपि स्थानिवत्त्वेन द्वित्वे ह्रस्वत्वे, ऋतोऽदित्यत्वे आगुणेत्यात्वे तिवि यङ्त्वितीदागमे, नामिन इति गुणे स्थानिवद्भावेन यङि ग्रो यङोति लः । ७–इदमोऽमोऽनतो लुबिति लुपि स्थानिवद्भावेनेदम इत्येनत् ।

**विशेषणमन्तः ।७।४।११३।।** विशेषणं विशेष्यस्याऽन्तोऽवयवो भवति। अतःस्यमोऽम् । अत्रात इति नाम्नो विशेषणं नाम्नोऽन्तोऽवयवो भवति । ततश्चादन्तान्नाम्न इत्यर्थो लभ्यते । तेन कुण्डं तिष्ठतीत्यादौ सेरम् सिध्यति । एतत्परिभाषाऽभावे तु अकारान्नाम्न इत्यर्थे कुण्डेति समुदायस्य अकाररूपत्वाभावात्सेरम् न स्यात् । तदित्यादौ च नाम्नोऽकारान्तत्वाभावात्सेरम् न भवति ।

**सप्तम्याः आदिः ७।४।११४** सप्तम्यन्तस्य विशेष्यस्य यद्विशेषणं तत्तस्यादिरवयवो भवति । इन्ङीस्वरे लुगित्यादौ स्यादेरनुवृत्तस्य स्वरआदिरवयवो भवति, ततश्च स्वरादौ स्यादावित्यर्थलाभात्पथ इत्यादाविनो लुग् भवति । अन्यथा तु स्वरे स्यादावित्यर्थे पथ इत्यादौ यस्स्यादिः असिति स न स्वरो यश्च स्वरोऽकारः स न स्यादिरिति निमित्ताभावाल्लुग् न स्यात् । एवमन्यत्राप्यूह्यम् ।

**प्रत्ययः प्रकृत्यादेः ।७।४।११५।।** प्रत्ययः प्रकृत्यादेः समुदायस्य विशेषणं नोनाधिकस्य । मातुर्भोगो मातृभोगस्तस्मै हितो मातृभोगीणः । अत्र मातृभोगीणशब्दात् सिर्न भोगीनमात्रादिति तदन्तं पदमिति पदसंज्ञा मातृभोगीन इति समुदायस्य स्याद्यन्ततया पदत्वादेकपदभावाण्णत्वं

१—भोगोत्तरेलीनः ।

सिध्यति। अल्पस्य भोगीन इत्येतस्य पदत्वे तु पदद्वयं स्यादित्येकपदाभावाण्णत्वं न स्यादिति बोध्यम्।

**कृत्सगतिकारकस्यापि** ।७।४।११७।। कृत्प्रत्ययः प्रकृत्यादेः समुदायस्य गतिकारकपूर्वस्य केवलस्य च विशेषणं भवति। तेन यथा नखैर्भिन्नो नखभिन्न इत्यत्र भिन्न इत्यस्य कृदन्ततया कारकं कृतेति समासस्तथा नखैर्निर्भिन्नो नखनिर्भिन्न इत्यत्र निर्भिन्नेत्यस्य गतिपूर्वकस्यापि कृदन्ततया तेन समासः सिध्यति। अन्यथा प्रत्ययः प्रकृत्यादेरिति भिन्नेत्यस्यैव कृदन्तत्वं स्यान्न निर्भिन्नेत्यस्येति समासो न स्यात्। एवमन्यत्राऽप्यूह्यम्।

**परः** ।७।४।११८।। प्रत्ययः प्रकृतेः पर एव भवति। वृक्षः, अजा, जुगुप्सते, कार्यम्, औपगवम्, इत्यादि।

**स्पर्धे** ।७।४।११९।। द्वयो र्विध्योरन्यत्र सावकाशयोस्तुल्यबलयोरेकत्राऽनेकत्र च समावेशः स्पर्धः, तत्र यः सूत्रपाठे परः स विधि र्भवति। यथा–शसोऽतेत्यस्यावकाशो वृक्षानित्यादौ, नपुंसकस्य शिरित्यस्यावकाशो यशांसीत्यादौ, वनानीत्यादौ चोभयं प्राप्नोति। तत्र परत्वाच्छिरेव भवति।

**आसन्न** ।७।४।१२०।। आसन्नानासन्नप्रसङ्गे यथास्वं स्थानार्थप्रमाणगुणैरासन्न एव विधि र्भवति। यथा–दण्डा-

ग्रमित्यादौ कण्ठ्ययोरकारयोः स्थाने स्थानत आसन्नः कण्ठ्य एवाऽऽकारो भवति नेकारादिः । एवमन्यत्रापि बोध्यम् ।

केचन शास्त्रे सूचिता लोकसिद्धाश्च न्यायाः । यथा–स्वं रूपं शब्दस्याशब्दसंज्ञा । स्वरस्य ह्रस्वदीर्घप्लुताः । आद्यन्तवदेकस्मिन् । एकदेशविकृतमनन्यवत् । यथासंख्यमनुदेशः समानाम् । विवक्षातः कारकाणि । अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् । लक्षण–प्रतिपदोक्तयोः प्रतिपदोक्तस्यैव । नामग्रहणे लिङ्गविशिष्टस्यापि । तिवा शवाऽनुबन्धेन निर्दिष्टं यद्गणेन च । एकस्वरनिमित्तं च पञ्चैतानि न यङ्लुपि ॥१॥ संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य । असिद्धं बहिरङ्गमन्तरङ्गे । गौणमुख्ययोः मुख्ये कार्यसंप्रत्ययः । सिद्धे सत्यारम्भो नियमार्थः । उक्तार्थानामप्रयोगः । निमित्ताभावे नैमित्तकस्याऽप्यभावः । येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति । उपपदविभक्तेः कारकविभक्तिर्बलीयसी । परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः । एवमन्येऽपि न्यायाः प्रक्रियासिद्धये आश्रिताः, ते चाकरतोऽवगन्तव्याः ॥

## ॥ उपयोगिश्लोकाः ॥

[1]संहितैकपदे नित्या नित्या धातूपसर्गयोः ।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥१॥

---

१–पदानामविलम्बेनोच्चारणं संहिता । अर्धमात्राधिककालाऽव्यवधानमित्यर्थः ।

निमित्तमेकमित्यत्र विभक्त्या नाभिधीयते ।
तद्गतस्तु यदेकत्वं विभक्तिस्तत्र वर्तते ॥२॥
ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः ।
आयामस्तु प्रमाणं स्यात्सङ्ख्या बाह्या तु सर्वतः ॥३॥
अविकारोऽद्रवं मूर्त्तं प्राणिस्थं स्वाङ्गमुच्यते ।
च्युत च प्राणिनस्तत्तन्निभं च प्रतिमादिषु ॥४॥
आकृतिग्रहणा जाति लिङ्गानां च न सर्वभाक् ।
सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह ॥५॥
सत्त्वे निविशतेऽपैति पृथग् जातिषु दृश्यते ।
आधेयश्चाऽक्रियाजश्च सोऽसत्त्वप्रकृति गुणः ॥६॥
इदमस्तु सन्निकृष्टं समीपतरवर्ति चैतदो रूपम् ।
अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात् ॥७॥

---

२–एकं फलमित्यादौ फलगतमेकत्वमेवैकशब्दस्याऽर्थः, तादृशैकत्वे नामार्थ एव विभक्तिः, " आदशभ्यः संख्या संख्येये " इति नियमाद् । एवं चैकादिशब्दानामेकत्वादिमति निरूढलक्षणैव । एकादिशब्दानां संख्यार्थकत्वे एकत्वत्वादिकमेव नामार्थः स्यात् , तादृशस्वार्थ एव विभक्त्यर्थः स्यादित्येकं फलमित्यादावभेदाभावात्तयोरभेदान्वयो न स्याद्, द्रव्यगुणयोर्भेदादिति भावः ॥२॥ ३–उच्चैस्त्वमित्यर्थः । परिमाणं सर्वतो मानं प्रस्थखार्यादिरूपमित्यर्थः । आयामो दैर्घ्यम् । बाह्या बहिरङ्गपरिमाणम् । ४–स्त्रीप्रत्ययप्रकरणे व्याख्यातमिति तद् द्रष्टव्यम् । ५–एतदपि व्याख्यातमेव । ६–स्वरादुत इति सूत्रे व्याख्यातमेतत् । ७–इदं शब्दस्य सन्निकृष्टः समीपोऽर्थो वाच्यत्वेन विषयः इदम् फलमिति यथा । अङ्गुल्या निर्देश्योऽर्थः इति यावत् । एतच्छब्दस्य तु समीपतरवर्त्ति हस्तगतादि वस्तु वाच्यम् । अदस् शब्दस्य दूरवर्ति वस्तु वाच्यम् । तच्छब्दस्य च परोक्षोऽर्थो वाच्य इत्याशयः ।

नकारजावनुस्वारपञ्चमौ धुटि धातुषु ।
सकारजः शकारश्चे षाट्टवर्गस्तवर्गजः ॥८॥

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
